Digitization by eGangotri-South Center

S.V. Vedic University Series No.142
Research & Publications

श्रीनीलकण्ठभगवत्पादप्रणीतम्

ब्रह्मसूत्रभाष्यम्

(भागः - १)

श्रीमुदिगोण्ड नागलिङ्गाराध्यकृत
शिवचिन्तामणिप्रभाव्याख्यासमेतम्



प्रधानसम्पादकः
आचार्य राणि सदाशिवमूर्तिः
कुलपतिः

सम्पादकः
डा. मुक्कपूडि जयसीतारामशास्त्री

श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः
(ति.ति.दे. प्रोत्साहितः विश्वविद्यालयानुदानायोगेन आमोदितश्च)
तिरुपतिः - ५१७ ५०२
२०२३

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

S.V. Vedic University Series No :142
Research and Publications

प्रधानसम्पादकः
आचार्य राणि सदाशिवमूर्तिः, कुलपतिः

श्रीनीलकण्ठभगवत्पादप्रणीतम्

ब्रह्मसूत्रभाष्यम्

(भागः - १)

श्रीमुदिगोण्ड नागलिङ्गाराध्यकृत
शिवचिन्तामणिप्रभाव्याख्यासमेतम्

सम्पादकः
डा. मुळ्ळपूडि जयसीतारामशास्त्री

श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः
(ति.ति.दे. प्रोत्साहितः विश्वविद्यालयानुदानायोगेन आमोदितश्च)
तिरुपतिः - ५१७ ५०२
२०२३

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

SRI NEELAKANTA BHAGAVATPADA PRANEETAM

BRAHMASUTRA BHASHYAM - PART - I

SRI MUDIGONDA NAGALINGARADHYAKRUTA SIVACHINTAMANIPRABHA VYAKHYA SAHITAM

Chif Editor : **Prof. Rani Sadasiva Murty**
Vice-Chancellor, Sri Venkateswara Vedic University, Tirupati.

Editor : **Dr. Mullapudi Jayaseetarama Sastri**

First Impression : **2023**

Copies : **300**

Price : **₹. 625/-**

ISBN :

© **Sri Venkateswara Vedic University, Tirupati, A.P.**

Published By : **The Registrar**
Sri Venkateswara Vedic University,
Tirupati - 517 502

Produced by : **Research & Publications**
S.V.Vedic University,
Tirupati-517502 (A.P)

Email : svvupublications@gmail.com, svvedic@gmail.com

Website : www.svvedicuniversity.ac.in

Phone : +91-877-2264651, 2264404

Fax : +91-877-2222587

Printed at : Prajasakti Daily Printing Press, Renigunta Road, Tirupati

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः, तिरुपतिः

(ति.ति.दे.प्रोत्साहितः यु.जि.सि.द्वारा आमोदितश्च)

आचार्य राणि सदाशिवमूर्तिः
कुलपतिः

Ph: 0877 - 2222586

पुरोवाक्

भगवता वेदव्यासमहर्षिणा प्रणीतानि ब्रह्मसूत्राणि "वेदान्तसूत्राणि" "शारीरकसूत्राणि" "ब्रह्ममीमांसासूत्राणी" "उत्तरमीमांसासूत्राणि" इति नामभिरपि प्रसिद्धानि। सूत्राण्येतानि निखिलोपनिषदामर्थानां दर्पणायमानानि। ब्रह्मसूत्रकर्तुः व्यासस्यैव पाराशर्य-बादरायण-कृष्णद्वैपायन-द्वैपायन-सत्यवतीसुतादि नामान्यपि लोकविदितानि।

बादरायणविरचिते ब्रह्मसूत्रग्रन्थे चत्वारः अध्यायाः सन्ति। प्रत्येकम् अध्यायस्य एकैकं नाम वर्तते। ते च समन्वयाध्याय-अविरोधाध्याय-साधनाध्याय-फलाध्यायनामकाः इति। पुना प्रत्येकम् अध्याये अपि चत्वारः पादाः भवन्ति। संहत्य च १६ पादाः सन्ति। तथैव च ५५५ सूत्राणि, १९१ अधिकरणानि, समग्रे ब्रह्मसूत्रे विलसन्ति। ग्रन्थेऽस्मिन् अध्यायान्तर्गताः पादः, पादान्तर्गतानि च अधिकरणानि, अधिकरणान्तर्गतानि च सूत्राणीति व्यवस्था कृता। ब्रह्मसूत्रस्थः सर्वोऽपि विचारः अधिकरणस्वरूपेण बद्धो भवति। एवं पूर्वमीमांसायामपि अधिकरणक्रमः आदृतः सूत्राणाम् अर्थकथनार्थम्।

सत्यज्ञानानन्दस्वरूपं नित्यं ब्रह्म अनन्तमसङ्गं च। तत् सर्वकारणकारणं एकमेवाद्वितीयम्। तस्य ज्ञानादेव मोक्षः इति सर्वमिदं लौकिकेतरविषयकम्। एतादृशस्यालौकिकविषयस्य अनाद्यपौरुषेयश्रुतिरेव प्रमाणम्। संक्षिप्तश्रुतिवाक्यं दुरवबोधम्। लौकिकवाक्यानीव सङ्गतियुक्तानि न भवन्ति। वैदिकी भाषा सुलभग्राह्या च न भवति। मीमांसकादिविविधदर्शनकारैः वेदवाक्यावबोधक्रमं क्लिष्टतरमकुर्वन्। एतादृशं कठिनवेदमार्गं सरलीकर्तुं भगवान् बादरायणः ब्रह्मसूत्राणि प्रणिनाय।

ब्रह्मसूत्राणि च श्रुतिमीमांसामुखेनैव तत्वोपदेशाय प्रवृत्तानि। श्रुत्यर्थनिर्णयार्थं यो लोकवेदसाधारणो नियमः मीमांसकैराविष्कृत अवधारितश्च तेनैव नियमेन श्रुत्यर्थ अद्वैतमते निरूप्यते। स एव वेदान्तसिद्धान्तः। सोऽयं सिद्धान्त एव ब्रह्मसूत्रैः प्रतिपाद्यते च। सत्सु नैकेषु प्राचीनार्वाचीनव्याख्यासमुदायेषु अधुना प्रकाश्यमानोऽयं ग्रन्थः श्रीनीलकण्ठभगवत्पादब्रह्मसूत्रभाष्यस्य श्रीमुदिगोण्ड नागलिङ्गाराध्यकृतया

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शिवचिन्तामणिप्रभाव्याख्यया समेतः। बादरायणब्रह्मसूत्राणां शैवसिद्धान्तदृष्ट्या व्याख्यानं कृत्वा ब्रह्मसूत्रेषु प्रतिपादितब्रह्मतत्त्वं साक्षात् परशिवतत्त्वमेवेति प्रत्यपादयत् व्याख्याकारः।

ग्रन्थोऽयं श्रीवेङ्कटेश्वरवेदविश्वविद्यालयेन भागद्वयात्मकरूपेण प्रकाशयिष्यते। अधुनाऽस्मिन् प्रथमे भागे ब्रह्मसूत्रेषु आद्यः समन्वयाध्यायः प्रकाश्यतामेति। अयं विद्वन्मनोवल्लभः भवतु इति धिया विरम्यते विस्तरात्।

श्रीवेङ्कटेश्वरस्य सेवायाम्

आचार्य राणि सदाशिव मूर्तिः
कुलपतिः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सम्पादकीयवचनम्

श्रीवेङ्कटेश्वरं देवं कारणस्य च कारणम्।
तमीडामहे सर्वे एतद्ग्रन्थजयक्रमे।।

व्यासनिर्मितानां ब्रह्मसूत्राणां यथा शङ्कर-रामानुज-पूर्णप्रज्ञादिभिः स्वस्वमतानुसारं भाष्याणि विरचितानि, तथैव नीलकण्ठाराध्यवर्येणापि शिवाद्वैतपरं भाष्यं व्यरचि। भाष्यस्यास्य, महात्मना द्राविडीयविद्वत्तल्लजेन अप्पय्यदीक्षितेन निर्मिता **शिवार्कमणिदीपिका** व्याख्या भारतदेशे प्रथिता, परिव्याप्ता च देदीप्यते। तद्व्याख्यायां तत्र तत्र अद्वैताभिमानिता या काचित् लक्ष्यते - इति धिया, आन्ध्रदेशीयेन गुण्टूरुवासिना शिवश्री मुदिगोण्ड नागलिंगशास्त्रिवर्येण, पाशुपतपथप्रियम्भावुकेन **आराध्यशैवमार्गतत्परेण** व्याख्यान्तरं निर्मितं **शिवचिन्तामणिप्रभा** नामकम्।

विस्तृतेऽस्मिन् भारतदेशे प्रतिमार्गं भिन्नाः सम्प्रदायाः संदृश्यन्ते। अत्रापि शैवे दाक्षिणात्यशैव, काश्मीरशैव, कर्णाटान्ध्रदेशगतशैव.... इत्यादिरूपेण विभिन्नता, यत् किञ्चित् वैरुध्यं च लक्ष्यते। सर्वेष्वपि शैवभेदेषु ऐक्यभावना तु शिव एव आराध्य इति। वेदमार्गमनुसरन्तः लिङ्गधारणं ये कुर्वन्ति त एव **आराध्य** सम्प्रदायिनः भवन्ति। (द्राविडदेशशैवे एतल्लिङ्गधारणं तु नैव सन्दृश्यते। भवतु नाम)

बहोःकालात् पूर्वं (१९५३) एतद्व्याख्यायुक्तं ग्रन्थमिमम् एकशिलानगरीयाः शैवाराध्यसम्प्रदायाभिमानिनः, संस्कृतकलाशालानिर्वाहकाश्च सुपरिष्कृतं प्रकाशयामासुः। तत्प्रकाशने आयोजिता - मुदिगोण्ड वीरेशलिङ्गशास्त्रिवर्यैः विद्वन्मणिभिः निर्मिता पीठिका बहुविषयपरामर्शनपूर्वकं, व्याख्यातुः व्याख्याननिर्माणलक्ष्यं विशदीचकार। शैवप्राचीनता, शैवपथप्रवर्तकानां लकुलीशादीनां परिचयादिकं, देशान्तरेषु शिवाराधनाविशेषादिकं, व्याख्याननिर्माणे आवश्यकं प्रमाण-प्रमेयादिकं, ब्रह्मसूत्रचतुरध्यायेषु तत्तत्पादगतविषयस्य संग्रहविवरणं .... एवमाद्यंशम् अतिनिपुणम् इयं पीठिका समास्पृशत्।

तत्रैव **भूमिका** इति नाम्ना व्याख्यात्रा नागलिङ्गशास्त्रिवर्येणापि स्वव्याख्यानस्य आवश्यकता संग्रहेण विवृता आसीत्। एतत् सर्वम् आलक्ष्य प्रकृतेऽस्मिन् प्रकाशने अनर्घं तत् पीठिका-भूमिकाद्वयं यथातथं शैवमतजिज्ञासुसुखावहम् अत्र आयोज्यते।

पीठिकारचनविषये किञ्चित् वक्तव्यमस्ति। व्यास-शङ्कराचार्य-नीलकण्ठाचार्यादीनां कालनिर्णयादिकं नैव समीचीनमिति संलक्ष्यते। तथा - ब्रह्मसूत्राणि क्रीस्तोः द्वितीयशताब्द्यां व्यासमहर्षिणा विरचितानि इति, ... क्रीस्तोः पूर्वं पञ्चमशताब्द्यां नीलकण्ठाराध्यः विद्यते इति... इति। एवमादिकम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अस्वरसं अविगणय्य शैवविज्ञानविस्तृतिसमवगाहने इयं पीठिका पाठकानां बाढम् उपकरोति - इति मन्ये।

नागलिङ्ग शिवाराध्यवर्याः स्वीयव्याख्यापद्धतेः समीक्षणं कुर्वन्तः भूमिकारचने एवं स्ववचांसि समर्थयामासुः। **"यावत् परमतं न निराकृतं तावत् स्वमतम् अप्रतिष्ठितं भवति"** इति न्यायेन पूर्वदार्शनिकानां निर्विशेषवादनिराकरणम् अवश्यं कर्तुमनाः व्याख्याता अप्पय्यदीक्षितवर्याणामपि वचांसि बहुत्र तिरस्कृत्य, **"शुद्धाद्वैतिनां दूषणादिकं, निराकरणं च कृतमि"**ति स्वाशयं निश्चप्रचम् आविश्चकार।

शङ्कराद्वैतस्य पूर्वपक्षमापादयन् एतद्व्याख्याकारः बहुत्र नीलकण्ठमताविष्करणं समर्थयामास। तथा प्रथमाध्याये आनन्दमयाधिकरणान्ते पुच्छब्रह्मवादं प्रस्तूय अतिविपुलम् अद्वैतमतं तिरश्चकाराऽसौ व्याख्याता (पृ.सं-११६-१२३) परिशीलयन्तु विद्वद्वराः। एतत् सर्व तिरस्करणम् अप्पयदीक्षितेन नैव स्पृष्टमिति ज्ञायते।

अपि च ग्रन्थारम्भे नागलिङ्गशास्त्रिवर्यैः कृता दक्षिणामूर्तिस्तुतिः, तथा पीठिका च आराध्यशैवसम्प्रदायं सर्वेषाम् आधुनिकानां विशदयति नूनम्। भाष्यकर्ता नीलकण्ठः भारद्वाजगोत्रिकः इति आधुनिक तेलङ्गाणराज्ये काळेश्वरक्षेत्रवासीति, गौरीदेवी विश्वेश्वराराध्यः तस्य जनकाविति, पाशुपतव्रतधारिणाविति, शास्त्रिवर्यः पीठिकायां भाष्यकर्तारं प्रस्तौतिस्म। अपि च अस्य शैवमार्गस्य सुलभावगाहकं विवरणं च पीठिकायां कृतमनेन।

आराध्यशैवसम्प्रदायः आधुनिकेऽस्मिन् काले क्रमेण ह्रसिष्ठतां समेतीति पूर्वप्रकाशनवचनं सहृदयानां मनांसि बाधते।

श्रीवेङ्कटेश्वरवेदविश्वविद्यालयशैवशाखायां स्थिताः पूर्वाचार्याः शिवश्री मृत्युञ्जयशर्ममहोदयाः ग्रन्थस्यास्य पुनः प्रकाशने अस्मान् प्रेरयामासुः। पूर्वप्रकाशनप्रतीनाम् अलभ्यत्वात् विश्वविद्यालयोऽपि कार्येऽस्मिन् जटिले अवततार। सर्वात्मनः शेषाचलनाथस्य अनुकम्पाविशेषेण दिनदिनवृद्धिम् अधिजिगमिषुणा विश्वविद्यालयेन प्रचाल्यमानः परिशोधन-प्रकाशनविभागः वेद-वेदभाष्य-शैवागम-वैखानस-पाञ्चरात्र...प्रभृतिनिगमागमशाखासु अनेकं ग्रन्थजातं प्रकाशयति इति विदुषां विदितचरमेव। **रुचीनामानन्त्यात्, मतीनां च विभिन्नत्वात्** एकस्यापि वातायनस्य पिधानम् अस्मिन् प्रकाशनविभागे नास्ति इति निरूपयति अस्मत्प्रकाशितग्रन्थबाहुल्यम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ग्रन्थोऽयं प्रथमाध्यायपर्यन्तम् इदानीं मुद्राप्यते। नातिचिरमेव शेषमध्यायत्रयं प्रकाशितुं संसिद्धोऽयं विश्वविद्यालयः। एतद्ग्रन्थप्रकाशनविषये सोत्साहानाम् अस्मत्कुलपतिवर्याणां **आचार्य राणि सदाशिवमूर्ति** महोदयानां कृते कृतज्ञताञ्जलिः समर्प्यते। एवं विभागाधिपतये **डा.ए.वि.राधेश्याम्** महोदयाय च शुभाशंसनादिकं समर्पयामि। अस्मिन् तन्त्रे टङ्कण-परिशोधनादिकार्यभारं सर्वं निरूढवते **सहसम्पादकाय वेदान्तप्रियाय मनोज् शिन्दे** नामकाय वर्धिष्णवे शुभाभिवृद्धिप्रदानचुञ्चुं सर्वदा प्रार्थये वेङ्कटनगस्थिरवासम्।

अत्र साधुपाठगवेषणायां नागपब्लिषर्सप्रकाशितं (१०८६) दीक्षितव्याख्यायुक्तम् श्रीकण्ठाचार्यकृतं ब्रह्मसूत्रभाष्यं बहुधा करदीपति। तत्पुस्तकं सकाले प्रदाय सदुपकृते **Dr. D.Ramakrishna,** HOD, Sanskrit, Maris Stella Collage, Vijayawada. महोदयाय सानुरागकार्तज्ञ्यं निवेदयामि।

इत्थं

तिरुपति,

सुधीविधेयः

डा. मुळ्ळपूडि जयसीतारामशास्त्री

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

श्री

दक्षिणामूर्तिदेवस्तुतिः

शक्त्या यश्चिदचिद्विशेषणतया युक्तो जगद्रूपया
ज्ञानेच्छाकृतिरूपया सहजया सन्तिष्ठते केवलः।
जन्मादीनि करोति पञ्च जगतः कृत्यानि यो लीलया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये।।

सर्वावस्थजगच्छरीरकतया यस्तत्प्रकारः परः
सूक्ष्मस्थूलदशाविशेषितजगद्रूपेण विद्योतते।
इत्यावेदयितुं वदन्ति निगमाः कार्यञ्च, यं कारणम्।
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये।।

यत्राऽऽन्तर्गणिकं विशेषमितरे कैवल्यमेवाऽन्ततो
मन्वाना विवदन्ति मुख्यमपरे देवे विशिष्टे श्रुतम्।
ऐक्यं यस्य च यद्विशेषणगतं भेदं ब्रवीति श्रुतिः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये।।

बह्व्यो नैगमसूक्तयश्चिदचितोरीशस्य यस्यैव च
भोक्तृत्वेन च भोग्यभाववशतस्तत्प्रेरकत्वादपि।
वैलक्षण्यमवार्यमेव सहजं संचक्षते सादरं
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये।।

शास्तेऽन्तस्समनुप्रविश्य सततं यश्चेतनाचेतनौ
तौ यस्यैव नियम्यभाववशतस्तन्वावुवाच श्रुतिः।
एवं यश्चिदचिद्विभागकलनोदंचज्जगद्विग्रहः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सार्वज्ञ्यप्रमुखं शुभं गुणगणं ब्रूते गुणित्वार्थिका
क्षुत्तृष्णादिमभव्यमेव नुदते किञ्चाऽगुणत्वाऽर्थिका।
यस्यैवोभयलिङ्गतां पशुपतेर्वक्तुं प्रवृत्ता श्रुतिः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये।।

तादात्म्यं तदसीति बोधयति यस्येशस्य शिष्यं गरुः
ब्रह्माऽस्मीति विभाव्य यांति यमनन्येनैव भावेन हि।
पत्युर्यस्य पशोरुपासनाविधावद्वैतमाह श्रुतिः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये।।

प्राणिन्मे तनुरस्यथापि न तु मां वेत्सि त्वदन्तस्स्थितं
मां जानासि नियामकं यदि तदा मृत्योर्मुखान्मुच्यसे।
इत्यर्थं प्रकटीकरोति सदयो यश्चारुचिन्मुद्रया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये।।

संचिन्त्यापि विशिष्य वक्तुमनलं धीवागमेयात्मकं
चाचार्या विफलोद्यमा यमविशेषं सङ्गिरन्ते परे।
शेषो यस्य च शेषिणश्चिदचिदाकारः प्रपञ्चोऽखिलः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये।।

ब्रह्मेन्द्रौ न विजज्ञतुर्न वदितुं वेदोऽपि वेदैव ये
वेदाऽहन्त्विति यं ब्रवीति हि जगत्येकस्स नारायणः।
भक्त्या वेत्ति सुकृत्यनन्यगतया यं यत्प्रसादात्तया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये।।

वाणी वारिजसम्भवस्य रमणीत्यासेविमौनव्रतं
लक्ष्मीः पङ्कजचक्षुषः प्रियतमेत्यामोदिभिक्षाटनम्।
येनाम्नायकृता स्वसेवकवधूसम्भोगबीभत्सया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यस्यैश्वर्यमतर्क्यमूहितुमुपक्रम्य भ्रमादन्यथा
अन्योऽन्यं बहुविब्रुवन्मुनिगणस्संव्याहतार्थाविलैः।
स्वाज्ञानं विवरीवरीति सुघनं स्वीयैरहोदर्शनैः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये।।

पूर्वेषां परमो गुरुर्निगदितः कालाऽनवच्छेदतः
कालेनाऽऽकलितात्मनां हि सकलानां यो गुरूणामपि।
यस्मिन्नेव च कालकाल इति शब्दोऽयं यथार्थाक्षरः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये।।

योगिनो नागलिङ्गस्य लिङ्गाम्बाहृदयेशितुः।
कृतिस्स्यादिष्टदा नृणां दक्षिणाशामुखस्तुतिः।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पीठिका

ओं नमश्शिवाय

श्रीशिवं दक्षिणामूर्तिं नत्वा च गुरुजङ्गमान्।
श्रीनीलकण्ठभाष्यस्य ब्रुवे तत्वविनिर्णयम्।।

शिवतत्वविजिज्ञासापराणां सुखबोधिनी।
मुमुक्षूणामियं कल्पलता भाष्यस्य पीठिका।।

मदुक्तमार्गपथिकाः निश्चितार्थाः न शङ्किताः।
दिक्षितास्सौख्यमासाद्य शिवानुग्रहमाप्नुयुः।।

निवेदनम्

अयि निष्पक्षपातधिषणाः गुणैकलोलुपाः यथार्थविषयपरिज्ञानकुतुकाः वाचकमहाशयाः नीलकण्ठभाष्यप्रमेयभूतपदार्थत्रयं तत्प्रतिपादकशैवदर्शनमधिकृत्य किञ्चिन्निवेदयामि।

शैवदर्शनम्

दृश्यते साक्षात्क्रियते अनेनेति दर्शनम्। शैवानां दर्शनं शैवदर्शनम्। शैवं च तत् दर्शनं च शैवदर्शनमिति वा व्युत्पत्तिः। इदमेव मीमांसादर्शनमिति कथ्यते।

मीमांसा च पूर्वोत्तरभागेन द्विविधा। **अथातो धर्मजिज्ञासा** इत्यारभ्य **अनावृत्तिश्शब्दात्** इत्यन्तमेकवाक्यतैव भाष्यकारेण प्रतिपादिता। पूर्वमीमांसाजैमिन्याचार्येण, उत्तरमीमांसाबादरायणेन च विरचिता। कर्मज्ञानसमुच्चयवादिना पाशुपतव्रतधारिणा नीलकण्ठाराध्येन, पूर्वोत्तरमीमांसा द्वयं शैवदर्शनत्वेन प्रत्यपादि। इदं च शैवं दर्शनं सर्वदर्शनेभ्यः प्राचीनमिति निश्चप्रचमेव।

दर्शनाधिपतिः

अइउण् इत्यादिचतुर्दशसूत्राणि माहेश्वराण्येव। तस्माद् **ईशानस्सर्वविद्यानामिति** श्रुतिरपि सर्वदर्शनानां माहेश्वरोपज्ञत्वमेव कथयति। एतेन सर्वविद्याधिपतिरीश्वर एवेति निश्चीयते। अत एवोक्तं नीलकण्ठभाष्ये ८८ (......) पृष्टे। **अष्टादशानामेतासां विद्यानां भिन्नवर्त्मनाम् आदिकर्ता शिवस्साक्षाच्छूलपाणिरिति स्मृत** इति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शिवः

अयं च शिवः भूर्भुवस्सुररादिसमस्तभुवनब्रह्माण्डकर्ता पञ्चकृत्य परायणशिशव-सदाशिव-महेश्वररूपतत्त्वत्रयाणां गुणाधिष्ठितानां ब्रह्मविष्णुरुद्राणाञ्च कारणभूतः परशिव परब्रह्म-महालिङ्गनामभिः वेदेषु पठ्यते। शिव एको ध्येयश्शिवंकरस्सर्वमन्यत्परित्यज्य - ब्रह्मा शिवो मे अस्तु शिवलिङ्गाय मम इति। ज्योतिर्मयोऽयं लिङ्गरूपतयोपासकानां हृदयमध्ये तिष्ठतीति देवाधिकरणे चोक्तम्।

शिवलिङ्गम्

नहि, भारतदेशे आसेतुहिमाचलपर्यन्तं काशीरामेश्वरादिक्षेत्रेष्वेव शिवलिङ्गपूजा शिवलिङ्गप्रतिष्ठा च दृश्यते। किन्तु विदेशेष्वपि। रोमकदेशे शिवलिङ्गानां प्रियेफसूफल्लूसनामधेयानां फाल्गुणमासे वसन्तोत्सवनाम्ना शिवपूजा प्रवर्तते। फलेशशब्दात् फल्लूस्शब्दोत्पत्तिर्बभूवेति कर्नल ताडमहाशयः जगाद। अरेबियानां लात्नामकशिवलिङ्गस्यौन्नत्यं पञ्चाशन्मानवौन्नत्येन सदृशमुच्यते। काबेनगर्यां मक्केश्वरलिङ्गं वर्तते इति भविष्यत्पुराणे ब्रह्मपर्वण्यस्ति।

अमेरीका फ्रान्सस्काटलेण्डग्रीसदेशेषु शिवलिङ्गार्चना वर्तते। ईजिप्तसमीपस्थित मफिन् असीरिन् क्षेत्रेषु शिवलिङ्गानां क्षीरेण अभिषेकः बिल्वदलैश्च पूजा भवति। हेड्रा पोलीसनगरस्थशिवालये त्रिंशत् पादौन्नत्यवच्छिवलिङ्गमस्ति तस्य खर्जूरपत्रैः पूजा भवति। बाबलीन्नगरे द्वादशशतपादौन्नत्यवत् महाशिवलिङ्गं वर्तते। न कुत्राप्येतादृशं लिङ्गमस्ति।

इण्डोचयनास्थित अनाम्देशे मीसोन् ग्रामो वर्तते। प्राचीनकाले चैतस्य चम्पा इति नाम। भद्रवर्ममहाराजेन शिवालयनिर्माणं कृतम्। एतस्य शासनेष्वादौ **ओम् नमश्शिवायेति** षडक्षरी महामन्त्रो लिखितः।

राजा जयेन्द्रवर्मा क्रीस्तोः पश्चात् १०८० संवत्सरे शम्भुभद्रेश्वरस्वामिनः विंशत्युत्तरपञ्चदश-तुलापरिमितसुवर्णेन सुवर्णकवचं कारयामास।

क्रीस्तोः पूर्वं बैस्ट्रियन् राजानः शकाः कुषाणाः कानिष्काश्च स्वपरिपालनमुद्रासु (सिक्का) शिवविग्रहानलिखन्। एवमेव सकलप्रपञ्चसृष्टिकर्तुः शिवलिङ्गरूपस्य परशिवस्य पूजा सर्वत्र विद्यत इत्यत्र नास्ति विचिकित्सा।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शिवस्वरूपम्

शिवस्य परब्रह्मणः **द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तमेव च** इति निर्गुणरूपमेकं सगुणरूपमेकञ्च वर्तते। मूर्तामूर्तमितीदमेव कथ्यते। निर्गुणं रूपं नाम अप्राकृतदिव्यमङ्गलविग्रहवत् सङ्कोचविकासा-वस्थारहितम्, अग्नौ दाहकशक्तिवत् सूर्याचन्द्रमसोरातपचन्द्रिकाविव, अपृथक्सिद्धचिदचिदात्मक-शक्तिविशिष्टममूर्त्यात्मकं महालिङ्गस्वरूपमेव। सगुणरूपं नाम मूर्त्यात्मकं कार्यब्रह्मरूपं भवति। मूर्तरूपाणां बेराणां पूजा ध्यानालङ्काराः अमूर्तरूपाणां शिवलिङ्गानामभिषेकपूजादयश्च भवन्ति। **द्वे ब्रह्मणी वेदितव्ये परञ्चापरञ्चे**ति श्रुत्या महालिङ्गगर्भकशिवस्य परापरनाम्ना द्वैविध्यं श्रूयते। परशिवः कारणब्रह्मा केवलो निर्गुणोऽमूर्त इति कार्यब्रह्मा शिवो मूर्तस्सगुण इत्युच्यते अत एव शिवलिङ्गाकृतिरेव मानवः। सुखासनस्थेन पुंसा बाहुद्वयप्रसारे पुरतः कृते सति लिङ्गाकारः। पुंसस्तस्योत्थाने च मूर्त्याकारो भवति। शिवस्यैकस्यैव रूपद्वयं वर्तते नत्वन्यदेवतानाम्।

परशिवसृष्टिः

वातूले सृष्ट्यर्थं सर्वतत्त्वानां लोकस्योत्पत्तिकारणम्। योगिनामुपकाराय स्वेच्छया चिन्त्यते शिवः। तस्य चिन्ता पराशक्तिसहस्रांशेन जायते। तच्छक्तेस्तु सहस्रांशादादिशक्तिसमुद्भवः। आदिशक्तेस्सहस्रांशादिच्छाशक्तिसमुद्भवः। इच्छाशक्तिसहस्रांशात् ज्ञानशक्तिसमुद्भवः। ज्ञानशक्तिसहस्रांशात्क्रियाशक्तिसमुद्भवः। इत्यादिना पराशक्त्यादिपञ्चशक्तिसमेतशिवसाद-अमूर्तसाद-मूर्तसाद-कर्तृसाद-कर्मसादवत्सदाशिवत्वेन परशिवः समवातरत्।

सृष्टि-स्थिति-लयावहः पञ्चविंशतिभेदविशिष्टस्सकलो महेश्वरस्सदाशिवतत्त्वान्तर्गत कर्मसादादाविर्भूतः।

सृष्टिकर्तृत्वाऽधिकारिणः रुद्र-भट्टारक-अनन्तेश-श्रीकण्ठादयो महेश्वरादेव समुद्भूताः आकाशनामकमहेश्वरादेव भूतसृष्टिस्सञ्जाता। परशिवकारणत्वात्सृष्टेः, सर्वापि सृष्टिः परब्रह्मणस्समुत्पन्नैवेति प्रथा जगति वर्तते।

शैवाः

शिवलिङ्गमिष्टप्राणभावलिङ्गात्मना, आचारलिङ्ग-गुरुलिङ्ग-शिवलिङ्ग-चरलिङ्ग-प्रसादलिङ्ग-महालिङ्गात्मना च, पाशुपतव्रतदीक्षां गृहीत्वा ये ध्यानपूजादिभिरुपासते त एव शैवाः एत एवाराध्या इत्युच्यन्ते। चातुर्वर्ण्यगुरुत्वं-वर्णाश्रमधर्मः-शिवलिङ्गधारणं परमेश्वरोपासना चैषां प्रधानधर्माः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पूर्वस्मिन् काले, शैवेषु बहुषु पाशुपतव्रतधारिषु सत्स्वपि विमतप्रचाराधिक्यात् स्वमतप्रचाराभावात् कलिस्वभावाच्च शिवलिङ्गधारिणां शैवानां मतं स्वल्पमिव साम्प्रतं परिदृश्यते।

अष्टादशवर्णेषु शिवलिङ्गधारिणस्सन्ति किन्तु द्विजेष्वेव स्वल्पतया दृष्टिगोचरा भवन्ति यथा पौण्डरीकादियज्ञकर्तारः। एते आन्ध्रकर्णाटकमहाराष्ट्रादिदेशेषु वाराणाशीकाश्मीराद्युत्तरहिन्दुस्थाने च निवसन्तीति विज्ञायते।

शैवेष्वाचार्यपुरुषाः

रेवणो मरुलश्चैको रामस्सिद्धास्त्रयः स्मृताः।
श्वेताचार्यो लाकुलीशो नीलकण्ठो जगद्गुरुः।।
उद्भटः कोटिपल्लिश्च वेमाराध्यः प्रकीर्तितः।
श्रीपतिर्मचनश्चैवमल्लिकार्जुनपण्डितः।।

एते द्वादशशैवाचार्यास्तत्तत्कालेषु शिवाद्वैतभक्त्युद्धरणार्थं शिवांशया कृतावताराश्शैवमतव्याप्तिं चक्रुः।

रेवणाराध्यः

अयं च कुल्यपाकपुरे सोमेश्वरलिङ्गात्प्रादुरासीत्। शिवाद्वैतसिद्धान्तप्रचारमकरोत्। अगस्त्यमहर्षेश्शिवतत्वमुपादिशत्। शङ्कराचार्यस्य चन्द्रमौळीश्वरलिङ्गं प्रादात्। आत्रेयगोत्रजः भुवनेश्वरपरिपालकस्य विश्वधर्मभूपालस्य तनयं चन्द्रकेतुमुज्जीवयामास। स्वेष्टलिङ्गमहिमानं प्रदर्श्य नागरिकाणां दिव्यलोचनानि दत्वा कैलासं दर्शयामास। अयमेव रेणुक इत्युच्यते। चतुर्दशशतवत्सरान् भूमौ प्रचारमकरोत्। अस्य भार्या दुर्गादेवी, पुत्राः त्र्यम्बकेश्वरादयश्च बभूवुः।

मरुलाध्यः

भारद्वाजसगोत्रः सदाशिवांशादुद्भूय शैवसिद्धान्तव्याप्तिं चकार। गोकर्णे तपस्तेपे। एतस्य जाया शिवज्ञानाम्बिका। स्वेष्टलिङ्गधारी चायं श्रीनगरसमीपे वीरकालमहीपाले तटाकनिर्माणाय भृतिमदत्वैव शिवलिङ्गधारिभिः मृत्कण्डोलवहनकर्म कारयति सति स्वहस्तधृतसुवर्णदण्डेनैव तत्कर्म कारयन् सर्वानपि तान् मोचयामास। भस्मोदकेन वीरकालं जीवयामास। आत्मानं प्रतारयितुं समागतमिन्द्रं शशास।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एकोरामाराध्यः

जगद्गुरुरेको रामाराध्यः रामनाथलिङ्गे अप्राकृतदिव्यदेहधारी अवततार। एतस्य घण्टाकर्णनामान्तरम्। हिमालये निवासः घण्टाकर्णहृद इति नाम्ना, एकस्तटाकः केदारमण्डले विद्यते। सर्वजन्तून् स्वाधिकारे निवेशयामास। मान्धाता-बाणासुरपुत्री उषादेवी चैतस्माद्विज्ञानं समुपार्जयामासुः। केदारपीठस्योत्तरदेशे भूपालाश्शिष्या बहवो वर्तन्ते। काश्यां विश्वेश्वरानुग्रहाज्जातस्य हारीतपुत्रस्य विश्वेश्वरस्य हारीतगोत्रजस्यैकोराम इति पुत्रो जातः। एकोराम एव दीक्षामेतस्य ददौ। एकोरामस्य पुत्रः पल्लिनाथः, अयञ्च ग्रीष्मे तपश्शक्त्या तटाकं सोमेश्वरक्षेत्रे कल्पयित्वा राज्ञः दाहापनोदनेन मल्लमपल्लिनामकाग्रहारं तस्माल्लब्धवान्।

श्वेताचार्यः

सर्ववेदान्ततत्त्वदर्शी पदवाक्यप्रमाणज्ञः श्वेताचार्यो बहूनामन्तेवासिनां शिवाद्वैतसिद्धान्तप्रतिपादक-ब्रह्मसूत्राणि शास्त्राणि चोपदिश्य योगाचार्येषु प्रधानस्थानमध्यारोहत्।

लकुलीशाचार्यः

अस्य नकुलीश इति नामान्तरमस्तीति केचित्। वामहस्ते बीजपूरफलं दक्षिणहस्ते लकुली शिरसि त्रिनेत्रं च यस्य वर्तते स एव लकुलीशः। एतस्य कुशिक-गर्ग-मित्र-कौरुष्यनामकशिष्याश्चत्वारो वर्तन्ते।

अयमत्युग्रं तपः कृत्वा बरोडादेशादारभ्य मथुरापर्यन्तं प्राचीनं पाशुपतं प्रचारयामास। मथुरानगर्यां पाशुपतशैवस्तम्भस्साम्प्रतमप्येको वर्तते। क्रीस्तोः पूर्वं द्वितीयशताब्द्यां वर्तते।

जगद्गुरूनीलकण्ठशिवाचार्यः

पाशुपतव्रतधारिणामष्टादशवर्णानामयमेव शिवाद्वैतसिद्धान्तबोधकशारीरकब्रह्मसूत्रमीमांसाभाष्यम-रीरचत्। एतस्यैव नीलकण्ठभाष्यमिति नामान्तरम्।

नीलकण्ठशिवाचार्यः भारद्वाजगोत्रिकः। हैदराबादराष्ट्रान्तर्गतकालेश्वरक्षेत्रवासी। केचन कालहस्तीक्षेत्रवासीति कथयन्ति। पिता चास्य विश्वेश्वराराध्यः। माता च गौरीदेवी। नीललोहितरुद्रांशेन सम्भूतः। बोधायनमहर्षि कृतोपनयनः श्वेताचार्यलब्धशाम्भववेदादीक्षाप्राप्तमहाप्रतिभाशाली शैवमतप्रचारमकरोत्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

नीलकण्ठाराध्यस्य भार्या सर्वमङ्गला। इयञ्च हारीतगोत्रोद्भवस्य वीरभद्राराध्यस्य सुता। कालेश्वरवरप्रादुर्भूतस्य नीलकण्ठशिवाचार्यस्य सोमेश्वर-अघोरनाथ-कालेश्वरश्रीगिरीश्वराभिधेयाश्चत्वारः पुत्रा समुदभूवन्।

धनदांशेन कालेश्वरप्रसादेन नागपुरीनाथो विक्रमांकस्समजनि। स च नीलकण्ठाराध्यस्य गुरुभक्त्याऽनन्तं धनं प्रादात्।

श्वेताचार्यस्वान्तेवासिनो नीलकण्ठाराध्यस्य वेदवेदान्तादिसर्वशास्त्राणि कथयित्वा जगद्गुरु पट्टाभिषेकपदव्यां प्रतिष्ठापयामास। नीलकण्ठाराध्यस्य चत्वारश्शिष्याः हरदत्त-सोमशेखर-भवदेव-भीमेश्वरनामाङ्कितास्समभवन्।

एतेषु हरदत्तो दाक्षिणात्यः। सोमशेखरः प्रतीच्यः। उदीच्यो भवदेवः। प्राच्यो भीमेश्वरः। नीलकण्ठाराध्यः न केवलं ब्रह्मसूत्रभाष्यमेव प्रस्थानत्रयमप्यलेखीत्।

ओं नमोऽहं पदार्थाय लोकानां सिद्धिहेतवे।
सच्चिदानन्दरूपाय शिवाय परमात्माने। इति,

प्रार्थनाश्लोकेनैव नीलकण्ठाराध्यः गृहीतशाम्भवव्रत इति ज्ञायते। अत एव मौनवदित्याद्यधिकरणेषु शिवलिङ्गधारणप्राशस्त्यमकथयदिति मोमुद्यते मे मानसम्।

नमश्श्वेताभिधानाय नानागमविधायिने।
कैवल्यकल्पतरवे कल्याणगुरवे नमः।। इति,

नीलकण्ठभाष्योक्त्या श्वेताचार्य एवाऽस्य गुरुरिति निर्णीयते।

श्रीकण्ठनीलकण्ठौ द्वावप्येक एव

नीलकण्ठाराध्यस्य श्रीकण्ठ इति नामान्तरं वर्तते। श्रीकण्ठनीलकण्ठौ द्वावप्येक एव। अत एवोक्तं भाष्ये **नीलकण्ठो विवृणुते श्रीकण्ठोपसमाह्वय** इति।

कालनिर्णयः

ब्रह्मसूत्राणि क्रीस्तोः द्वितीयशताब्द्यां व्यासमहर्षिणा विरचितानि। क्रीस्तोः पूर्वं तृतीयशताब्द्यां भगवद्गीता रचितेति तिलक्महाशयः। चतुर्थशताब्द्यामिति भण्डारकरमहोदयश्चावादीत्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दर्शयामास पार्थाय परमं रूपमैश्वरम्।
ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।
तमेव शरणं गच्छ सर्वभावेन भारत।।

इत्यादि भगवद्गीताश्लोकानां भाष्ये उदाहृतत्वात् बौद्धसाङ्ख्यवादखण्डनाच्च क्रीस्तोः पूर्वं पञ्चमशताब्द्यां नीलकण्ठाराध्यो विद्यत इत्यभ्यूह्यते।

बहवो नीलकण्ठनामधेयाः

नीलकण्ठनामाङ्किताः बहवः परिदृश्यन्ते। शिवोत्कर्षमञ्जरी-शिवलीलार्णव-नीलकण्ठविजयचम्प्वादि ग्रन्थकर्ता, अप्पयदीक्षित सोदर्य श्रीमदाचार्यदीक्षितपौत्रः नारायणदीक्षितात्मजो नीलकण्ठदीक्षितः, एको वर्तते क्रीस्तोः पश्चात् सप्तदशशताब्द्याम्।

क्रियापादे श्रीमद्विशिष्टाद्वैतसिद्धान्तरहस्यैकोत्तरशतस्थलाभिज्ञश्रीनीलकण्ठकृते निगमागमागमसारसङ्ग्रहे क्रियासारे द्वितीयोपदेश इति कथनेन क्रियासारकर्ता नीलकण्ठोऽपरो वर्तते। इति सर्वमतोत्कृष्टा शैवसिद्धान्तदीपिका श्रीनीलकण्ठरचिता मुदेस्तात्सुधियामियमिति शैवसिद्धान्तदीपिका कर्ता कश्चन नीलकण्ठः विद्यते।

महाभारतस्य भारतदीपव्याख्यानकर्ता गोदावरीतीरस्थो नीलकण्ठनामाङ्कितः एकः क्रीस्तोः पश्चात् षोडशशताब्द्यां वर्तत इति बर्नलमहाशयो लिलेख।

माधवीये शङ्करविजये पञ्चदशसर्गे अन्यो नीलकण्ठनामा ब्रह्मसूत्रभाष्यकर्ता शङ्कराचार्येण विवदमानः पराजितः स्वभाष्यं परित्यज्य शरणं गत इति विज्ञायते। बहुषु विद्यमानेष्वयमेव नीलकण्ठो भाष्यकर्तेत्युच्यते।

शङ्कराचार्यादपि प्राचीनो नीलकण्ठाराध्यः

एतेन नीलकण्ठश्शङ्कराचार्यसमकालिक इति केचन वदन्ति। तदसत्, शङ्करविजयग्रन्थकर्ता माधवाचार्यः शङ्कराचार्यस्य भाष्यरचनायामग्रताम्बूलं दिदित्सुः तत्पूर्वस्थितभट्टभास्करनीलकण्ठादीन् स्वग्रन्थे पराभूतान् प्रकटयामास। चरित्रविरुद्धत्वात् न तद्ग्राह्यम्।

नीलकण्ठाराध्यभाष्यस्थितविषयान् स्वभाष्ये अनूद्य शङ्करः खण्डयामास तस्मात् शङ्कराचार्यात्पूर्वः। **भेदव्यपदेशादिसूत्रे** जीवेश्वरयोः भेदे कथिते सति शङ्कराचार्येण अभेदः प्रतिपादितः। **आत्मकृतेः परिणामादिति** सूत्रेण परिणामकारणवादे राद्धान्तिते ब्रह्ममीमांसासूत्राऽप्रतिपादितो विवर्तवादः शङ्करेण निगदितः। **कर्ता शास्त्रार्थवत्त्वादिति** जीवस्य कर्तृत्वं नीलकण्ठभाष्यकारेणोक्ते सति, अकर्तृत्वं कथितम्। **जन्माद्यस्य यतः** इति सूत्रेण जगज्जन्मादिकारणत्वं ब्रह्मणः प्रतिपाद्य **ईक्षतेर्नाशब्दमिति** जगतश्चेतनकर्तृत्वे अचेतनप्रधानस्य स्वजगत्कारणनिषेधे च प्रतिपादिते, शङ्करेण जगन्मिथ्यात्वं सिद्धान्तितम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वैधर्म्याच्च न स्वप्नादिवदिति जगतः स्वप्नतुल्याभावत्वं सर्वधर्मोपपत्तेश्चेति ब्रह्मणः सर्वज्ञत्वादि सर्वधर्मत्वं नीलकण्ठाराध्येन निगदिते जगतस्स्वप्नतुल्यत्वञ्च ब्रह्मणो निर्धर्मकत्वं शङ्करेण प्रकटितम्। उत्क्रान्ति गत्यागतीनामिति जीवस्याऽणुपरिमाणत्वं **गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्** इति हृदयाकाशस्थितौ जीवेश्वराविति, आनन्दमयोऽभ्यासादित्यानन्दमयो ब्रह्मेति, निर्णीते नीलकण्ठाराध्येन, जीवो विभुरिति हृदयगुहावासिनौ बुद्धिजीवाविति आनन्दमयो जीव इति शङ्करेण निगदितम्। **कार्यं बादरिरस्य गत्युपपत्तेरि**ति सूत्रेण अमानवपुरुषः मुक्तान्कार्यब्रह्मणस्सकाशं गृहीत्वा गच्छतीति बादरेरभिप्राय इति पूर्वपक्षमुक्त्वा **परं जैमिनिर्मुख्यत्वादि**ति सूत्रेण परब्रह्मणस्समीपमेव मुक्तान् गृहीत्वा गच्छतीति सिद्धान्तिते नीलकण्ठेन, तद्विरुद्धतया आचार्यः प्रथमतः विद्यमानं कार्यं बादरिरितिसूत्रं पश्चादुक्त्वा तदनन्तरसूत्रव्याख्याने पूर्वपक्षार्थमित्युक्त्वा बादरिमतमेव सिद्धान्तितम्।

अनावृत्तिश्शब्दादिति चरमसूत्रे मुक्तस्य पुनरावृत्तिर्नास्तीति सिद्धान्तितः नीलकण्ठाराध्येन। सगुणमुक्तावेवेदं सम्भवति। अतश्शङ्कराचार्यः भाष्याऽप्रतिपादितनिर्गुणमुक्तिस्सम्यग्दर्शयनविध्वस्ततमसां सिद्धैवाऽनावृत्तेरिति स्ववाक्येनैव शास्त्रसमाप्तिं चकार। उपक्रमोपसंहारैस्सह ब्रह्ममीमांसाशास्त्रं सर्वमपि सगुणपरमेव। अत एव शङ्कराचार्येण विनाध्यारोपापवादौ निर्गुणाऽद्वैतमतसिद्धान्तस्य स्थापनं दुष्करमिति मनीषया प्रथमत एव **अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते** इत्यध्यासभाष्यं रचयामास। श्रुतिसूत्रसमन्वयसहितं सगुणपरं नीलकण्ठाराध्यभाष्यं सर्वमपि खण्डयित्वा निर्गुणपरत्वेन शङ्कराचार्येणोक्तत्वात् शङ्कराचार्यादिप्राचीनो नीलकण्ठाराध्य इत्यत्र नास्ति संशयः।

शाङ्करभाष्यं श्रुतिसूत्रसमन्वयरहितमिति भगवद्गीतागूढार्थदीपिकाऽद्वैतसिद्धिग्रन्थकर्ता मधुसूदनसरस्वतिरेव दशश्लोकिव्याख्यानभूतसिद्धान्तबिन्दुग्रन्थे -

नस्तौमितं व्यासमशेषमर्धं सम्यङ्न सूत्रैरपि यो बबन्ध।
विनापि तैस्सङ्ग्रथिताखिलार्थं तं शङ्करं नौमि सुरेश्वरं च।।

इत्युक्त्वा। अपि च भामतीग्रन्थकारेण वाचस्पतिमिश्रेणापि श्रुतिसूत्रविरुद्धता, आनन्दमयाधिकरणे प्रतिपादिता। एतेन शङ्करभाष्यादपि प्राचीनं श्रुतिसूत्राऽविरुद्धं भाष्यं नीलकण्ठीयमेवेति निर्णीतम्।

अपि च शिवार्कमणिदीपिकासहितनीलकण्ठभाष्यमुद्रापकाः कुम्भकोणवास्तव्याः हालास्यनाथशास्त्रिणः स्वविरचितभाष्यभूमिकायां तत्तत्कालेषु क्रमेण कृतावतारैर्भगवदंशभूतैः श्रीकण्ठशङ्कररामानुजानन्दतीर्थाद्यैरिति **परंत्वादिमन्येषां त्रयाणामिदं श्रीकण्ठीयं शैवाद्वैतपरं भाष्यमि**ति च कथयामासुः। एतेन च शाङ्करभाष्यादपि आद्यत्वं शाङ्करभाष्यस्य आद्यत्वं नीलकण्ठभाष्यस्य निश्चप्रचमेव।

वाराणस्यां सर्वभाष्याणामुत्तमभाष्यविषये विवादे संवृत्ते सति विशालाक्षीदेव्याः पादमूले भाष्याणि निक्षिप्य कवाटं पिधाय सर्वे बहिरागत्य क्षणं स्थित्वा पुनः कवाटमुद्घाटयामासुः। तदा देव्याश्शिरसि नीलकण्ठभाष्यम-वर्ततेत्याख्यायिका विद्यते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उद्भटाराध्यः

अयं च शिवलिङ्गधारिब्राह्मणो जगद्गुरुः काशीविश्वेश्वरलिङ्गात्प्रादुरासीत्। एतस्य जनको विश्वेश्वरः। जननी चान्नपूर्णा। वल्लकीपुरपालकस्य भोजराजस्य गुरोरुद्भटाराध्यस्य जाया लीलावती। एतस्यास्सुन्दरीत्यपरं नाम वर्तते।

गन्धर्वभूतशतसप्तकशापमोक्षप्रभावेन जगत्यद्भुतयशश्शाली बभूव। त्रिसहस्राग्रहारानार्जयामास। चातुर्वर्णगुरुत्वेन वराजमानश्शिवाद्वैतमतप्रचारं चकार।

भारद्वाजगोत्रजः। गूर्जरदेशवासी। एतस्य चतुष्षष्टिभूपालाश्शिष्या अभूवन्। यजुर्वेदभाष्य-काव्यालङ्कारसङ्ग्रहादिग्रन्थान् अरचयत्।

एतद्वंशीयो मुदिगोण्डेतिगृहनामधेयो मल्लिकार्जुनाराध्यः प्रतापरुद्रेणाऽत्मनो ब्रह्महत्यादोषनिवृत्त्यर्थं काशीनगरादाह्वानितः। क्रीस्तोः पश्चादष्टमशताब्द्यामुद्भटाराध्यस्समवर्तत। जयापीडमहाराजसभायां विद्यापतिपदवीमलञ्चकार। स राजा प्रत्यहं सूर्योदयात्प्राक् लक्षदीनारान् प्रेषयति स्मेत्यनेन श्लोकेन विजानीमः।

विद्वान्दीनारलक्षेण प्रत्यहं कृतवेतनः।
भट्टोऽभूदुद्भटस्तत्र जयापीडसभापतिः।।

विश्वाराध्यः

एष कोटिफली पुरीवरशिवप्रासादवासी। तस्मात्कोटिपल्याराध्य इत्युच्यते। अस्य पिता सोमेश्वरः, जननी भवानी। क्रीस्तोः पश्चाद् द्वादशशताब्द्यां वर्तते। काश्यपगोत्रजः।

चतुर्वेदसार-वृषभाधिपशतक-बसवराजीयादिग्रन्थान् अलेखीत्। शैवधर्मान् शश्वत् स्थापयामास। शिष्याः प्रशिष्याश्च बहवो विद्यन्ते। पालकाश्रमं गत्वा विश्वाराध्यस्तत्र न्यवसत्। नीत्वा कानिचिद्दिनानि तदेवाश्रमं पालकुरिकिग्रामत्वेन परिणतिं प्रापयामास। अयमेव ग्रामः पालकुर्तीति व्यवह्रियते। विश्वाराध्यसन्तति रिवटूरिगृहनाम्ना साम्प्रतमाहूयते।

वेमनाराध्यः

बेलिदेविग्रामनिवासी। जनको मल्लिकार्जुनः। दीक्षागुरुस्त्रिपुरान्तकेश्वरः। श्रीशैलमल्लिकार्जुनलिङ्ग-गर्भसम्भूतः। विष्णुदेवभूपालात् बेलिदेवविप्रभृत्यग्रहारान्प्रपेदे। बहून्यज्ञानकरोत्।

अस्य भार्या शर्वाणी। ज्योतिर्नाथभीमनाराध्य घण्टानाथादयो बहवश्शिष्यास्सन्ति। यागीय मृतपशून् पुनरुज्जीवयामास। माहेश्वरपादतीर्थप्रोक्षणेन सर्पदष्टभूपालस्य प्राणदानं चकार। कौण्डिन्यगोत्रसञ्जातः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एतद्वंशीया मुलुगुगृहनाम्ना व्यवह्रियन्ते। वेमनाराध्य इति व्यवहारनाम। गीर्वाण्यां व्योमाराध्य इति व्यवहारः। मल्लिकार्जुनपण्डिताराध्येन लब्धगुरुपट्टाभिषेकः शिवाद्वैतमतप्रचारं चक्रे। ररक्षसुकेतोः पुत्रम्। सुन्दरेश्वरञ्च भाषयामास दक्षिणदेशे मथुरानगर्याम्। द्वादशशताब्द्यां वर्तते।

श्रीपतिपण्डिताराध्यः

श्रीकरभाष्यकर्ता। अस्य जनकः मल्लिकार्जुनः। जननी भ्रमराम्बादेवी। श्रीशैले निवासः। विजयवाटिकायां कतिचित्सरान्यापयामास। जातवेदसं वस्त्रेण बन्धयित्वा ग्रन्थिकृत्वा शमीशाखायां बबन्ध। जगद्गुरुः। बहवः शिष्यास्सन्ति।

अनन्तभूपालस्य गुरुः। एषोऽनन्तपालः षष्ठस्य विक्रमादित्यस्य सैन्याधिपतिः। एतद् विक्रमादित्य-जामातुश्चक्रदण्डराजस्य द्राक्षारामालयस्थितशासनमनुसृत्य क्रीस्तोः पश्चादेकादशशताब्द्यामयं स्थितवानिति निर्णीयते।

मञ्चनपण्डिताराध्यः

ब्रह्मा शिवाज्ञया मञ्चनपण्डितनाम्ना बदरीकेदारे गौरीकेदारेश्वरयोः पुत्रस्समजनि। एतस्य शाम्भवदीक्षा कृता महात्मनोपमन्युना। वाराणसीवास्तव्यस्य त्र्यम्बकसोमयाजिनः कुमारीं चण्डिकानाम्नीमुपयेमे। साङ्ख्यायनगोत्रजातः।

मञ्चनपण्डितस्यैतस्य पितामहस्सोमशम्भुः। गोडदेशस्थितस्य महतश्शैवाचार्यमठस्य गोळकीनामधेयस्य आधिपत्यमवदहयं सोमशम्भुः।

मञ्चनपण्डितस्य गृहनामधेयं शिवलेंक इत्युक्तम्। काळहस्तिनगरे कियत्कालमतिवाहयामास। श्रीशैले च तपस्तेपे। क्रीस्तोः पश्चादेकादशशताब्द्यां वर्तते। बौद्धजैनादिमतखण्डनं चकार। पाशुपतव्रतनिष्ठो मञ्चनपण्डितस्स्वगृहबहिर्द्वारि **शैवेतरवादि घोषण भेदरक्ष** इति स्वबिरुदं लेखयमास। काशीनगरे माधवं विश्वेश्वरालपर्यन्तमटयित्वा **जगत्कर्ता शिव एवेति न्यरूपयत्।** अत एवोक्तमभियुक्तैः -

काशीविश्वेशनिकटमटयित्वा हठाद्धरिम्।
बभंज वैष्णवान्यस्त वन्दे मञ्चनपण्डितमिति।।

मल्लिकार्जुनपण्डिताराध्यः

द्राक्षारामनिवासी। अस्य जनको भीमनपण्डितः जननी च गौराम्बा। गौतमगोत्रजो मल्लिकार्जुनपण्डित-स्स्वेष्टलिङ्गधारी। चातुर्वर्ण्यपदवीमधिष्ठितस्त्रिलोकगुरुबिरुदमुवाह।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यः कोपि वा शिवादन्यमधिकं ब्रवीति स्वपादेन तच्छिरस्ताडयामीति प्रतिज्ञां चक्रे। बौद्धेस्साकं शपथं कृत्वा शिवपारम्यं प्रतिष्ठापयामास। संसदि मतविवादे स्वनेत्रे शलाकया बहिराकृष्य पुनरीश्वरकृपया नेत्रे प्राप।

शिवतत्त्वसार-लिङ्गोद्भवदेवगद्य-अमरेष्टकादिग्रन्थान् विरचयामास। क्रीस्तोः पश्चात् द्वादशशताब्द्यामवर्तत। शिवपूजापात्रेषु प्रमादेन स्वपादस्पृष्टेषु सत्सु तदपराधनिवृत्तये लिङ्गसायितनामक स्वकरवालच्छेदितपादद्वयस्य वेल्लगोण्डमहदेवाराध्यस्य स्वमहिम्ना यथापूर्वं तस्य पादावनुजग्राह।

वेलनाटिभूपालानां बौद्धपदपादाचार्याणां राजधान्यां गुण्टूरुमण्डलान्तर्गतायां धनदपुर्यां (चन्दवोलु) मल्लिकार्जुनपण्डिताराध्यसम्बन्धिशिलाशासनमेकं वर्तते। तच्च शिवतत्त्वसारग्रन्थे मुद्रितमेव।

पाशुपतव्रतम्

एतादृशैर्द्वादशाचार्यैरवलम्बितं पाशुपतव्रतम् **अत्याश्रमं पाशुपतं शाम्भवं तच्छिरोव्रतम्। इतीदं नामभिः पुण्यैर्निगमान्तेषु गीयत** इति कारणोत्तरे निगदितम्।

अत्याश्रमिभ्यः परमं पवित्रम्। अत्याश्रमी सर्वदा सकृद्वा जपेत्। व्रतमेच्छाम्भवमिति वेदे च प्रतिपादितम् अत एव भाष्यकारेण सहकार्यन्तर-अङ्गावबद्धमौनवदधिकरणेषु सूचितम्।

वेधामनुक्रियाभिख्य दीक्षात्रयसुशोभितम्।
षडध्वशुद्धिकलिकं गुरुकारुण्यसम्भृतम्।।

भस्मरुद्राक्षश्रीलिङ्गधारणात्मकमुत्तमम्।
शाम्भवव्रतमेतदद्धि वेदशास्त्रैकबोधितम्।। इति।

चन्द्रज्ञाने कथितम्।

ब्राह्मणस्य समाख्यातं लिङ्गधारणमुत्तममिति लिङ्गपुराणे।

अन्तर्धारणशक्तो वा ह्यशक्तो वा द्विजोत्तमः।
संस्कृत्य गुरुणा दत्तमिष्टलिङ्गं हृदिस्थले।
धार्यं विप्रेण मुक्त्यर्थम्।। इति।

स्कान्दे चाभिहितम्।

गतान्तैरध्यवसितमत्याश्रममिदं व्रतम्।
मया पाशुपतं दक्ष शुभमुत्पादितं पुरा।। इति।

महाभारते प्रथमं पाशुपतव्रतमेव उत्तममिति सुस्पष्टमभिहितम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भस्म रुद्राक्षशिवलिङ्गधारणात्मकं प्रथमम्। भस्मरुद्राक्षधारणात्मकं द्वितीयम्। भस्मधारणात्मकं तृतीयमिति पाशुपतव्रतं त्रेधा निगमान्तैरुपपादितम्। यावदायुषं पाशुपतव्रतधारिणां मुक्तिरेव फलम्। तदन्येषां भोग एव फलमिति नीलकण्ठभगवत्पादेन कण्ठरवेणैवोक्तम्। अतः पाशुपतव्रतं सर्वैरवश्यमाचरणीयम्।।

प्रमाणम्

शैवमते प्रत्यक्षाऽनुमानाऽगमानां त्रयाणां प्रमाणत्वोपपत्या यथासम्भवमितरेषामत्रैवान्तर्भावः।

आगमाः

शैवे आगमप्रामाण्यं वेदप्रामाण्यवदङ्गीकृतम्। यतः भाष्यकारेण पाशुपताधिकरणे - वयं तु वेदशिवागमयोर्भेदं न पश्यामः उभयोरेकः एव शिवः कर्ता।

अष्टादशानां विद्यानामेतासां भिन्नवर्त्मनाम्।
आदिकर्ता कविस्साक्षाच्छूलपाणिरिति स्मृतः।। इत्युक्तम्।

आगमानां धर्मशास्त्राण्येव। कामिकाद्यष्टाविंशत्यागमानाञ्च वेदानामिव शिवोपज्ञत्वमेव। सूत्रप्रायेण श्रुत्युदितविधिवाक्यानां भस्मरुद्राक्षशिवलिङ्गधारणशिवपूजाशिवलिङ्गप्रतिष्ठापनादीनां तत्तत्कार्यानुष्ठान-साधनकुण्डमण्टपशिवालयशिवपूजाविधिशाम्भवदीक्षादिपरिज्ञानस्यागमशास्त्रविज्ञानाभावेऽनुपपत्तेः।

अष्टाविंशत्यागमेषु कामिकादयः दशशैवागमाः सदाशिवपदवासिभ्यः शिवस्वरूपेभ्यः प्रणवादिभ्यः उपदिष्टाः। विजयादयः अष्टादशरौद्रागमाः ईश्वरतत्त्ववासिभ्यः अनन्तरुद्रादिभ्य उपदिष्टाः। प्रत्यागमं चत्वारः पादाः। शैवसिद्धान्ततत्त्वं ज्ञानपादे तत्त्वप्रेरकाधिदेवताविज्ञानतद्वशीकरणोपायौ क्रियापादे च प्रतिपादितौ। तत्त्वानि संशोध्य अध्वमूर्तीस्संसृज्य शिवज्ञानप्राप्त्यै अवश्यस्य मनसः योगेन वशीकृतस्य शिवे संयोजनं योगपादे चाऽभिहितम्। कर्मबाहुल्यात्तनुकरणभुवनभोगानामनैककण्ठ्यात् मनसश्चाञ्चल्यातिशयाच्च ज्ञानयोगमाप्तुं सदाचारानुष्ठानं चर्यापादे वर्णितम्।

आगमाश्च पूर्वोत्तरभेदेन वेदोपनिषदाविव द्वेधा दृश्यन्ते। उपनिषत्सु, उपासनाज्ञानकाण्डस्य यथा प्राधान्यमागमान्तेषु च परशिवानुग्रहसुलभप्राप्तहेतुभूतपाशुपतव्रतादीनां श्रौतानां तथा प्राधान्यं प्रामाण्यञ्च स्पष्टतया प्रतिपादितं परशिवेन।

ततः किञ्चिज्ज्ञप्रोक्तस्मृतिभ्यस्सर्वज्ञशिवप्रोक्तानामागमानां वेदवत्प्रामाण्यमङ्गीकृतम्।

प्रमेयः

पतिः पशुः पाश इति पदार्थास्त्रय ईरिताः। एतेषु पतिनिरूपणं क्रियते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पतिः

एषामीशे पशुपतिः पशूनां चतुष्पदामुत च द्विपदामिति जन्माधिकरणे पाशसम्बन्धेन जीवानां पशुत्वव्यवहाराज्जीवानां चिदचिदात्मनां नियामकं ब्रह्म परशिव एवेति प्रतिपादितम्।

अयञ्च पतिष्षट्त्रिंशत्तत्त्वात्मकष्षडध्वकलितोऽष्टत्रिंशत्कलोपेतो भवति।

मन्त्रमूर्तीनां गुणत्रयाऽधिष्ठित ब्रह्मविष्णुरुद्राणामतीतः **चतुर्थः शिवमद्वैतमिति** चतुर्थपुरुषत्वेन श्रूयमाणस्तनुकरणादिजगत्कर्तृत्वादिना पतिरिति प्रमीयते।

उपादानविलीनसमस्तकार्यजननशक्तिमात्रयुक्ततया **शक्त** इति, कार्यजननाभिमुखशक्तियुक्ततया **उद्युक्त** इति, जनितकार्यशक्तियुक्ततया **प्रवृत्त** इति, त्रेधा कथ्यते।

इयं च शक्तिरेकैव। सा च कार्यानुकूलाऽदृष्टादिपरामर्शिनी **ज्ञानस्वभावेति** एवं भवत्वित्याकारिकेच्छया तत्तत्कार्यजनककृतिना च इच्छाकृतिस्वभावात्मिकेति शिवसमवेता चिदचिन्मयी, मूर्धादिभावकल्पनया, मननत्राणयोगेन च मन्त्रपदवाच्यशिवशरीरमिति कथ्यते। एतच्छक्तिविशिष्टः षट्त्रिंशत्तत्त्वात्मकः पतिरित्युच्यते।

षट्त्रिंशत्तत्त्वानि

१.शिव, २.शक्ति, ३.सदाशिव, ४.ईश्वर, ५.शुद्धविद्या, ६.माया, ७.कला, ८.विद्या, ९.राग, १०.काल, ११.नियति, १२.पुरुष, १३.प्रकृति, १४.बुद्धि, १५.अहङ्कार, १६.मनः, १७.श्रोत्र, १८.त्वक्, १९.चक्षुः, २०.जिह्वा, २१.घ्राण, २२.वाक्, २३.पाणि, २४.पाद, २५.पायु, २६.उपस्थ, २७.शब्द, २८.स्पर्शः, २९.रूप, ३०.रस, ३१.गन्ध, ३२.आकाश, ३३.वायु, ३४.वह्नि, ३५.सलिल, ३६.भूमयः।

पशुः

देहेन्द्रियादिव्यतिरिक्तः नित्यश्चिदात्मकोऽनेकोऽनादिमलावृतोऽस्वतन्त्रः कर्ता च पशुरित्युच्यते। एष च पशुरुपाधिभेदेन सकलः प्रळयाकलः विज्ञानाकलश्चेति त्रिविधः।

सकलः

मलोपरुद्ध दृक्छक्तित्वे सति तत्प्रसादहेतुककलादिमत्वे सति भोगाय कर्मसम्बद्धत्वं सकलस्य लक्षणम्। केवलस्सकलश्शुद्धस्त्रयवस्थः पुरुषः स्मृत इति किरणे अवस्था त्रयमुक्तम्। एतेषां सकलानामवस्थानामशुद्धमायाधोभागेऽशुद्धाध्वनि भवति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रलयाकलः

प्रलये उत्सितकलत्वे सति दीक्षाप्रायश्चित्तभोगकृतावशुद्धाध्वविषयकर्मपरिक्षयवत्वे सति भोक्ष्यमाणमिश्रध्वकर्मणा स्ववशीकृत्य कलासम्बन्धवत्वं प्रलयाकलस्य लक्षणम्। पक्वमला अपक्वमलाश्चेति एतेपि द्विविधाः। शिवः पक्वमलाननुगृह्य तेभ्यो भुवनपतित्वं ददाति। अपक्वमलानां प्राकृतभोगकर्मवशात्पुर्यष्टकदेहं दत्वा सकलत्वं ददाति। एतेषामवस्थानमशुद्धमायामध्यभूतमिश्राध्वनि भवति।

विज्ञानकलः

विज्ञानादिना सर्वकर्माणि कलाश्च विहाय दृक्क्रियावारकाऽणवमलमात्रयुक्ताः विज्ञानकलो भवति। एते च प्रशान्तकलुषा अप्रशान्तकलुषा इति द्विविधाः। एतेषु कांश्चन मलपरिपाकं निरीक्ष्यैव शुद्धाध्वन्यधिकारे शिवः योजयति। कांश्चिद्भोगाख्ये तत्त्वे योजयति।

कांश्चिद्भोगाह्वये तत्त्वे सर्वज्ञान् बलशालिनः।
सदाशिवगुणोपेता भोगाख्यं तत्त्वमाश्रिताः।।

ये प्राप्तास्तत्त्वमैशानं विशेषेण क्रियाधिकाः।
अधिकारगुणोपेता महान्तश्चक्रवर्तिनः।।

अष्टावनन्तसूक्ष्माद्या यथापूर्वं गुणाधिकाः।
विद्याविद्याह्वयं प्राप्तास्सङ्ख्यया सप्तकोटयः।
प्रशान्तकलुषास्सर्वे महात्मनोऽमितौजसः।। (शैवपरिभाषायाम्)

एतेषां मध्ये यस्य स्वाधिकारे वैराग्यं जायते तं मलपरिपाकानुगुण्येनैवेश्वरोनुगृह्यपरमां मुक्तिं प्रापयति। सदाख्यतत्त्वगतानां पदे ईश्वरतत्त्वगतान् तत्पदे विद्यातत्त्वगतान् तत्रत्यानां पदे मायामस्तकगतांश्च योजयति।

षडध्वानः

कलातत्त्वभुवनवर्णपदमन्त्रस्वरूपाः। निवृत्ति प्रतिष्ठा विद्या शान्ति शान्त्यतीताख्या पञ्चकलाध्वेत्युच्यते। पृथिव्यादिनादान्तानि षट्त्रिंशत्तत्त्वानि तत्त्वाध्वा। कालज्ञानाद्यनाश्रितान्तचतुर्विंशत्युत्तरशतद्वयभुवनानि भुवनाध्वा। अकारादिक्षकारान्तान्येकपञ्चाशद्वर्णनानि वर्णाध्वा व्योमव्यापि मन्त्ररूपैकाशीपतिपदानि पदाध्वा। ब्रह्माङ्गरूपैकादशमन्त्राः मन्त्राध्वेत्युच्यते। एतेषां षडध्वनां परमकारणं वस्तु कुण्डलिनीशुद्धविद्येति परमशिव इति चोच्यते। षडध्वव्यतिरिक्ताः आत्मानः नित्याः व्यापकाश्चेतनाः प्रतिशरीरं भिन्ना मलिनाः कर्मकर्तारः कर्मफलभोक्तारः किञ्चिज्ञाः किञ्चित्कर्तास्सेश्वराश्च भवन्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शिवादिशुद्धविद्यान्तानि पञ्चतत्त्वानि शुद्धाध्वेति रागतत्त्वमारभ्य कलातत्त्वान्तानि पञ्चतत्त्वानि मिश्राध्वेति पृथिवीतत्त्वमारभ्य प्रकृतितत्त्वान्तपञ्चविंशतेरशुद्धाध्वेति कथ्यते। अत एवोक्तमनुत्तरप्रकाशपञ्चाशिखायां शिवादिक्षितिपर्यन्तं विश्वं वपुरुदंचयन् पञ्चकृत्य महानाट्यरसिकः क्रीडति प्रभुरिति। परशिवस्वरूपमहालिङ्गे अप्राकृतदिव्यमङ्गलविग्रहे चित्रपटे सन्तः दृष्टिं दत्वा **लिङ्गगर्भे जगत्सर्वं** लीयते गम्यते येन जगदेतच्चराचरमिति सूक्तेरनुभवं यथार्थतया परिजानन्तु।

पाशः

पाशत्वं नाम शिवानन्दाभिव्यक्तिविरोधित्वम्। तच्चाणवमलस्याच्छादकतया तिरोधायकशक्तेस्तु तच्चोदयितृत्वेन बिन्दुमायाकर्मणामपि भोगभोग्यसम्पादनद्वारा वैषयिकसुखादिजनकत्वेन आणव-तिरोधायकशक्ति-बिन्दु-माया-कर्मानामभिः पञ्चविधः। तत्र चत्वारः पदार्थाः जडरूपाः। तिरोधायकशक्तिस्तु चिद्रूपापि पाशाऽनुग्राहकत्वात् पाशमध्ये प्रवेशः। तत्र, आणवत्वं नाम आत्मनो दृक्क्रियारोधकत्वम्। अस्य चाणवोक्तिर्विभोरात्मनोऽणुत्वसम्पादनार्थम्। अत एवोक्तं शिवज्ञानशेखरे

अयानादिमलः पुंसाम्, पशुत्वं परिकीर्तितम्।
तुषकं चुकवद् ज्ञेयमायाबीजाङ्कुरस्य तद्।।

इति ताम्राश्रितकलङ्कवदिति च।

तिरोधायिशक्तिपाठः

इयमेव चिद्रूपा शिवसमेता माहेश्वरीशक्तिः भोगमोक्षानुग्रहकारणत्वात् सर्वानुग्राहकत्ववर्ती(ती)। मलशक्तीः चित्क्रियासंनिरोधकत्वान्तं परिणामयति। शिरसि स्थितेश्वररूपादित्यचित्विषाचैतन्यप्रकाशमाधत्ते।

बिन्दुपाशः

विश्वसारोत्तरसूत्रे - याधः कुण्डलिनीशक्तिः मायाकर्मानुसारिणी। नादबिन्द्वादिकं कार्यं तस्या इति जगत् स्थितिः। नादश्शिवतत्त्वं बिन्दुश्शक्तितत्त्वम्। अयं च वैखरीमध्यमापश्यन्तीसूक्ष्मासंज्ञितः शिवतत्त्वादिशुद्धविद्यापर्यन्तं सृजति। शिवस्य लयादिकं रुद्राणूनां बन्धः विमुक्तिश्चास्मिन्नेव भवति।

मायापाशः

कलादिपृथिव्यन्तकार्यजातस्य उपादानभूता जडा च भगवतः परिग्रहशक्तिः। इयञ्चैका नित्या च प्रलये कर्मणामाश्रयभूता। शिवस्य मायाक्षोभकत्वं बिन्दौ साक्षाद्भवति। मायायान्तु अनन्तेश्वरद्वारेण। विचित्रशक्तिमती माया निखिलप्रपञ्चजननहेतुः। एतदशुद्धमायातत्त्वारब्धानि शरीराणि पुंसां सुखदुःखभोगसाधनानि भवन्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

लोकान्तरगत्यागतिरूपं पुर्यष्टकाख्यं सूक्ष्मशरीरञ्च भवति। एतच्च तन्मात्रपञ्चकमनोबुध्द्यहङ्कारात्मकम्।

कर्मपाशः

एतच्छरीरप्राप्तिः कर्मपाशेन भवति। मनोवाक्कायभेदेन त्रिविधमपि कर्म आध्यात्मिकाधिभौतिकाधिदैविकभेदेन पुनस्त्रिविधं भवति। वैषयिकसुखदुःखादिहेतुत्वात् पाश इत्युच्यते।

मतप्रचारः

प्राचीनकाले प्रथमं भारतीयानां विदेशीयानाञ्च सर्वेषामुपासनीय ईश्वर एव। शिवोपासनारूपमुक्तिमार्गोप्येक एव। नवखण्डभूमण्डलसृष्टिकर्तुर्निष्पक्षपातस्येश्वरस्योपास्तिस्सर्वेषामेकत्वेनैव समुचिता। बादरायणस्समवतार्य ब्रह्मसूत्राणि रचयामास। यदा कैश्चिद्वेदार्थमजानद्भिर्मार्गान्तरं स्वीक्रियते।

स्वाभिमानपूरिताः केचन प्रत्येकं शैवे भेदकल्पनमारेभिरे। तथाप्यासेतु हिमाचलपर्यन्तं श्रुतिसूत्रानुगुणं शिवाद्वैतमतमेव तदा जगद्व्याप्तमासीत्। तदानीमेव जगद्गुरु नीलकण्ठाराध्यः चिदचिच्छक्तिविशिष्टशिवाद्वैतपरं भाष्यमरीरचत्। **अन्यत्सर्वं परित्यज्य शिव एको ध्येयश्शिवङ्करः।** न तस्मादधिकस्समानश्च। वैदिकश्शिवाद्वैतसिद्धान्त एव मुमुक्षुभिरवलम्बनीयः। शिवोपासनैव मुक्तिदायिनीत्युपन्यस्यति। नीलकण्ठाराध्ये सभामध्यबद्धा निश्शलाका घण्टा, उपन्यासस्याद्यन्तयोः ओम् ओम् इति एकघण्टापर्यन्तं ननाद। ततः भस्मरुद्राक्षशिवलिङ्गधारिणां शिवोपासकानाञ्च सर्वेषां नीलकण्ठभाष्यमेव शरणं करणीयम्। वस्तुतस्तु श्रौताश्रौतत्वभेदेन शैवं द्विविधमुच्यते इति वायुसंहितायामुक्तम्। तत्राप्युत्तरदेशशैवं दक्षिणदेशशैवमिति द्वैविध्यं परिदृश्यते।

उत्तरदेशशैवम्

शङ्कराचार्यात्पश्चात् षड्विंशत्युत्तरद्विशततमे वत्सरे २२६ अभिनवगुप्तपादाचार्याः प्रादुरासन्। ते च स्पन्दशास्त्रं रचयामासुः। शङ्कराचार्यात्प्राक् उत्तरदेशेऽपि नीलकण्ठभाष्यानुसारेण चिदचिद्विशिष्टशिवाद्वैतमतमेवासीत्।

तत इदं शैवं - शिवशक्तेस्तन्मयस्य शिवस्य वा किञ्चिच्चलनात् शिवादिपृथिव्यन्तजगदुज्जृम्भणनिरूपणात्तयोस्संविद्रूपत्वप्रत्यभिज्ञात्मकत्वकथनात् शिवेन स्वेच्छयैव सदा शिवादिपृथिव्यन्तजगत्प्रवर्तनप्रतिपादनाच्च स्पन्दशास्त्रसंवित् तत्र प्रत्यभिज्ञा तन्त्रस्वतन्त्रशिवाद्वैतनाभिर्व्यवह्रियते चोत्तरस्यां दिशि काश्मीरदेशे श्रीनगरे।

एतत्सिद्धान्तस्य मूलं शिवसूत्राणि। एतानि पूर्वस्मिन्काले आत्मेश्वरत्वनिरासकैर्नास्तिकसिद्धैस्समाक्रान्तेऽस्मिन् जीवलोके रहस्यसम्प्रदायस्याविच्छेदेच्छया स्वेच्छयैव शङ्करो महादेवगिरेश्शिलातले

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शिवसूत्राणि समालिख्य स्वप्ने वसुगुप्ताय महेश्वरशिखामणये चोपदिदेशत्याख्यायिका वर्तते। काश्मीरसंस्कृत-ग्रन्थावल्यां ७७ सप्तसप्ततिसङ्ख्यान्येतानि शिवसूत्राणि प्रकाशितानि।

वसुगुप्ताचार्याल्लब्धोपदेशो भट्टकल्लचस्स्पन्दकारिकां प्रणिनाय। उत्पलाचार्य क्षेमराजादयः स्पन्दकारिका व्याचख्युः। उत्पलाचार्यगुरुस्सोमानन्दनाथः। तदन्तेवासिलक्ष्मणगुप्तशिष्यः परममाहेश्वराचार्य बिरुदाङ्कितोऽभिनव-गुप्तपादाचार्यः क्रिस्तब्दीयः दशमशताब्द्यां प्रत्यभिज्ञासूत्रविमर्शिन्यादिग्रन्थान् विरच्य शैवमतप्रचारमकार्षीत्। इदं प्रत्यभिज्ञा शैवमेव स्वतन्त्रशिवाद्वैतमित्युत्तरदेशे व्यवहारः।

दक्षिणदेशशैवम्

इदं शैवं सदाशिवस्कन्दनन्दिपरम्पराप्रवर्तितं शैवागममूलकं शिवादिपृथिव्यन्तषट्त्रिंशत्तत्त्वबोधकं तत्त्वशोधनतः पुरुषस्य शिवाऽनन्यत्वबोधनेन शिवस्वरूपत्वप्रापकं सत् स्वतन्त्रशिवाद्वैतात्प्रभिन्नक्रमं तिरुवाडुतुरै धर्मपुरसूर्यवान् कोयिल् इत्यादि द्रविडदेशशैवमठेष्वतीव व्याप्तम्। शक्तिविशिष्टाद्वैतनाम्ना चकास्ति। महाराष्ट्रान्ध्रकर्णाटकेषु सदाशिवपरम्परागतशिवाद्वैतनामकशैवमेव वर्तते।

कल्याणदेशिकपरम्परा

सदाशिवगुरुपरम्परागतकल्याणदेशिककरुणाकटाक्षलब्धशाम्भवदीक्षादीक्षितद्वादशाराध्य सम्प्रदायप्रवर्तकाः वर्णाश्रमधर्मशिवोपासनाशिवलिङ्गधारणभाजः जगद्गुरु त्रिलोकगुरु लोकाराध्येत्यादि बिरुदाङ्किताश्चाराध्यब्राह्मणा एव सदाशिवगुरुसम्प्रदायकाः। अत एवोक्तम् -

सदाशिवसमारम्भां नीलकण्ठाख्यमध्यमाम्।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम्।। इति।

इयमेव शिवचिन्तामणिप्रभायामस्मद्गुरुवर्यैरुक्ता सदाशिवगुरुपरम्परा।

सदाशिवं शिवं स्कन्दं केशवं पद्मसम्भवम्।
नन्दीश्वरं कुम्भयोनिं भरद्वाजात्रिगौतमान्।।

दधीचिमुपमन्युञ्च मार्कण्डेयं पराशरम्।
श्वेतं च लकुलीशं च नीलकण्ठशिवाह्वयम्।।

रेणुकं मरुलं चैकोराममुद्भटदेशिकम्।
श्रीपतिं मञ्चनं चैव मल्लिकार्जुनपण्डितम्।।

विश्वाराध्यं वेमनं च प्रणमाम्यभिमताप्तये।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्कन्दगुरुपरम्परा

स्कन्दो वामदेवमुनये, स नीलकण्ठशिवाचार्याय स च मणुकर्णिकातीरस्थितमहामठालङ्कृतविश्वेश्वरशिवाचार्याय स च सदाशिवमार्गप्रकाशिकदेशिकाय स च शिवाग्रयोगि शिवक्कोलुन्दु शिवाचार्याय चोपादिशत्।

अयञ्च द्रविडदेशान्तर्गतार्कवने मठं संस्थाप्य शिवकामसुन्दरीसमेतज्ञाननटराजं श्रीकालहस्तीश्वरं चार्चयन् शैवसिद्धान्तप्रचारमकरोत्।

अपि च स्वाचार्योपदिष्टवर्त्मना सदाशिवोऽहंभावनया शिवानन्दनिष्ठायां निषण्णः अतिगतवर्णाश्रमः अतिवर्णाश्रमः शिवयोगीति **पप्रथे**।

श्रीमत्स्कन्दगुरोश्शिवेन कथितेति सिद्धान्तसारावल्यामुक्तत्वाददिगुरुस्सदाशिव एवेति सिद्धम्।

नन्दिकेशगुरुपरम्परा

नन्दिकेश्वरस्सनत्कुमाराय सः सत्यज्ञानदर्शिने सः परञ्ज्योतिमुनये सः मेयकण्डदेवाय शैवमुपदिदेश। धर्मपुरादिशैवमठप्रतिष्ठितमिदं शैवम्।

उपदेशक्रमः

शक्तयोऽस्य जगत्सर्वं शक्तिमांस्तु महेश्वरः।
शक्तिस्तु शक्तिमद्रूपाद्व्यतिरेकं न गच्छति।।

तादात्म्यमनयोर्नित्यं वह्निदाहिकयोरिव।
न वह्नोर्दाहिका शक्तिर्व्यतिरिक्ता विभाव्यते।।
शक्तेस्सङ्कोचभावेन निर्गुणश्चेति गीयते।

इत्यादिना शक्तेस्सङ्कोचविकासाभ्यां निर्गुणसगुणरूपेण कीर्तनीयस्य शिवतत्त्वस्य महाप्रवाहवदविच्छिन्नगुरुपरम्परोपदेशक्रमः महौघक्रम इति शास्त्रोपदेशक्रमः प्रतिसंहिताक्रम इति द्विधा कथ्यते।

शिवाद्वैतः

सर्वविद्याधिपतिना सर्वानुग्रहतत्परेण जगदीश्वरेण निगमागमान्तप्रतिपादितोऽयं शिवाद्वैतसिद्धान्तः जगद्गुरु नीलकण्ठाराध्येन स्वभाष्ये प्रकटितः। सर्वप्रपञ्चमेकेन मार्गेण चालने सङ्कल्पवतां शिवाचार्याणामयमेव प्रथमः।

एतदीयशारीरकब्रह्ममीमांसासूत्रभाष्ये उपास्यश्शिवः। उपासको जीवः। शिवोऽहं भावनारूपाद्वैतमार्गेण पाशुपतदीक्षां गृहीत्वा ईश्वरदर्शनहेतुभिः श्रवणमननिदिध्यादृगवधानद्वयत्वगवधानत्रयमनोवधानपञ्चकषट्स्थलस्थ-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

षल्लिङ्गात्मकषट्त्रिंशदुपचारपूजाभिरामरणान्तमिष्टप्राणभावात्मकशिवलिङ्गोपासनया भ्रमरकीटन्यायेन शिवसारूप्यं सायुज्यञ्च गत्वा शिवानन्दानुभव एव शिवाद्वैत इति प्रतिपादितः।

शिवाद्वैतमार्गः

माहेश्वरसत्सङ्गादीहां त्यक्त्वा च संसृतौ धीमान्।
कल्याणदेशिकेक्षा कारुण्याल्लब्धशाम्भवोपेतः।।

प्रारब्धकर्मभोगात्प्रक्षीणो महानन्दः।
आवरणाष्टकसहितस्त्वप्राकृतदिव्यविग्रहं चेशम्।।

षल्लिङ्गाङ्गविवेकी षट्स्थलपूजारतो ध्यात्वा।
निरतार्चितशिवलिङ्गस्तदनुग्रहधूतमायिको जीवः।।

आयुर्वित्तसुतादिसौख्यमधिकं भुक्त्वा क्षितावन्ततः
सारूप्यं लभते निरन्तरमुमाकान्तस्य सम्पूजनात्।
हार्दानुग्रहलब्धमध्यधमनीद्वारा बहिर्निर्गतः
मुक्तोर्चिर्दिनपूर्वपक्षषड्डुदङ्मासाब्दवातांशुमत्।।

विद्युद्वरुणेन्द्र धातृमहितस्सीमान्तसिन्धुमहत्
तीर्त्वा विष्णुपदोर्ध्वभानमजडं नित्यं महानन्ददम्।
श्रीकैलासमुपेत्य नन्दति चिरं तस्मिन्परब्रह्मणः
सायुज्यं समवाप्य तेन सह लब्धानन्तभोगो व्रती।।

शिव एव परंब्रह्म

गुणमूर्तिभ्यः ब्रह्मविष्णुरुद्रेभ्यः परं परब्रह्मैव शिवनामशब्दितं भवति। शिव एव केवल इत्याद्युपनिषद्वचनानि शिवमेव परात्परं शक्तिविशिष्टं कार्यकारणरूपं निमित्तोपादानभूतं निरूपयन्ति। ऋतगुँ सत्यं परंब्रह्मेति श्रुतिरपि शिवमेव परब्रह्मपदवाच्यं वदति।

श्रीकण्ठभाष्यस्य शिवार्कमणिदीपिकाकर्तारः अप्पयदीक्षिता अपि ब्रह्मतर्कस्थले उच्चावचैरुपनिषद्वचनप्रकाण्डैः तद्ब्रह्म शङ्करभवानिति तर्कयाम इति शिव एव परंब्रह्मेति निश्चिक्युः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शिवतत्त्वम्

अहमेकः प्रथममासम्। वर्तामि च भविष्यामि नान्यः कश्चन मत्तो व्यतिरिक्तः। ध्यायीतेशानम्। इत्यादिना निखिलजगज्जन्मादिकारणमनितरसाधारणशिवेशेशानेश्वरमृत्युञ्जयाष्टमूर्त्यादिशब्दवाच्यं शिवतत्त्वमेकमेव चतुर्वर्णाश्रमस्थैस्समुपास्यम्।

न तत्समश्चाभ्यधिकश्च दृश्यते। खद्योतो यदि चण्डभानुसदृशस्तुल्यो हरिश्शम्भुना। निम्बाको यदि चन्दनेन सदृशस्तुल्यो हरिश्शम्भुना सूतसंहितायाम्। जागरिते ब्रह्मा स्वप्ने विष्णुः सुषुप्तौ रुद्रः तुरीयमक्षरमिति ब्रह्मोपनिषदि। अकारं ब्रह्माणं नाभौ उकारं विष्णुं हृदये मकारं रुद्रं भ्रूमध्ये ओङ्कारं सर्वेश्वरं द्वादशान्त इति। ब्रह्मविष्णुरुद्रेन्द्रा सम्प्रसूयन्त इत्यादि श्रुतयः शिवमद्वैतं चतुर्थं प्रतिपादयन्ति। सदादिपदानां छागपशुन्यायेन शिवे समन्वयः।

घण्टापथः

इदानीं ब्रह्मपथेषु सत्स्वपि बहुषु नीलकण्ठाराध्येन राजमार्गतया निर्णीतोऽयं शिवाद्वैत एव। शुद्धाद्वैतविष्णुविशिष्टाद्वैतादीनां वेदपथव्यतिरिक्तत्वं ब्रह्मपथे निरूपितमेव।

शक्तिविशिष्टत्वम्

मायान्तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति चिदचिदाकारमायाशक्तिविशिष्टस्सकलं जगदीशतेपतिः।

अयमीश्वरः जगतो निमित्तुपादानञ्च। चेतनाचेतनात्मकसमस्तजगतः शिवादाविर्भावोक्त्या शिवस्यैवोपादानत्वम्। प्रवृत्ताशेषशक्तिकः शिव एव प्रथमसृष्टौ कर्ताऽभ्युपेयः। अनन्तेशश्रीकण्ठादयश्च शिवशक्त्यैव विभिन्नाः पतिपदार्थ एवान्तर्भवन्ति।

चिदचिच्छक्तिविशिष्टेश्वरस्य जगदुपादानत्वेऽपि विशेषणीभूतमायाया एव विकारित्वम्। आरम्भणाधिकरणे ब्रह्मप्रपञ्चयोर्न वयमत्यन्तभेदवादिनः घटपटयोरिव तदनन्यत्वपरश्रुतिविरोधात्। न च अत्यन्ताभेदवादिनः न वा शुक्तिरजतयोरिव एकतरत्वमिथ्यात्ववादिनः तत्स्वाभाविकगुणभेदपरश्रुतिविरोधात्। किन्तु शरीरशरीरिणोरिव गुणगुणिनोरिव च विशिष्टशिवाद्वैतवादिन इत्युक्तत्वात् न विकारित्वं परशिवस्य।

स विशेषाद्वैतमेव शिवाद्वैतम्। अनन्तकल्याणगुणैकनिधित्वं हेयगुणप्रत्यनीकत्वञ्च सप्रपञ्चस्य परब्रह्मणो लक्षणम्। नित्यनिर्मलगुणविग्रहविशिष्टं शिवरूपमेव ब्रह्म मुक्तप्राप्यम्। न निर्विशेषं ब्रह्मास्तीति **उपस्थितेऽतस्तद्वचनादित्यधिकरणे** निर्णीतम्। अतो मुक्तप्राप्यं ब्रह्म शिवादन्यं न भवति। किन्तु सगुणं सविग्रहं सप्रपञ्चं सविशेषं शिवस्वरूपमेव। आकाशसूर्याविव न कोऽपि दोषस्स्पृशति परशिवम् रूपगुणनिषेधश्रुतीनां रूपगुणवत्येव शिवे परब्रह्मणि हेयरूपगुणनिषेधपरत्वात्। स्वतन्त्रस्य शिवस्य शरीरसाम्ये सत्यपि जीववत् न तद्गतदोषोपपत्तिः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

जगदुभयकारणत्वम्

कूटस्थजगदाकारेण परिणामे सत्यपि नामरूपविभागानर्हसूक्ष्मचिदचिच्छक्तिविशिष्टस्य परमेश्वरस्य कारणत्वं नामरूपविभागार्हस्थूलचिदचिच्छक्तिविशिष्टस्य कार्यत्वञ्च निगदितम्। ईश्वरे जगदुभयकारणत्वञ्च श्रुतिसिद्धमेव **यथोर्णनाभि सृजते गृह्णते च। तदात्मानं स्वयमकुरुतेत्यादिना।**

मुक्तिः

अनादिना कर्मनिगुडेन बद्धो जीवः तत्तत्फलभोगानुगुणमायामयबहुकलेबरप्रविष्टः दुर्वारतापसंघातं पारवश्येन व्यपोहितुमकुशल एव मुह्यमानश्शोचति। ततश्शाम्भवदीक्षितोऽयं शिवपूजाध्यानादिभिः शिवप्रसादं प्राप्य अपहृतशोकः उपासनया भ्रमरकीटन्यायेन शिवसाम्यं सायुज्यञ्च प्राप्नोति। अत एवोक्त - निरञ्जनः परमं साम्यमुपैतीति कीटो भ्रमरयोगेन भ्रमरो भवति धृवम्। मानवश्शिवयोगेन शिवरूपत्वमाप्नुयादिति लिङ्गपुराणे चाभिहितम्।

उपासना

उपासनाविधिपराः निषदः। उपासनामन्तरा परमेश्वरमुक्तेरसम्भवः। शाङ्करभाष्ये निषदामुपासनाविधि-परत्वस्य निराकृतत्वेन तन्मतानुसारिणां परमेश्वरोपासनाविश्वासानुपपत्तेः। ये च मुमुक्षवस्तैरवश्यं नीलकण्ठभाष्यमेव पठितव्यम्।

शास्त्रदृष्ट्या तूपदेशो वामदेववदिति सूत्रेषूपासकस्योक्तशिवाभेदभावनायाः आरोपिताभेदभावनापरत्वात्। ब्रह्मभावाभ्यासेन विश्वामित्रागस्त्यादीनां स्वर्गान्तरकरणजलधिकबलनादिसामर्थ्यमिव मन्त्रिणां गरुडभावनया गरुडासाधारणधर्ममिव शिवोऽहंभावनया शिवसादृश्यं प्राप्नोत्युपासकः। अत एवोक्तं सुदर्शनाचार्यचरणैः। मन्त्री यथा गरुडभावनया गरुत्मानिति - अद्वैतमागमशिरोभिरुपासनायामुक्तं तदेव परमार्थतया न वाच्यमिति च।

निरन्वयोपासकानामत्रैव मुक्तिरित्यनियमाधिकरणादिसूत्रभाष्योक्तवाक्यानां स्वमतपोषणाय केचित्काराभिमतत्वेन परिकल्पितत्वाभ्युपपत्या न तानि नीलकण्ठाराध्याभिमतानीति ज्ञायते। यतः श्रुतौ **एष सम्प्रसादोस्माच्छरीरात्समुत्थाय परञ्ज्योतिरूपसम्पद्य स्वेन रूपेण निष्पद्यते** इत्युक्तम्।

न केवलाद्वैतमेव शिवाद्वैतम्

न निर्विशेषं ब्रह्म। तद्भावापत्तिर्न मुक्तिः। अंशाधिकरणे आभासा एव चेति सूत्रभाष्ये युक्तय आभासाः एवेति शुद्धाद्वैतस्य निराकृतत्वात्। केचन निर्गुणब्रह्मण एव शिवशब्दितत्वमभ्युपेत्य केवलाद्वैतमेव शिवाद्वैतमिति कथयन्ति। तादृशतत्त्वप्रतिपादकसूत्रभाष्यविरहात्तन्नोपपद्यते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

केवलाद्वैतबोधकशाङ्करभाष्ये परतत्वस्य नामरूपरहितत्वात्केवलाद्वैतस्य शिवाद्वैतप.. व्यवहार्यत्वानुपपत्तेश्च न शाङ्करभाष्यं शिवाद्वैतभाष्यमिति वक्तुं शक्यते। अत एव जगद्गुरु नीलकण्ठाराध्य-विरचितनीलकण्ठभाष्यस्यैव शिवाद्वैतभाष्यमिति व्यवहारस्सङ्गच्छते। तस्माद्वर्णानुयायिना-मष्टावरणपञ्चाचारशीलव्रतानां स्वेष्टलिङ्गधारिणां शैवानामिदमेव भाष्यमित्यूरीकर्तव्यम्।

इष्टलिङ्गधारणम्

यथा त्रिवृत्सूत्रे शरीरान्तस्थिते सत्यपि बहिर्धारणं विधीयते तथा प्राणेष्वन्तर्मनसो लिङ्गमाहुर्लिङ्गे सुषुप्तिरित्यादिश्रुतिभिर्विद्यमानेऽपि प्राणलिङ्गधारणे बाह्यशरीरे स्वेष्टलिङ्गधारणस्याप्यावश्यकत्वात्। यथा तृणादिदानेन प्रसन्ना गौस्तदन्तस्सारं क्षीरं ददाति तथैव बाह्यशिवलिङ्गपूजायाः निराकरणे स्वमनोरथसिद्धेरलब्धत्वात्। अतो यन्मनसा सङ्कल्पते तद्वाचा वदति तत्कर्मणा करोतीति श्रुतिरपि बाह्यलिङ्गपूजाया आवश्यकत्वं निर्धारयति। यत्र मनआदिप्रतीकमेव ब्रह्मेत्युपासते तद्धि प्रतीकोपासनम्। नहि मनआदेर्ब्रह्मगुणत्वाभावात् विकारत्वान्न च प्रतीकालम्बनानां ब्रह्मप्राप्तिः। दहराद्युपासकानां साक्षाद्ब्रह्मोपासकत्वेन न प्रतीकालम्बनत्वम्। तथैव शिवलिङ्गोपासकानाम्। अन्यथा काशी-श्रीशैल-रामेश्वरादिक्षेत्रवासिनां विश्वेश्वरमल्लिकार्जुनराम-लिङ्गेश्वरादिदेवानां सर्वेषां पूजाया निष्फलकत्वाच्च। निरर्थकत्वाच्च। शिवलिङ्गपूजाध्यानादिकं विना पशुत्वानिवृत्तेः। आत्मनः पशुत्वनिवृत्तिमन्तरेण शिवत्वं न जायते। ततश्चोत्तममध्यमाधमभेदत्रयसहितपाशुपत-व्रतधारणस्यानिवार्यत्वापत्तेश्च।

तस्माद्भस्मरुद्राक्षशिवलिङ्गधारणात्मकपाशुपतव्रताचारणपूर्वकं श्रवणमनननिदिध्यासनैः परशिवं प्रसन्नानामेव तत्साक्षात्कारद्वारा परममुक्तिरिति।

अणोरणीयानित्यपरिच्छिन्नस्याप्यण्वादिपरिमाणकलिङ्गरूपत्वस्याम्नातत्वेन विश्वेश्वरादिलिङ्गानां नास्तिकता प्रसक्त्या आन्तरिकं बाह्यमपि लिङ्गोपासनं साक्षाद्ब्रह्मोपासनमेव।

प्रमिताधिकरणे शब्दादेव प्रमितः।

अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति।
ईशानो भूतभव्यस्य न ततो विजुगुप्सते।।

इत्यादिना ईश्वर एव ब्रह्मपदवाच्यतया निर्धारितत्वेन शिवलिङ्गोपासनैव सर्वेषां कर्तव्यं न ह्यन्यदेवतार्चनमिति ब्रह्मसूत्रकारस्य व्यासमहर्षेराशय इत्यभिरूपमणीनां मनसि प्रस्फुरतीत्यत्र नास्ति शङ्कालवलेशोपि।

यथा न्यग्रोधबीजस्थश्शक्तिरूपो महाद्रुमः
तथा हृदयबीजस्थं विश्वमेतच्चराचरम्।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वह्नेरूष्मेव विज्ञेया रश्मिरूपा रवेरिव।
सर्वस्य जगतो वापि सा शक्तिः कारणात्मिका।।

शक्तिसन्धाने शरीरोत्पत्तिः। चैतन्यमात्मा इच्छाशक्तिरुमाकुमार। सुप्ते जगत्यन्तरात्मरङ्गस्थलस्थः संसारनाट्यप्रवर्तयिता जागरूकः परमेश्वर एक एवेत्यादिना अभिनवगुप्तपादाचार्यः काश्मीरे स्वतन्त्रशिवाद्वैतं प्रकटयामास।

प्रत्यभिज्ञादर्शनशब्देन प्राचीनकाले वसुगुप्तेन प्रचारितं स्पन्दशास्त्रं, सोमानन्देन प्रकटितं प्रत्यभिज्ञाशास्त्रञ्च गृह्यते। त्रिक्दर्शनं माहेष्वरद्र्शनमित्यादिनामभिः शाक्तं काश्मीरशैवं व्याप्तमासीत्।

अद्वैतम्

अद्वैतवादिनः बहवः वर्तन्ते। ते च ब्रह्माद्वैत-शून्याद्वैत-शब्दाद्वैत-शाक्ताद्वैत-ईश्वराद्वैत-शिवाद्वैत-नामभिर्व्यवह्रियन्ते च।

ईश्वराद्वैतमेव शिवाद्वैतम्। काश्मीरशिवाद्वैते स्पन्दशास्त्रस्य प्राधान्यं दीयते। स्पन्दो नाम शक्तिरेव। शिवप्रधानावस्थायां विश्वबीजशक्तिर्विलीना भवति शिवे। शक्तिप्रधानावस्थायामपि शिवाभावः वर्तते। चिदंशश्शिवभावः। आनन्दांशश्शक्तिभावः। इयञ्च ज्ञानभक्त्योस्सामञ्जस्यावस्था। शिवशक्त्योर्भेदो नास्ति। ज्ञानमार्गभक्तिमार्गयोरधिकरणं शिवाद्वैतमेव।

षट्पञ्जरिकास्तोत्रे श्रीशङ्कराचार्येणापि कथितम् -

सत्यपि भेदापगमे नाथ तवाहं नमामकीनस्त्वम्।
सामुद्रो हि तरङ्गः क्वचन समुद्रो न तारङ्गः।।

अत एवोक्तं संविदुल्लासेप्यद्वैतमपि द्वैते पर्यवस्यतीति तदित्थम्।

तादन्यदसत्यकल्पमपरैरद्वैतमाख्यायते
तद्द्वैते वत पर्यवस्यति कृतं वाचाट दुर्वज्ञया।
एते ते वयमेवमभ्युदयिनोः कस्यापि कस्याश्चिद-
प्यालस्योत्सितमैकरस्यमुभयोरद्वैतमाचक्ष्महे।।

शैवे शिवजीवैक्य-लिङ्गाङ्गसामरस्य-शिवसायुज्यतामभिश्शिवशक्त्यो(शिवजीवयो)रैक्यं भ्रमरकीटन्यायेन समभिहितम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ईश्वराद्वैतब्रह्माद्वैतयोर्भेदः

ब्रह्मवादे सदसद्विलक्षणत्वमनिर्वचनीयत्वञ्च मायायाः प्रतिपाद्यते। शुद्धब्रह्मा विवर्तात्मकः। अनादिप्रवर्तमानव्यवहारस्याधिष्ठानभूतः। एतस्य कर्तृत्वं स्वातंत्र्यं च कल्पितम्। यथार्थतया नास्ति। स्रष्टृत्वादिधर्मा आरोपिताश्चाध्यस्ताश्च भवन्ति। विश्वं दर्पणदृश्यमाननगरीवद्भाति। बौद्धशास्त्रोक्तसंवृत्तिरेव मायाशब्देन कथ्यते। एषा स्वाभाविकी न हि। साक्षीभूतः भावाभावहीनः सृष्टिस्थितिसंहारहेतुरात्मा कर्ता न हि। ज्ञानस्य क्रियायाश्च कर्तृता वर्तते। ज्ञानक्रिययोरुन्मुखतैवेच्छा कथ्यते। इच्छादिशक्तित्रयसहितस्स्वातंत्र्यमयः कथ्यते।

ब्रह्मव्यतिरिक्तजीवपदार्थो नास्तीति शङ्कराद्वैतमेव ब्रह्माद्वैतेन व्यवह्रियते।

ईश्वराद्वैतम्

ईश्वराद्वैते माया अज्ञानं च भवति। किन्तु तत्प्रवृत्तिः स्वातंत्र्यमूलिका। यथा नटः बहुभूमिकास्स्वेच्छया गृहीत्वा नानाप्रकारकाभिनयं करोति तथा परमेश्वरश्च नानावेषधारी स्वलीलाविलासान्प्रदर्शयति।

स च स्वतन्त्रः। स्वरूपस्य प्रकटनाप्रकटनयो रविरिव समर्थः। यथा रविः स्वसृष्टमेघेनाच्छादितोप्यनाच्छादित एव भवति तथैव परमेश्वरोपि क्रीडापरायणः लीलावस्थायां विश्ववैचित्र्यलीलां स्वस्सृष्टशक्त्या प्रदर्शयति। स्वातंत्र्यशक्तिविजृम्भणमेवाऽज्ञानमुच्यते। एषा स्वाभाविकशक्तिः।

इच्छा सैव स्वच्छा सन्ततसमवायिनी शक्तिः।
स चराचरस्य जगतो बीजं निखिलस्य निजविलीनस्य।।
स्वेच्छाशक्त्युद्गीर्णं जगदात्मतया समाच्छाद्य
निवसन् स एव निखिलानुग्रहनिरतस्सदाशिवोभिहितः।।

एवं षट्त्रिंशत्तत्त्वसंदोहे भोजराजेन कथितम्।

शक्तिविशिष्टशिवः प्रपञ्चात्मना परिणमति। अत एवोक्तं प्रत्यभिज्ञाकाशिकायामुत्पलदेवेन भाष्ये च।

चिदात्मैव हि देवोन्तस्थितमिच्छावशाद्बहिः।
योगीव निरुपादनमर्थजातं प्रकाशयेत्।। इति।

शक्तयोस्य जगत्सर्वं शक्तिमांस्तु महेश्वरः।
शक्त्यादि च पृथिव्यन्तं शिवतत्त्वसमुद्भवम्।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

परिणामवादः

काश्मीरदेशस्थितशिवाद्वैते विवर्तवादोऽङ्गीकृतः चिच्छक्तिरेव प्राधान्यम्। शिवसूत्राण्येव तस्य कारणभूतानि। ब्रह्माद्वैतपदे वर्तमानस्य ब्रह्मशब्दस्य शिवशब्दत्वमुक्तम्। प्रपञ्चस्य परमेश्वरप्रतिबिम्बत्वं प्रतिपादितम्। यथा सुवर्णमयानि कुण्डलानि तथैवेदं जगत् ब्रह्ममयं कारणस्यैव सत्यत्वं तथाभासित्वमुच्यतेति प्रायशः शक्तिप्राधान्येन शङ्कराद्वैतमेवानुसरतीव। विवर्तपरिणामाभ्यां द्वाभ्यामप्युपपद्यतेति संवित्प्रकाशे यदुक्तं तदयुक्तमेव। शिवश्च शिवश्च शिवौ तयोरद्वैतं शिवाद्वैतमित्युत्पत्त्या कारणब्रह्मैव कार्यब्रह्मात्मना परिणमति।

चिदचिदाकारेण परिणतः परमेश्वरः स्वशरीरभूतं सूक्ष्मचिदचिद्वस्तु स्वस्माद्विभज्य **तत्सृष्ट्वा तदेवानुप्राविशदि**ति श्रुत्या स्वतो विभक्ते चिदचिद्वस्तुनी स्वयमात्मतया प्रविश्य **सच्च त्यच्चाभवदि**ति श्रुत्या **स्वतो परिणतो भवेदि**ति सूत्रभाष्योक्त्या परिणामवाद एव प्राचीनः।

प्रकृत्यधिकरणे भाष्यकारेण **अपि च कारणरूपविकारो हि परिणामः पूर्वरूपपरित्यागेन रूपान्तरापत्तिः परिणामः इति** परिणामलक्षणमुक्त्वा परिणामवादस्यैव स्वीकृतत्वात् विवर्तवादस्य नाम्नाप्यनुल्लेखितत्वाच्च विवर्तवादप्रतिपादकश्रुतिसूत्रविरहान्न विवर्तवादो भाष्यकाराभिमतः।

निगमागमप्रतिपादितपरिणामवाद एव स्वीकरणीयः।

विवर्तवादः

अप्रच्युतपूर्वस्वरूपस्याऽसत्यनानाकाराभासो विवर्तः। तदुक्तम् -

सतत्त्वतोऽन्यथा प्रथा विकार इत्युदीरितः।
सतत्त्वतोऽन्यथा प्रथा विवर्त इत्युदाहृतः।।

विवर्तवादो मायावादिवेदान्तिनाम्। तन्मते कारणमेव कार्यस्वरूपेण भासते। इति कारणस्यैव सत्यत्वम्। न तु कार्यस्य सत्यत्वम्। यथा शङ्करभारतीमते शुक्तौ - इदं रजतमिति ज्ञानानन्तरमधिष्ठानभूतशुक्तिज्ञाने जाते बाधज्ञानेन पूर्वज्ञातं रजतं यथा निवर्तते तद्वत् ब्रह्मज्ञाने जाते सति जगदादिभेदप्रपञ्चो निवर्तते। तदुक्तम् -

ततो निरंश आनन्दे विवर्तो जगदिष्यताम्।
अवस्थान्तरभानं तु विवर्तो रज्जुसर्पवदिति।।

विवर्तवादखण्डनम्

तदिदं वेदान्तिमतमपि न समीचीनतामर्हति। असतिबाधे प्रत्यक्षसिद्धपदार्थस्य मिथ्यात्वासम्भवात्। यत्र हि बाधज्ञानं किञ्चिदन्यकारणं वा भवति तत्रैव मिथ्यात्वस्य वक्तुं शक्यत्वात् तथा च कापिलसूत्रम्। जगत्सत्यत्वमदुष्टकारणजन्यत्वात् बाधकाभावादिति। तत्र दुष्टकारणजन्यं यथा पीतशङ्खज्ञानम्। बाधकञ्च

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

नेदं रजतमिति ज्ञानम्। न चेदं तथा। प्रकृत्यादीनामदुष्टत्वात् नेदं जगदिति प्रत्ययाभावात् बाधकञ्च नास्ति। तस्माज्जगतो मिथ्यात्वासम्भवात् विवर्तवादोऽसङ्गत एव।

व्यासदेवोऽपि परिणामादिसूत्रैः प्रपञ्चब्रह्मणः परिणामं प्राप्नोति न तद्विवर्तमिति जगतोऽनित्यत्वमेव न मिथ्यात्वमिति सारम्। श्रुतिरपि **यदिदं किञ्च। तत्सत्यमित्याचक्षते। भोक्ता भोग्यं प्रेरितारञ्च मत्वा। सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयदि**त्यादिना जगतस्सत्यतां प्रतिपादयति।

तस्मान्नीलकण्ठाराध्यैः परिणामवादस्यैवाङ्गीकृतत्वात्परोक्तविवर्तवादस्य सर्वत्र बहुधा दूषितत्वाच्च सर्वैरप्यास्तिकैः परिणामवाद एवाङ्गीकर्तव्यः।

भेदाभेदः

न तु भेदाभेदपरश्रुतिसूत्रप्रामाण्याद्भेदाभेद एव शैवसिद्धान्त इति वाच्यं तेजस्तिमिरयोरिव विरुद्धस्वभावयोर्भेदतदभावयोर्वस्तुविरोधेनैकत्रावस्थितेरसम्भवात्।

पटकुटीरवदहिकुण्डलवच्च स्थितस्य चिदचिदाकारपरमशक्तिविशिष्टस्य शिवस्याऽद्वितीयत्वश्रवणात्। शक्तिविशिष्टशिवाद्वैत-विशिष्टशिवाद्वैत-शिवाद्वैतनामभिर्वेदान्तेषु सुप्रसिद्धः नीलकण्ठाराध्यसिद्धान्त एव गरीयान् साधीयानिति विज्ञायते। अत एव अप्पयदीक्षिताभेदाभेदकल्पं विशिष्टाद्वैतं साधयिष्याम इत्यवादिषुः।

पिण्डितार्थः

भक्तानुग्रहार्थं ध्यानपूजानिमित्ताय शिवो महालिङ्गरूपं धत्ते। पाशुपतदीक्षितः पुमान् भ्रमरकीटन्यायेन परशिवमुपास्य शिवसायुज्यमाप्नोतीत्येतादृगर्थबोधकमनन्यसाधारणं महाभाष्यं विरच्य न त्वस्मानेवानुजग्राह जगद्गुरुभगवान्भाष्यकारो नीलकण्ठाराध्यः, किन्तु सर्वानपि भारतीयान्।

श्रीनीलकण्ठभाष्यम्

इतःपूर्वमिदं भाष्यं चेन्नबोम्मभूपालानुग्रहेण श्रीमदप्पयदीक्षितेन कृतया शिवार्कमणिदीपिकाव्याख्यया श्रीकण्ठभाष्यमितिनाम्ना कुम्भकोणवास्तव्येन हालास्यनाथशास्त्रिणा मुद्रापितम्। श्री श्रीनिवासाचार्येण मैसूरनगर्यां मूलसूत्रमेव मुद्रापितम्।

साम्प्रतं नीलकण्ठभाष्यनाम्ना शिवचिन्तामणिप्रभाव्याख्यया साकमेकमेकशिलानगरवासिभिराकारपु नरसिङ्गगुप्तैः मुद्रापितम्। आदौ श्री मुदिगोण्ड लिङ्गय्यशास्त्रिणा शिवपुरं राजयाराध्येन च प्रेरिताः नागलिङ्गशास्त्रिणः तद्द्रव्यसहायेन चतुस्सूत्रीपर्यन्तमलिखन्। पश्चाल्लेखने मुद्रणे च यावद्धनं मुख्यं तावद्धनं दशसहस्ररूप्याणि दत्वा एतद्भाष्यमुद्रापयितुः नरसिङ्गगुप्तस्य व्याख्यानकर्तुः नागलिङ्गशास्त्रिणश्च जीवितचरितं सङ्ग्रहेण मया कथ्यते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

महोपाध्यायशिवयोगि मुदिगोण्ड नागलिङ्गशिवाराध्यः

जगद्गुरु नीलकण्ठाचार्यकृतप्रस्थानत्रयस्य व्याख्यानकर्ता गुण्टूरमण्डलान्तर्गतताडिकोण्डग्रामवास्तव्यः यजुश्शाखायामयं भारद्वाजसगोत्रे समुदभूत्। आपस्तम्बसूत्रः भोजराजगुरुरुद्भटाराध्य एतेषां मूलपुरुषः।

एतस्य नागलिङ्गशास्त्रिणः पिताऽघोरमन्त्रोपासकोऽघोराराध्यः। माता च ज्वालाम्बिका। जाया च लिङ्गाम्बिका। ज्येष्ठभ्राता नागमल्लयाराध्यः। कनिष्ठभ्राता रामलिङ्गशास्त्री। दीक्षागुरुः मल्लपल्लिवीरेशलिङ्गाराध्यः। षष्ठिसप्तत्युत्तराष्टादशहूणशके (१८७६) निजजन्मना समलमकार्षीत्। एतस्य तिस्रः कन्यकाः, द्वौ सुब्रह्मण्यशास्त्री अघोरमल्लिकार्जुननामधेयौ पुत्रौ च वर्तेते। पञ्चनदक्षेत्रप्रान्त नदुक्कावेरीग्रामवास्तव्यश्चिदम्बरनगरप्रचारितब्रह्मविद्यादिपत्रिकाधिपतिः परसमयपञ्चानन पाञ्चजन्यबिरुदश्श्रीनिवासदीक्षितो वेदान्तविद्यागुरुः।

रामनाथनगरसंस्थाने व्याकरणशास्त्रे परीक्षां ददुः। तेनालिनगरनिवासं कृतवतः संस्कृतकलाशालायां व्याकरणसाहित्योपाध्यायपदवीमलङ्कुर्वाणस्यैतस्यैकादशवत्सराः गताः। ततः नीलकण्ठभाष्यस्य शिवचिन्तामणिप्रभानामकव्याख्यां रचयामास। ब्रह्मपथादिग्रन्थरत्नानि बहूनि व्यरचयत्। एतस्य पाण्डित्यस्यानभिज्ञाः न केऽपि सन्त्यस्मिन् देशे।

श्रौतशैवमतप्रकाशिका-शैवरहस्यबोधिनी-ज्ञानबोधिनीतिनामभिः पत्रिकास्तिस्रः स्थापयित्वा मतसेवां भाषासेवाञ्च चकार। १९२९ संवत्सरे महोपाध्यायबिरुदमान्ध्रसारस्वतसभायामवाप। गोमाहात्म्यं लिखित्वा प्रथमबहुमतिं लेभे।

आत्मकूरुसंस्थानपण्डितेन बालसरस्वतीतर्कतीर्थेत्यादिबिरुदांकितेन श्रीनिवासाचार्येण वेणुवंकग्रामनिवासिना कन्दाललवरदाचार्येण च मतविवादं कृत्वा विजयं प्राप। तथैव चेन्नपुर्यां डि. गोपालाचार्यकृतवैष्णवसभायामप्यन्यान्विमतपण्डितान्समजयत्।

बहुवारं शैवसभाध्यक्षपदवीमलङ्कृत्य शैवमतप्राशस्त्यमुद्घोषयामास। १९३७ वत्सरे षष्ठिपूर्तिमहोत्सवो महोत्सवेन संवृत्तः। भाष्यचर्चासु स्वमतविमतपण्डितान्विजित्य नीलकण्ठभाष्यमेव सर्वेषां मोक्षमार्गदर्शकमिति निश्चिकाय। विजयवाटिकास्थितस्य शैवमहापीठस्याधिपत्यं प्रथममवाप्य शिवयोगि शैवमहापीठाधिपतिः नागलिङ्गशिवाराध्य इति प्रथां तन्मूलककीर्तिं चालभत्।

आकारपु नरसिङ्गगुप्तः

जगद्गुरु नीलकण्ठभाष्यव्याख्यालेखनमुद्रणद्रव्यदाता वरङ्गलनगरवास्तव्यो महाराजश्री आकारपु नरसिङ्गगुप्तः। अयं च शिवपूजाधुरन्धरः। वैश्यशिरोमणिः। वरङ्गलनगरे विश्वेश्वरालयं महान्तं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शिवलीलासङ्कलितं निर्माय श्री. लो.निगमाचार्यैः मुदिगोण्ड पापयाराध्यैः वीरभद्राराध्यैश्च शिवलिङ्गप्रतिष्ठां कारयामास।

आकारपु नरसिङ्गगुप्तस्य श्रीमत्यावनन्तलक्ष्मीदेवी सुशीलादेवी नामधेये द्वे भार्ये वर्तेताम्। एतस्य पिता चेन्नयगुप्तः। माता च राजमाम्बा। औरसपुत्रः पद्मनाभो दशमवत्सरे ममार। अतः द्वितीयविवाहं चक्रे। तस्या अपि तथैव सन्तानाभावात् सौ. सुशीलानाम्नीं बालिकां राजचेन्न विश्वेश्वरनामकं पुत्रं च दत्ततया स्वीचकार। एतां सुशीलां म. चकिलं नागभूषणाख्यस्य दत्तवान्। एतयोर्द्वयोरपत्यभूतां चिरञ्जीविनीं सौभाग्यवतीं शरच्चन्द्रिकाभिधाम् आत्मनः दत्तपुत्रस्य राजचेन्न विश्वेश्वरस्य दत्वा परिणयं चकार आकारपु नरसिङ्गगुप्तः।

स्वेष्टलिङ्गधारी नरसिङ्गगुप्तः प्रतिसोमवासरं सौवर्णपूजापरिकारैः तद्व्यतिरिक्तदिनेषु राजतपात्रैश्च महतीं शिवपूजां करोति। पूजासमये शतरुद्रीयपाठकानां मुलुगु वीरमल्लयाराध्य मधुमहादेवघनपाठिप्रभृतीनां गुरोः मुदिगोण्ड रामलिङ्गाराध्यस्य च प्रत्यहं सत्कारं च करोति।

अयं च नरसिङ्गगुप्तः कन्यकापरमेश्वरी धर्मकर्ता। पितृस्थापितधर्मसत्रं वर्धयामास। विश्वेश्वरसंस्कृतकलाशालां स्थापयित्वा प्रतिवत्सरं पञ्चसहस्ररूप्यादायप्रदायकान्भवनादीन् दत्वा निर्माय पालकसंघं स्थिरनिर्माणं कृतवान्। शैवग्रन्थान्बहून्मुद्रापयामास। शङ्कराराध्यचरितं मल्लंपल्लिवीरेश्वरशर्मकृतं कृतित्वेन परिजग्राह। श्री नागलिङ्गाराध्यकृत् शिवचिन्तामणिप्रभायाश्च कृतिपतिरयमेव। बहूनां विद्यार्थिनामुचितभोजनवसतीः कल्पयित्वा विद्याभ्यासं कारयामास। अनेकेषामर्थिनां यथाशक्तिदानं चकार। संवत्सरवेतनानि दत्वा बहूनि कुटुम्बानि पोषयामास। सुन्दरतमं प्रासादं निर्ममे। अन्नसत्रं स्थापयामास। गुरुलिङ्गजङ्गमपादतीर्थप्रसादसेवनया पूतात्मायं महद्धनं व्ययीकृत्य स्वोद्याने स्वसमाधिं कारयामास।

कृतिदातारो श्री लो.मुदिगोण्डनागलिङ्गशास्त्रिणः, कृतिपतयो महाराजश्री आकारपु नरसिङ्गगुप्ताश्च साम्प्रतं कैलासवासिनः।

गतेपि भर्तरि तदाज्ञापरिपालिन्यौ श्री अनन्तलक्ष्मीदेवी सुशीलादेवी च निजभर्तृसमारब्ध-नीलकण्ठभाष्यमुद्रणकार्यं निर्वाह्य सरस्वतीदेव्याः नूतनं समनोहरं सुवर्णखचितं शिवचिन्तामणिप्रभा-नामकमाभरणमर्पयन्तीदानीमित्ययं विषयः प्रमोदस्य परां काष्ठामधिरोहति।

आचन्द्रार्कमेतद्वंशः श्री अन्नपूर्णाविशालाक्षीसमेत काशीविश्वेश्वरानुग्रहेणायुरारोग्यैश्वर्यपुत्रपौत्रैः कीर्तिप्रतिष्ठाकरः अभिवर्धतामित्याशास्महे वयम्।

भाष्यप्रकृतियः

अस्माभिश्चतस्रो भाष्यप्रतिकृतयस्सङ्गृहीताः। तासां मध्ये देवादिसंस्थानाधिपतेः कीर्तिशेषिणः कन्दुकूरि बालसूर्यप्रसादभूपालाल्लब्धनीलकण्ठभाष्यस्य बहुषु स्थलेषु भेदः वर्तते। दिङ्मात्रमुदाहरामः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यत्र यत्र केचिदन्ये चेत्यादिना पदान्युक्तानि तत्र तत्र तादृक्पदानि वाक्यानि न सन्ति। अतः स्वमतपोषणाय पदकल्पितत्वमभ्यूह्यते। प्रथमपादस्थितषोडशसूत्रे गुरुलिङ्गजङ्गमात्मकत्रिविधस्वरूपतापन्नस्येत्यादि वाक्यानि भाष्यान्तरेषु न सन्ति।

देविडीसंस्थानभाष्ये नवत्युत्तरशतसङ्ख्याकान्यधिकरणानि। श्रीकण्ठभाष्ये द्व्यशीत्युत्तरशतसङ्ख्याकानि। चतुष्षष्ट्युत्तरपञ्चशतसङ्ख्याकानि सूत्राणि देविडीभाष्ये। पञ्चचत्वारिंशत्युत्तरपञ्चशतसङ्ख्याकानि सूत्राणि श्रीकण्ठभाष्ये।

अतः नीलकण्ठभाष्यं प्राचीनं संस्कृतमिति विज्ञायते।

रेणुकं मदुलं चैकोराममुद्भटदेशिकं
श्रीपतिं मञ्चनञ्चैव मल्लिकार्जुनपण्डितं
विश्वाराध्यं वेमनं च प्रणमाम्यभिमताप्तये।।

एते नीलकण्ठभाष्ये वर्तन्ते। नान्यत्र।

एतद्भाष्यव्याख्यालेखने मुद्रणे मुद्रापणे च साह्यकारिणां मुलुगुवीरमल्लयाराध्य शिवपुरं मल्लयाराध्य मूलंपल्लि राजशेखरशास्त्रि मुदिगोण्ड सुब्रह्मण्यशर्मप्रभृतीनामन्येषां ग्रन्थकर्तृणां च धन्यवादानर्पयामः। मुद्रणद्रव्यदातॄणामन्वयमाचन्द्रतारकमभिवर्धतामिति पौनःपुन्येन परशिवमभ्यर्थयामः।

श्रेयांसि बहुविघ्नानीति प्राचीनाभाणकानुसारेणैतद्भाष्यलेखनमुद्रणमुद्रापणेषु महती प्रतिबन्धपरम्परा समाजगाम। तथापि परब्रह्मणः परशिवस्य कृपया भाष्यमुद्रणं समाप्तमासीदिति निवेदयामि सहृदयेभ्य इति सर्वं शिवम्।

शिवं मूर्तित्रयातीतमष्टमूर्तिं सशक्तिकम्।
मूर्तामूर्तमहं वन्दे निर्गुणं परमेश्वरम्।।

विद्वच्छिरोमणिः

एकशिलापुरी
१२-६-५३

मुदिगोण्ड वीरेशलिङ्गशास्त्री
एकशिलानगरीस्थित-
विश्वेश्वरसंस्कृतान्ध्रकलाशालाप्रधानाध्यापकः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

श्री शिवाय गुरवे नमः

भूमिका

अयि भोः पण्डितमणयः

किञ्चिदिहावधत्त

विदितमेव हि श्रीमतां दुरन्तसंसारार्णवमग्नचेतनजातसमुत्तितारयिषुणा नारायणेषुणा समवतारितं बृन्दमुपनिषदां। अथापि तदीयं हृदयं कलुषीकृतमनेकैर्मुनिवरैर्विविधदर्शनप्रणयनपरैरित्यौपनिषदर्थनिर्दिधारयिषो-र्जगदीशुतुराज्ञया तादर्थ्यपरिगृहीतनारायणापरावतारेण भगवता पराशरकुमारेण समारचितमिदमुत्तरं मीमांसाशास्त्रम्।

ततश्चैतत्परमबोधरत्नखनिना श्रीबोधायनमुनिना समनुगृहीतयावृत्या समलङ्कृतमासीत्। तथापि बहुभिः पूर्वाचार्यैः कलुषीकृतभावमासीदिति भगवता श्रीनीलकण्ठशिवाराध्येन श्रुतिसूत्रवृत्तिसामरस्याऽदूष्येण भाष्येण भूषितमासीदिति।

व्याससूत्रमिदं नेत्रं विदुषां ब्रह्मदर्शने।
पुर्वैः कलिषुतं नीलकण्ठे नाद्य प्रसाद्यते।।

नीलकण्ठो विवृणुते श्रीकण्ठोपसमाह्वयः।
बोधायनोक्तिमालम्ब्य ब्रह्मसूत्रं यथाश्रुतिः।।

इति पद्याभ्यां विज्ञायते।

ततोपि कलिमहाराजकलितकलहकोलाहलाकुलिते शैवादिमतजाते सङ्घीभावं पिपादयिषुणा श्रीशङ्कराचार्येण मतभेदनोदकं शुद्धाद्वैतपरभाष्यं विरच्य प्रख्यापितमासीत्।

अथापि श्रीहरिभक्तिमुद्दिधीर्षुणा श्रीरामानुजाचार्येण श्रीभाष्यं विरच्य प्रचारितमासीत्।

ततश्च पृथगाचार्यपीठमधिरुरुश्रुणा पूर्णप्रज्ञेन भाष्यान्तरकल्पनेनाकल्पितम्।

एवमन्यैरपि भास्करनिम्बार्कप्रभृतिभिर्विरचितानि भाष्याण्युपलभ्यन्ते। विद्यमानेषु ब्रह्मसूत्रभाष्येषु श्रीनीलकण्ठीयमेव प्राचीनमिति विज्ञायते। तथाहि - शङ्करविजये **शिव तत्परसूत्रभाष्यकर्ता यमिनामृषभेण नीलकण्ठम्** इत्यादिपद्याभ्यां श्रीनीलकण्ठाराध्यस्य शङ्कराचार्यसमकालिकत्वोक्तावपि तत्र शङ्कराचार्यात्प्राचीनानामेव भट्टभास्करादीनां तत्समकालिकत्वग्रहणेन भाष्यकर्तुर्नीलकण्ठाराध्यस्यापि ततः प्राचीनत्वमवगम्यते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

किञ्च - श्रीमदप्पयदीक्षितेन्द्रैः शिवार्कमणिदीपिकायाम्। **व्याससूत्रमिदं नेत्रम्** इति पद्यविवरणे एवमर्वाचीनभाष्यप्रणेतृणां तु पूर्वपूर्वोपदेष्टार आसंस्तदानुद्दिश्य पूर्वाचार्यैरित्युक्तिरित्यनेनाऽन्येषां भाष्यप्रणेतृणामर्वाचीनत्वोक्त्याऽपि भाष्यकर्तुर्नीलकण्ठस्य तेभ्यः प्राचीनत्वमाविष्कृतम्।

ततश्च श्रीनीलकण्ठभाष्यं प्रकृतिस्तदन्यानि भाष्याणि विकृतय इति विज्ञायते। तथाहि - **पुरुषार्थोऽतश्शब्दात्** इत्यधिकरणे नीलकण्ठभाष्ये **तच्छ्रुतेः - यदेव विद्यया करोती**ति श्रुत्यैव विद्यायाः कर्मसु विनियोगादपि कर्माङ्गत्वं यत्करोति तद्विद्ययेति हि श्रुतेरर्थ इति।

शाङ्करभाष्ये -

तच्छ्रुतेः - यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति च कर्मशेषत्वश्रवणाद्विद्याया न केवलायाः पुरुषार्थहेतुत्वमिति।

रामानुजभाष्ये -

तच्छ्रुतेः - श्रुतिरेव हि विद्यायाः कर्माङ्गत्वमाह। **यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवती**त्यादि।

नीलकण्ठभाष्ये -

तच्छ्रुतेः - समन्वारम्भणात्, तं विद्या कर्मणी समारभेते इति विद्याकर्मणोरेकस्मिन्पुरुषे साहित्यं दृश्यते। अतश्च तदङ्गत्वमेव विद्याया इति।

शाङ्करभाष्ये - तं विद्या कर्मणी समन्वारभेते इति च विद्याकर्मणोः फलारम्भे सहकारित्वदर्शनान्न स्वातन्त्र्यं विद्यायाः। इति।

रामानुजभाष्ये - तं विद्या कर्मणी समन्वारभेते इति विद्याकर्मणोस्साहित्यं च दृश्यते। साहित्यञ्चोक्तेन न्यायेन विद्यायाः कर्माङ्गत्वे सत्येव भवति। इति।

एतानि भाष्याणि विमृशतां निष्पक्षपातचेतसां पौर्वापर्ये आर्जवकौटिल्ये च विशदमवभासेत इति न तदधिकृत्य वक्तव्यमास्ते बहु।

यद्यपीदं भाष्यं श्रीमद्भिरप्रतिमवैदुष्यभूषणैरप्पयदीक्षितेन्द्रैर्विरचितया शिवार्कमणिदीपिकाख्यया व्याख्यया भूषितमेव। तथापि तैश्शुद्धाद्वैतमताभिसानधनाढ्यतया बहुष्वधिकरणेषु व्यत्यासितमित्यवगम्यते।

तथा च - सन् घटः, सन् पटः इति सर्वत्र दृश्यत एव सद्रूपस्य ब्रह्मणो व्याप्तिरित्यादीनि शुद्धाद्वैतपोषकाणि वाक्यानि जन्माद्यधिकरणेषु प्रक्षिप्तानि।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

निरन्वयोपासकानामत्रैव मुक्तिरित्यादिवाक्यानि च अनियमाद्यधिकरणेषु प्रक्षिप्तानि।

प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासादिति सूत्रभाष्ये नीलकण्ठीये **अतो घटादिष्वनुवृत्तं सन्मात्रं प्रत्यक्षं ब्रह्मेति विरुद्धमेवे**ति वचनेन सन् घटः, सन् पटः इत्यादिवचनं प्रक्षिप्तमिति विशदमवगम्यते। अन्यथा भाष्यकाराणां स्ववचनव्याघातदोषापत्तेरवार्यत्वात्।

न च भाष्ये - प्रक्षिप्तघटनं निष्प्रयोजनत्वादसम्भाव्यमिति शङ्क्यम्। तैरेव दीक्षितेन्द्रैरेतादृशप्रक्षिप्तवचनान्येवावलम्ब्य शिवाद्वैतनिर्णये श्रीकण्ठशिवाचार्याणां शुद्धाद्वैत एव परमसिद्धान्त इति प्रसाधितेन विशिष्टशिवाद्वैतभाष्यकाराणामपि स्वाभिमते शुद्धाद्वैत एव परमतात्पर्यमिति प्रख्यापनेन प्राकृतजनावर्जनस्यैव परमाभिमतत्वेनावगम्यमानत्वात्। न केवलमिदं भाष्यं तैस्स्वाभिमतशुद्धाद्वैतसाधकवाक्यप्रक्षेपेण व्यत्यासितम्। किन्तु स्वाऽनभिमतलिङ्गधारणोपपादकवाक्यानामुत्क्षेपेणापि व्यत्यासितम्। अत एव नीलकण्ठभाष्ये देशान्तरेषूपलभ्यमानानि क्रियासारादिप्राचीनग्रन्थेषु नीलकण्ठभाष्ये **मौनवदितरेषाम्** इत्याद्यधिकरणेषूक्ततयोदाहृतानि महालिङ्गधारणोपपादकानि वाक्यानि तैस्संस्कृते श्रीकण्ठीये नोपलभ्यन्ते।

न ह्यभिमतानि प्रक्षिप्तमानानामनभिमतानामुत्क्षेपणमकिञ्चित्करमिति न तत्र वक्तव्यं बहु। न केवलं कतिपयवाक्यसंयोजनवियोजनाभ्यामेव व्यत्यासितम्। अपि तु भाष्यकर्तुः पौरुषनाममात्रपरिग्रहपूर्वकं निजनामोत्सर्जनेन नाम्नापि परिवर्तितमिति।

नीलकण्ठो विवृणुते श्रीकण्ठोपसमाह्वय इति वचनेन श्रीकण्ठनामपौरुषेयमिति व्यक्तमेव। वास्तवमेवंविधं व्यत्यासमजानन्तः कतिचिदिदं श्रीकण्ठभाष्यं नीलकण्ठभाष्यादन्यदिति भ्रान्तिमुपजग्मिरे। अन्येप्येवंविधभ्रान्तिमेव मूलीकृत्य नीलकण्ठभाष्यं नष्टमिति च मन्यन्ते। नेदमत्यन्तविस्मयावहं यतश्च दीक्षितवर्याणामप्रतिमविद्यानिधितया निस्तुलप्रशस्तिशालित्वात्तेषु ग्रन्थव्यत्यासकरणाद्यल्पदोषाणां हठादविश्वसनीयत्वात्। एवमपि वस्तुवृत्तं विमृश्य निश्चिन्वतां विपश्चितामत्र न किमपि संशयास्पदमित्यास्ताम्।

वस्तुतस्तु **शिवतत्परसूत्रभाष्यकर्ता यमिनामृषभेण नीलकण्ठम्** इत्यादि शङ्करविजयपद्यपर्यालोचनया शैवसूत्रभाष्यकर्तुर्नीलकण्ठसमाख्यैव मुख्येति विज्ञायते।

अत एव प्राञ्चः श्रीकण्ठसंज्ञया विकृतमपि **भाष्यमेकदेशविकृतमनन्यवद्भवती**ति न्यायेन नीलकण्ठभाष्यमित्येव व्यवहरन्ति। अमुमंशं नीलकण्ठभाष्यं नष्टमिति विवदन्तः परेप्यभ्यनुयन्त्येव।

ये तावन्नीलकण्ठभाष्यं नष्टमिति मन्वते तैरवश्यं शैवसूत्रभाष्ये प्राचीने द्वे शैवभाष्यकर्तारै च प्राज्ञावुभाववर्तिषातामिति न केवलमवश्यं गौरवमेव सोढव्यमपि तु तदुपपादनाय परं रौरवमपि।

तथाहि - यदि नीलकण्ठश्रीकण्ठनामानावुभावाचार्यौ पुराऽभूतां चेत्तर्हि शङ्करविजये श्रीकण्ठाख्यः कुतो नोदाह्रियते। तदाऽयमप्रतीत इति वा, अजा इति वा, जनित्वा मृत इति वा किल प्रतिवक्तव्यं तैः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

किञ्च ये खलु नीलकण्ठोपज्ञं भाष्यं नष्टमिति विवदन्ते ते सर्वेऽपि श्रीकरभाष्यावलम्बिन एव। ते काममवलम्बन्तु। प्रभूतापभ्रंशापसिद्धादिभिः श्रीकरमपि तदेव यथाविधि यथारुचि यथामति च। तथापि श्रीकरभाष्यकृतापि बहुधा बहूकृतं नीलकण्ठीयं भाष्यं द्रष्टुं नावकाश इत्यास्ताम्। अथ यदि ते नीलकण्ठभाष्ये प्रचारिते श्रीकरभाष्यस्य प्रचारोऽस्तमयादिति नीलकण्ठभाष्यं नष्टीकर्तुं यतेरन् तर्हि तेनैव यत्नेन स्वाभिमतमेव नश्येदित्यत्र न वक्तव्यं बहु। श्रीदीक्षितवर्यैरेव कतिपयविषयेषु व्यत्यासितमपि याथार्थलोभात् स्वाभिमतशुद्धाद्वैतखण्डयितृ रामानुजविषयवैरनिर्यातनलाभाच्च श्रीशिवपारम्यादिविषयेषु यथा वैदिषु सम्यग्व्याख्यातमेवासीत्।

अस्माभिस्तु महालिङ्गधारणप्रतिपादकभागानां विवरणस्यावश्यकता सविशेषनिर्विशेष-वादयोरन्योन्यविरुद्धतया **यावत्परमतं न निराकृतं तावत्स्वमतमप्रतिष्ठितं भवती**ति न्यायेन निर्विशेषवादनिराकरणस्याऽऽवश्यकतया तद्विषये स्वमतभङ्गभिया दीक्षितवर्यैर्मौनस्यैवाऽवलम्बितत्वेन तद्विवरणस्याऽप्यावश्यकत्वेन च भाष्यस्याऽस्य विवृतिश्चिकीर्षितासीत्। अत्र दीक्षितवर्यैर्विमृश्य प्रतिपादितेष्वंशेषु पुनर्विमर्शस्याऽनावश्यकतां मत्वा **यावदविरुद्धमनुमतम्भवती**तिन्यायेन तदीयामेव विवृत्तिं संक्षिप्य तैर्निर्दिष्टसंज्ञयैव परिगृह्य तत्साहित्येनैवेदं समारचितमिति।

इदं विवरणं दशवर्षेभ्यः प्राक् तिम्मायिपालेम् ग्रामवास्तव्यस्य श्रीमतः मुदिगोण्डलिङ्गय्यशास्त्रिणः सिकिन्द्राबादनगरवास्तव्यस्य श्रीमतः शिवपुरपु राजयाराध्यस्य च प्रेरणया मया चतुस्सुत्रीमात्रम् व्यरचि। इदानीन्तु धीमतः भक्तिमतः श्रीमतः श्रीशिवनिष्ठागरिष्ठस्य शैवमताभिमानिनः वरङ्गल्नगरवास्तव्यस्य आकारपु नरसिङ्गगुप्तस्य प्रेरणया समापितमिति विज्ञापयति।

मुदिगोण्ड नागलिङ्ग शास्त्री

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

श्री शिवाय गुरवे नमः

कृतिपति वंशानुक्रमः

श्लो.

हैदराबादभिख्याक पुरीप्रान्तेऽतिविश्रुते।
शंषाबान्नगरे ह्यास गुरवार्यो गुणाग्रणीः।।

आकारपाख्य सद्वंशमुक्तामणिरिति श्रुतः।
नागमाम्बासमाख्याकदेवीशो नयभूषणः।।

तस्य सूनुस्सूनृतपरस्सिङ्गयाख्यो दृढव्रतः।
यल्लमाम्बाख्यया देव्या वरङ्गलपुरमागतः।।

तस्यात्मजश्चेन्नयाख्यो विख्यातगुणवैभवः।
राजमाम्बाख्यया देव्या सह कीर्तिमुपार्जयत्।।

यश्चामेयधिया जहास धिषणं राया धनेशं तथा।
भोगेनापि पुरन्दरं ह्यचलया वैकुण्ठनाथं श्रिया।।

तस्यार्यस्य गुणावलिं गणयितुं को नु क्षितौ स्यात् क्षमः।
तस्य स्यात्सदृशस्स इत्यभिदधुर्याथार्थ्यसम्मानिनः।।

सोऽयं प्रातिष्ठिपद्देवीं कन्यकापरमेश्वरीम्।
धर्मशालामपि तथा विशालां चारुवैभवः।।

श्री राजमाम्बाख्यतदीयदेव्यां चेन्नयगुप्तस्य सुतोऽजनिष्ट।
गुणप्रदीप्तो नरसिङ्गगुप्तः सुरापगायामिव बाहुलेयः।।

अनेन भूयो जनकप्रतिष्ठिता सा धर्मशाला बहुधा हि संस्कृता।
यथा त्वसङ्ख्या जनता वसेच्चिरम् समस्तसौकर्यकृतानुमोदना।।

एनेन विश्वेश्वराख्यलिङ्गं सर्वाङ्गमङ्गलम्।
अन्नपूर्णा विशालाक्षी देवीभ्यां सुप्रतिष्ठितम्।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भद्रकालीसमेतश्च वीरभद्रो प्रतिष्ठितः।
तथा वल्ली देवसेना देवीभ्यां क्रौञ्चदारणः।।

आसीत्प्रतिष्ठितो नवग्रहाश्चासन् प्रतिष्ठिताः।
नरसिङ्गगुप्तसंज्ञेन भक्त्या निर्मापितं यथा।।

विश्वेश्वरमहालिङ्गमहाप्रसादमेव च।
तत्र प्रतिष्ठितान्देवविग्रहानपि शोभनान्।।

सुवर्णरत्नखचितानानालङ्कारभासुरान्।
तत्र नित्यं त्रिकालञ्च प्रचरन्तं सुवैभवम्।।

भजनं श्रीवेदपाठगीतावाद्यादिसंयुतम्।
महाभोगं बहुविधं भक्ष्यभोज्यादिमेदुरम्।।

द्रष्टव्यमेव तद्वक्तुं नहि केनापि शक्यते।
नरसिङ्गसुप्तसंज्ञस्य विनयादिगुणौकसः।।

सत्यावत्यन्तलालित्य भासिताऽमलविग्रहे।
अनन्तलक्ष्मीदेवी सुशीलादेवीति संज्ञिते।।

अन्वर्थनाम्नावन्योन्यनित्यसाङ्गत्यभूषिते।
ज्येष्ठपत्नी सुतश्चासीत्किल सर्वाङ्गसुन्दरः।।

अनन्तपद्मनाभाख्यो विनयाभरणोज्ज्वलः।
स्वभोगायोन्नतायाऽयं लोको नालमितीव हि।।

द्वादशाब्दाढ्य एवाऽयं भुवो दिवमुपागमत्।
पित्रोर्बन्धुजनस्याऽपि तदाश्रयवतामपि।।

शुचमापादयन्तीव्रामपरां चारुदर्शनः।
नरसिङ्गगुप्तबन्धूनामखिलाञ्च मूर्तयः।।

शिलामय्यः प्रदर्श्यन्ते विश्वेश्वरमहालये।
अनेन गुप्तवर्येण प्रेरितेनैव यन्मया।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शिवचिन्तामणिप्रभासमाख्या निर्मिता कृतिः।
नीलकण्ठशिवाराध्यभाष्यव्याख्या सुविस्तृता।।

नरसिङ्गगुप्तवर्य त्वं शम्भौ माहेश्वरेषु च।
विद्वत्सु मयि चात्यन्तं भक्तिमान्पात्रमित्यपि।।

दत्तेयं भवते शम्भुमाहात्म्यभरिताकृतिः।
श्रेयसे यशसेऽप्यस्तु पुत्रपौत्रादिसम्पदे।।

आवाभ्यां शिवभक्तेभ्यश्शिवं भूयादनारतम्।
स्वस्त्यस्तु सर्वलोकेभ्यस्सुखिनस्सन्तु जन्तवः।।

महेशपादाम्बुजभावनावते
व्यतीर्यतेयं भवते सुधीमते।
अशेषवेदार्थसमाहृतिः कृतिः
यशो दिशन्ती जयतात्सदैव।।

चन्द्रार्कताराद्युतिमावहन्त्यो
यावद्वसेयुस्स(स्स्म?) तमो निहन्त्यः।
तावत्कृतिश्च ज्वलताज्जनानां
हार्दं महासन्तमसं नुदन्ती।।

शिवं भूयात्

एवं

मुदिगोण्ड नागलिङ्गाराध्यः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

जगद्गुरु नीलकण्ठाराध्यस्तुतिः

निगमशिखरसिन्धौ स्वीयपाण्डित्यशैलो
न्मथनजनितभाष्याख्यां सुधां संवितीर्य।
भवविषयबिभीतान्प्राणिनो पूपुषद्य
स्स जयतु गुणसिन्धुर्नीलकण्ठो बुधेन्द्रः।।

दुर्वादिदर्वीकरनीलकण्ठः
तपःक्रियातर्पितनीलकण्ठः।
शास्त्रार्थवादे कृतसिंहकण्ठः
जीयात् स साक्षाद्भुवि नीलकण्ठः।।

कृपासमुद्रः खलु नीललोहितः
भवांबुधौ मग्नजनोद्दिधीर्षुः।
स्वनामधेयाङ्कितभाष्यपोतं
निर्मातुमेवावततार भूमौ।।

श्रितजनहृदयाब्जभास्करोसौ
कलुषविषद्रुमभेदने कुठारः।
करकलितनिजात्मतत्त्वबोधः
स जयतु मे चककण्ठदेशिकेन्द्रः।।

योऽद्वैतमत्तगजकुम्भभिदा मृगेन्द्रः
बौद्धादिदुर्मतगिरीन्द्रमहेन्द्रवज्रं।
वेदागमाम्भोनिधि कुम्भयोनिं
तं नीलकण्ठबुधदेशिकमानतोऽस्मि।।

भस्मत्रिपुण्ड्राङ्कितदिव्यमूर्तिः
रुद्राक्षकङ्कण लसत्करदण्डयुग्मः।
षट्कालसम्पूजितस्वेष्टलिङ्गः
तं नीलकण्ठबुधदेशिकमानतोस्मि।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

व्याघ्राजिनाञ्चित सुखासनरम्यमूर्तिः
रुद्राक्षनिर्मितकिरीटस्फुरच्छशाङ्कः।
श्रीताळपत्रलिखितोत्तमशैवभाष्यः
तं नीलकण्ठबुधदेशिकमानतोस्मि।।

आराध्यवंशाम्बुधिपूर्णचन्दं
आसेतुशीतनगमध्यकृतप्रबोधम् ।
श्रीनीललोहितशिवांशकृतावतारं
तं नीलकण्ठबुधदेशिकमानतोस्मि।।

श्रीशङ्कराचार्यमनन्तशक्तिं
शैवादिषण्मतविधूननलुप्तशक्तिम् ।
चक्रे निजप्रतिभया भुवि यो महात्मा
तं नीलकण्ठबुधदेशिकमानतोस्मि।।

काशीनगर्यां कृतसत्सभायाम्
उद्घाटितो यावदुमाकवाटः ।
यद्भाष्यमम्बानिजमूर्ध्न्यधत्त
तं नीलकण्ठविबुधं शिरसा नमामि।।

यस्य प्रवृत्तासु सभासु नित्यम्
आद्यन्तयोर्वाङ्मुखसत्प्रसङ्गे ।
घण्टाद्यनादी द्रहिता शलाकया
तं नीलकण्ठविबुधं शिरसा नमामि।।

लोके शिवाद्वैतमतप्रबोधं
कुर्वञ्जगत्यद्भुतकीर्तिशाली ।
यश्शिष्यजालनिरतार्चितपादकञ्जः
तं नीलकण्ठविबुधं शिरसा नतोस्मि।।

सौवर्णकान्तिस्सविलासमूर्तिः
निर्धूतभक्तौघनिरन्तरार्तिः ।
षल्लिङ्गतत्त्वार्थविदुत्तमो यः
तं नीलकण्ठं मनसा स्मरामि।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सूत्रानुक्रमणिका

अथ जिज्ञासाऽधिकरणम्

अथाऽतो ब्रह्मजिज्ञासा ।। १-१-१ ।।

अथ जन्माद्यधिकरणम् २

जन्माद्यस्य यतः ।। १-१-२ ।।

अथ शास्त्रयोनित्वाधिकरणम् ।। ३।।

शास्त्रयोनित्वात् ।। १-१-३ ।।

अथ समन्वयाधिकरणम् ४

तत्तु समन्वयात् ।। १-१-४ ।।

अथ ईक्षत्यधिकरणम् ५

ईक्षतेर्नाऽशब्दम् ।। १-१-५ ।।

गौणश्चेन्नाऽत्मशब्दात् ।। १-१-६ ।।

तन्निष्ठस्य मोक्षोपदेशात् ।। १-१-७ ।।

हेयत्वाऽवचनाच्च ।। १-१-८ ।।

प्रतिज्ञाविरोधात् ।। १-१-९ ।।

स्वाप्ययात् ।। १-१-१० ।।

गतिसामान्यात् ।। १-१-११ ।।

श्रुतत्वाच्च ।। १-१-१२ ।।

अथ आनन्दमयाधिकरणम् ६

आनन्दमयोऽभ्यासात् ।। १-१-१३ ।।

विकारशब्दान्नेति चेन्न प्राचुर्यात् ।। १-१-१४ ।।

तद्धेतुव्यपदेशाच्च ।। १-१-१५ ।।

मान्त्रवर्णिकमेव च गीयते ।। १-१-१६ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ इतरानुपपत्त्यधिकरणम् ७

नेतरोनुपपत्तेः ।। १-१-१७ ।।

भेदव्यपदेशाच्च ।। १-१-१८ ।।

कामाच्च नाऽनुमानापेक्षा ।। १-१-१९ ।।

अस्मिन्नस्य च तद्योगं शास्ति ।। १-१-२० ।।

अथ अन्तरधिकरणम् ८

अन्तस्तद्धर्मोपदेशात् ।। १-१-२१ ।।

भेदव्यपदेशाच्चान्यः ।। १-१-२२ ।।

अथ आकाशाधिकरणप्राणाधिकरणे ९

आकाशस्तल्लिङ्गात् ।। १-१-२३ ।।

अत एव प्राणः ।। १-१-२४ ।।

अथ ज्योतिरधिकरणम् १०

ज्योतिश्चरणाभिधानात् ।। १-१-२५ ।।

छन्दोभाधानान्नेति चेन्न तथा चेतोऽर्पणनिगदात्तथा हि दर्शनम् ।। १-१-२६ ।।

भूतादिपादव्यपदेशोपपत्तेश्चैवम् ।। १-१-२७ ।।

उपदेशभेदान्नेति चेन्न उभयस्मिन्नप्यविरोधात् ।। १-१-२८ ।।

अथ इन्द्रप्राणाधिकरणम् १२

प्राणस्तथानुगमात् ।। १-१-२९ ।।

न वक्तुरात्मोपदेशादिति चेदध्यात्मसम्बन्धभूमा ह्यस्मिन् ।। १-१-३० ।।

शास्त्रदृष्ट्या तूपदेशो वामदेववत् ।। १-१-३१ ।।

जीवमुख्यप्राणलिङ्गान्नेति चेन्न, उपासा(उपासना)त्रैविध्यादाश्रितत्वादिह तद्योगात् ।। १-१-३२ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रथमाध्यायस्य द्वितीयः पादः

अथ सर्वत्रप्रसिद्धाधिकरणम् १३

सर्वत्र प्रसिद्धोपदेशात् ॥ १-२-१ ॥
विवक्षतगुणोपपत्तेश्च ॥ १-२-२ ॥

अथ अनुपपत्त्यधिकरणम् १४

अनुपपत्तेस्तु न शारीरः ॥ १-२-३ ॥
कर्मकर्तृव्यपदेशाच्च ॥ १-२-४ ॥
शब्दविशेषात् ॥ १-२-५ ॥
स्मृतेश्च ॥ १-२-६ ॥
अर्भकौकसत्वात् तद्व्यपदेशाच्च नेतिचेन्न ॥ १-२-७ ॥
सम्भोगप्राप्तिरिति चेन्न वैशेष्यात् ॥ १-२-८ ॥

अथ अत्त्रधिकरणम् १५

अत्ता चराचरग्रहणात् ॥ १-२-९ ॥
प्रकरणाच्च ॥ १-२-१० ॥

अथ गुहाधिकरणम् १६

गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॥ १-२-११ ॥
विशेषणाच्च ॥ १-२-१२ ॥

अथाऽन्तरधिकरणम् १७

अन्तर उपपत्तेः ॥ १-२-१३ ॥
स्थानादिव्यपदेशाच्च ॥ १-२-१४ ॥
सुखविशिष्टाभिधानादेव च ॥ १-२-१५ ॥
अत एव स ब्रह्म ॥ १-२-१६ ॥
श्रुतोपनिषत्कगत्यभिधानाच्च ॥ १-२-१७ ॥

अथ अनवस्थित्यधिकरणम् १८

अनवस्थितेन सम्भवाच्च नेतरः ॥ १-२-१८ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथाऽन्तर्याम्यधिकरणम् १९

अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ॥ १-२-१९ ॥
न च स्मार्तमतद्धर्माभिलापात् शारीरश्च ॥ १-२-२० ॥
उभयेऽपि हि भेदेनैनमधीयते ॥ १-२-२१ ॥

अथ अदृश्यत्वाधिकरणम् २०

अदृश्यत्वादिगुणको धर्मोक्तेः ॥ १-२-२२ ॥
विशेषणभेदव्यपदेशाभ्यां च नेतरौ ॥ १-२-२३ ॥
रूपोपन्यासाच्च ॥ १-२-२४ ॥

अथ वैश्वानराधिकरणम् २१

वैश्वानरः साधारणशब्दविशेषात् ॥ १-२-२५ ॥
स्मर्यमाणमनुमानं स्यादिति ॥ १-२-२६ ॥
पुरुषमपि चैनमधीयते ॥ १-२-२७ ॥
अत एव न देवता, भूतं च ॥ १-२-२८ ॥
साक्षादप्यविरोधं जैमिनिः ॥ १-२-२९ ॥
अभिव्यक्तेरित्याश्मरथ्यः ॥ १-२-३० ॥
अनुस्मृतय इति बादरिः ॥ १-२-३१ ॥
संपत्तेरिति जैमिनिस्तथाहि दर्शयति ॥ १-२-३२ ॥
आमनन्ति चैनमस्मिन् ॥ १-२-३३ ॥

प्रथमाध्यायस्य तृतीयः पादः

अथ द्युभ्वाद्यधिकरणम् २२

द्युभ्वाद्यायतनं स्वशब्दात् ॥ १-३-१ ॥
मुक्तोपसृप्यव्यपदेशाच्च ॥ १-३-२ ॥
नानुमानमतच्छब्दात्, प्राणभृच्च ॥ १-३-३ ॥
भेदव्यपदेशात् ॥ १-३-४ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रकरणात् ।। १-३-५ ।।
स्थित्यदनाभ्यां च ।। १-३-६ ।।

अथ भूमाधिकरणम् २३

भूमा संप्रसादादध्युपदेशात् ।। १-३-७ ।।
धर्मोपपत्तेश्च ।। १-३-८ ।।

अथ अक्षराधिकरणम् २४

अक्षरमम्बरान्तधृतेः ।। १-३-९ ।।
सा च प्रशासनात् ।। १-३-१० ।।
अन्यभावव्यावृत्तेश्च ।। १-३-११ ।।

अथ ईक्षतिकर्माधिकरणम् २५

ईक्षतिकर्मव्यपदेशात्सः ।। १-३-१२ ।।

अथ दहराधिकरणम् २६

दहर उत्तरेभ्यः ।। १-३-१३ ।।
गतिशब्दाभ्यां तथाहि दृष्टं लिङ्गं च ।। १-३-१४ ।।
धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः ।। १-३-१५ ।।
प्रसिद्धेश्च ।। १-३-१६ ।।
इतरपरामर्शात्स इति चेन्न, असम्भवात् ।। १-३-१७ ।।
उत्तराच्छेदाविर्भूतस्वरूपस्तु ।। १-३-१८ ।।
अन्यार्थश्च परामर्शः ।। १-३-१९ ।।
अल्पश्रुतेरितिचेत्तदुक्तम् ।। १-३-२० ।।
अनुकृतेस्तस्य च ।। १-३-२१ ।।
अपि च स्मर्यते ।। १-३-२२ ।।

अथ प्रमिताऽधिकरणम् २७

शब्दादेव प्रमितः ।। १-३-२३ ।।
हृद्यपेक्षया तु मनुष्याधिकारत्वात् ।। १-३-२४ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ देवाधिकरणम्   २८

तदुपर्यपि बादरायणस्संभवात् ।। १-३-२५ ।।
विरोधः कर्मणीतिचेन्न, अनेकप्रतिपत्तेर्दर्शनात् ।। १-३-२६ ।।
शब्द इतिचेन्नाऽतः प्रभवात् प्रत्यक्षाऽनुमानाभ्याम् ।। १-३-२७ ।।
अत एव च नित्यत्वम् ।। १-३-२८ ।।
समाननामरूपत्वाच्चाऽवृत्तावप्यविरोधो दर्शनात् स्मृतेश्च ।। १-३-२९ ।।
मध्वादिष्वसम्भवादनधिकारं जैमिनिः ।। १-३-३० ।।
ज्योतिषि भावाच्च ।। १-३-३१ ।।
भावन्तु बादरायणोऽस्ति हि ।। १-३-३२ ।।

अथ अपशूद्राऽधिकरणम्   २९

शुगस्य तदनादरश्रवणात्तदाद्रवणात् सूच्यते हि ।। १-३-३३ ।।
क्षत्रियत्वगतेश्च ।। १-३-३४ ।।
उत्तरत्र चैत्ररथेन लिङ्गात् ।। १-३-३५ ।।
संस्कारपरामर्शात्तदभावाभिलापाच्च ।। १-३-३६ ।।
तदभावनिर्धारणे च प्रवृत्तेः ।। १-३-३७ ।।
श्रवणाध्ययनार्थप्रतिषेधात् ।। १-३-३८ ।।
स्मृतेश्च ।। १-३-३९ ।।
कम्पनात् ।। १-३-४० ।।

अथ ज्योतिरधिकरणम्   ३१

ज्योतिर्दर्शनात् ।। १-३-४१ ।।

अथ अर्थान्तरात्वादिव्यपदेशाधिकरणम्

आकाशोऽर्थान्तरत्वादिव्यपदेशात् ।। १-३-४२ ।।
सुषुप्त्युत्क्रान्त्योर्भेदन ।। १-३-४३ ।।
पत्यादिशब्देभ्यः ।। १-३-४४ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रथमाध्यायस्य चतुर्थः पादः

अथ आनुमानिकाधिकरणम् ३३

आनुमानिकमप्येकेषामितिचेन्न शरीररूपकविन्यस्तगृहीतेः दर्शयति च ।। १-४-१ ।।
सूक्ष्मन्तु तदर्हत्वात् ।। १-४-२ ।।
तदधीनत्वादर्थवत् ।। १-४-३ ।।
ज्ञेयत्वावचनाच्च ।। १-४-४ ।।
वदतीतिचेन्न प्राज्ञो हि प्रकरणात् ।। १-४-५ ।।
त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ।। १-३-६ ।।
महद्वच्च ।। १-३-७ ।।

अथ चमसवदधिकरणम् ३४

चमसवदविशेषात् ।। १-४-८ ।।
ज्योतिरुपक्रमात्तु तथाह्यधीयत एके ।। १-४-९ ।।
कल्पनोपदेशाच्च मध्वादिवदविरोधः ।। १-४-१० ।।

अथ सङ्ख्योपसंग्रहाधिकरणम् ३५

न सङ्ख्योपसंग्रहादपि, नानाभावादतिरेकाच्च ।। १-४-११ ।।
प्राणादयो वाक्यशेषात् ।। १-४-१२ ।।
ज्योतिषैकेषामसत्यन्ने ।। १-४-१३ ।।
कारणत्वेन चाऽकाशादिषु यथा व्यपदिष्टोक्तेः ।। १-४-१४ ।।
समाकर्षात् ।। १-४-१५ ।।

अथ जगद्वाचित्वाधिकरणम् ३६

जगद्वाचित्वात् ।। १-४-१६ ।।
जीवमुख्यप्राणालिङ्गान्नेतिचेत्तद्व्याख्यातम् ।। १-४-१७ ।।
अन्यार्थन्तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ।। १-४-१८ ।।

अथ वाक्यान्वयाधिकरणम् ३७

वाक्यान्वयात् ।। १-४-१९ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः	॥ १-४-२० ॥
उत्क्रमिष्यत एवं भावादित्यौडुलोमिः	॥ १-४-२१ ॥
अवस्थितेरिति काशकृत्स्नः	॥ १-४-२२ ॥

अथ प्रकृत्यधिकरणम् ३८

प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्	॥ १-४-२३ ॥
अभिध्योपदेशाच्च	॥ १-४-२४ ॥
साक्षाच्चोभयाम्नानात्	॥ १-४-२५ ॥
आत्मकृतेः	॥ १-४-२६ ॥
परिणामात्	॥ १-४-२७ ॥
योनिश्च हि गीयते	॥ १-४-२८ ॥

अथ सर्वव्याख्यानाधिकरणम् ३९

एतेन सर्वे व्याख्याताः व्याख्याताः	॥ १-४-२९ ॥

***

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विषयसूचिनी

श्रीकण्ठीयब्रह्ममीमांसासूत्रभाष्ये अध्यायपादाधिकरणानां सङ्ग्रहेण विषयसूचिना -

तत्र प्रथमाध्याये निखिलवेदान्तवाक्यानां तदनुगुणस्मृतीतिहासानाञ्च तात्पर्येण ब्रह्मणि समन्वयः। प्रमेयस्वरूपम् प्रतिपाद्यते।

- प्रथमपादे स्पष्टलिङ्गवाक्यविचारः।
- द्वितीयपादे अनतिस्पष्टलिङ्गवाक्यविचारः।
- तृतीयपादे स्पष्टाऽस्पष्टलिङ्गवाक्यविचारः।
- चतुर्थपादे अस्पष्टलिङ्गवाक्यविचारश्च क्रियते।

विषयः **पुटसङ्ख्या**

प्रथमोऽध्यायः

१.१ प्रथमाध्यायस्य प्रथमपादः 1-150

१.१.१ जिज्ञासाधिकरणे ब्रह्ममीमांसायाः समारम्भणीयत्वसमर्थनम् 14

१.१.२ जन्माद्यधिकरणे उद्दिष्टस्य ब्रह्मणो लक्षणम् 58

१.१.३ शास्त्रयोनित्वाधिकरणे ब्रह्मणो जगत्कारणस्य शास्त्रैकप्रमाणकत्वञ्च 72

१.१.४ समन्वयाधिकरणे सर्वेषां वेदान्तवाक्यानां ब्रह्मणि परमशिवे समन्वयः 80

१.१.५ ईक्षत्यधिकरणे प्रधानस्य जगत्कारणत्वनिराकरणम् 93

१.१.६ आनन्दमयाधिकरणे आनन्दमयस्य परमेश्वरत्वसमर्थनेन जीवस्य जगत्कारणत्वनिराकरणम् 104

१.१.७ इतरानुपपत्त्यधिकरणे जीवसमष्टिरूपस्य हिरण्यगर्भस्य जगत्कारणत्वनिराकरणम् 124

१.१.८ अन्तरधिकरणे आदित्यान्तर्वर्ति हिरण्मयपुरुषस्य परमेश्वत्वव्यवस्थापनम् 129

१.१.९ आकाशप्राणाधिकरणयोः आकाशप्राणशब्दयोः परमेश्वरप्रतिपादनम् 137

१.१.१० ज्योतिरधिकरणापरनाम्नि प्राणाधिकरणे ज्योतिश्शब्दस्य परमेश्वरप्रतिपादनम् 140

१.१.११ इन्द्रप्राणाधिकरणे प्राणशब्दसमानाधिकरणेन्द्रशब्दस्य परमेश्वरप्रतिपादनम् 144

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१.२. प्रथमाध्यायस्य द्वितीयपादः 151-200

१.२.१ सर्वत्र प्रसिद्धाधिकरणे मनोमयत्वादिधर्मकत्वेन श्रूयमाणस्य पुरुषस्य परमेश्वरत्वोपपादनम् 151
१.२.२ शरीराख्यानुपपत्यधिकरणे विश्वपतित्वादिलक्षणयुक्ततया श्रूयमाणस्यापि परमेश्वरत्वोपपादनम् 159
१.२.३ अत्त्रधिकरणे निखिलचिदचित्प्रपञ्चात्त्रतया श्रूयमाणस्य परमेश्वरत्वव्यावस्थापनम् 168
१.२.४ गुहाधिकरणे गुहागतत्वेन श्रुयमाणयोर्जीवपरमेश्वरत्वस्थापनम् 173
१.२.५ अन्तराधिकरणे अमृतत्वादिलक्षणस्य अक्ष्यन्तः श्रूयमाणस्य पुरूषस्य परमेश्वरत्वस्थापनम् 177
१.२.६ अनवस्थित्यधिकरणे अङ्गुष्ठमात्रत्वादिविशिष्टस्य परमेश्वरत्वोपपादनम् 182
१.२.७ अन्तर्याम्यधिकरणे पृथिव्याद्यखिलवस्त्वन्तर्यामितया श्रूयमाणस्य परमेश्वरत्वस्थापनम् 184
१.२.८ अदृश्यत्वाधिकरणे अदृश्यत्वाक्षरत्वादिगुणकत्वेन श्रूयमाणस्य परमेश्वरत्वव्यवस्थापनम् 190
१.२.९ वैश्वानराधिकरणे उपास्यमानतयोक्तस्य वैश्वानरशब्दवाच्यस्य परमेश्वरत्वव्यवस्थापनम् 193

१.३ प्रथमाध्यायस्य तृतीयपादः 201-254

१.३.१ द्युभ्याद्यधिकरणे द्युभ्वाद्याधारतया श्रूयमाणस्य परमेश्वरत्वोपपादनम् 201
१.३.२ भूमाधिकरणे भूमशब्दनिर्दिष्टस्य परमेश्वरत्वव्यवस्थापनम् 207
१.३.३ अक्षराधिकरणे अक्षरशब्दवाच्यस्य परमेश्वरत्वस्थापनम् 210
१.३.४ ईक्षतिकर्माधिकरणे ईक्षतिकर्मत्वेन श्रूयमाणस्य परमेश्वरत्वस्थापनम् 214
१.३.५ दहराधिकरणे दहरशब्दवाच्यस्य परमेश्वरत्वोपपादनम् 219
१.३.६ प्रमिताधिकरणे अङ्गुष्ठमात्रतया श्रूयमाणस्य पुरुषस्य परमेश्वरत्वप्रतिपादनम् 227
१.३.७ देवताधिकरणे परमेश्वरोपासने मनुष्याणामिव देवानामप्यधिकारस्थापनम् 231
१.३.८ अपशूद्राधिकरणे नास्ति शूद्राणां वेदपूर्वको ब्रह्मविद्यायामधिकारः 240
१.३.९ कम्पनाधिकरणे सकलजगत्कम्पनहेतुत्वेन श्रूयमाणस्य परमेश्वरत्वस्थापनम् 247
१.३.१० ज्योतिरधिकरणे मुक्तप्राप्यस्य परस्य ज्योतिषः परमशिवाभिधानपरब्रह्मत्वसमर्थनम् 249
१.३.११ अर्थान्तरत्वादिव्यपदेशाधिकरणे नामरूपनिर्वोढृतया श्रूयमाणस्याकाशशब्दवाच्यस्य परमेश्वरत्वोपपादनम् 252

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१.४ प्रथमाध्यायस्य चतुर्थपादः 255-321

१.४.१ आनुमानिकाधिकरणे महतः परत्वेनोच्यमानस्य अव्यक्तशब्दवाच्यस्य शरीरत्वसमर्थनम् 255

१.४.२ चमसवदधिकरणे सर्वप्रपञ्चकारणत्वेन जन्मरहितत्वादजेतिश्रूयमाणा प्रकृतिः परमेश्वरकारुणिकैवेति व्यवस्थापनम्। 262

१.४.३ सङ्ख्योपसङ्ग्रहाधिकरणे पञ्चपञ्चजना इति मन्त्रे पञ्चपञ्चेति पञ्चविंशतिसङ्ख्योपसङ्ग्रहादपि न तान्त्रिताकाणां तत्वानां ग्रहणम्, किन्तु श्रुतिप्रसिद्धानामेवेति व्यवस्थापनम् 265

१.४.४ जगद्वाचित्वाधिकरणे कर्मशब्दस्य जगद्वाचित्वात् जगत्कार्यवान् परमेश्वर एवेति व्यवस्थापनम् 269

१.४.५ वाक्यान्वयाधिकरणे **आत्मा वा अरे द्रष्टव्यः** इत्यादौ द्रष्टव्यत्वादिना विधीयमानस्यात्मनः परमेश्वरत्वसमर्थनम् 275

१.४.६ प्रकृत्यधिकरणे परमेश्वरस्य ब्रह्मणो जगदुभयकारणत्वप्रतिपादनम् 282

१.४.७ सर्वव्याख्यानाधिकरणे पुरुषसूक्तशतरुद्रीयादीनां स्मृतीतिहासपुराणादीनाञ्च तात्पर्यलिङ्गसमन्वयेन परब्रह्मबोधकत्वोपपादनम् 295

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

।। श्रीः।।

श्रीशिवाय गुरवे नमः

श्रीमहागणाधिपतये नमः

श्रीमेधादक्षिणामूर्तये नमः

श्रीनीलकण्ठभगवत्पादाराध्यकृतौ शारीरकब्रह्ममीमांसासूत्रभाष्ये प्रथमाध्यायस्य प्रथमः पाद आरभ्यते

***

।।नी.भा.।।

ॐ नमोऽहं पदार्थाय लोकानां सिद्धिहेतवे ।
सच्चिदानन्दरूपाय शिवाय परमात्मने ।। १ ।।

।।शि.चि.प्र.व्याख्या।।

शिवचिन्तामणिप्रभा आरभ्यते

मङ्गलं दिशतु मे गजाननो मङ्गलं दिशतु मे षडाननः ।
मङ्गलं दिशतु मे महेश्वरी मङ्गलं दिशतु मे महेश्वरः ।। १ ।।

यो विश्वप्रभवो, यमेति निखिलं, येनेदमारक्षितम्,
यस्मै च श्रुतयो नमो विदधते, यस्मात्परं नेक्ष्यते ।
भूम्ना यस्य परिभ्रमत्यनुकलं ब्रह्माण्डभाण्डावलि,
र्यस्मिंत्सर्वमपि प्रतिष्ठितमिदं, तस्मै नमश्शम्भवे[१] ।। २ ।।

गर्भे निवेश्य कलयन् प्रतिसञ्चरेषु संश्लिष्य सर्गनिचये सुखयन् सुषुप्तौ ।
पुत्रं पितेव परिरक्षति सर्वदा मां यस्तं मुमुक्षुरभवं शरणं गतोऽस्मि ।। ३ ।।

यत्कृपाप्रसरणात्पुरातना लेभिरे हि गुरवोऽपि गौरवम् ।
भावये सततमादिमं गुरुं दक्षिणाभिमुखमेव दैवतम् ।। ४ ।।

---

१. प्रथमादिसार्वविभक्तिकं स्तोत्रमिदं व्याख्यातुः भक्तिपारवश्यं प्रकाशयति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सदाशिवं शिवां स्कन्दं केशवं पद्मसम्भवम् ।
नन्दीश्वरं कुम्भयोनिं भरद्वाजात्रिगौतमान् ।। ५ ।।

दधीचिमुपमन्युं च मार्कण्डेयं पराशरम् ।
व्यासं श्वेतं च तच्छिष्यं नीलकण्ठशिवाह्वयम् ।। ६ ।।

तस्य शिष्यान् हरदत्तभवदेवमुखान् सदा ।
प्रणमामि ब्रह्मविद्यासम्प्रदायप्रवर्तकान् ।। ७ ।।

कृतदीक्षोऽघोरमुखे कुलकूटस्थो भरद्वाजः ।
विद्येश्वरेषु विदितो यस्तं वन्दे महर्षिगुरुम् ।। ८ ।।

नमोऽस्तु गुरवे नीलकण्ठाय शिवयोगिने ।
श्रुतिसारशिवाद्वैतपरभाष्यविधायिने ।। ९ ।।

व्यासं सूत्रकृतं वृत्तिकृतं बोधायनं तथा ।
नीलकण्ठं भाष्यकृतं प्रणमामि मुनित्रयम् ।। १० ।।

सदाशिवसमारम्भां नीलकण्ठाद्यमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ।। ११ ।।

महापाशुपतज्ञानसम्प्रदायप्रवर्तकान् ।
अंशावतारानीशस्य योगाचार्यानुपास्महे ।। १२ ।।

श्वेतादिलकुलीशान्तां योगाचार्यपरम्पराम् ।
सद्वादशोत्तरशतशिष्यसंख्यां स्मराम्यहम् ।। १३ ।।

नमस्त्रयष्षष्टिमहागणेभ्यस्त्रयोदशभ्यो दशषोडशभ्यः ।
गणेश्वरेभ्यो गणनायकेभ्यो नमो नमः शङ्करकिङ्करेभ्यः ।। १४ ।।

ये रुद्रलोकादवतीर्य रुद्रा मानुष्यमाश्रित्य जगद्धिताय ।
चरन्ति नानाविधचारुचेष्टास्तेभ्यो नमस्त्र्यम्बकपूजकेभ्यः ।। १५ ।।

अस्तङ्गतान्यखिलनास्तिकहृत्तमांसि फुल्लानि वैदिकसमाजमनोम्बुजानि ।
यस्योदयेन भुवि भानुसमानुभावं तं श्रीनिवासमखिनं गुरु मानतोऽस्मि ।। १६ ।।

दिशावळीविश्रुतनागलिङ्गसमाख्यमाराध्यकुलाब्धिसोमम् ।
मतान्तराम्भोनिधिकुम्भयोनिं पितामहं लोकगुरुं प्रपद्ये ।। १७ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

त्रयोविंशत्यूनपञ्चसहस्रगणितेषु हि ।
कलिवर्षेषु वृत्तेषु वत्सरे धातृनामनि ।। १८ ।।

मासि चैत्रे वळक्षे हि पक्षे च दशमीतिथौ ।
पुष्यर्क्ष इन्दुवारे च लग्ने कर्कटकाह्वये ।। १९ ।।

केतौ कन्यागते चैव मन्दे कुम्भस्थितेऽपि च ।
सगुरौ वृश्चिकके मीने रविराहुबुधैर्युते ।। २० ।।

वृषस्थे सति शुक्रे च भौमेन सहिते तथा ।
कृष्णवेणीसरित्प्रान्ते ताडिकोण्डाह्वये पुरे ।। २१ ।।

मल्लिकार्जुनदेवस्य क्षेत्रे योऽजनि विश्रुते ।
मोक्षधर्मैकनिलयं न्यबन्धीद्धर्मसंग्रहम् ।। २२ ।।

प्राचारीत्पत्रिकां शैवरहस्यार्थविबोधिनीम् ।
कृतनानाविधकृतिश्चीर्णपाशुपतव्रतः ।। २३ ।।

भारद्वाजकुलोद्भूत उद्भटाराध्यवंशजः ।
ज्वालाम्बिकाऽघोरनाथदाम्पत्यफलितोदयः ।। २४ ।।

श्रीमद्वीरेश्वराराध्यकल्याणगुरुसेवकः ।
श्रीश्रीनिवासमखिराट्कृपाधिगतसत्कलः ।। २५ ।।

त्रैलिङ्गो नागलिङ्गाख्यः शिवध्यानपरायणः ।
भगवच्छ्रीनीलकण्ठशिवाराध्यविनिर्मितम् ।। २६ ।।

शारीरकब्रह्मसूत्रभाष्यमार्जवदुर्जयम् ।
तत्त्वत्रयार्थनिक्षेपं विवृणोति यथामति ।। २७ ।।

कुमतध्वान्तसन्दोहविनाशाय प्रसार्यते ।
लघ्वर्कदीपिकोपेता शिवचिन्तामणिप्रभा ।। २८ ।।

तत्त्वं यच्छिवशब्दितं श्रुतिगतं व्यासेन मीमांसितम्
सञ्चिन्त्यैव परिष्कृतं भगवता भाष्यप्रणेत्रा पुनः ।
व्याख्याय प्रतिबोधितं गुरुवरैः सत्यार्थसिद्धादरै-
स्तस्याऽमर्त्यमणेः प्रमाणकषणादुद्दीप्यते सुप्रभा ।। २९ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अतिगम्भीरवाग्गुम्भं भगवत्पादभाषितम् ।
भाष्यमम्भोनिधिमिव कस्तितीर्षेदमूढधीः ।। ३० ।।

मद्गृहीततदीयार्थबोधलब्धप्रयोजना ।
अनियत्तावबोधार्था न दोषाय भवेत्कृतिः ।। ३१ ।।

भाष्यं यद्यपि विस्तरेण विवृतं विज्ञैरनेकैः पुरा
न व्यक्तीकुरुते तथापि हि निजं भावं निगूढं परम् ।
व्याख्याता विमतो भवेद्यदि कथं भाष्याशयः स्यात्स्फुटो
लब्धो मेऽवसरस्ततो विवरणे भाष्यस्य विज्ञाः पुनः ।। ३२ ।।

परात्मना दक्षिणदिङ्मुखेन यथा नियुक्तोऽस्मि तथा ब्रवीमि ।
ततः प्रबन्धावळिसङ्गतेन गुणेन दोषेण न संसृजामि ।। ३३ ।।

स्वाज्ञानविस्मृततनुस्त्विह संसरामि ब्रह्माऽहमेव हि भवन्निति बादरेर्या ।
माया विमोहयति शाम्यतु सा नितान्तं तत्त्वावबोधपरमास्त्रनिरस्तरूपा ।। ३४ ।।

संसारमोक्षस्थितिबन्धहेतोः सर्वात्मनोऽश्रान्तमुपासितस्य ।
पत्युः पशूनां परमप्रसादान्मुञ्चेयमित्यस्त्वचला मतिर्मे ।। ३५ ।।

सविशेषः शिवाद्वैतो नीलकण्ठप्रतिष्ठितः ।
तत्र यत्सविशेषत्वं शङ्करेण विखण्डितम् ।। ३६ ।।

मण्डयामास तद्भूयो रामानुजयतिः परम् ।
तदीयं शिवपारम्यं रामानुजविदूषिताम् ।। ३७ ।।

मण्डयामास तत्सर्वं श्रीमानप्पयदेशिकः ।
एवमावरणापायाच्छिवाद्वैतप्रभाकरः ।। ३८ ।।

यथावद्भात्यपहरन् धीमतामान्तरं तमः ।
रामानुजाप्पयज्वानौ वैदुष्यानुपमावपि ।। ३९ ।।

यतस्तौ हरिपारम्यशुद्धाद्वैताभिमानिनौ ।
तत्यजुः शिवपारम्यसविशेषत्वके ततः ।। ४० ।।

तदुक्तिसारं संगृह्णन् तत्त्यक्तं पूरयन्नपि ।
संक्षेपादेव वच्म्यत्र विस्तरोऽन्यत्र दृश्यताम् ।। ४१ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रस्थानानि विमोक्षशास्त्रगहनेऽनेकानि वीक्ष्य भ्रमाद्
गन्तव्येऽध्वनि संशयाद्विचरतां खिन्नात्मनां धीमताम् ।
पन्थानं श्रुतिसम्मतं प्रकटितुं निर्वर्त्तितेयं कृतिः
नैवोपक्रमिता बुधा ननु मया वैदुष्यदर्पोद्धतेः ।। ४२ ।।

ये लोका बुहुभाष्यदर्शनवशाद्विक्षिप्तनैजान्तराः
ये भूयः किल पक्षपातविरहान्न्यायैकबद्धादराः ।
शृङ्गग्राहिकया परं श्रुतिगतं तत्त्वं जिघृक्षन्ति ये
तेषामेव कृते विभातु रचिता संक्षिप्तभाषा कृतिः ।। ४३ ।।

गाढोपगूढविततस्वमताभिमानछन्नेक्षणाः कृतिमिमां न विलोकयेयुः ।
याथार्थ्यसंग्रहणलोलुपताधुरीणनिष्पक्षपातधिषणा न किमाद्रियेरन् ।। ४४ ।।

मर्त्यालिदुर्विधिवशाद्बत तत्त्वशास्त्रेष्युच्चावचाध्वनिचयं रचयन्ति केचित् ।
सर्वार्थवित्सकलचेतनबुद्धिसाक्षीत्र्यक्षस्सदा नयतु मामृजुना पथैव ।। ४५ ।।

धीमन्दरेण मथितान्निगमान्तसिन्धोरभ्युद्धृतेन सरसद्युतिनिस्तुलेन ।
ग्रीवामलङ्कुरुत ग्रन्थवरेण विज्ञा येनेक्षितेन सुधियोऽभयमाप्नुवीरन् ।। ४६ ।।

भाष्यं श्रीभवदेवमुख्यविबुधैर्व्याख्यातमेवाऽद्य ते-
ष्वेकं वाऽपि समग्रमीक्षणपथं कुत्रापि नारोहति ।
यद्यप्यप्पयदीक्षितैर्विरचिता संलभ्यते दीपिका
पृथ्वी भाति तथापि तैर्हि विमतैर्व्यत्यासितं भूरिशः ।। ४७ ।।

तस्मादस्य विधेहि सद्विवरणं मूलानुसारीति हि
प्राज्ञैरायसपाशतोऽतिबलयाऽदुर्लङ्घ्यदैवाज्ञया ।
मादृग्दुस्तरसूत्रभाष्यविवृतिव्यापारघोराम्बुधा
वाबद्धो विनिपातितो न हि बुधा वैदुष्यदर्पोद्धतेः ।। ४८ ।।

तथापि शिवनिष्ठानां प्रसादः कृतसंविदाम् ।
उत्तारयिष्यति कथं पोतीभूय न मामयम् ।। ४९ ।।

विश्वस्येत्येव कृत्येऽस्मिन् लेखिनीं चालयाम्यहम् ।
लिखितुं वोपेक्षितुं वा मम नास्ति स्वतन्त्रता ।। ५० ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

परात्मा दक्षिणाशास्यः स्वे हितं कारयिष्यति ।
समाप्तौ साधुतायां वा सुधीजनबहूकृतौ ।। ५१ ।।

यद्यप्यस्ति न मे वाच्छा तथाऽपि मम लेखिनी ।
आर्जवे पथि गम्येति प्रार्थये बुद्धिसाक्षिणम् ।। ५२ ।।

इह खल्वभीष्टमभीप्सताम् अनिष्टं च परिजिहीर्षतां पुरुषाणामप्रत्यक्षानुमानगम्येऽलौकिकपुरुषार्थरूपे वस्तुन्यशङ्कितपौरुषेयत्वदोषतया भवति वेदराशिरेव प्रमाणम्। तत्र च पशुपुत्रस्वर्गाद्यैहिकामुष्मिक-फलसाधककर्मपरेऽपि पूर्वभागे, परमपुरुषार्थप्रतिपादनसमर्थो जागर्त्येवोपरिभागः। अथाऽयम् **अनिवृत्तसंशयः स्वाशयं न प्रयच्छेदि**ति तदर्थनिर्णिनीषयैव कृतावतरणे भगवति बादरायणे निर्णोद्य विशयजालमारचयत्यपि शारीरकब्रह्ममीमांसां, हन्त! कलिदोषकलुषितशेमुषीकाः कतिचन कुपथगामिनस्तां स्वस्वपथमाचकर्षुः। ततश्च प्रथमचरमपुरुषार्थनिर्धारणपरायणो भगवान्बोधायनो महर्षिर्ब्रह्ममीमांसायाः सूत्रवृत्तिं व्यधासीत्। अथ तामपि निराकृत्य कुतर्कबलाद्वैयासिक्या मीमांसाया बहुषु बहुविधान्यारचयत्सु विवरणानि धीमत्सु चाऽस्य तन्त्रस्य विष्वङ्मुखत्वं विभूषणमेवेति मन्वानेषु प्रामाणिकेषु च परस्परविरुद्धार्थप्रदत्वमनवबोधकतानिदानमेवेति निश्चिन्वत्सु विफलितमीमांसाकृतप्रयासस्य वेदव्यासस्य सम्प्रार्थनया लोकानुजिघृक्षया च परिगृहीतमहेशांशावतारो भगवान्भाष्यकाराः **ऋषेर्हृदिस्थं ऋषिरेव वेत्ति** इति न्यायमनुसृत्य महर्षिबोधायनकृतवृत्त्यनुसारेण उत्तरमीमांसासूत्रनिकुरुम्बं व्याचिख्यासुः, मङ्गलादीनीति गोनर्दीयस्मृतिं शिष्टाचारं चाऽनुरुध्य, प्रारीप्सितस्य ग्रन्थस्याऽविघ्नपरिसमाप्तिप्रचयगमनार्थं प्रतिपिपादयिषितसिद्धान्तसूचनद्वारा नमस्काररूपं मङ्गलमादौ निबध्नाति ॐ नम इति।

पाशुपतव्रतनिष्ठोऽयमाचार्यः। अत एव सहकार्यन्तरविध्यधिकरणे यावदायुषं पाशुपतव्रतधारिणां मुक्तिरेव फलमिति निपुणतरमुपपादयिष्यति। तदेव मनसि निधाय प्रथमपादगताभ्याम् ॐ नम इति पदाभ्यां तुरीयपादगतेन शिवायेति पदेन च प्राणलिङ्गभूतं श्रीशिवषडक्षरीमहामनुमनुस्मरन् प्रियतमत्वादिष्टलिङ्गभूतेनाऽहंपदार्थेन सर्वान्तरत्वाद्भावलिङ्गस्य वाचकेन परमात्मशब्देन च तमेव विशिनष्टि। अवतेष्टिलोपश्चेत्यवधातोर्मन्प्रत्यये, प्रत्ययस्य टिलोपे, ज्वरत्वरेति वकाराकारयोरूढि सवर्णदीर्घे सार्वधातुकार्धधातुकयोरिति गुणे च सति, तस्य **कृन्मेजन्त** इति मान्तत्वेनाऽव्ययत्वात् **अव्ययादाप्सुप** इति चतुर्थ्या लोपे ओमिति, ब्रह्मणे इत्यर्थः। अनेन, **यः पुनरेतं त्रिमात्रेणोमित्यक्षरेण परं पुरुषमभिध्यायीते**त्याथर्वणोपनिषदि दहरशब्दितभावलिङ्गोपासनापर-ब्रह्मवाचकेन त्रिमात्रेणाऽपि नादकलासहितेन सूक्ष्मपञ्चाक्षरीरूपेण प्रणवेन तदनुसन्धानपूर्वकं कर्तव्येति विधानात्, तदाम्नातगुणविशेषोपसंहारेणाऽनुसन्धानं सूचितम्।

अहं पदार्थायेति - जीवे प्रयुज्यमानस्याऽहंपदस्याऽन्तरात्मत्वेन मुख्यार्थभूतायेत्यर्थः। यद्वा, अहमिति शक्तिशिवाद्वयं ब्रह्मोच्यते। तदेवाऽन्नादिकप्रपञ्चातीतमिति भावनेत्यादिना **अहमन्नमहमन्नमि**त्यादिवाक्यार्थस्य भाष्यकारेणैव जगद्व्यापाराधिकरणे प्रतिपादयिष्यमाणत्वात्। अनेनाऽन्नमयस्थूलतनुसम्बन्धिनः **इष मूर्जं तपसा नियच्छते**त्यादिश्रुतिप्रतिपादितस्येष्टलिङ्गस्याऽनुसन्धानं सूचितम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

लोकानां सिद्धिहेतव इति - इष्टाद्यनुसन्धानपराणामभिमतसकललोकप्राप्तिहेतव इत्यर्थः। **अथ यदि पितृलोककामो भवति सङ्कल्पादेवाऽस्य पितरस्समुत्तिष्ठन्ती**त्यादिनिगमनिगदितोऽर्थः सूचितो भवति।

सच्चिदानन्दरूपायेति। अनेन, **विभुं चिदानन्दमरूपमद्भुतम**िति कैवल्योपनिषदि सच्चिदानन्दरूपत्व-कीर्तनात्तदाम्नातगुणविशेषोपसंहारेणाऽनुसन्धानं सूचितम्।

अथ उपास्यं नमस्कार्यं वस्तु निर्दिशति **शिवाये**ति। एतेन

विद्यासु श्रुतिरुत्कृष्टा रुद्रैकादशिनी श्रुतौ।
तत्र पञ्चाक्षरस्तत्र शिव इत्यक्षरद्वयम्।। इति,

नाम्नोस्ति यावती शक्तिः पापनिर्हरणे द्विज।
तावत्पापानि कर्तुं वै शक्तः को वा कलौ युगे।।

इत्यादिस्मृतिवचनैः श्रीशिवनाम्नः परमोत्कर्षस्य व्यक्तत्वेन श्रोतॄणां श्रवणादिप्रतिबन्धकसकलदुरित-निवृत्तिर्भवतीति प्रथमं शिवनामसङ्कीर्तनस्य प्रयोजनमुन्नेयम्।

किञ्च, **शिव एको ध्येयश्शिवङ्करः; सर्वमन्यत्परित्यज्य** इति सकलनिगमान्तपर्यवसानभूताऽथर्व-शिखान्ताऽवतंसितमन्त्रेण सकलेतरदेवतापरित्यागपूर्वकं शिव एव ध्येय इत्यर्थो दर्शितः।

कथं ध्येय इत्याकाङ्क्षायां विशिनष्टि - **परमात्मन** इति - भावलिङ्गरूपायेत्यर्थः। युक्तञ्चैतत्। तैत्तिरीयोपनिषदि **तस्याश्शिखाया मध्ये परमात्मा व्यवस्थित** इति ध्येयस्य भावलिङ्गस्य परमात्मशब्देन व्यवहारात्।

अपि च, चतुर्भिरोमित्यादिविशेषणैर्व्याख्येयचतुरध्यायीप्रतिपाद्यमुख्यार्थसूचकैश्शिवो विशेष्यते। तथाहि, ओमित्यनेन तद्वाच्ये परब्रह्मणि शिवे सर्वेषां वेदान्तानां समन्वयः प्रथमाध्यायप्रतिपाद्यः सूचितः।

अथ परमेश्वरस्याऽद्वितीयत्वाङ्गीकारे द्वैतश्रुतीनां व्याकोपः। सद्वितीयत्वाङ्गीकारे अद्वैतश्रुतीनां व्याकोपः। तस्मादशेषप्रपञ्चाऽऽकारशक्तिविशिष्टस्य परमेश्वरस्याऽद्वितीयत्वात्, विशेषणगतभेदाप्रतिक्षेपाच्च न कश्चिदपि विरोध इति द्वितीयाध्यायप्रतिपादितविरोधपरिहाररूपोऽर्थः अहंपदार्थायेत्यनेनाऽऽवेदितः। अहमिति पदं सकलप्रपञ्चाकारशक्तिविशिष्टशिवाद्वैतवाचकमिति भाष्यकारेणैव जगद्व्यापाराधिकरणे वक्ष्यमाणत्वात्।

लोकयन्ते इष्टप्राणादिरूपं परमात्मानमिति लोकाः लिङ्गाङ्गसंयोगभाजः। तेषां सिद्धिः मुक्तिलाभस्तस्य हेतव इत्यर्थः। तेन शिवानुसन्धानपराणां पञ्चकृत्यपरः शिव एव मोक्षलक्ष्मीं ददातीत्यनेन मुक्तिसाधनस्य निगदिततया तृतीयाध्यायप्रतिपाद्योऽर्थो दर्शितः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

निजशक्तिभित्तिनिर्मितनिखिलजगज्ज्ञालचित्रनिकुरुम्बः
स जयति शिवः परात्मा सकलागमसारसर्वस्वम्।। २।।

भवतु स भवतां सिद्ध्यै परमात्मा सर्वमङ्गलोपेतः।
चिदचिन्मयः प्रपञ्चः शेषोऽशेषोपि यस्यैषः।। ३।।

सच्चिदानन्दरूपायेति - **ब्रह्मविद् ब्रह्मैव भवतीति** मुक्तिफलस्य ब्रह्मरूपत्वश्रवणादनाद्युपचारेण तिरोहितं स्वीयं निरतिशयं सच्चिदानन्दरूपमेव मुक्तिफलं मुक्तानामाविर्भवतीति चतुर्थाध्यायनिरूपितार्थो बोधितः।

अन्यच्च - ओमिति ब्रह्मवाचिना पदेन जगत्कारणत्वस्य विवक्षितत्वादण्वादिकारणवादिनो व्युदस्ताः। अहंपदार्थायेत्यनेन परब्रह्मणश्शिवस्य शक्तिवैशिष्ट्यप्रतिपादनान्निर्विशेषवादिनां व्युदासः। लोकानां सिद्धिहेतव इत्यनेन सकलस्य कर्मज्ञानफलस्य विवक्षितत्वेन केवलकर्मादिवादिनां निरासः। सच्चिदानन्दरूपायेत्यनेन शून्यवादिनो व्युदस्यन्ते। शिवायेति पदेन पाञ्चरात्रादयः प्रतिक्षिप्यन्त इत्याद्यूहनीयम्।

अथ वस्तुनिर्देशरूपं मङ्गलमारचयति **निजशक्तीति** - परात्मा जीवव्यतिरिक्ताऽत्मा जीवादर्थान्तरमित्यर्थः। **शिवः** नित्यनिरस्तनिखिलदोषो निरवशेषकल्याणगुणाकरश्च। **स** इति -

अनादिमलसंश्लेषप्रागभावात्स्वभावतः।
अत्यन्तपरिशुद्धात्मा शिव इत्यभिधीयते।।

अथवानन्तकल्याणगुणैकनिधिरीश्वरः।
शिव इत्युच्यते सद्भिः शिवतत्त्वार्थवेदिभिः।।

इति वचनसिद्धमुक्तविशेषणार्थं ध्वनयति। **जयति** सर्वोत्कर्षेण वर्तते। युज्यते चैतत्। नित्यनिरस्तनिखिलदोषस्य, निखिलकल्याणगुणाकरस्य च शिवस्य सर्वस्माच्चेतनाचेतनप्रपञ्चादुत्कर्षस्य सहजसिद्धत्वात्। उक्तार्थे लक्षणप्रमाणे दर्शयति निजेत्यादिविशेषणद्वयेन - निजा सहजा न तु कल्पितेत्यर्थः। शक्तिरेव भित्तिः, तस्यां निर्मितं निखिलं सकलाऽवान्तरभेदयुक्तं जगज्जालमेव चित्रनिकुरुम्बं येन स तथोक्तः। अनेन जगत्कारणत्वं लक्षणमावेदितम्। सकलानामागमसाराणामुपनिषदां सर्वस्वम्। सर्वस्वपदादरणीयस्तन्महातात्पर्यविषय इति हृदयम्। अनेनोपनिषदस्तत्र प्रमाणमित्युक्तं भवति।

अथाऽशीर्वचनरूपं मङ्गलं निबध्नाति **भवत्विति** - सर्वमङ्गलया श्रीगौर्या सर्वैः कल्याणगुणैश्चोपेतः। सः, **'यदा तमस्तन्न दिवा न रात्रिर्न सन्न चाऽसच्छिव एव केवलः'**, **'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृत'** इति च प्रसिद्धः। परमात्मा परा निरतिशया मा लक्ष्मीः यस्य तथाभूत आत्मा शिवः भवतां श्रोतॄणां सिद्ध्यै

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

नमः श्वेताभिधानाय नानाऽऽगमविधायिने।
कैवल्यकल्पतरवे कल्याणगुरवे नमः।। ४।।

अभिलषितपदाऽवाप्तये भवतु। निरतिशयैश्वर्यशालिनस्सर्वाभिलषितफलप्रदानसामर्थ्यं युज्यत एवेति भावः। निरतिशयैश्वर्यशालित्वमुपपादयति - **चिदचिन्मय** इत्यादिना। चिदचिन्मयः स्वरूपार्थे मयट्। चेतनाऽचेतनात्मकः अशेषः निरवशेषोपि प्रपञ्चो यस्य शेषः तदाराधनोपयोगितया तदर्थः। स भवत्विति पूर्वेणान्वयः। अपिशब्देनाऽनवशेषप्रपञ्चग्रहणम्। अशेषोपि शेष इति विरोधाभाससूचनं च क्रियते। शेषः परार्थत्वादिति शेषलक्षणमुक्तम्। कृत्स्नस्याऽपि जगतश्शिवाराधनोपयोगितया तच्छेषत्वमुपपन्नम्। तदुपयोगित्वं च चेतनवर्गस्य तत्तदधिकारानुगुण्येन शिवाराधनरूपज्ञानकर्मानुष्ठातृत्वेन तादृशकर्मोपकरणसम्पादकत्वेन च सम्भवति। अचेतनवर्गस्य तु तदाराधनस्थानत्वेन तदुपकरणादिभावेन च सम्पद्यत इत्यनवद्यम्। पशुपाशपतेः शिवस्य सर्वशेषित्वं तु - '**ब्रह्मादिस्तम्बपर्यन्तान्पशून्बध्वा महेश्वरः। पाशैरेतैः पतिर्देवः कार्यं कारयति स्वकम्।।**' इत्यादिपुराणवचनैरवगम्यते। एतेन जगतां नियन्तुरैश्वर्यं नान्येषामिव गजतुरगाभरणादिकतिपयचेतनाऽचेतनाऽत्मकम्। किन्तु निरतिशयमिति भावः।

अथैतादृशभाष्यविरचनोपयोगिसकलनिगमान्तार्थबोधकं महापाशुपतव्रतदीक्षाप्रदं च देशिकं नमस्करोति- **नम** इति। नानाविधाननेकप्रकारानन्योन्यविरुद्धार्थत्वेनाऽवभासमानानागमान् निगमान्तान् विधातुम् अविरुद्धैकार्थवत्तया निर्धारयितुं शीलमस्येति नानागमविधायी। सुप्यजाताविति ताच्छील्ये णिनिः। एवं वेदान्तानामशेषाणामविरोधेन शिवे तात्पर्यमुपदिश्य लोकाननुग्रहीतुमवतीर्ण इत्याकूतम्। एतेन विद्यागुरुत्वमावेदितम्। अथ पाशुपतदीक्षाप्रदत्वं ध्वनयति - **कैवल्यकल्पतरव** इति। कैवल्यस्य मुक्तेः कल्पतरुरिव तत्तुल्य इत्यर्थः। यथा कल्पतरुरर्थिनाममोघाभ्यर्थनस्तथा कैवल्यार्थिनामयमिति भावः। तथा कैवल्यप्रदानोपयोगिज्ञान-भक्तिवैराग्यादिकल्याणगुणसमृद्धिमुपपादयति - **कल्याणगुरवे नम** इति। कल्याणान्यस्य सन्तीति कल्याणशब्दो मत्वर्थीयाऽच्प्रत्ययान्तः। अपि च, कल्याणगुरुपदं दीक्षाप्रदगुरौ साम्प्रदायिकम्। तथा हि -

जन्तोरपश्चिमतनोस्सति कर्मसाम्ये निश्शेषपाशपटलच्छिदुरा निमेषात्।
कल्याणदेशिककटाक्षसमाश्रयेण कारुण्यतो भवति शाम्भववेधदीक्षा।।

इत्यागमिकसूक्तौ वेधाभिधशाम्भवदीक्षाप्रदातुः सद्गुरोः कल्याणदेशिकपदेन व्यवहारात्।

अन्यच्च, श्वेतपदेन शैवशास्त्रप्रचारणार्थमवतीर्णानामष्टाविंशतेर्योगाचार्याणामाद्यस्य श्वेताचार्यस्याऽपि नमस्कारः सूचितः। एवं लिङ्गाङ्गिशैवजनाऽनादिसम्प्रदायानुस्यूतशैवाचार्यप्रणामेनाऽस्य भाष्यकर्तुर्लिङ्गाङ्गसङ्गित्वम-विप्रतिपन्नमिति ज्ञेयम्। द्वितीयो नमश्शब्द आदरार्थः। **नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नम** इतिवत्। यथा श्रीरुद्रप्रतिपादकवाक्येषूभयतो नमस्कारा दृश्यन्ते तथा **यथा देवे तथा गुराविति** श्रुत्यनुरोधेन श्रीकल्याणगुरुप्रतिपादकेऽपि वचन इत्यनुसन्धेयम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

व्याससूत्रमिदं नेत्रं विदुषां ब्रह्मदर्शने।
पूर्वैः कलुषितं नीलकण्ठेनाऽद्य प्रसाद्यते।। ५।।

ननु **ॐ नमोऽहंपदार्थायेति** परशिवप्रतिपादकेऽपि वचन एकत एव नमस्कारः कृतः। गुरुस्तुतिविधायके कथमुभयतो नमस्कार इति चेन्न जानासि शैवसमयरहस्यम्। सिद्धान्ते हि शिवादपि गुरोराधिक्यं भावनीयमिति ध्वनितमिति हृदयम्।

अथ भाष्यकारः स्वचिकीर्षितस्य ग्रन्थस्य भाष्यान्तरेभ्य उत्कर्षमाविष्कुर्वन्नेव चिकीर्षितं प्रतिजानीते **व्यासे**ति - इदं व्याचिख्यासिततया बुद्धिसन्निहितं, व्याससूत्रं जातावेकवचनम्। व्यासप्रणीतं सूत्रजातमित्यर्थः। विदुषां साङ्गसशिरस्कवेदाध्ययनेन सामान्यतोऽधिगतब्रह्मस्वरूपाणां ब्रह्मदर्शने ब्रह्मणो दर्शने इदमित्थम्भूतमिति परिच्छेदात्मके निर्णये, नेत्रं घटादिपरिज्ञाने नेत्रमिव निरपेक्षकारणमित्यर्थः। एवम्भूतमेवेदं व्याससूत्रजातं पूर्वैः पूर्वाचार्यैः कलुषितम्। प्राचीनैर्व्याख्यातृभिः क्लिष्टार्थाध्याहारादिना कलुषीकृतम्। अभिभूतस्वाभाविकप्रसादतां नीतम्। तदिदानीमाचार्यप्रवरेण श्रीनीलकण्ठाराध्येन प्रसाद्यते, सूत्रकाराशयस्थित ऋजुयोजनाप्रदर्शनेन सम्यग्व्याख्यानेन आविर्भूतस्वाभाविकप्रसादं क्रियते। यथा कैश्चन कुवैद्यैर्विलोकनक्षम एव नयने अहिताञ्जनं प्रयुज्य कलुषीकृते सति तदेव पुनर्भिषग्वरेण हिताञ्जनमुपयुज्य प्रसाद्यते तद्वदित्यर्थः।

अत्रेदमवधेयम्। व्याससूत्रे नेत्रत्वाऽऽरोपेण रूपकालङ्कारेण क्लिष्टार्थेभ्यः शास्त्रान्तरेभ्योऽस्य उत्कर्षप्रतिपादनेन व्यतिरेकालङ्कारो ध्वन्यते।

शास्त्रान्तराणां हि क्लिष्टार्थत्वमविप्रतिपन्नमेव। तथा हि, व्याकरणे व्याख्यानैकशरणानि सन्देहबीजानि विशेषतः समुपलभ्यन्ते। अत एव परिभाषितं **व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्**इति। तथा अनुवृत्तिषु मण्डूकप्लुतिरुत्तरतश्चापकर्षोऽधिकृतत्वज्ञापकं स्वरितत्वं च न विदुषामपि शक्या वेदितुम्। तथा जैमिनितन्त्रेप्यत्यन्ताप्रतीताध्याहारगौणलक्षणाविपरिणामव्यवधारणविकल्पनादयो न व्याख्यामनपेक्ष्य बुद्धिगोचरा भवितुमर्हन्ति धीमतामपि। प्रकृतेषु वैयासिकसूत्रेषु न तादृक्क्लेशो दरीदृश्यते। तथा हि, समन्वयविरोध-परिहारसाधनफलप्रतिपादकतया चतुरध्यायी तत्र स्पष्टब्रह्मलिङ्गाऽस्पष्टब्रह्मलिङ्गादिप्रतिपादकतया चतुष्पादीमपि विषयविभागपुरस्सरं पठितॄणामसन्देहतत्त्वप्रतिपिपादयिषया निर्मितत्वात्।

एवं तत्त्वार्थसुखबोधसाधनमपि वैयासिकसूत्रनिकुरुम्बं हन्त कतिचिन्मायावादबलेन तर्ककौशलेन च विपरीतार्थतां व्यनैषुः। तथाहि, केचित् प्रकृतशास्त्रप्रतिपादितानां जगज्जन्मादिकारणत्व, मुख्येक्षितृत्व, मुक्तोपसृप्यत्वादिब्रह्मधर्माणां, कर्तृत्वादिजीवधर्माणां चाऽपवादार्थमादावेवाऽध्यासमध्याजह्रुः। यद्ययं शास्त्रकर्तुस्स्यादभिमतस्तर्हि ब्रूयादेनं स कण्ठरवेणैव। न चाऽयमसूत्रितोप्यध्याहर्तुं युज्यते। येन गलरवाऽनिगदितोऽपि ग्रन्थकर्तुः सम्मत इति गृह्येत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कृत्स्नशास्त्रप्रतिपादितजीवेश्वरभेदकथापवादैकप्रयोजनतयाऽस्य प्रामुख्येन वाचनिकत्वमन्तरेण ग्रहीतुमयुक्तत्वात्।

न चाऽत्र शास्त्रे न जीवेश्वरभेदकथा निगदितेति वाच्यम्। प्रायशः प्रत्यधिकरणमपि तत्तदौपनिषदं वाक्यं विषयीकृत्य किमिदं जीवपरमुत परमेश्वरपरमिति संशयं, जीवपरमिति पूर्वपक्षं च प्रदर्श्य नेदं जीवपरं, किन्तु परमेश्वरपरमेवेति सिद्धान्तीक्रियमाणतयाऽस्य शास्त्रस्य जीवपरभेदप्रतिपादकात्वऽवसायात्।

किञ्च - **भेदव्यपदेशाच्चाऽन्यः, अधिकन्तु भेदनिर्देशात्, नेतरोऽनुपपत्तेः, अनुपपत्तेस्तु न शारीरः, इतरपरामर्शात्स इति चेन्नाऽसम्भवात्, शारीरश्चोभयेऽपि हि भेदेनैनमधीयते** इत्यादिसूत्रेषु जीवपरभेदस्य कण्ठरवेणैव निगदितत्वाच्च।

न चाऽयं जीवपरभेदोऽविद्याकल्पित इति वाच्यम्। तत्कल्पनस्य भवद्वचनमन्तरा प्रकृतशास्त्राऽगदितत्वेन अविश्वसनीयत्वात्। तत्कल्पकाऽविद्याया एव दुर्निरूपत्वाऽवधारणेन तन्मूलकत्वस्य सुतरामनुपपन्नत्वाच्च।

अपि च, जीवपरभेदस्याऽविद्याकल्पिततत्वेन तदपवादपूर्वकमभेदनिश्चयस्यैव शास्त्रप्रतिपाद्यत्वे एतादृशनिर्णयस्यैव विस्पष्टं कथनीयतया तादृशनिश्चयस्य प्रकृते कुत्राऽप्यकथनेनाऽतात्त्विकत्वावगमाच्च।

तस्मादविद्याकल्पितभेदप्रतिपादकतयाऽस्य शास्त्रस्य यज्जीवब्रह्मैक्यविषयत्वसाधनं, तत्सिसाधयिषया शास्त्रारम्भे यदध्यासप्रवेशनं जलनिधिमथनारम्भ इव हालाहलप्रवेशनं परेषां तत्कलुषीकरणविधान्तरमेवेति हृदयम्।

तथा आनन्दमयाधिकरणे **आनन्दमयोऽभ्यासा**दित्यानन्दमयस्य ब्रह्मत्वेन सूत्रकृता सिद्धान्तिते आनन्दमय इत्यत्र **ब्रह्मपुच्छं प्रतिष्ठा** इति स्वप्रधानमेव ब्रह्मोपदिश्यत इत्यादिकमध्याहृत्य आनन्दमयस्य जीवत्वमेव परै राद्धान्तितम्। अत्र यद्वक्तव्यं तदधिकमुपरिष्टाद् द्रष्टव्यम्।

एवमन्यैरप्यनीश्वरस्येश्वरतासाधनमपि श्रुतिसूत्रविरुद्धमेव। न च नारायणपरत्वं ब्रह्ममीमांसासम्मतमिति वाच्यम्। **शब्दादेव प्रमिता** इत्यधिकरणे ईशानशब्दादेवाङ्गुष्ठमात्रस्य परतत्त्वतया प्रमितत्वनिबन्धनात्। वक्ष्यमाणरीत्या ईशानशब्दस्य योगरूढत्वाङ्गीकारस्याऽऽवश्यकत्वेन तदनङ्गीकरणे सूत्राऽसामञ्जस्यस्य तदङ्गीकरणे नारायणपरत्वव्याहतेश्च समुचिततया नारायणपरत्वस्याऽशास्त्रसम्मतत्वसिद्धेर्दुर्वारत्वात्।

यद्यप्येवंविधव्याख्यानकर्तारोऽस्माद्भाष्यकर्तुरर्वाञ्च एव, तथाप्येवंविधमार्गानुयायिनां ये पूर्वपूर्वोपदेष्टारस्ते पूर्वाचार्यशब्देनोदाहियन्त इति ज्ञेयम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ब्रह्मसूत्रं पयो गाङ्गं मलत्रयविशोधकम्।
परैः पङ्किलितं नीलकण्ठाराध्येन शोध्यते।। ६।।

नीलकण्ठो विवृणुते श्रीकण्ठोपसमाह्वयः।
बोधायनोक्तिमालम्ब्य ब्रह्मसूत्रं यथाश्रुति।। ७।।

श्रीमतां व्याससूत्राणां श्रीकण्ठीयः प्रकाशते।
मधुरो भाष्यसन्दर्भो महार्थो नाऽतिविस्तरः।। ८।।

अथ व्याचिख्यासितं ब्रह्मसूत्रं बन्धविमोचनदक्षमिति रूपकनिरूपणेनाऽवेदयति - **ब्रह्मसूत्रमिति**।

यथा मन्दाकिनीपयः समस्तपापापनोदनक्षमं, तथेदमपि शैवशास्त्रप्रसिद्धाऽऽणवमायिककार्मिकरूपत्रिविधमलसंशोधनमुखेन नित्यनिर्वाणप्रदमित्यर्थः। **परैः पङ्किलितमि**त्यादिना मतान्तरप्रवर्तकपरभाष्यसम्पर्कसङ्कलितविपरीतार्थरूपदोषनिवर्तनद्वारा निर्मलीक्रियत इति व्यज्यते।

अथ स्वीयोपसमाख्याविशेषप्रख्यापनद्वारा स्वीयनामविशेषमूलं भाष्यकर्तृभेदाभेदविषयं संशयं निर्वापयति - **नीलकण्ठ** इति।

बोधायनोक्तिमिति - एतेन श्रीभाष्यकृता बोधायनवृत्तिमालम्ब्यैव भाष्यमारच्यत इति यदुक्तं तदयथार्थमिति विख्यापितम्। तथा हि, यद्यपि महर्षेर्बोधायनस्य सविशेषतत्त्वनिर्धारकत्वेऽपि तदीयवृत्तौ चिदचिदात्मकसकलजगद्रूपपरमशक्तिविशिष्टस्य तत्त्वस्य **मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमि**त्यादिश्रुतिशतमतानुसारेण शिवरूपत्वनिर्णयेन श्रीभाष्यकृदभिमतश्रीपतिपारम्यस्य निर्धूतत्वात्।

श्रीमहान्यासरुद्रयागकल्पादिशिवाराधनपरकृतिशतग्रथनेन बोधायनस्य परमशैवत्वस्य जगत्प्रसिद्धत्वेन श्रीभाष्यगतनारायणपरत्वस्य बोधायनमतविरुद्धत्वादित्यलमधिकेन।

एवं चिकीर्षितप्रतिज्ञायामेव स्वचिकीर्षिते परविवरणेभ्य उत्कर्षं निवेद्याऽत्र गुणान्तरमपि दर्शयति **श्रीमतामि**ति - **श्रीः** वेदत्रयी **सा हि श्रीरमृता सतामि**ति श्रुतेः। तद्वतां सकलवेदार्थनिर्णयार्थानामित्यर्थः। यद्यप्येतान्यधिकरणसूत्राण्येकैकविषयवाक्यार्थनिर्णयार्थं प्रवृत्तानीति ज्ञायते, तथाऽपि तानि न्यायसाम्यात् बहुश्रुत्यर्थनिर्णायकानीत्यवगम्यते। सकलवेदतदर्थविदा भगवता बादरायणेन प्रणीतानां सूत्राणामखिलनिगमार्थनिर्णयार्थत्वस्य समुचितत्वात्। एवंविधानां व्याससूत्राणां श्रीकण्ठनिर्मितो भाष्यसंदर्भः प्रकाशते प्रकर्षेण विराजते। **श्रीकण्ठीय** इति साभिप्रायं विशेषणम्। श्री स्त्रिवेदी कण्ठे यस्येति विग्रहेण सकलवेदतदर्थाभिज्ञत्वस्य प्रतीयमानत्वात्। सकलवेदार्थविदा कृतानां सूत्राणां तादृशेनैव विरचितं विवरणं सार्थक्यमश्नुत इति भावः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सर्ववेदान्तसारस्य सौरभास्वादमोदिनाम्।
आर्याणां शिवनिष्ठानां भाष्यमेतन्महानिधिः।।९।।

एवंविधार्थविशेषलोभेनैवोपाह्वयग्रहणमिति ज्ञेयम्। **मधुरः** - सरस इत्यर्थः। माधुर्यं चेह **रसो वै स** इत्यादि श्रुतिनिर्धारितनिरतिशयानन्दरूपपरशक्तिविशिष्टपरब्रह्मप्रतिपादकत्वम्। अथाप्ययं न काव्यमिव परब्रह्मगुणवर्णन-मात्रविश्रान्तः। किन्तु तन्निर्णयोपयोगिन्यायसहस्रभरित इत्याह - **महार्थ** इति। अप्येवमत्र नाऽस्त्येव शब्दप्रपञ्चो भूयान्। तथापि, व्याख्यानतो विशेषप्रतिपत्तिरिति न्यायेन तदभिप्रायस्य सुगमत्वादित्याशयेनाऽह - **नातिविस्तर** इति। नञः समासाऽभावो नशब्देन समासो वाऽत्राऽनुसन्धेयः।

एतादृशगुणमप्येतद्भाष्यं केषाञ्चिदनादरणीयमिति सर्वोपादेयत्वविरहं दोषमाशङ्क्य नाऽयं दोषः, किन्तु गुण एवेत्याह - **सर्वे**ति। सर्वेषां वेदान्तानां यत्सारस्यमनवधिकास्वादनीयरसात्मके परमात्मनि तात्पर्यं तत्सौरभमिवेत्युपमितसमासः। एवं दिव्यपुष्पसौरभवद्व्यापिनो वेदान्तबृन्दतात्पर्यस्य आस्वादः साकल्येनाऽनुभवः, तेन मोदितुं शीलमेषामिति ताच्छील्ये णिनिः। एवं विधानां शिवनिष्ठानां **तन्निष्ठस्य मोक्षोपदेशादि**ति सूत्रानुसारेण सर्वाङ्गलिङ्गसाहित्येन शिवं प्रपन्नानामार्याणां पूज्यानामिति। अत्राऽयमाशयः। केचिन्नारायणप्रपदनपरा दृश्यन्ते। ते हि पाञ्चरात्रसमयमात्रनिष्णाता अपि **वयमपि वेदप्रामाण्यवादिन** इति जनान्विश्वासयितुं क्वचित्कोणे श्रुतां काञ्चित् **एको ह वै नारायण आसी**दित्यादिकां श्रुतिमवलम्बमानाः **यदा तमस्तन्न दिवा न रात्रिर्न सन्न चाऽसच्छिव एव केवल** इत्यादिनानाशाखापठितपरमेश्वरपारम्यप्रतिपादनपराश्श्रुति-गिरस्समन्वेतुमक्षमाः समुपवीक्ष्यन्ते। तत्त्वमग्रे व्यक्तीभविष्यति।

अन्ये च परमेशितुस्स्वसमानाधिकराहित्यरूपमहामहिमप्रख्यापनपरां **एकमेवाऽद्वितीयं ब्रह्म** इति काञ्चिच्छ्रुतिमवलम्ब्य शुद्धाऽद्वैतमेव तत्त्वं निर्दिधीर्षन्तो **द्वा सुपर्णे**त्यादिश्रुतिशतानि समन्वेतुमशक्नुवानाः सर्वप्रमाणाधिगतं द्वैतं मिथ्याज्ञानविजृम्भितमावेदयन्तो दरीदृश्यन्ते। एवंविधानां श्रुत्येकदेशप्रामाण्यवादिनामत्राऽनादरे मेदुरेऽप्यथ ये सर्ववेदान्तसारस्य सौरभास्वादमोदिनः शिवनिष्ठा जगति विद्यन्ते तेषामिदं परमादरभाजनमेव भवेदिति।

एतेन सर्वश्रुतिप्रामाणिकानां शैवानामस्य भाष्यस्य परमादरणीयत्वेन श्रुत्येकदेशप्रामाणिकापरिग्रहो न दोषाय। किन्तु गुणायैवेति सर्ववेदान्तेत्यादिविशेषणेन व्यज्यते।

महानिधिरिति - यथा महानिधिः पुराकृतसुकृतानामेव निजरूपमावेदयन्नवलोकमात्रेणैव निरतिशयानन्दकरस्तदभीप्सितसर्वार्थप्रदश्च, तद्वदिदमपि भाष्यं शिवनिष्ठानां दर्शनमात्रेण महानन्दकरं, सकलवेदान्तार्थनिर्णयेन निरन्तरशिवध्यानोपयुक्तसकलकल्याणगुणमहिततदीयरूपविशेषसमर्पकं चेति वेदनीयम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ जिज्ञासाऽधिकरणम्

इहौपनिषदी मीमांसा समारभ्यते।

एतेन यथा निधानमकृतसुकृतानां वृश्चिकभाजनमिव, घोरदर्वीकराकरमिव दृश्यमानमपि सुकृतशालिनां सर्वार्थप्रदतया भूष्यमेव भवति न तु दूष्यं तद्वदिदं भाष्यमप्यकृतसुकृतानामनर्थप्रदमिव दृश्यमानमपि न दूष्यं भवतीति गम्यते। अपि च, दधीचिगौतमादिशापदग्धेभ्यो विरुद्धवादिभ्यश्चोरेभ्यो महानिधिवदस्य भाष्यस्य यत्नेन गोपनीयतया तदनादरणमस्मदपेक्षणीयमेवेति भावः।

अथ जिज्ञासाऽधिकरणम्

इह - कर्मब्रह्मपरभागद्वयात्मके वेदे य उपनिषद्भागस्तत्र मीमांसा तदर्थनिर्धारणोपयुक्तन्याय-प्रकाशनपरसूत्रनिकुरुम्बरूपा समारभ्यत इत्यर्थः।

ननु, इयं हि मीमांसा वेदान्तार्थप्रकाशनार्थं प्रवृत्ता। तदर्थप्रकाशनार्थं न पृथक् शास्त्रारम्भः समुचितो भवति। तद्विवरणेनैव तदवबोधसिद्धौ तादर्थ्येन पृथक् मीमांसारम्भस्य निरर्थकत्वात्।

न च सर्ववेदान्तानां ग्रन्थविस्तरमन्तरेण विवरीतुमशक्यतया तादृशविवरणस्य गौरवाश्रयत्वेन सर्ववेदान्तविषयवाक्यगतविशयविनिवारणार्थं लघूपायेन न्यायग्रथनरूपमीमांसाकरणमेव समुचितमिति वाच्यम्। सर्ववेदान्तविवरणापेक्षया मीमांसायां ग्रन्थलाघवसम्भवेऽपि मीमांसासूत्राणां संग्रहरूपत्वेन विवरणापेक्षिततया परस्परविरुद्धनानार्थावकाशदायित्वेन तादृशबहुविधविवरणसम्पत्त्या तत्त्वार्थाधिगमस्य दुर्लभत्वात्। तत्तद्विवरणार्थनिर्धारणार्थमसङ्ख्याकानां विवरणादीनां सम्भावितत्वेन प्रकृतेऽपि ग्रन्थगौरवस्याऽनपायाच्च। तदुक्तमभियुक्तैः **सूत्रात्मा पारिजातः सकलमभिमतं मह्यमर्थं स दद्यादिति**। एवं प्रकृतमीमांसासूत्रजातस्य पारिजातवत्तत्तद्विद्वदभिमतार्थदायित्वेन स्फुटतया तत्तद्विद्वन्निर्णीतनानार्थेषु तत्त्वार्थस्य दुरवगमतया चैतन्मीमांसा निरर्थिकेति चेन्न।

सर्ववेदान्तविवरणस्य दुष्करतया दुर्दर्शतया च तदपेक्षया सर्ववेदान्तविषयगतविषयविनिवारणार्थं लघूपायेन मीमांसाकरणस्यैव समुचितत्वात्।

न च, सूत्राणां संग्रहरूपत्वेन अन्योन्यविरुद्धनानार्थावकाशदायित्वेन च तादृशबहुविवरणसम्पत्त्या तत्त्वार्थाधिगमो दुर्लभ इति वाच्यम्। सूत्राणां सङ्ग्रहरूपत्वेन विवरणापेक्षायां सत्यामपि विरुद्धार्थावकाशदायित्वाऽ-भावेन सद्विवरणवशतस्तत्त्वार्थाधिगमस्य सुलभत्वात्।

न च परस्परविरुद्धेषु विवरणेषु बहुष्विदमेव सद्विवरणमिति निर्णेतुमशक्यत्वेन तद्वशतस्तत्त्वार्थाधिगमो दुष्प्राप इति वाच्यम्। मतान्तराभिनिवेशवतामल्पमेधसां चेदं सद्विवरणमिति निर्णेतुमशक्यत्वेपि तटस्थानां सुमेधसां च सद्विवरणमिदमिति निर्णेतुं शक्यत्वात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तथाहि, **शब्दादेव प्रमिता** इत्यधिकरणे **अङ्गुष्ठमात्रः पुरुष** इति कठवल्लीमन्त्रश्रुतः पुरुषः जीवो वा ब्रह्म वेति संशय्य अल्पपरिमाणत्वाज्जीव एवेति पूर्वपक्षं कृत्वा शब्दादेव **ईशानो भूतभव्यस्येति** चरमश्रुतेशानशब्दस्य ब्रह्माभिधानश्रुतित्वेन ईशानशब्दादेव ब्रह्मेति राद्धान्तितम्।

ननु, तत्र भूतभव्यस्येत्यैश्वर्यप्रतिसम्बन्ध्युपादानेन रूढ्युन्मेषो न सम्भवति। योगरूढिमतां शब्दानां यौगिकार्थप्रतिसम्बन्ध्युपादाने यौगिकार्थपरत्वात्। अत एव **पद्मानि यस्याऽग्रसरोरुहाणि प्रबोधयत्यूर्ध्व-मुखैर्मयूखैरि**तिश्लोके सरः प्रतिसम्बन्ध्यग्रपदोपादानवति सरोरुहशब्दे स्थितेपि पद्मशब्दप्रयोगो दृश्यते। अन्यथा **उत्फुल्लस्थलनलिनीवनादमुष्मादुद्धूतस्सरसिरुहोद्भवः परागः** इत्यत्र सरसिरुहशब्दस्येवाऽत्र सरोरुहशब्दस्य रूढ्युन्मेषे पद्मपदस्य पौनरुक्त्यं प्रसज्येत। तस्मादिह ईशानो भूतभव्यस्येति पदद्वयसमभि-व्याहाररूपवाक्येन ब्रह्मलिङ्गमेव बोध्यत इति चेत्। उच्यते। शब्दश्रवणमात्रेण समुपलभ्यमानो रूढ्युन्मेषो यौगिकार्थप्रतिसम्बन्धिपदेन न प्रतिबद्धुं शक्यते। न हि तत्प्रतिसम्बन्धिपदानुपादान एव रूढ्युन्मेष इति राजाज्ञाऽस्ति। यद्येवं तर्हि पूर्वोदाहृतश्लोके पद्मपदं स्यात्पुनरुक्तमिति चेदत्रेदमवधेयम्। व्यङ्ग्यार्थप्रधानेषु काव्येषु यस्य पदस्य यौगिकार्थो व्यञ्जनाव्यापारानुकूलस्तत्पदं यौगिकार्थ एवोपक्षीणं मत्वा तदीयरूढ्यर्थसमर्पकं पदान्तरं क्वचिदुपादीयत इति न तत्पदोपादानं यौगिकार्थप्रतिसम्बन्ध्युपादानस्य रूढ्युन्मेषविरोधित्वप्रयुक्तम्। तदनुपादानेऽपि -

तव प्रसादात्कुसुमायुधोऽपि सहायमेकं मधुमेव लब्ध्वा।
कुर्यां हरस्याऽपि पिनाकपाणेर्धैर्यच्युतिं के मम धन्विनोऽन्ये।।

इत्यत्र तद्दर्शनात्। अत्र हि कैमुतिकन्यायोपयोगिनि सारतरायुधत्वव्यञ्जनानुकूले यौगिकार्थ एव पिनाकपाणिशब्दमुपक्षीणं मत्वा तद्रूढिविषयशिवसमर्पणार्थं पदान्तरं प्रयुक्तम्।

किञ्च - यस्य योगरूढिमतः पदस्य सन्निधौ तदलभ्यं कस्यचिदवयवार्थस्य विशेषकं किमपि प्रथममुपादीयते, यथा **पद्मानि यस्याग्रसरोरुहाणी**ति, यथा वा **वदनं पद्ममेवाऽस्याः लावण्यसरसीरुहमिति** तत्पदं तद्विशेषितयौगिकार्थवशीकृतमिति तेनापि हेतुना तत्र रूढ्युन्मेषो न भवतीति वक्तुं शक्यम्। इह तु सङ्कोचकाभावादीशानपदयौगिकार्थतया तल्लब्ध एवाऽर्थो **भूतभव्यस्ये**त्यनेन पश्चादनुवदिष्यत इति नाऽत्र तदनुन्मेषशङ्कावकाशः। एवञ्च अत्रत्येशानशब्दरूपाभिधानश्रुतिश्शब्दशब्देन विवक्षिता। भूतभव्ययोः प्रकरणोपपदादिसङ्कोचकाभावेन असङ्कुचितभूतभविष्यद्वस्तुजातपरत्वात्तन्नियन्तृत्वमपि ब्रह्मलिङ्गम्। एतस्मादुभयस्माच्च अङ्गुष्ठप्रमितः परमेश्वर इति निश्चीयते।

अत्रैवमुभयोः श्रुतिलिङ्गयोरुपपत्तावपि श्रुतेर्लिङ्गस्य दुर्बलत्वेन भूतभव्येशितृत्वरूपलिङ्गमास्ताम्। शब्दादीशानशब्दरूपाभिधानश्रुतिमात्रादेव अङ्गुष्ठप्रमितः परमेश्वर एवेति शब्दादेवेति भगवता बादरायणेन राद्धान्तितम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अत्र केचिदीशानशब्दस्याऽभिधानश्रुतित्वाऽभ्युपगमे अस्य शास्त्रस्य नारायणपरत्वं व्याहन्येतेति मन्यमानाः यौगिकार्थपरत्वमेवोरीकृत्य **ईशानो भूतभव्यस्ये**ति पदद्वयसमभिव्याहाररूपवाक्यादिति व्याचक्षते। तदिदं विवरणं सूत्रविरुद्धम्। तथा हि, सूत्रकृता भूतभव्येशितृत्वरूपलिङ्गमपि शब्दाद्दुर्बलमिति, ततः प्रबलया श्रुत्या ब्रह्मणि निर्धार्यमाणे परैः लिङ्गादपि दुर्बलस्य वाक्यस्य प्रमाणीकरणात्। शब्दः श्रुतमात्रस्तदर्थावगममन्तरेणैव अङ्गुष्ठमात्रः परमेश्वर इति निश्चिनोतीत्येवकारेण ईशानशब्दगतरूढिं व्यञ्जयति भगवति बादरायणे तदनभ्युपगमादेवकारवैयर्थ्याच्च परेषां विवरणं सूत्राऽननुगतमिति विशदमेव। एतादृशमपि विवरणं तत्राऽभिमानवतामल्पमेधसां च सदिव प्रतिभासमानमपि निरभिमानिनां सुमेधसामसदेवेति स्फुटं विज्ञायत एव।

अन्ये च **परिणामादि**ति भगवति सूत्रकृति परिणामकारणवादं निश्चिन्वति, हन्त! तन्निराकृत्य विवर्तवादमुपनिबध्नन्ति। इदं पूर्वपक्षसूत्रमित्यपि न तैरुच्यते। येन विवर्तः सम्मतः सूत्रकर्तुरित्यभ्युपगन्तुं युज्येत। त एव हि परस्तात् सूत्रकृत् परिणामकारणवादं चाश्रयति सगुणेषूपासकेषूपयोक्ष्यत इति ब्रुवते। एतेन परिणामवादस्सूत्रकृतस्सम्मत इति तदुक्त्याऽपि स्फुटीभवति। एवं **कर्ता शास्त्रार्थवत्वादि**ति जीवस्य कर्तृत्वे सिद्धान्तिते तदवधूय तद्विरुद्धमकर्तृत्वमूरीकुर्वते।

तथा **उत्क्रान्तिगत्यागतीनामि**ति जीवस्याऽणुत्वे सूत्रकृता सिद्धान्तिते, तन्निराकृत्य तस्य विभुत्वमापादयन्ति। तदेतत्सूत्रविरुद्धम्। तथा हि, उत्क्रान्तिगत्यागतीनामिति उत्क्रान्तिगत्यागतिश्रवणेन जीवः परिच्छिन्न इति प्रतिज्ञाय, ततः **नाऽणुरतच्छ्रुतेरिति चेन्नेतराधिकारादि**त्यत्र श्रुतिषु **महानज आत्मा** इत्यादिना जीवस्य महत्त्वं श्रुतं व्याकुप्येदित्याक्षिप्य, इतराधिकारात् तद्विभुत्वं ब्रह्मप्रकरणे निबद्धमतो नेदं जीवगतमिति कण्ठरवेणैव विभुत्वं निराकृत्य, ततोऽपि **स्वशब्दोन्मानाभ्यां च** इत्यादिभिर्बहुभिस्सूत्रैरणुत्वं निर्धारितम्। एवं सति **तद्गुणसारत्वात्तद्व्यपदेशः प्राज्ञवदि**ति सूत्रे **तद्गुणसारत्वात्तु** इति तु शब्दमेकं प्रक्षिप्य **तु शब्दः पक्षं व्यावर्तयती**त्यारभ्य आदितस्सूत्रेषु निर्धारितं सिद्धान्तं स्ववचनैः प्रतिक्षिपन्ति। इदं सूत्रविरुद्धमिति विशदम्। तथाच, पूर्वोदीरितपक्षव्यावृत्तिस्सूत्रकृदभिमत इत्यभ्युपगन्तुं न युज्यते। यदि विभुत्वमेव जीवस्य सूत्रकृदभिमतं स्यात्तर्हि तेन तदेव कण्ठरवेण प्रतिज्ञायाऽणुत्वं निराक्रियेत। न तथा क्रियते। अथ कण्ठरवेण बहुभिस्सूत्रैर्विभुत्वनिराकरणपूर्वकमणुत्वं निर्धार्य परस्तात् तुशब्देन पूर्वोक्तपक्षव्यावर्तने तस्य प्रताकरमेव सिद्ध्येत्। तु शब्दोहनीयेन सिद्धान्तेन कण्ठरवेण बहुसूत्रसमर्थितस्याऽर्थस्य व्यावर्तनीयत्वात् सूत्रकृता कण्ठरवेणोदीरितस्सर्वोऽपि व्यावर्त्यः। तुशब्देन मयोन्नीत एव सिद्धान्त इति वक्तुं हन्त को नु क्षमेत। विमर्शने, तुशब्द एव न दृश्यत इत्यतश्चित्रं किमपरम्।

अन्यच्च, **कार्यं बादरिरस्य गत्युपपत्तेरि**ति कार्याधिकरणसूत्रे कार्यमित्यादिना निगदितं पूर्वपक्षमेव सिद्धान्तीकृत्य तदनन्तरं सिद्धान्ततया निबद्धं **परं जैमिनिर्मुख्यत्वादि**त्यादिकं पूर्वपक्षतया विवृतम्। एवं वैयासिकं सिद्धान्तमेव पूर्वपक्षीकर्तुं कं पुनः पूर्वपक्षमाशङ्क्याऽयं सिद्धान्तः प्रतिष्ठापितः। **कार्यं बादरिरि**त्यादिनेति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तदारम्भो ह्यत्र, किं पुरुषार्थः। पुरुषार्थो हि निरुपाधिकप्रेमद्वेषास्पदयोः सुखदुःखयोः

स इदानीं सूत्रैरेवोपदर्श्यते। परं जैमिनिर्मुख्यत्वादित्युक्तम्। यदि सूत्रकृत्परं जैमिनिरित्यादिकं पूर्वपक्षतयाऽभिप्रेयात् तर्हीदं सूत्रं पुरस्तादेव निबध्नीयात्। अथ यदि स पूर्वतः सिद्धान्तमुत्तरतश्च पूर्वपक्षं निबध्नीयात् तर्हि नूनं स जनान्वञ्चयेत्। न तेन हि भगवता प्रतारकेण भाव्यम्। तस्मादयमर्थो न सूत्रकृदभिमत इति विज्ञायते। एतेन, हन्त वैयासिकौ पूर्वोत्तरपक्षौ परमते व्यत्यासं गताविति विशदम्। एवमेतादृशविवरणानि सूत्रविरोधे नाऽसद्विवरणानीति सुविज्ञेयतया सद्विवरणतस्तत्त्वार्थवेदनं सुलभमित्यलं बहुना।

ननु, अन्ये किल वेदान्तानां कश्चिदर्थं स्वबुद्धिबलेनैव निर्णीय **यथा चायमर्थस्सर्वेषां वेदान्तानां तथा वयमस्यां शारीरकब्रह्ममीमांसायां प्रदर्शयिष्याम** इति वदन्ति। अयं हि भाष्यकारः **इहौपनिषदी मीमांसा समारभ्यत** इति वदति। एतेनाऽस्य भाष्यकर्तुः वेदान्तार्थनिर्धारणपटीयसी शेमुषी न विद्यत इति गम्यते। यतश्चाऽयं मीमांसानुमतेनैव पथा वेदान्तानामर्थं निर्धारयितुमीहते। परोक्तदिशा तु मीमांसासम्मतिमनपेक्ष्य वेदान्तानामर्थं स्वयमेव निर्णेतुं युज्यत इति च प्रतिभातीति चेदुच्यते। यद्यपि यथा चाऽयमर्थ इत्यादिवचनेन वेदान्तानां स्वबुद्धिनिर्धारितमेव कञ्चिदर्थं मीमांसायां प्रदर्शयितुमेवाऽन्येषामुद्यम इति तदुदीरितविधया वेदान्तार्थस्स्वयमेव निर्णेतुं युज्यत इति च प्रतिभात्येव। तथापि न तदीयो मार्गः प्रामाणिकानां हृदयङ्गमः। तथाहि - श्रुत्यन्तार्थनिर्धारणार्थमेव समारचितमिदमुत्तरं मीमांसाशास्त्रं भगवता बादरायणेन। श्रुत्यन्तसूक्तीनामापाततः परस्परविरोधादिना संशयजनकत्वमन्तरा नेदं शास्त्रं प्रवृत्तिमर्हति। संशयादेर्मीमांसाङ्गत्वात्। तन्निर्णयस्तु विद्यतेऽस्मिन्नेव शास्त्रे। अतश्च श्रुत्यन्तानां स्वाभिमतार्थमाविश्चिकीर्षुभिरपीदमेवाऽवशतो व्याख्येयमासीच्छास्त्रम्। यतश्च वैदिकास्सर्वे वेदान्तार्थं वैयासिकमीमांसाऽननुगतं नाऽनुमोदन्ते। अत एव किलाऽन्यैरपि यथा चाऽयमित्यादिना निगद्य स्वाभिमतार्थोप्यत्रैव प्रदर्शनीय आसीत्। अतश्च, यथा धर्ममीमांसानुगतो वेदार्थस्तथा वैयासिकमीमांसासम्मत एव वेदान्तार्थः परमार्थ इत्यभिप्रेत्य - **इहौपनिषदी मीमांसा समारभ्यत** इत्याह। एतेनास्या मीमांसायाः स्वरससिद्ध एव वेदान्तार्थ आदर्तव्य इति विशदम्। अन्यदीयानां हि विवरणानामसूत्रानुसारित्वं प्रायः प्रत्यधिकरणं व्यक्तीभविष्यति।

ननु, तर्हि ब्रह्मणः स्वरूपप्रमाणसाधनफलैर्विचारार्थं **जन्माद्यस्य यत** इत्याद्येन शास्त्रमारम्भणीयम्। किमाद्यसूत्रेणेत्याशङ्क्य तद्व्यावृत्त्यर्थं शङ्काचतुष्टयं प्रदर्शयति - **तदारम्भ** इत्यादिना।

ननु, अनुबन्धचतुष्टयं शास्त्रस्यैव न तु तदारम्भस्य। कथमत्र **तदारम्भो ह्यत्र किं पुरुषार्थ** इत्यादिना निगद्यत इतिचेदुच्यते। शास्त्रगतमेव तत्तदारम्भ उपचारेण व्यपदिश्यते। अनुबन्धचतुष्टयमन्तरा शास्त्रारम्भस्यैवाऽनुपपन्नतया यच्छास्त्रस्य प्रवर्तकं तत्प्रथमप्रवृत्तिरूपस्याऽऽरम्भस्याऽपि भवतीत्यारम्भगततया निर्देशो न विरुध्यते। **किं पुरुषार्थ** इति। किं प्रयोजनक इत्यर्थः। ननु विचारशास्त्रस्य विचार्यनिर्णयः प्रयोजनमिति विदितम्। किमत्र प्रष्टव्यमित्याशङ्क्याह - **पुरुषार्थो हीति**। मुख्यपुरुषार्थभूतयोः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्राप्तिरत्यन्तनिवृत्तिर्वा। कश्चेहाधिकारी, यस्यार्थित्वादयो धर्माः, किमस्य विषयः, यत्प्रसिद्धमनतिप्रसिद्धं च सन्देहजालसमारूढं वर्तते, कस्याऽनन्तरमस्याऽरम्भः यस्य नियतप्रयोजकतया पूर्वभावित्वमवगम्यत इति श्रोतृजनमनश्शङ्काशूकसमुन्मूलनाय सर्वज्ञशिखामणिना भगवता व्यासेन समवतारितमिदं सूत्रम्।

सुखदुःखनिवृत्त्योरन्यतरपर्यवसायित्वेनैव विचार्य निर्णयस्य प्रयोजनत्वमुपपादनीयम्। न ह्येतदुपपद्यते। तथाहि - सांसारिकं सुखदुःखनिवृत्योरन्यतरस्य प्रयोजनमुत संसारनिवृत्तिरूपापवर्गकालभावित्वेनाभिमतम्। नाद्यः, तत्र प्रमाणाभावात्। न द्वितीयः, अनादेः संसारस्य निवर्तयितुमशक्यत्वादिति भावः। **कश्चेति**। अर्थी समर्थो विद्वान् शास्त्रैरपर्युदस्तो वैदिककर्मण्यधिकारीत्यर्थित्वादयो गुणास्तावद्वाच्याः। न तावदेवाऽत्राधिकारिविशेषणम्। किन्तु **परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेद मायान्नाऽस्त्यकृतः कृतेने**त्यादिवचनैर्नित्यानित्य-वस्तुविवेकादयोपीत्यभिमतम्। तन्नोपपद्यते। **अक्षय्यँ ह वै चातुर्मास्ययाजिनस्सुकृतं भवती**त्यादिवाक्यैः कर्मफलानामपि नित्यत्वावगमेन तद्विवेकाऽसम्भवादिति भावः।

किमस्येति - यत्सामान्यतः प्रसिद्धं विशिष्याऽप्रसिद्धं च संशयास्पदं भवति स एव विषयः। ततश्च, यदि **अयमात्मा ब्रह्मे**त्यादिश्रुत्यनुसारेणाऽहमित्यनुभूयमानो जीव एव ब्रह्मेति मतं तथाऽतिप्रसिद्धत्वान्न तस्य विषयत्वम्। यदि **यन्मनसा न मनुत** इत्यादि श्रुत्यनुसारेण वाङ्मनसातीतं ब्रह्मेति मतं तथाऽत्यन्ताप्रसिद्धत्वान्न तस्य विषयत्वमिति भावः।

कस्याऽनन्तरमिति - न कर्मविचारस्याऽनन्तरमस्याऽरम्भः। तस्याऽत्र प्रयोगाभावादिति भावः।

ननु, अनुबन्धचतुष्टयाक्षेपप्रस्तावे प्रयोजनाधिकारिविषयेष्वनुपपन्नत्वाशयविशिष्टतया पृष्टेष्वनेन प्रयोजनेन विषयेण वाऽस्य शास्त्रस्य कः सम्बन्ध इति प्रष्टव्येऽत्र पूर्ववृत्तविशेषप्रश्नो न सङ्गच्छते। किं च विषयप्रयोजनवतः शास्त्रस्याऽरम्भे पूर्ववृत्तविशेषो नाऽपेक्ष्यत एव। **'अथ योगानुशासनम्', 'अथ शब्दानुशासनमि'**त्यादौ पूर्ववृत्तविशेषस्याऽदृष्टत्वादिति चेन्न। अस्याऽयं विषय इत्युक्ते तेन प्रतिपाद्यप्रतिपादकभावः सम्बन्धः इति, अस्येदं प्रयोजनमित्युक्ते तेन कार्यकारणभावः सम्बन्ध इति च तत एवाऽवगन्तुं शक्यत्वेन शास्त्रस्य विषयप्रयोजनाभ्यां सम्बन्धस्य पृथक्प्रतिपादनीयत्वाऽनपेक्षणात्।

अथ तत्तत्सम्बन्धानुपपत्तिशङ्काया अपि विषयत्वप्रयोजनत्वाऽनुपपत्तिशङ्कारूपत्वेन न पृथङ्निरूपणावश्यकता। न च, विषय एवाऽनन्यलभ्यत्वाकारो विषयत्वरूपः। प्रारीप्सितशास्त्रेण शक्यप्रतिपादनत्वं सम्बन्ध इत्यवान्तरभेदस्य विद्यमानतया पृथक्सम्बन्धनिरूपणमावश्यकमिति वाच्यम्। यत्प्रसिद्धमनतिप्रसिद्धं च संशयास्पदं तद्विषय इति प्राक्कथितत्वेन शक्यप्रतिपादनत्वविशिष्टस्यैवाऽनन्यलभ्यत्वस्य विषयत्वरूपत्वात्। अत्र हि सामान्यतः प्रसिद्ध्या शक्यप्रतिपादनत्वम्। विशिष्याऽप्रसिद्ध्याऽनन्यलभ्यत्वं च व्यज्यते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथाऽतो ब्रह्मजिज्ञासा ।। १-१-१।।

इति इदमेकमधिकरणम्। विषयसंशयपूर्वपक्षसिद्धान्तनिर्णयसंगतीनामाधारत्वमिहाऽधिकरणत्वम्।

यद्यपि पूर्ववृत्तं न सार्वत्रिकम्, तथाऽपि तद्यत्र तत्रैव शास्त्रेऽनुबन्धचतुष्टयमन्यत्र तु तत्त्रयमेवाऽस्तु यद्येवं तर्हि पूर्ववृत्ताभावेनाऽत्र शास्त्रारम्भाक्षेपः कथं घटत इति चेत्तत्रेदमाकूतम्। धर्मविचारं पूर्वभाविनमपेक्ष्याऽस्य शास्त्रस्यारम्भ इति सिद्धान्ती मन्यते। तन्न युज्यते। धर्मविचारस्याऽत्राऽनुपयोगात्। न च तस्य चित्तशुद्धावुपयोग इति वाच्यम्। जन्मान्तरानुष्ठिते नैव कर्मणा तत्सिद्ध्या तदर्थं कर्मविचारस्याऽनपेक्षितत्वात्। अतः सिद्धान्त्यभिमत-पूर्ववृत्तसंबन्धाक्षेपोऽपि ब्रह्मविषयाक्षेपवदुपपद्यत एव।

ननु, पूर्ववृत्तविषये नियमाभावेन सिद्धान्तिनो धर्मविचारस्य पूर्ववृत्तत्वाभिमानोप्यसङ्गत इति चेदुच्यते। यदि पूर्ववृत्तं योगानुशासनादाविव न विवक्षितं तर्हि तथैव स्यात्। प्रकृते **परीक्ष्य लोकान्कर्मचितानि**त्यादिना जिज्ञासाधिकरणविषयवाक्येन तत्र तत्र तत्त्वनिर्णयार्थं परिगृहीतैः श्रुतिलिङ्गादिभिश्च तद्व्युत्पादकस्य धर्मविचारस्य पूर्ववृत्ततया विवक्षितत्वादिति। एतच्छङ्काचतुष्टयपरिजिहीर्षयैव शास्त्रकृता प्रवर्तितमिदमादिमं सूत्रमित्याशयेनाऽह श्रोतृजनेत्यादिना।

अत्रैकैकशङ्काश्रयपूर्वपक्षनिराकरणार्थं किमिदमधिकरणचतुष्टयमित्याशङ्क्याह - **इदमेकमधिकरणमि**ति।

इदं शास्त्रं नाऽऽरम्भणीयमिति शास्त्रानारम्भरूपपूर्वपक्षस्यैकार्थाश्रयत्वेन पूर्वपक्षहेतूनां '**नामरूपधर्म-विशेषपुनरुक्तिनिन्दाशक्तिसमाप्तिवचनप्रायश्चित्तान्यार्थदर्शनात् शाखान्तरे कर्मभेदः स्यादि**'ति जैमिनिसूत्रदर्शितानां नामरूपादीनामिव भिन्नत्वेप्येकाधिकरणत्वमेवेत्याशयः।

ननु **आधारोऽधिकरणम्** इति विदितम्। इदं केषामाधार इत्यधिकरणशब्देन निगद्यत इत्याशङ्क्य तत्प्रवृत्तिनिमित्तविवरणमुखेनाऽधिकरणगतानवयवान्प्रतिपादयति विषयसंशयेत्यादिना। सिद्धान्तस्य निर्णयावसानत्वरूपविशेषमभिप्रेत्य सिद्धान्तनिर्णयेत्युक्तम्। केचित्प्रयोजनेन सहाऽधिकरणस्य पञ्चावयवान् वदन्ति। अन्ये सङ्गत्या सह। तदुभयसङ्ग्रहार्थं वा। निर्णीयते नितरां प्राप्यत इति व्युत्पत्त्या निर्णयशब्देन प्रयोजनं विवक्षितम्। सङ्गतिः शास्त्रद्विकाऽध्यायपादपेटिकापूर्वाधिकरणरूपप्रतियोगिभेदात् षोढा भिद्यते। पूर्वाधिकरणसङ्गतिराक्षेपापवाददृष्टान्तप्रत्युदाहरणादिभेदेन भवति बहुविधा। सा तत्र तत्राऽधिकरणे व्यक्ती भविष्यति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अत्राऽथशब्दोऽयमानन्तर्यार्थः। न तु 'अथ योगानुशासनमि'त्यादाविवाऽधिकारार्थः। अधिकारो हि प्रारम्भः। न खलु ब्रह्मज्ञानेच्छा कर्तव्यत्वेन प्रारम्भयोग्या भवति। सा किल विषयरामणीयकमात्रसम्भाव्या।

ओङ्कारश्चाऽथशब्दश्च द्वावेतौ ब्रह्मणः पुरा।
कण्ठं भित्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ।।

इति स्मृतेरयमथशब्दो मङ्गलार्थो न वर्णनीयः। जिज्ञासायां मङ्गलार्थस्यान्वयाऽसम्भवात्शास्त्रारम्भे शिष्टाचारपरिपालनार्थं मङ्गलाचरणं तु वर्णध्वनिमात्रेण कल्प्यते। न चायं पक्षान्तरपरिग्रहार्थः। पूर्वमेकस्याऽनुक्ततया तत्प्रसङ्गासम्भवात्। न च भोजनगमनादिवदनियतं यत्किंचित् पूर्ववृत्तमपेक्ष्याऽयमथशब्दप्रयोगः। नियतसामग्रीभूतस्य कस्यचिदत्राविवक्षितत्वात्। यस्य संपत्तिरिहाऽधिकारिविशेषणतया ब्रह्मविचारस्य साधनं तत् पूर्वभावीति विज्ञायते।

इह प्रथमं सूत्रपदानि विवृणोति - **अत्राऽथशब्द** इति।

अथशब्दस्याऽनेकार्थत्वेपि '**प्रसिद्धतरार्थग्रहणे सम्भवत्यप्रसिद्धार्थग्रहणं न कार्यमि**'ति न्यायेनाऽनन्तर्यार्थकत्वमुचितमित्याशयः।

ननु **अथ योगानुशासनमि**त्यादिना शास्त्रारम्भेष्वथशब्दस्याऽधिकारार्थत्वं दृष्टचरम्। ततोऽत्रापि तदेव युज्यत इत्याशङ्क्याह - **न तु अथ योगानुशासनमित्यादाविवे**ति। न च जिज्ञासाशब्दस्य **धर्मं ज्ञातुमिच्छेत्, तद्विजिज्ञासस्वे**त्यादिलौकिकवैदिकप्रयोगप्राचुर्याद्विचारपरत्वोपलब्ध्या तादृशार्थस्य ग्रहणे विचारस्य प्रारम्भयोग्यतया स्वरूपप्रमाणादिमुखेन प्रत्यधिकरणं विचारस्य क्रियमाणत्वाच्च। **योगानुशासनम्, शास्त्रमधिकृतं वेदितव्यमि**त्यादिवद् ब्रह्मविचारात्मकं शास्त्रमधिकृतमिति विवरणे नाऽसामञ्जस्यमिति वाच्यम्। आनन्तर्यार्थकत्वेन विशिष्टाधिकारलाभे सम्भवत्यधिकृतत्वमात्रद्योतकस्याऽधिकारार्थत्वस्याऽनुचितत्वात्।

अन्वयाऽसम्भवादिति - जिज्ञासां प्रति मङ्गलस्य कर्तृकरणादिभावेनाऽनन्वयादित्यर्थः। यद्यपि **अथैवं मन्यस** इत्यादौ पक्षान्तरपरिग्रहोप्यथशब्दार्थतया दृश्यते तथापि तादृशार्थोऽत्र न सम्भवति। पूर्वं कस्यचिदपि पक्षस्याऽनुपन्यासादित्यभिप्रेत्याऽह **न चाऽयमि**ति। एवमथशब्दस्याऽर्थान्तरप्रतिक्षेपेणाऽनन्तर्यपरत्वे व्यवस्थापिते नियतसामग्रीभूतं किंचित्पूर्ववृत्तं निर्दिधारयिषुः पक्षान्तरं निराकरोति - **न चाऽयमि**ति। अनियतस्य निष्प्रयोजनस्य च कस्यचिदर्थस्य विवक्षायां सूत्रकृतोऽनवधेयवचनत्वप्रसङ्गादिति भावः। तर्हि अध्ययनं पूर्ववृत्तमस्त्वित्याशङ्क्याह - **अथे**ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथाऽष्टवर्षत्वादियुक्तब्राह्मणाद्युपयुक्तोपनयनसंस्कारपूर्वकस्य 'स्वाध्यायोऽध्येतव्य' इति

ननु **'अध्यापनविधिरध्ययनस्याऽनुष्ठापकः, न स्वविधिः निर्नियोज्यत्वादि'**ति प्राभाकरा वदन्ति। तथाहि - उपनयनपूर्वकाध्ययनादाचार्यकं निष्पद्यते। **'उपनीय तु यः शिष्यमि'**त्यादिस्मरणात्। तदनुसारेण **'अष्टवर्षं ब्राह्मणमुपनयीत। तमध्यापयीत'** इत्यात्मनेपदबलादुपनयने प्रतीयमानस्याऽचार्यकहेतुत्वस्य तन्निर्वर्त्याध्यापनद्वारकत्वकल्पनौचित्यात्। न चाऽचार्यकमाधाननिष्पाद्यमाहवनीयत्वादिकमिवाऽलौकिकातिशय-रूपत्वेन न स्वतः पुरुषार्थरूपमिति वाच्यम्। तस्य तथाविधत्वेपि **'आचार्याय प्रियं धनमाहृत्ये'**ति श्रुतेः दक्षिणादानादिहेतुतया गौणपुरुषार्थरूपत्वात्। ततश्च तत्कामोऽध्यापनविधौ नियोज्य इति सनियोज्यकेन तेन विधिनाऽध्यापनं तावत्प्रयुज्यते। तद्यद्यपि लौकिकेनाप्यध्ययनेन सम्भवति तथाप्युपनयनद्वारा विहितस्यैवाऽध्ययनस्य तेन प्रयुक्तिरित्येष्टव्यम्। कथमिति चेत्। उपनयनं तावदध्यापनाङ्गम्। **'उपनीय तु यः शिष्यमि'**ति स्मृतावुपनयनाध्यापनयोस्समानकर्तृकत्वप्रतिपादनात्। **'अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीते'**ति श्रुतौ तच्छब्दगृहीतोपनीतस्याध्यापनान्वयावगमात्। उपनयीतेत्यात्मनेपदश्रुत्याऽध्यापनफलस्याचार्यकस्योपनयन-फलत्वप्रतिपादनाच्च। एवमध्ययनस्याऽध्यापनविधिप्रयुक्तत्वे अध्यापनविधिना लब्धानुष्ठानस्याऽध्ययनस्याऽधिकार्य-पेक्षाभावादर्थज्ञानकामस्याऽधिकारिणोऽकल्पनीयत्वे नाऽर्थज्ञानस्याऽध्ययनं प्रति फलोपकार्याङ्गत्वाभावात्। विचारे वेदाध्ययनस्य नियतसामग्रीत्वेन पूर्ववृत्तत्वं न सिद्ध्येदित्याशङ्क्याऽध्ययनस्याऽध्यापनविधिप्रयुक्तत्वं निराकर्तुमाह - **अष्टवर्षत्वादियुक्तब्राह्मणाद्युपयुक्तोपनयनसंस्कारस्ये**ति।

अत्रेदमवधेयम्। उपनयनमुपनेयब्राह्मणाद्यर्थम्। **'वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजन्यम्, शरदि वैश्यमि'**ति द्वितीयाश्रुतिभिस्तथाऽवगमात्। तदर्थत्वं च तस्य तदीयकार्याध्ययनाङ्गत्वेनाऽन्योपयुक्तत्वे इति युक्तिं सूचयितुं ब्राह्मणाद्युपयुक्तेत्युपनयनविशेषणम्। किञ्च, **'भूतभाव्युपयोगं हि द्रव्यं संस्कारमर्हती'**ति न्यायेन संस्काररूपक्रियायाः कर्मार्थत्वस्य कार्यान्तराङ्गत्वेनैव निर्वाह्यतया उपनयनसंस्कृतस्य भूतोपयोगाभावात्। भाव्युपयोगे वक्तव्ये तस्याऽध्यापनाङ्गत्ववादिनाऽपि **अध्ययनं कुर्वन्माणवकस्तद्द्वारा तस्याऽङ्गं भवतीति** वक्तव्यतया उपनयने पूर्ववृत्ते सति प्रथमोपस्थितमुपनेयगतत्वेनाऽन्तरङ्गं चाऽध्ययनं प्रत्येवाऽङ्गत्वं युक्तम्। न त्वध्यापनं प्रतीत्यमुमर्थं युक्त्यन्तरं च सूचयितुमुपनयनाङ्गकस्येत्यनुक्त्वा **उपनयनसंस्कारपूर्वकस्ये**त्युक्तम्।

अनेन उपनयनाध्ययनयोराम्नानपौर्वापर्यमप्यत्र साधकं विवक्षितम्। **'स्वाध्यायोऽध्येतव्य'** इत्युत्तरवाक्यान्वयिनोऽध्ययनविधिग्रहणस्य काकाक्षिन्यायेन पूर्ववाक्येप्यन्वयात्। एवञ्च उपनयनस्य द्वितीयाश्रुत्या उपनेयार्थत्वेऽवगते **किमर्थमहमुपनयनसंस्कारेणाचार्यसमीपं प्रापित** इति कार्याकाङ्क्षया उपनयनविध्यनन्तरमकर्तृकतया विहितस्याऽध्ययनस्य कर्त्राकाङ्क्षया चोपनयनाध्ययनयोरेकवाक्यता भवतीति वाक्यप्रमाणेनाऽपि तस्याऽध्ययनाङ्गत्वमिति तेन सूचितम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ननु, उपनयीतेत्यात्मनेपदश्रुतिर्वाक्यप्रमाणाद्बलवतीति चेन्न। तस्या वाक्येन विरोधाऽभावात्। तथाहि, आचार्यकहेतुत्ववैशिष्ट्यं समीपप्रापणरूपे धात्वर्थे न प्रत्याय्यते। न त्वाहत्य धात्वर्थस्याऽध्यापनाङ्गत्वं बोध्यते। **संमाननोत्संजनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः** इत्याचार्यकरणविशिष्टे धात्वर्थे नयतेरात्मनेपदविधानात्। तत्त्वाचार्यकहेतुत्वं साक्षादुपनयनस्य न सम्भवति। **'उपनीय तु यश्शिष्यं वेदमध्यापयेद्द्विजः। सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते।।'** इति तस्योपनयनपूर्वकालयापनफलकत्वस्मरणात्। किन्त्वध्यापनद्वारेत्यनया प्रणाडिकया तस्याऽध्यापनाङ्गत्वं प्रत्याय्यत इत्युपपादनीयम्। एवं च, द्वारविचारे तस्याऽध्ययनाङ्गत्वमेव सिद्ध्यति। कथं - उपनयनस्याऽध्यापननिर्वर्तकत्वमपि न साक्षात्। किन्तूपनयनेन विना नोपनेयस्याऽचार्यसमीपप्राप्तिः। तां विना नाऽध्ययनम्। अध्ययनं विना नाऽध्यापनमिति तदपि परम्परयोपपादनीयम्। एवं चास्यां परम्परायामध्ययनस्य प्रथमनिविष्टत्वादुपनेयगतत्वेनान्तरङ्गत्वादुपनेयसंस्कारप्रतिपादकद्वितीयाश्रुत्यनुग्रहात्। **'उपनयनं विद्यार्थस्य श्रुतितः संस्कारः'** इति स्मृत्यनुग्रहाच्च तस्याऽध्ययनाङ्गत्वमेव सिद्ध्यति।

किञ्च आत्मनेपदश्रुत्यैवाऽध्ययनाङ्गत्वमुपनयनस्य सिद्ध्यति। सम्माननेत्यादिसूत्रेण आत्मनेपदविधानस्याऽकर्त्रभिप्रायार्थत्वात्। क्रियाफलस्य कर्तृगामितायां नयतेरात्मनेपदस्य **'स्वरित ञित'** इत्यादि सूत्रेणैव सिद्धत्वात्। न च उपनयनं प्रत्यङ्गित्वेन उद्देश्यस्याऽध्यापनस्य तत्फलस्याऽचार्यकस्य च कर्तृगतत्वेऽपि तस्याऽध्यापनाङ्गतायां द्वारभूतोपनयनजन्यसंस्कारस्याऽकर्तृगतत्वादात्मनेपदं नोपपद्यत इति वाच्यम्। यत्प्रधानं फलमुद्दिश्य क्रियारम्भस्तस्य कर्तृगतत्वाऽकर्तृगतत्वयोरेव पदव्यवस्थाप्रकरणविषयत्वात्। अत एव वृत्तिकारेण **'स्वरित ञित'** इत्यादिसूत्रे यस्य कस्यचित्फलस्य कर्तृगामित्वमात्रेण आत्मनेपदविधाने **पचन्ति पाचकाः, यजन्ति याजकाः** इत्यत्राऽत्मनेपदं स्यात्। तत्राऽपि दक्षिणादेः कर्तृगामित्वादित्याशङ्कानिराकरणायोक्तं - **क्रियायाः फलं प्रधानभूतं यदर्थमसौ क्रिया आरभ्यत** इति। तस्मात्संस्कारमात्रस्योद्देशफलत्वासम्भवात्किमर्थं वयमुपनयनेन संस्कृता इति संस्कारस्य कैमर्थक्याकाङ्क्षायामर्थज्ञानफलकमध्ययनमेव तस्योद्देश्यं फलमिति युक्तम्। न त्वाचार्यकफलकमध्यापनम्। अकर्त्रभिप्रायार्थात्मनेपदश्रुतिविरोधात्।

न च, **'उपनीय तु यश्शिष्यमि'**ति स्मृतिगत'क्त्वा'श्रुत्या उपनयनाध्यापनयोस्समानकर्तृकत्वमवगम्यते। त नैकप्रयोगतां विनेति प्रयोगैक्येन उपनयनस्यऽध्यापनाङ्गत्वं सिद्ध्यति। उपनयनमुपनेयासक्तिं सम्पाद्य तदीयेनाऽध्ययनेनाऽध्यापनं निर्वर्तयितुं क्षममिति दृष्टद्वारसत्वादुपनयनस्याऽध्यापनाङ्गत्वेनैव प्रयोगैक्यनिर्वाह इति वाच्यम्। श्रुत्यवगतस्य उपनयनाऽध्ययनाङ्गत्वस्य यच्छब्दयोगादनुवादसरूपया स्मृत्या बाधितुमशक्यत्वेन स्मृतिगतक्त्वाप्रत्ययस्य **दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत** इत्यत्र क्त्वाप्रत्ययस्येव पौर्वापर्यमात्रपरतया नेतव्यत्वात्। तस्मादुपनेयार्थत्वेन श्रुतमुपनयनमध्ययनाङ्गमेव भवति। न त्वध्यापनाङ्गमिति सिद्धम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्वविधिप्रयुक्ततया नित्यप्राप्तस्य नियमोपासिताऽऽचार्यमुखलब्धाक्षरग्रहणरूपस्याऽर्थज्ञानफलस्य

अपि चाऽत्र अष्टवर्षत्वादीत्यादिशब्देन काम्यकल्परूपाण्यष्टवर्षत्वादीनि गृह्यन्ते। यथा **गर्भाष्टमेषु ब्राह्मणमुपनयीत, गर्भैकादशेषु राजन्यं, गर्भद्वादशेषु वैश्यमिति** प्रकृत्य **अथ काम्यानि, सप्तमे ब्रह्मवर्चसकाममष्टम आयुष्कामं, नवमे तेजस्कामं, दशमे अन्नाद्यकाममेकादश इन्द्रियकामं, द्वादशे पशुकाममिति**। अत्र उपनयनाश्रितानां वयोविशेषरूपाणां गुणानामुपनेयार्थत्वेन तदाश्रयस्य प्रधानभूतस्योपनयनफलस्याऽपि तदर्थत्वसम्प्रतिपत्तेः। एवं काम्यकल्पपर्यालोचनयाप्युपनेयार्थस्याध्ययनस्यैवोपनयनमङ्गमिति सिद्ध्यतीत्याशयः।

एवमुपनयनस्याऽध्ययनाङ्गत्वे सिद्धे विहिताध्ययनस्याऽध्यापनविधिप्रयुक्तत्वाऽभावात्स्वविधिप्रयुक्तमेव अध्ययनं भवति। अध्ययनस्य स्वविधिप्रयुक्तत्व एव नित्यवदनुष्ठानं सिद्ध्येत्, न त्वध्यापनविधिप्रयुक्तत्वे इत्याशयेनाह - **स्वविधिप्रयुक्ततया नित्यप्राप्तस्येति**।

अध्ययनं हि नित्यम्। तदङ्गस्योपनयनस्य नित्यत्वात् -

अत ऊर्ध्वं त्रयोप्येते यथाकालमसंस्कृताः।
सावित्रीपतिता व्रात्या भवन्त्यार्यविगर्हिताः।।

योऽनधीत्य द्विजो वेदानन्यत्र कुरुते श्रमम्।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः।।

इति तदभावे दोषस्मरणात्। अध्यापनविधेस्तु काम्यतया तत्प्रयुक्तत्वे त्वध्ययनस्य न नित्यत्वं सिद्ध्येदिति ज्ञेयम्।

नन्वध्ययनविधेः सर्वशाखाविषयत्वे स्वविधिनाप्यध्ययनस्य प्रयुक्तिर्न सम्भवत्यशक्यानुष्ठानत्वादित्याशङ्क्य स्वशाखामात्रविषयोऽध्ययनविधिः, न तु सर्वशाखाविषय इत्याशयेन **'स्वाध्यायोऽध्येतव्य'** इत्यध्ययनविधिरुदाहृतः।

नियमोपासितेति - अनेनाप्यध्ययनस्य स्वविधिप्रयुक्तत्वमूरीकरणीयमित्याशयः। तथा हि, यावद्वेदपरिसमाप्त्याचार्याधीनेन शुश्रूषादिनियमैस्तदुपासनापरेण माणवकेन कर्तव्यतया भवत्यध्ययनमतिक्लेशसाध्यम्। एतादृशे कर्मण्यन्यपुरुषगाम्याचार्यकसिद्ध्यर्थं कथमन्यः प्रवर्तेत। दक्षिणां च कथं दद्यात्। तस्मादिदं स्वविधिप्रयुक्तमेवेति ग्राह्यमिति।

ननु फलरहितोऽध्ययनविधिर्न प्रवर्तक इत्याशङ्क्याह - **अर्थज्ञानफलकस्येति**। अत्रेदं बोध्यम्। अध्ययनानन्तरमक्षरग्रहणपदावधारणपदार्थज्ञानमुखेन समुपलभ्यते वाक्यार्थज्ञानम्। तदेव भवत्यध्ययनस्य फलम्। तत्कामोऽधिकारीति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वेदाध्ययनस्य ब्रह्मविचारात्पूर्वभावित्वं युक्तम्। धर्मवत् ब्रह्मणोऽपि वेदैकसिद्धत्वादनधीतवेदस्य तद्विचारानुपपत्तेः। ततः केवलाध्ययनानन्तरं ब्रह्मविचार इति चेत्, भवतु नाम तादृशमध्ययनम्।

ननु अध्ययनविधौ तत्कामोऽधिकारी न श्रूयत इति चेन्न। अध्यापनविधावश्रूयमाणस्याऽचार्यककामस्येवाऽध्ययनविधावर्थज्ञानकामस्य कल्पनीयत्वात्। न च बालस्याऽर्थज्ञानकामना न सम्भवतीति तादृशोऽधिकारी न लभ्यत इति वाच्यम्। बालस्य तादृशकामनाया असम्भवेऽपि बालहितकारिषु तत्सम्भवेन तत्प्रेरणयाऽधिकारिलाभात्। नन्वेवं बालस्य स्वाधिकारः प्रवर्तको न स्यादिति चेन्न। रुग्णं बालमुद्दिश्य भिषग्भिः पित्रादिभिः सामदानाद्युपायेनाऽनुष्ठाप्यमानायामौषधसेवायामिवाऽध्ययनेऽनुष्ठाप्यमाने बालस्यैव विध्युक्तं फलं भवत्विति पित्राद्याशयस्य विद्यमानतया तदधिकारस्यैव प्रवर्तकत्वनिश्चयात्। अन्यथा पित्रादिभिरनुष्ठाप्यमाने सन्ध्यावन्दनादावपि बालस्याऽधिकारः प्रयोजको न स्यात्। एवमध्ययनस्याऽर्थज्ञानफलकतया स्वाधिकारेण स्वविधिनैव प्रयुक्तत्वेन नाऽध्यापनविधिप्रयुक्तत्वम्। ततोऽस्य पूर्ववृत्तत्वमुपपन्नमित्याह ब्रह्मविचारात्पूर्वभावित्वं युक्तमिति।

अध्यापनविधिप्रयुक्तत्वे त्वस्य आचार्यककामेनाऽन्येनानुष्ठाप्यमानतया तस्मिन्नर्थज्ञानकामस्याधिकारिणोऽनपेक्षणादित्याशयः।

ननु जगत्सकर्तृकं कार्यत्वाद् घटवदिति कार्यलिङ्गानुमानेनाऽपि ब्रह्मणोऽवगन्तुं शक्यत्वेन वेदैकगम्यत्वाभावान्नियमेन वेदाध्ययनं पूर्ववृत्तमिति वक्तुं न युज्यत इत्याशङ्क्याह - **धर्मवदि**ति। यद्यपि कार्यलिङ्गेन सामान्यतः कर्ता ब्रह्मेति सिद्ध्यति, तथापि विशिष्य तच्छिवशब्दितमिति तु **यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केवलः** इत्यादिश्रुत्यर्थावगममन्तरा न निष्पद्यते। अतो वेदैकसमधिगतत्वाद् ब्रह्मणो वेदाध्ययनं नियतपूर्ववृत्तं भवितुमर्हति। यथा लोके प्राणिनां भोगस्य नानाविधत्वेन दृश्यमानतया तल्लिङ्गेन कारणस्य धर्मस्याऽनुमानगम्यत्वेऽपि यागदानादिरूपस्य धर्मस्य वेदैकगम्यत्वमित्याशयः। तस्माद्ब्रह्मविचारस्याऽध्ययनानन्तर्यं युक्तमित्युपसंहरति - **तत** इति। तत्परिहरति - **भवतु नामे**ति। स्वविधिप्रयुक्ततयोपनयनाङ्गमध्ययनमर्थज्ञानफलकमपि तदनन्तरं न ब्रह्मविचारस्सम्पद्यते। तदा धर्मविचारस्यैव प्राप्तेरित्याशयः।

अथ अध्ययनात्प्रागपि धर्मविचारः कर्तुं शक्यत इति शङ्कां वारयितुमाह तस्य तदसिद्धौ सिद्ध्यभावादिति - अस्येदं हृदयम्। वसन्त उपनीयो हि ब्राह्मणः श्रावण्यां प्रोष्टपद्यां वा उपाकर्म निर्वर्त्य वेदमध्येतुमुपारभते। कथमतः पुरस्तादेव कृत्स्नस्वाध्यायार्थनिर्णयोपयुक्तन्यायविचारं धीमानपि कर्तुं शक्नुयात्। किञ्च वैदिकपदतदर्थावगमो व्याकरणादिनैव हि निर्वाह्यः। अन्यथा तस्य तदङ्गत्वमुच्छिद्येत। अङ्गाध्ययनं तु वेदपाठोपक्रमानन्तरं कृष्णपक्षेष्वनुष्ठेयमित्यध्ययनात्पूर्वं न्यायविचारस्सुतरां न सम्भवति। तस्मादुपनीतो धर्माधर्मौ महाफलाविति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तदनन्तरं तु धर्मविचारः। तस्य तदसिद्धौ सिद्ध्यभावात्। तथा चाचार्यैः प्रतिपादितम् 'अथातो धर्मजिज्ञासा' इति प्रथमत उपाध्यायादध्ययनानन्तरं धर्मविचारप्राप्तिरिति।

तर्हि किमनन्तरमस्याऽरम्भः? धर्मविचारानन्तरम्। कथम्? न वयं धर्मब्रह्मविचाररूपयोः शास्त्रयोरत्यन्तभेदवादिनः। किंत्वेकत्ववादिनः। धर्मब्रह्मणोराराधनाराध्यभूतयोः प्रतिपादकं 'अथातो

वृद्धजनादाकर्ण्य तद्ज्ञानमन्विच्छन् स्वाऽध्यायविधिना साङ्गवेदाध्ययने प्रवृत्तस्तदध्ययनेन वेदे वैदिकपदतदर्थावगमे च सिद्धेऽपि वाक्यार्थविशेषेषु सन्दिहानः तत्तद्वाक्यार्थविशेषमवजिगमिषुरध्ययनानन्तरमेव धर्मविचारे प्रवर्तत इति। एवमभिप्रेत्यैव जैमिनिना धर्मविचारशास्त्रं प्रणीतमित्याह - **तथा चे**ति।

ननु **'अथाऽतो धर्मजिज्ञासे'**त्यत्राऽथशब्दस्य वेदाध्ययनानन्तरमित्यर्थो न वक्तुं शक्यते, वेदाध्ययनस्य धर्मब्रह्मविचारसाधारणकारणतया प्रथमं धर्मविचारप्रवर्तकत्वरूपविशेषपक्षपातकल्पनायोगादित्याशङ्क्य तस्य तथात्वेऽपि विरक्ताऽविरक्तसाधारण्येन कर्मानुष्ठानस्याऽवश्यकतया तदपेक्ष्यधर्मविचार एव प्रथमं प्रवर्तत इत्याशयेनाह - **प्रथमत** इति। अथशब्दस्याऽनन्तर्यार्थकत्वं निर्णीयाऽध्ययनानन्तर्यं निराकृतम्। अथ यदनन्तरमस्यारम्भो वा तन्निरूपयितुं प्रश्नं प्रवर्तयति - **तर्ही**ति। तदुत्तरमाह - **धर्मविचारानन्तरमि**ति। ननु ब्रह्मविचारस्य धर्मविचारानन्तरकर्तव्यत्वमुक्तम्। तन्न युक्तम्। धर्मब्रह्मविचारयोः पौर्वापर्ये हेतुसम्बन्धविरहादित्यभिप्रेत्य शङ्कते - **कथमि**ति। काण्डद्वयात्मके वेदे कर्मकाण्डव्याख्यानरूपो धर्मविचारः। ब्रह्मकाण्डविवरणरूपश्च ब्रह्मविचार इत्यविवादम्। एवमुभयोरपि विचारयोर्वेदात्मैकग्रन्थविवरणरूपत्वेनैकशास्त्रत्वस्य समुचिततया काण्डद्वयगतपौर्वापर्यमेव धर्मब्रह्मविचारद्वयगतपौर्वापर्ये हेतुसम्बन्ध इत्याशयेनाह - **न वयमि**ति। धर्मविचारशास्त्रे पूर्वापरषट्कयोरिव विचारशास्त्रयोरवान्तरविषयभेदेन किञ्चिद्भेदानुमत्यर्थम**त्यन्त**पदम्।

ननु पूर्वोत्तरमीमांसयोरैकशास्त्र्यमनुपपन्नं, प्रधानप्रतिपाद्यभेदात्कर्तृभेदात्प्रयोजनभेदादर्थविरोधाच्चेत्याशङ्क्याह - **धर्मब्रह्मणोरि**ति - धर्मपरस्याऽपि वेदभागस्य तत्समाराध्ये ब्रह्मण्येव महातात्पर्यम्। **'सर्वे वेदा यत्पदमामनन्ती'**ति, **'वेदैरशेषैरहमेव वेद्यः'** इति च श्रुतिस्मृतिभ्यां ब्रह्मणः सर्ववेदप्रतिपाद्यत्वाऽवसायात्। तस्मात्तद्विवरणरूपयोरपि विचारशास्त्रयोर्व्याख्येयमहातात्पर्यविषयैकार्थपर्यवसायित्वेन प्रतिपाद्यभेदाभावादेकशास्त्रत्वमविरुद्धम्।

तथा न कर्तृभेदे एकशास्त्रत्वविघटकः। पाणिनीयसूत्रपूर्वोत्तरवृत्त्योः वामनजयादित्यकृतयोर्मूलग्रन्थैक्यादेकव्याख्यानत्वस्य दृष्टत्वात्। नाऽपि प्रयोजनभेदः शास्त्रभेदसाधक इति वाच्यम्। द्वादशलक्षणीपूर्वोत्तरषट्कयोः प्रकृतिविकृतिरूपप्रयोजनभेदे सत्यप्येकशास्त्रत्वस्य दृष्टत्वात्।

ननु एकशास्त्रत्वविघटकोऽर्थविरोधो दुष्परिहरः। तथा हि, जैमिनिना **'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते'** इति सूत्रेणाऽर्थवादादीनामक्रियार्थानामानर्थक्यं पूर्वपक्षीकृत्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

धर्मजिज्ञासा' इत्यारभ्य 'अनावृत्तिश्शब्दादि'त्येतावत्पर्यन्तमेकमेव शास्त्रम्। तत्र 'अथातश्शेष-लक्षणमि'त्यादिवदवान्तरपरिच्छेदार्थोऽयम् 'अथातो ब्रह्मजिज्ञासा' इत्यारम्भः।

'**विधिनात्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युरि**'ति सूत्रेण विध्येकवाक्यतया क्रियार्थत्वोपपादनेनैव तेषामानर्थक्यं परिहृतम्। भगवता बादरायणेन तु '**शास्त्रयोनित्वादि**'ति सूत्रेण ब्रह्मणि वेदान्तानां प्रामाण्यं प्रतिज्ञाय '**तत्तु समन्वयादि**'ति सूत्रेण अक्रियारूपे ब्रह्मणि कथं तेषां प्रामाण्यमित्याशङ्कायाम् आम्नायस्य क्रियार्थत्वनियमं तिरस्कृत्य, सर्वत्र यत्किञ्चिद्विध्यन्वितानामपि ब्रह्मप्रतिपादकवेदान्तशब्दानां ब्रह्मणि प्रामाण्यं समर्थितम्। तथा जैमिनिना **देवता वा प्रयोजयेदतिथिवद्भोजनस्य तदर्थत्वादि**ति सूत्रेण यथाऽतिथिपूजात्मकमातिथ्यमतिथिप्रीत्यर्थं सदतिथिप्रधानमेवं देवपूजात्मकं यजनमपि देवताप्रीत्यर्थं सद्देवताप्रधानम्। तेनैव च प्रीता देवता फलदात्रीति पूर्वपक्षं कृत्वा **अपि वा शब्दपूर्वत्वाद्यज्ञकर्म प्रधानं स्याद् गुणत्वेन देवताश्रुतिरि**ति सूत्रेण न देवताप्रधानं यजनं तदेवाऽपूर्वद्वारा फलजनकं, न तु हविषा प्रीता देवता। तस्यास्तु द्रव्योद्देश्यतया यागोपसर्जनत्वेनैव श्रुतिरिति सिद्धान्तमभिधाय **अतिथौ तत्प्रधानत्वमभावः कर्मणि स्यात्तस्य प्रीतिविधानत्वादि**ति सूत्रेणातिथ्यवैषम्यं यजने दर्शितम्। आतिथ्यमतिथिप्रीतिविधानम्। यथातिथिः प्रीयते तथा कर्तव्यतया विहितमिति तदतिथिप्रधानं युज्यते। कर्मणि तु नास्ति प्रीतिविधानम्। यथा देवता प्रीयते तथा कर्म कर्तव्यमिति। अतो न देवताप्रधानं यजनमिति। तथा **विप्रतिपत्तौ हविषा नियम्येत कर्मणस्तदुपाख्यत्वादि**ति सूत्रेण इन्द्रपुरोडाशेषु पुरोडाशरूपहविस्सामान्यादाग्नेययागविध्यन्तः न त्विन्द्ररूपदेवतासामान्यात् सान्नाय्ययागविध्यन्तः। हविस्त्यागरूपस्य यागकर्मणो हविष्युपलभ्यमानत्वात्। हविर्हि त्यज्यमानं दृश्यते। देवता त्वप्रत्यक्षैव परं यागोद्देश्येति प्रतिपाद्ययागस्य देवतासाधनरूपत्वात्। देवतैव प्रसन्ना फलदात्री प्रधानभूतेति तत्सामान्यं हविस्सामान्याद्बलीय इति शङ्कानिराकरणार्थं सूत्रितं **गुणत्वेन देवताश्रुतिरि**ति। बादरायणेन तु **फलमत उपपत्तेरि**ति परमेश्वराराधनरूपतया सर्वं कर्म परमेश्वरप्रधानम्। तत्तत्कर्मा-राधितात्परमेश्वरादेव फलं नापूर्वव्यापारात्कर्मण इति स्वमतमुक्त्वा; **धर्मं जैमिनिरत एवेति** सूत्रेण परमेश्वर एव सर्वकर्मफलदाता **स एवैनं भूतिं गमयती**त्यादिकर्मविधिवाक्यशेषेषु वाय्वादिरूपस्य परमेश्वरस्यैव फलहेतुत्वव्यपदेशात्। क्षणविनाशिनः कर्मणः फलजनने द्वाराकाङ्क्षायां वाक्यशेषार्पितां देवताप्रीतिमपहाय द्वारान्तरकल्पनायोगादिति जैमिनिमतप्रतिक्षेपकयुक्तिप्रदर्शनेन स्वमतं निर्धारितम्। एवं परस्परविरुद्धार्थयोः कथमैक्यं घटत इति चेन्न। परस्परविरुद्धार्थतया प्रतिभासमानयोस्तयोरुत्सर्गापवादन्यायेनाऽविरुद्धत्वात्। यथा **न हिंस्यादि**ति सामान्यतो हिंसानिषेधेपि **अग्नीषोमीयं पशुमालभेते**त्यादिना हिंसाविशेषस्य कर्तव्यत्वोक्तिस्तथा देवताप्राधान्यनिषेधकस्य जैमिनिसूत्रस्य देवतानिराकरणे न तात्पर्यम्। न हि निन्दान्यायेन कर्म प्रशंसितुमेव प्रवृत्तत्वात्तस्य अश्रुतवेदान्तानां कर्मण्यश्रद्धानिवारणाय कर्मप्राधान्यपरत्वमेव वाच्यम्। अथवा वेदप्रामाण्यकर्मावश्यकताप्रतिपादनपारवश्यात्तत्प्रतिपक्षनिराचिकीर्षयाऽन्वारुह्यवादो देवतानिरासोक्तिर्भवति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथवा धर्मस्य ब्रह्मबोधहेतुत्वात्तद्विचारोपयुक्तानां श्रुतिलिङ्गादीनां वेदचोदनार्थवादस्मृत्यादि-प्रामाण्यप्रतिपादनादीनां च ब्रह्मविचारोपयुक्तत्वाच्च धर्मविचारानन्तरं ब्रह्मविचारः। साधनं विना

तथा हि -

अभीष्टार्थव्ययेनाऽपि जयति क्षेत्रहारिणम्।
लब्धक्षेत्रैर्न दुष्प्रापः स्यादर्थ इति निश्चयात्।।

इतिन्यायेन अभिमतार्थानादरेणाऽपि विपक्षनिराकरणमिष्यते। एवं परमाभिमतेश्वराद्यनादरेणाऽपि वेदप्रामाण्यसमर्थने पश्चादभिमतार्थसिद्धिरयत्नलभ्येति जैमिनेराशय उन्नेयः। अन्यथा **सम्पत्तेरिति जैमिनिः।, परं जैमिनिर्मुख्यत्वात्।, ब्राह्मेण जैमिनिरुपन्यासादिभ्य।** इत्यादिब्रह्मसूत्रैरेव जैमिनेर्ब्रह्मस्वरूपतद्गुणतदुपासनतत्फलाद्यभ्युपगमो विरुध्येत। एवं विरुद्धार्थे तात्पर्याभावान्नार्थविरोधः।

नन्वेवमपि, जैमिनिना **द्रव्यदेवतासाम्ये द्रव्यं बलीय** इति देवताप्राधान्यं निराकृतम्। तेन देवतानिरासे तात्पर्यं दरीदृश्यत इतिचेन्न। अत्र द्रव्यदेवतयोस्सद्भावाऽसद्भावाभ्यां प्राधान्याऽप्राधान्ययोरविवक्षिततत्वात्। द्रव्यस्याऽविलम्बितप्रत्यक्षगम्यतया, देवताया विलम्बितशास्त्रगम्यतया च विलम्बिताऽविलम्बितप्रवृत्तिप्रमाण-विषयत्वेनैव प्राधान्याऽप्राधान्ययोर्विवक्षिततत्वेन तावता देवतानिरासे तात्पर्याभावात्।

न च **धर्मं जैमिनिरि**ति जैमिन्युक्तापूर्वगतफलप्रदत्वस्य बादरायणेन निराकृतत्वेन विरोधो दुष्परिहार इति वाच्यम्। जैमिनिना श्रुतत्वोपपत्तिभ्यां कालान्तरभाविफलसाधनमात्रेऽभिहिते, ताभ्यामेवाऽत्र फलसाधनविशेष-सिद्धेर्बादरायणेन प्रदर्शिततत्वेन तयोः परस्परविरोधानुपलम्भात्। तस्मात्पूर्वोत्तरमीमांसयोरेकशास्त्रत्वमक्षतम्। अत एवोक्तं वृत्तिकारेण **वृत्तात्कर्माधिगमादनन्तरं ब्रह्मविविदिषेति** संहितमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेनेति चैकशास्त्रत्वमुक्तम्। शारीरकमिति ब्रह्ममीमांसा। जगच्छरीरः परमात्मा शारीरः। **तस्यैष एव शारीर आत्मा** इति श्रुतेः।

एवमेकशास्त्रत्वे बहुप्रमाणसम्मतिप्रदर्शनेऽपि ये मनः प्रत्ययमलभमानास्तानुद्दिश्याह - **अथवे**ति। धर्मविचारस्य ब्रह्मविचारपूर्ववृत्तत्वे अर्थज्ञानपूर्वकानुष्ठानद्वारा विचारसाध्यस्य धर्मस्य ब्रह्मावबोधहेतुत्वमेको हेतुः। धर्मविचारशास्त्रे धर्मनिर्णयोपयुक्ततया व्युत्पादितानां श्रुतिलिङ्गादीनां तत्रत्यानां वेदप्रामाण्यादिप्रतिपादनानां च ब्रह्मविचारोपयुक्तत्वमपरो हेतुरिति ज्ञेयम्। **अत्राऽदि**शब्देन वाक्यप्रकरणस्थानसमाख्यानां शेषशेषिभावादि-प्रमाणानां च ग्रहणमिष्यते।

ननु, धर्मस्य ब्रह्मबोधहेतुत्वोक्तिरयुक्ता। मेयसिद्धिर्हि मानाधीना। न तु यज्ञाद्यनुष्ठानाधीना। ततश्च यज्ञाद्यनुष्ठानं विनाऽपि प्रमाणप्रवृत्तौ सत्यां ब्रह्मबोधः संपद्यते। तस्मान्न तदर्थं धर्मविचारापेक्षेत्याशङ्क्याह - **साधनं विनेति**।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

साध्यानिष्पत्तेः। ब्रह्मबोधं प्रति धर्मस्य साधनत्वे 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन' इति श्रुतिरेव भगवती प्रमाणम्।

न च कर्मणो ब्रह्मबोधसाधनत्वे तदेव विचार्यमनुष्ठेयं च, किमनेन वेदान्तवाक्यविचारप्रयासेनेति वाच्यम्। तस्य फलाभिसन्धिरहितस्य पापापनयनरूपचित्तशुद्धिसम्पादनद्वारा बोधहेतुत्वात्। तथा चाभियुक्तस्मृतिः यस्यैते चत्वारिंशत्संस्कारा इत्यादिना स ब्रह्मणः सायुज्यं सालोक्यं च गच्छतीत्यन्तेन गर्भाधानादिसकलकर्मणां पापमलापकर्षसंस्कारहेतुतां प्रकाशयति।

प्रमाणत्वाभिमतस्याऽपि प्रमेयसिद्धौ साधनत्वं साधनत्वग्राहकप्रमाणाधीनम्। तद्यज्ञाद्यनुष्ठानेप्यविशिष्टमिति तस्याऽपि ब्रह्मबोधे साधनत्वात्तद्विना ब्रह्मबोधो न निष्पद्यत इत्यर्थः। तादृशं प्रमाणं किमित्याकाङ्क्षायामाह - **धर्मस्येति**।

यद्येवं तर्हि श्रुतिप्रामाण्यात्तपश्चर्ययेव यज्ञाद्यनुष्ठानेनैव परमेश्वरसन्निधानपूर्वकं तत्त्वदर्शनं, तत एव मोक्षश्च भविष्यतीत्यलं वेदान्तविचारेणेत्याशङ्क्य निराकरोति - **न चेति**।

यथा ऐहिकामुष्मिकवरदानार्थं शिवसन्निधानपूर्वके तद्दर्शने तपश्चर्यायाः कारणत्वमभिहितं तथा मोक्षप्रदानार्थं शिवसन्निधानपूर्वके तद्दर्शने यज्ञादिश्रुतेः कारणत्वमभिहितं चेत्तद्युज्येत। न त्वेवम्। किन्तु तथा श्रुत्या पापापनयनरूपचित्तशुद्धिद्वारा वेदान्तविचारादिप्रामाण्यसम्पादनेन तद्वेदनहेतुत्वस्यैवोक्ततया न वेदान्तविचारनिरपेक्षेत्याशयः। ननूदाहृतश्रुतौ द्वारविशेषो न प्रतीयते तदवगतिः कुत इत्याशङ्क्याह - **तथा चेति**।

यस्यैते इत्यादिना गौतमस्मृतौ गर्भाधानादिषु कर्मसु संस्कारशब्दः प्रयुक्तः। तेनैतेषां कर्मणां व्रीहिप्रोक्षणादिवत्कार्यान्तरोपयुक्तकिंचिद्द्रव्यगतातिशयाधानर्थताऽवसीयते। तत्किमतिशयवद्द्रव्यसाध्यं कार्यम्? किञ्चित्तदतिशयवद्द्रव्यं? कश्च तत्राऽतिशय इत्याकाङ्क्षायां **'स ब्रह्मणस्सायुज्यं सालोक्यं च गच्छती'**त्युपसंहारवाक्येन मोक्षः कार्यमिति परिज्ञायते। एवञ्च शिवसाक्षात्कारैकसाध्ये मोक्षे द्रव्यस्य साक्षाज्जनकत्वाभावेन साक्षात्कारजनकं चित्तमेव साक्षात्कारद्वारा तदुपयोगि द्रव्यम्। तदैकाग्र्यप्रतिबन्ध-निवृत्तेरपेक्षितत्वात्तद्गतपापापनयनमेव परिगणितकर्मजन्यो मलापकर्षरूपोऽतिशय इत्यवसीयते **'धर्मेण पापमपनुदति', 'ज्ञानप्रसादेन विशुद्धचित्तस्ततस्तु तं पश्यते निष्कलं ध्यायमान'** इत्यादिश्रुतिसंवादात्। तस्मादुदाहृतश्रुतौ स्मृत्यनुसारेण द्वारमुन्नेयमित्याशयः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ व्रीहिप्रोक्षणवत् सर्वकर्मणां संस्कारकत्वे सर्व एते पुण्यलोका भवन्तीति श्रुत्युक्ताश्रमफलस्वातन्त्र्यं न स्यादिति चेन्न। पुण्यलोकफलाभिसन्धिपूर्वककर्मणां स्वातन्त्र्येऽपि तदभिसन्धिरहितेन पुंसाऽनुष्ठितकर्मणां चित्तशुद्ध्यादिसंस्कारजनकत्वोपपत्तेः। तथा च तस्य पुंसो यदेव ज्ञानफलं तदेव कर्मफलं च। यथा व्रीहिप्रोक्षणं दर्शपूर्णमासोत्पत्त्यपूर्वहेतुतया स्वर्गे समुच्चीयते तथा कर्माणि ज्ञानप्रयोजकतया मोक्षे समुच्चीयन्ते। अतो गुणकर्मत्वादङ्गत्वमेतेषाम्।

ननु नित्यविधिप्राप्तस्य ज्योतिष्टोमादेरितिकर्तव्यतात्वविरोधान्न संस्कारकतासिद्धिरिति चेन्न। कारणतया स्वतन्त्रविध्यन्तरविहितस्य सौत्रामणि बृहस्पतिसवनादेरग्निचयनवाजपेयाद्यङ्गत्ववदुभय-विधिबलादुभयसिद्धेः। अतो यावदुत्पद्यते ज्ञानं तावदनुष्ठेयानि कर्माणि।

ननु यज्ञादीनां प्रोक्षणादिवद् गुणकर्मत्वे अर्थकर्मत्वं न स्यात्तदा द्रव्योपसर्जनत्वं न सिद्ध्येत्। तदसिद्धौ स्वातन्त्र्येण पुण्यलोकप्राप्तिफलकत्वं श्रूयमाणं विरुद्ध्येतेत्याशङ्क्य समाधत्ते - **अथ व्रीहिप्रोक्षणवदि**त्यादिना।

ननु **'विद्याञ्चाऽविद्याञ्चे'**ति श्रुतेः कर्मणामपि ज्ञानवत्साक्षान्मोक्षफलत्वेन नाऽर्थकर्मत्वमेवाऽङ्गीकर्तुं युक्तमिति ज्ञानकर्मसमुच्चयवादिशङ्कां निराकरोति - **तथा चे**ति।

ननु गुणकर्मत्वेनाऽङ्गत्वे पुण्यलोकसाधनत्वेन प्राधान्यं न सम्भवति स्विष्टकृदादिष्वङ्गेषु गुणकर्मत्वार्थकर्मत्वयोरिवाऽङ्गत्वस्य फलसाधनत्वरूपप्रधानत्वस्य च क्वचिदप्येकस्मिन्कर्मणि समावेशादर्शनादित्याशङ्क्य समाधत्ते - **नन्वि**त्यादिना। **कारणतये**ति।

यथा **'यजेत्सौत्रामण्या अपत्नीकोप्यसोमपः। मातापितृभ्यामृणार्थाद्यजेते'**ति वचनात्। **'ब्रह्मवर्चसकामो बृहस्पितिसवेन यजेते'**त्यादिभिः श्रुतिभिः स्वातन्त्र्येण फलकारणतया विहितस्यापि सौत्रामणिबृहस्पतिसवादेः **'अग्निं चित्वा सौत्रामण्या यजेत। वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत। तेनेष्ट्वा राजा राजसूयेन यजेते'**त्यादिवचनैरग्निचयनवाजपेयाङ्गत्वेनापि विधानं दृश्यत इत्यर्थः।

एवं च संस्कारस्मृतिप्रामाण्येन चित्तसंस्कारत्वेनाऽवगतानामपि कर्मणामाधानस्याऽग्निसंस्कार इव तावन्मात्रे विश्रान्त्यदर्शनेन तद्द्वारा ज्ञानसाधनत्वस्य यज्ञादिश्रुत्यावगतेः **यावद्ज्ञानोदयमनुष्ठेयानि तदर्थानि कर्माणि**, न तु विविदिषोदयरूपप्रत्यक्प्रावण्येन चित्तशुद्ध्यवगमे सति त्यक्तव्यानीत्याशयेनाह - **अत** इति।

ननु कर्मणां चित्तगतमलापकर्षद्वारा ज्ञानसाधनत्वाभ्युपगमेऽपि, व्रीहिगततुषविमोकद्वारा क्रत्वपूर्वसंयुक्तस्याप्यवहननस्य यथा तुषविमोकपर्यन्तमेवानुष्ठानं, तथा चित्तशुद्धपर्यन्तमेव स्यादिति चेन्न। निर्मुक्ततुषेषु व्रीहिषु पुनस्तुषाणामिव चित्ते शुद्धे पुनर्ज्ञानोदयप्रतिबन्धकदुरितानां प्रसक्त्यभावे तावत्पर्यन्तमेवाऽनुष्ठानं युज्येत। शुद्धचित्तस्य ज्ञानार्थं श्रवणादिषु प्रयतमानस्याऽपि यावद्ज्ञानोदयं प्रतिबन्धकदुरितानां सम्भावितत्वेन

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ननु विविदिषन्तीति श्रवणात्कर्मणां ज्ञानेच्छासमुदायपर्यन्तमनुष्ठानमिति चेन्न सारमेतत्। इच्छाया अपुरुषार्थत्वात्। ततः कर्मणां ब्रह्मबोधकसाधनानां विचारस्यानन्तरं ब्रह्मबोधकशास्त्रारम्भः समुचितः।

तन्निवृत्तेरपेक्षितत्वात् संस्कारस्मृतिबलात्कर्मणां चित्तशुद्धिमात्रार्थत्वाभ्युपगमेऽपि यावद्ज्ञानोदयं तदपेक्षित-चित्तशुद्ध्यनुवृत्तये तदर्थकर्मापेक्षा भवत्येवेति भावः।

अथ परमतं निराचिकीर्षुश्शङ्कते - **नन्विति**। एवमिहाभिप्रयन्ति परे - **'तमेतं वेदानुवचनेन स्वाध्यायेन ब्राह्मणा विविदिषन्ति'**, वेदितुमिच्छन्ति, न तु विदन्ति वस्तुतः प्रधानस्यापि वेदनस्य प्रकृत्यर्थतया शब्दतो गुणत्वात्, इच्छायाश्च प्रत्ययार्थतया प्राधान्यात्, प्रधानेन च कार्यसम्प्रत्ययात्, न हि राजपुरुषमानयेत्युक्ते वस्तुतः प्रधानोपि राजा पुरुषविशेषणतया शब्दत उपसर्जन आनीयते। अपि तु पुरुष एव, शब्दतस्तस्य प्राधान्यात्। एवं वेदानुवचनस्येव यज्ञस्यापीच्छासाधनतया विधानमिति। तद्वारणायाह - **इच्छाया अपुरुषार्थत्वादि**ति। इच्छायाः स्वतः पुरुषार्थरूपत्वाभावेन पुरुषेणाऽर्थनीयत्वासम्भवात्। तस्यास्तत्फलेच्छयार्थनीयत्वं वक्तव्यम्। तत्तु न सम्भवति।

तथा हि, श्रवणादिप्रवृत्तिद्वारा विविदिषाफलभूतायां विद्यायामिच्छासत्वे तत्सत्वात्तदसत्वे फलेच्छाविरहाच्च। लिङ्गादिभिर्विधिबोधकैः कर्मणामिष्टसाधनत्वेऽवगते तत्कर्मसाध्यं किमितीष्टविशेषाकाङ्क्षायामिच्छाविषयत्वेन निबद्धं विशिष्योपात्तञ्च यत्, तस्यैव कर्मसाध्यत्वेनाऽन्वेतुमुचितत्वेन फलवाक्येषु इच्छाविषयत्वेन निबद्धस्यैव कर्मफलत्वावगमात्। अत एव स्वर्गकामादिवाक्येषु स्वर्गादिकमेव फलं, न स्वर्गकामना। तत एव च, **'प्रतितिष्ठन्ति ह वा एते य एता रात्रीरुपयन्ती'**त्यर्थवादसिद्धफलान्वयस्थले प्रतिष्ठादीनां फलत्वावगतये सन्नर्थाध्याहारमभ्युपगम्य **'ये प्रतितिष्ठासन्ति त एता रात्रीरुपेयुरि'**ति यत्तदोर्व्यत्यासेन सनर्थाध्याहारेण पूर्वमीमांसकैर्वाक्यार्थो दर्शितः। यत्त्वत्र राजपुरुषमानयेत्यत्र वस्तुतः प्रधानस्याऽपि राज्ञः पुरुषशब्दोपसर्जनतया नानयनं, तथा प्रकृते वेदनस्य प्रधानत्वेपि प्रत्ययार्थस्य प्रधानतया यज्ञादिकमिच्छायामेवाऽन्वेतीति तन्न युक्तम्। यज्ञेन विविदिषन्तीत्येतत्समानाकारे **अश्वेन जिगमिषति, असिना जिघांसती**त्यादिलौकिकवाक्ये सन्प्रत्ययवाच्येच्छाविषयगमनादेरेव फलत्वेनान्वयदर्शनात्। प्रकृतेऽपीच्छाविषयत्वेनाऽवगताया विद्याया एव यज्ञादिफलत्वमुचितमित्याशयः। एतेन कर्मणामिच्छासाधनत्ववादो निरस्तः।

तथा कर्मणां कर्मज्ञानसमुच्चयवाद्यभिमतः साक्षादङ्गभावोपि न युक्तः। प्रकृतौ क्लृप्तोपकाराणां विकृतौ तदतिरिक्तोपकारकल्पन इव, ज्ञाने विनियुक्तयज्ञादीनां क्लृप्तपापक्षयातिरिक्तकल्पने गौरवापत्तेः।

तथा च श्रुतिः **'सह वा आत्मयाजी, यो वेद इदं मेऽनेनाङ्गं संस्क्रियत इदं मेऽनेनाङ्गमुपधीयत'** इति। अनेनेति प्रकृतं यज्ञादिकं परामृश्य तस्योपात्तदुरितनिबर्हणेन पुरुषसंस्कारकत्वमावेदयति। तथाऽऽथर्वणश्रुतिरपि - **'विशुद्धसत्वस्ततस्तु तं पश्यति निष्कलं ध्यायमान'** इति। स्मृतिश्च **'ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मण'** इत्यमुमेवाऽर्थं विशदयति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ननु कर्मब्रह्मविचारयोः क्रमनियमः कथमुपपद्यते? कर्त्रैक्यादिति चेन्न। कर्त्रैक्यमिहाघार-

यत्तु, अननुष्ठितकर्माऽपि प्राग्भवीयकर्मवशाद्यो विशुद्धसत्त्वः संसारासारतादर्शनेन निष्पन्नवैराग्यः कृतं तस्य कर्मानुष्ठानेन वैराग्योत्पादोपयोगिना, प्राग्भवीयकर्मानुष्ठानादेव तत्सिद्धेरिति तदसमञ्जसम्। प्राग्भवीयस्यापि कर्मानुष्ठानस्यैव चित्तशुद्धिसन्धायकत्वाभ्युपगमेन चित्तशुद्धिकर्मानुष्ठानयोः कार्यकारणभावाऽक्षतेः।

न हि प्राग्भवीयसुकृतवशात्कस्यचिदयत्नोपलब्धो महार्थ इति तावता वाणिज्यादेरर्थसाधनत्वमनुपपन्नं भवति। तदभ्युपगमे पुराकृतसुकृतपरिपाकसुप्रसन्नपरमेश्वरप्रसादविशेषवशात्। **'प्रसन्ने सति कीटो वा पतङ्गो वा विमुच्यत'** इति पुराणवचनप्रामाण्येन, गर्भस्थवामदेवस्याऽपि ज्ञानोत्पत्तिश्रवणेन च ब्रह्मविचारस्याऽपि ज्ञानसाधनत्वभङ्गप्रसङ्गाच्च। एतेन जन्मान्तरीयकर्मवशाच्चित्तशुद्धिसम्भवेन कर्मानुष्ठानविद्ययोः कार्यकारणत्वविरहसमर्थनं विरुद्धमिति सिद्धम्।

अत्रेदं तत्त्वम्, **'धर्मेण पापमपनुदती'**ति श्रुतिप्रामाण्येन ज्ञानोत्पत्तये फलाभिसन्धिरहितेन कर्मानुष्ठानेन पापं कर्माऽपनोद्यमिति विज्ञायते। तस्माद्ब्रह्मप्राप्तिसाधनं ज्ञानं सर्वमप्याश्रमकर्माऽपेक्षत इति निष्पद्यते। अमुमेवाशयमभिव्यनक्ति भगवान् सूत्रकारः **सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदि**ति। अतो ज्ञानापेक्षितयज्ञादिकर्मस्वरूपप्रतिपादनार्था धर्ममीमांसा ब्रह्ममीमांसायाः पूर्ववृत्तेति श्रुतिसूत्रानुरोधात्प्रतिपद्यते।

किं च; श्रुत्यादिबलीयस्त्वाच्च न बाधः। लिङ्गभूयस्त्वात्। विधिर्वा धारणवत्। इत्यादिना श्रुत्यादीनां प्रकृतेऽर्थनिर्धारकत्वावगमेन तेषां च कर्ममीमांसायामेव निर्णीतस्वरूपत्वेन तस्या ब्रह्ममीमांसोपकारकत्वात् पूर्ववृत्तत्वमुचितम्।

ननु, नायमुपपद्यते क्रमनियमः। तथा हि, एककर्तृकाणामनेकेषां कर्मणामेकदैकेन कर्त्रा समनुष्ठातुमशक्यानामनुष्ठानार्थं क्रमापेक्षायां सत्यां श्रुत्यादिभिः क्रमविशेषो युज्येत नियन्तुम्। न ह्यत्र विचारयोः कर्त्रैक्यमस्ति। अङ्गाङ्गिभावादीनामेव तत्प्रयोजकतया तेषामत्राऽविद्यमानत्वात्। किन्तु, यागस्वर्गयोरिव कर्मज्ञानयोर्यज्ञादिश्रुतिसिद्धं चित्तशुद्धिद्वारं करणफलभावमात्रं विद्यते। तस्माज्जन्मान्तरीयैः कर्मभिश्शुद्धचित्तस्य विरक्तस्य मुमुक्षोर्विचारे प्रवृत्तिर्न कर्मविचारापेक्षा भवितुमर्हति। क्रत्वपूर्वसंयुक्तस्याप्यवहननस्य तुषाविमोकरूपद्वारसिद्धिपर्यन्तमेवाऽनुष्ठेयतया यावत्फलोदयमनुष्ठेयत्वविरहादित्याशयेनाक्षिपति - **नन्वि**ति।

ननु, येन चित्तशुद्ध्यर्थकर्मानुष्ठानार्थं धर्मविचारः कृतः, तेनैव पुरुषेणोपासनारूपज्ञानलाभार्थं ब्रह्मविचारस्याऽपि कर्तव्यत्वात्। फलकरणभावेऽपि कर्त्रैक्यं विद्यत इति शङ्कते - **कर्त्रैक्यादि**ति।

ज्ञानकर्मणोः कर्तृत्वाधिष्ठानपुरुषैक्यमात्रं न कर्तृकारकैक्यं, तत्प्रयोजकरूपाभावात्। प्रयोगाङ्गकर्त्रैक्यं हि प्रयोगैक्ये सति तदन्तर्गतपदार्थानां भवति। एकप्रयोगान्तर्गतिश्च। अङ्गप्रधानत्वेन वा? एकप्रधानसिध्यर्थानेकाङ्गत्वेन वा? अधिकृताधिकारेण वा? एकफलसाधनत्वेन वाऽनुष्ठेयानां फलं भवति। न चैषामन्यतमरूपमिह श्रुत्यादिभिः प्रमाणैरुपलभ्यते। अतो न युक्तोऽयं क्रमनियम इति। परिहरति - **न कर्त्रैक्यमि**ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दर्शपूर्णमासवदङ्गाङ्गित्वेन वा पञ्चप्रयाजवदेकाङ्गिप्रयुक्तानेकाङ्गत्वेन वा ? गोदोहनादिवदधिकारान्तर-प्रयुक्त्युपजीवित्वेन वा ? षड्यागवत्फलैक्येन वा ? भवति। तथात्वे विचारयोः श्रुत्यादिप्रमाणं नोपलभ्यते। ततः कर्मब्रह्मविचारयोः क्रमनियमो न युक्त इति। यदि श्रुत्यादिप्रमाणं न संभवति तदा खलु तथा स्यात्। 'विद्यां चाऽविद्यां च यस्तद्वेदोभयं सह।', 'तेनैति ब्रह्मवित्पुण्यकृच्च सत्येन

ननु, इहाऽपि तदन्यतमरूपमस्ति। यथा व्रीहिप्रोक्षणमित्यादिभाष्येण कर्मज्ञानयोरङ्गाङ्गितया मोक्षोपयोगित्वस्य प्रागुक्तत्वात्। एवञ्च कर्मब्रह्मज्ञानसाधकयोस्तद्विचारयोरपि प्रधानतदङ्गाङ्गित्वरूपमेकाङ्गि-प्रयुक्तानेकाङ्गत्वेन वेत्यनेनोपलक्षितं कर्त्रैक्यप्रयोजनमस्तीत्याशङ्क्याह - **तथात्व** इति।

अत्राऽयमाशयः। **कर्मज्ञान**योरङ्गाङ्गित्वे प्रमितेऽपि तद्विचारयोरङ्गाङ्गित्वे न प्रमाणमुपलभामहे। अध्ययनविधेरर्थज्ञानफलकत्वपक्षे विचारयोरध्ययनाङ्गत्वे सम्मतेऽपि तस्याऽक्षरावाप्तिफलकत्वरूपमुख्यपक्षे तयोः स्वतन्त्रत्वेन चाङ्गाङ्गित्वविरहादिति। आक्षेपमुपसंहरति तत इति। समाधत्ते - **यदी**ति।

ननु, विचारयोः क्रमाकाङ्क्षाजनककर्त्रैक्यसाधकेऽङ्गाङ्गित्वादौ न प्रमाणमस्तीत्याक्षिप्य तत्समाधानार्थं प्रमाणास्तित्वं प्रतिज्ञाय कर्मणोस्समुच्चये प्रमाणमुपन्यस्तम्। कथमिदमुपपन्नम्? किञ्च - व्रीहिप्रोक्षणदर्शपूर्णमासन्यायेन प्रागपि तयोस्समुच्चयो दर्शितः। स तु जन्मान्तरानुष्ठितचित्तशुद्ध्यर्थकर्माश्रयतयाऽपि सङ्गच्छत इति ज्ञानानुष्ठानात्पूर्वं ब्रह्मविचारस्येव धर्मविचारस्य नियतकर्तव्यत्वाभावात्तयोः क्रमनियमो न युज्यत इत्याक्षिप्ते सति, प्राङ्निरूपित एव कर्मज्ञानसमुच्चये पुनरपि प्रमाणोपन्यासेन किं लभ्यत इत्याशङ्क्याह - **ततः कर्मज्ञानयो**रिति।

अत्रेदमवधेयम्। विविदिषन्तीति वाक्येन चित्तशुद्धिविविदिषादिसम्पादकः श्रवणमननसम्पादनद्वारा ज्ञानानुष्ठाने प्रवर्तको जन्मान्तरानुष्ठितकर्मसाधारणस्तस्य क्रमसमुच्चयः प्राग्दर्शितः। इह तु ज्ञानानुष्ठानसमकालमनुष्ठेयैः कर्मभिस्तस्य समुच्चये श्रुतिरुपन्यस्यते। '**विद्यां चे**'ति मन्त्रे हि सहश्रुतिः कर्मज्ञानवेदनयोर्यौगपद्यं प्रतिपादयन्ती ज्ञानानुष्ठानकाले कर्मानुष्ठानं बोधयति। '**अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुत**' इत्युत्तरार्थे तदुपयोगं च ब्रवीति। प्राचीनकर्मभिरुपासनानुष्ठानप्रतिबन्धकनिवृत्तावपि तत्र प्रवृत्तस्य आप्रायणं प्रत्यहमनुवर्तनीयायां तस्यां प्रतिबन्धकतया स्थितं तत्काल एव प्रामादिकतया जातं वा सम्भावितदुरितजातं सर्वमप्युपासना-समकालमनुष्ठितेन कर्मजातेन तीर्त्वा ततो निर्विघ्नमविच्छिन्नमनुवृत्तया विद्यया मुक्तिं प्राप्नोतीति तस्यार्थः।

इदं विद्यानुष्ठानप्रवृत्तिप्रतिबन्धकतया समारब्धविद्यस्य विद्यानुष्ठानानुवृत्त्यादिप्रतिबन्धकदुरितनिवर्तकतया च विद्योपकारककर्मद्वैविध्यं **विहितत्वाच्चाऽऽश्रमकर्मापी**ति तृतीयाध्यायाधिकरणे भाष्य एव स्पष्टीकरिष्यते। एतेन आद्यप्रकारकर्मणां जन्मान्तरीयसाधारणत्वेऽपि द्वितीयप्रकारकर्मणां विद्यानुष्ठानसमकालमनुष्ठेयत्वात्तदर्थं धर्मब्रह्मविचारयोः कर्तव्ययोर्विद्यानुष्ठानारम्भात्प्रागपि श्रवणादिकालेष्ववश्यानुष्ठेयानां कर्मणामनुष्ठानसिद्ध्ये

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

लभ्यस्तपसा ह्येष आत्मा सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यमि'त्यादिका ज्ञानकर्मसमुच्चयवादिनी श्रुतिरुपलभ्यते। ततः कर्मज्ञानयोर्मोक्षैकफलत्वात् तद्विचारयोरपि क्रमनियमो युक्तः। यद्यप्यक्षरग्रहण-मात्रपर्यवसायित्वमध्ययनविधेस्तथापि विचारयोर्न प्रवृत्त्यसंभवः। साङ्गाध्ययनेनाऽपाततः पदार्थमात्र-प्रतीतेः। तदनु ब्रह्मस्थूलोपासनज्योतिष्टोमादिविधायकानां वाक्यानां सूक्ष्मोपासनभूतदहरादि-

---

धर्मविचारप्राधान्यमर्थादापततीति विचारयोः क्रमनियमसिद्ध्युपयोगित्वाद्विद्यानुष्ठानकालानुष्ठेयकर्मसमुच्चये प्रमाणप्रदर्शनं कृताक्षेपसमाधानाय कल्पत एवेति।

ननु, विचारयोः कर्तव्यत्वे प्रमिते क्रमनियमचिन्ताऽवकाशो लभेत। तदेवाऽप्रमितम्। न च, अध्ययनविधेरर्थज्ञानफलकत्वेन विचारमन्तरेणाऽर्थज्ञानसिद्ध्यसम्भवात् काण्डद्वयस्याऽपि विचारमाक्षिपतीति वाच्यम्। तस्याऽक्षरावाप्तिफलकत्वेनाऽर्थज्ञानफलत्वानुपपत्तेः। तथाहि, **स्वाध्यायोऽध्येतव्य** इति तव्यप्रत्ययेन स्वाध्यायस्याध्ययनप्राप्यत्वं प्रतीयते।

न च, अक्षरावाप्तेरपुरुषार्थत्वेन अध्ययनेन स्वाध्यायस्याऽवाप्तिरूपः संस्कारः, अवाप्तेन स्वाध्यायेना-ऽर्थावबोध इति क्रमादर्थज्ञानं फलत्वेनाऽध्ययनविधिर्गृह्णातीति वाच्यम्। अर्थज्ञानस्याप्यपुरुषार्थत्वात्। न चाऽर्थज्ञानं गौणपुरुषार्थरूपमिति वाच्यम्। पशुपुत्रादिवत्पुरुषार्थोपयोगितया गौणपुरुषार्थत्वस्याक्षरावाप्तेरपि तुल्यत्वात्। अवश्यं चाऽर्थज्ञानं फलमभ्युपगच्छताऽपि क्वचित्क्वचिदक्षरावाप्तिरपि फलत्वेनाऽवगन्तव्या। अन्यथा हुंफडादीनां स्तोभाक्षराणामनर्थकत्वेन तत्राध्ययनस्य निष्फलत्वापत्तेः। न च तात्पर्यसिद्ध्यर्थमर्थज्ञानमपि सम्भवस्थलेष्वध्ययनफलत्वेनाऽभ्युपगन्तव्यमिति वाच्यम्। लोकव्युत्पत्तिसिद्धस्य शब्दानामर्थपरत्वस्यौत्सर्गिकस्य क्वचित्क्वचिल्लौकिकवाक्ये वक्तृदोषादपवादेप्यपौरुषेये वेदे तदभावान्निरपवादस्य स्वत एव सतस्तस्याऽर्थ-ज्ञानोद्देश्यकशब्दोच्चारणविधिनिरपेक्षतया तत्सिद्ध्यर्थं तव्यप्रत्ययोपात्तत्वेन श्रुतमक्षरावाप्तिफलमुल्लङ्घ्य तत्फलभूतस्याऽर्थज्ञानस्याऽपि वैधफलत्वकल्पनायोगात्।

ननु, अध्ययनविधेरर्थज्ञानफलकत्वाभावे तदुपयोगिनां व्याकरणादीनामङ्गत्वं न स्यादिति चेन्नैवम्। तेषां हि वेदाङ्गत्वमेव स्मृतं, न ह्यध्ययनाङ्गत्वम्। तदीयं हि वेदाङ्गत्वमध्ययनस्यार्थज्ञानफलकत्वाभावेऽपि युज्यते। आधानसंस्कृतस्याऽग्नेः क्रतुष्विव अध्ययनविधिरक्षरावाप्तिफल एव, नाऽर्थज्ञानफलः। तस्मादध्ययनविधिना तावद्विचारो नाक्षिप्यते।

न च, स्वाध्यायस्याऽर्थज्ञानमन्तरा क्रतुविधीनां दुरनुष्ठेयतया क्रतुविधिभिर्विचार आक्षिप्यत इति वाच्यम्। तत्तत्क्रत्वनुष्ठानकालापेक्षितस्य तत्तद्ज्ञानस्य कल्पसूत्रोपदिष्टवचनादिभिरपि सम्भावनीयत्वेन तद्विचारस्यानपेक्षितत्वात्। एवं च वेदार्थविचारकर्तव्यतायामेव प्रमाणविरहेण धर्मब्रह्मविचारयोः क्रमनियमे सुतरां प्रमाणानुपलम्भ इत्याशङ्क्याह - **यद्यपीति**।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विद्याविधायकानां च परस्परविरोधाभासं पश्यंस्तद्विचारे पुरुषार्थाकाङ्क्षी पुरुषः स्वयमेव प्रवर्तते। ततो नाऽनिबन्धनो विचारः।

स्थूलोपासनानि बाह्यत्वान्मुक्तौ ज्ञानद्वारकत्वाच्च बहिरङ्गसाधनानि। सूक्ष्मोपासनानि तु आन्तरत्वात्कर्मवद्व्यवहितसाधनत्वाभावादन्तरङ्गसाधनानि।

परस्परेति - **'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति।', 'तद्यथेह कर्मचितो लोकः क्षीयते', 'पुत्रं ब्रह्मणमिच्छध्वम्', 'स वै लोको वदावदः', 'किं प्रजया करिष्यामो येषां कोऽयमात्मा'** इत्यादीनां कर्मब्रह्मकाण्डगतवाक्यानां वास्तविकविरोधरहितानामप्यापाततो विरोधस्य प्रतीयमानत्वात् तस्याऽऽभासत्वम्।

इदमेकैकस्मिन्नपि काण्डे उदितानुदितहोमादिविधायकवाक्यानामेकैकस्मिन्वाक्येऽपि पूर्वपक्षसिद्धान्त-साधकयुक्तिसङ्कलितानामर्थानां च दृश्यमानविरोधाभासस्योऽपलक्षणम्।

ननु, एतादृशविरोधाभासनिरासैकप्रयोजने विचारे निर्वृत्तेऽपि न कोऽपि पुरुषार्थः सेत्स्यति। न च, क्रतुविद्यानुष्ठानरूपपुरुषार्थसिद्धिरस्तीति वाच्यम्। सकलवेदार्थनिर्णायकन्यायविद्भिर्महर्षिभिः प्रणीतेषु कल्पसूत्रेषु वासिष्ठादिषु च कल्पेषु प्रतीयमानविरोधानां परिहृतत्वेन तद्विश्वासेनैव क्रतुषु विद्यासु च प्रवृत्तिसम्भवादिति चेन्न। अध्ययनसंस्कृतस्स्वाध्यायः **भूतभाव्युपयोगं हि द्रव्यं संस्कारमर्हती**ति न्यायेन, आधानसंस्कृतोऽग्निरिव भूतोपयोगविरहात्। क्वचिद्भाव्युपयोगमपेक्षमाणः फलान्तरोपयोगिनि भृतकाध्यापनादिवत्प्रतिषेधरहिते यत्र यत्र कार्ये समर्थत्वेनाऽवधार्यते तत्र सर्वत्राऽपि वस्तुसामर्थ्यलक्षणेन लिङ्गेन विनियुज्यते। तस्मात्कर्मज्ञानानुष्ठान-द्वाराऽभ्युदयनिश्श्रेयसोपयोगिन्यर्थज्ञाने सम्भवद्वेदार्थसंग्राहकपौरुषेयग्रन्थाद्युपायान्तरेप्यस्य लिङ्गेन विनियुज्यमानत्वात्।

अपि च - पदतदर्थावधारणादिद्वाराऽर्थज्ञानैकोपायानां वेदाध्ययनकालेऽध्येतव्यानां व्याकरणादीनां वेदाङ्गत्वान्यथानुपपत्त्याप्यधीतस्वाध्यायस्याऽर्थज्ञानं विनियोगस्य सिद्धत्वाच्च।

अकिञ्चित्करस्याऽङ्गत्वायोगेन नित्यवेदस्वरूपेऽनुपकारकाणामङ्गानां फलोपकारकत्वस्यैवोचितत्वाच्च। एवञ्च अङ्गाध्ययनं स्वाध्यायादापाततो ज्ञानस्य तन्निर्णय एव पुरुषार्थावगतेश्चोत्पादनेन तन्निर्णिनीषामुत्पादयति। न्यायविचारमन्तरेण वेदान्ततदर्थनिर्णयासम्भवात्तन्निर्णयार्थं विचिचारयिषामुत्पाद्य विचारे प्रवर्तयतीत्यध्ययन-विधेरक्षरग्रहणपर्यन्तत्वेऽपि नियमेन विचारे प्रवृत्तिस्सिद्ध्यति।

न च, अध्ययनविधेरक्षरग्रहणमात्रपर्यन्तत्वाभ्युपगमेन अङ्गानामध्ययनाङ्गत्वाऽनभ्युपगमेन चाऽर्थज्ञानं न सिध्यतीति वाच्यम्। तथापि तेषामध्ययनसंस्कृतवेदार्थज्ञानोपयोगित्वेनैव वेदाङ्गत्वस्याऽनपायात्तदेतन्मनसि निधाय विचारे प्रवर्तकाभावशङ्कापरिहारमुपसंहरति - **तत** इति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ननु 'श्रोतव्य' इति वाक्येन वेदान्तश्रवणं साक्षाद्विधीयत इति चेन्न। विधित्वप्रयोजकरूपसम्पत्त्यभावात्। तथाहि वेदान्तश्रवणं नाऽपूर्वविधिगोचरम्, प्राप्तत्वात्। प्राप्तिश्च वेदान्तश्रवणं स्वविषयोपात्तावगतिसाधनं शास्त्रश्रवणत्वाद्वैद्यशास्त्रश्रवणवदित्यादिभिः। न चाऽस्य नियमविधिगोचरत्वम्। अवघातादिवत्कस्यचिद्दृष्टफलस्योपायान्तरस्याऽप्राप्तिः। न च परिसङ्ख्याविधिविषयत्वम्। एवं हि वेदान्ताः श्रोतव्या एव, नाऽध्येतव्या इति पर्यवस्येत्। तथा सति अनधीतवेदान्तानां विचारायोगात् पुरुषार्थाऽसंभवः। यदि वेदान्तश्रवणस्य परिसङ्ख्यापरत्वं कर्मकाण्डश्रवणनिषेधपरत्वरूपमिति विचारस्तदा विचाराऽभावात् कर्मानुष्ठानाऽसंभवः। तदभावे चित्तशुद्ध्यभावात् ज्ञानानुत्पत्तिः स्यात्। तस्मात् पूर्वोक्तमेव समीचीनम्।

एवं विचारे प्रवर्तकमुपपाद्यश्रवणविधिस्तत्र प्रवर्तक इति केषांचिन्मतं निरसितुमाशङ्कते - **नन्विति**। **वेदान्तश्रवणमिति**। श्रवणविधिवाक्ये यद्यपि वेदान्तग्रहणं नास्ति, तथाप्यात्मा श्रोतव्य इति विधीयमानं ब्रह्मणि तात्पर्यावधारणरूपं श्रवणं ब्रह्मणो वेदान्तैकप्रमाणकत्वात्तत्तात्पर्यावधारणरूपं पर्यवस्यतीति हृदयम्।

श्रवणे विधेरेवाऽसम्भवेन तस्य प्रवर्तकत्वमसिद्धमित्याशयेन तत्र विध्यसम्भवे हेतुमुदाहरति नेति - **विधित्वेति**।

विधित्वे प्रयोजकानि रूपाणि त्रैकालिकाप्राप्ति-पाक्षिकाप्राप्ति-समुच्चितप्राप्तयः। यथा - व्रीहीन्प्रोक्षतीत्यत्र दार्शपूर्णमासिकेषु व्रीहिषु प्रोक्षणं विहितम्। एतद्विध्यभावे कालत्रयेप्यस्याऽन्यतः प्राप्त्यभावात्तत्प्राप्तिफलकोऽयमपूर्वविधिः। व्रीहीनवहन्तीत्यत्र पुरोडाशप्रकृतिभूतानामेव व्रीहीणां पुरोडाशनिर्वर्तनार्थमपेक्षिते तण्डुलीभावे एतद्विध्यभावेऽपि लोकावगतसाधनत्वेन यद्यप्यवहननस्याक्षेपतः प्राप्तिस्सम्भवति, तथापि तत्र लोकावगतसाधनत्वाविशेषान्नखविदलनमपि प्राप्नुयादित्यवहननस्य पाक्षिकी प्राप्तिः। अतोऽवहनने तदप्राप्तांशपरिपूरणफलो नियमविधिः। **इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्त** इत्यग्निचयनप्रकरणाम्नातस्य मन्त्रस्य तत्र कर्तव्येऽश्वरशनाग्रहणे रशनाग्रहणप्रकाशनसामर्थ्यरूपाल्लिङ्गात्प्राप्तिः। यद्यपि **अश्वाभिधानीमादत्त** इति विध्यभावेऽपि सम्भवत्येव, तथापि लिङ्गाविशेषात्तत्रत्ये महिषरशनाग्रहणेऽपि प्राप्तिः स्यादिति तन्निवृत्त्यर्थः परिसङ्ख्याविधिः। एवमपूर्वविधित्वादिप्रयोजकरूपाणां मध्येऽन्यतमस्याऽत्र सम्पत्त्यभावादित्यर्थः।

तत्त्वं निरूपयति **तथाहीत्यादिना** - एवं श्रवणविधौ निराकृते सति तद्विचारे पुरुषार्थाकाङ्क्षी पुरुषः स्वयमेव प्रवर्तत इति पूर्वोक्तसरणिरेवाऽङ्गीकर्तव्येत्याह - **तस्मादिति**।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ततस्सकलचिदचित्प्रपञ्चाऽऽकारपरशक्तिविशिष्टाऽद्वितीयवैभवस्य सकलनिगमसारसामरस्यनिधानस्य भव शिव शर्व पशुपति परमेश्वर महादेव रुद्र शम्भु प्रभृतिपर्यायवाचकशब्दसारप्रकाशितपरममहिमविलासस्य स्वशेषभूतनिखिलचेतनसमुपासनानुगुणसमुदितनिजप्रसादसमर्पितपुरुषार्थस्य परब्रह्मणः प्रतिपादकमुपनिषच्छास्त्रं विचारणीयम्। तन्नियोगरूपचोदनालक्षणस्य तदाराधनविशेषसाधनरूपस्य तत्तदर्थवादप्रकाशितप्राशस्त्यविलासस्य श्रुत्यादिसम्पादितसकलाङ्गपुङ्खितस्य स्वप्रमाणानुगुणस्मृतीतिहासपुराणाभियुक्तसूक्तिसंदर्भकृतोपबृंहणस्य विधिनिषेधविकल्पसमुच्चयोत्सर्गापवादबाधाभ्युच्चयादिमतो निखिलपुरुषार्थरत्नाकरस्य परमप्रबोधसाधनस्य भगवतो धर्मस्य विचारान्तरमित्यथशब्दार्थो दर्शितः।

इयता प्रबन्धेनोपपादितमथशब्दस्य धर्मविचारानन्तर्यार्थत्वमुपसंहरन् ब्रह्मजिज्ञासेति सूत्रशेषलब्धस्यार्थस्योपात्तधर्मविचारानन्तरं कर्तव्यतयाऽन्वयं दर्शयति - **तत** इत्यारभ्य - **अथ शब्दस्याऽर्थो दर्शित** इत्यन्तेन।

ब्रह्मजिज्ञासेत्यस्य ब्रह्मप्रतिपादकोपनिषच्छास्त्रस्य विचार इत्यर्थः। तत्र विचारं प्रति विषयसमर्पकेण सौत्रेण ब्रह्मपदेन शिवोऽभिधीयत इति निरूपयितुं **सकलेत्यादि**विशेषणचतुष्टयेन विशिनष्टि।

बृंहतेर्धातोर्मन्प्रत्यये निष्पन्नस्य ब्रह्मशब्दस्य धात्वर्थानुगमात्, प्रकरणोपपदादिसङ्कोचकाभावाच्च त्रिविधपरिच्छेदरहितं वस्त्वर्थ इत्येष्टव्यम्। देशकालपरिच्छेदरहितस्याऽपि शिवस्य तन्न सम्भवति। तस्य चेतनाचेतनात्मकप्रपञ्चविलक्षणत्वाभ्युपगमेन वस्तुपरिच्छेदसद्भावादित्याशङ्कां परिहर्तुमाह - **सकलेत्यादिना**।

सकलप्रपञ्चाकारया तद्रूपपरिणामिन्या परमशक्त्या जडशक्तिरूपाया मायाया नियामकत्वेन तत उत्कृष्टया चिच्छक्त्या विशिष्टस्य अत एवाऽद्वितीयवैभवस्य द्वितीयाश्रयरहितबृहत्त्वस्येत्यर्थः।

वृक्षे पत्रपुष्पाद्यान्तर्गणिकभेदे सत्यप्येक एवाऽत्र वृक्ष इत्यत्र तत्समानजातीयवृक्षान्तराभाववच्चेतनाचेतनप्रपञ्चविशिष्टस्य शिवस्य तद्विशेषणयोश्चेतनाचेतनयोस्तस्य ताभ्यां चान्तर्गणिकभेदे विद्यमानेऽपि तत्समानजातीयवस्त्वन्तराभावोऽस्तीति तदेव वस्तुपरिच्छेदराहित्यम्। न तु सर्वथा वस्त्वन्तरराहित्यमित्याशयः।

ननु, शक्तिविशिष्टाद्वितीयवैभवस्येत्यनुपपन्नम्। वेदान्तेषु निर्विशेषस्यैव ब्रह्मणः परमार्थत्वेन श्रूयमाणत्वात्।

तथाहि, **'सदेव सौम्येदमग्र आसीत्'**, **'एकमेवाद्वितीयम्'**, **'अथ परा यया तदक्षमधिगम्यते'**, **'यत्तदद्रेश्यमग्राह्यमगोत्रमपर्णमचक्षुश्श्रोत्रं तदपाणिपादं। नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः।।'**, **'सत्यं ज्ञानमनन्तं ब्रह्म'**, **'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनं प्रत्यस्तमितभेदं यत्सत्तामात्रमगोचरं। वचसामात्मसंवेद्यं तत् ज्ञानं ब्रह्मसंज्ञितम्।।'**, **'यत्र नान्यत्पश्यति**

CC-0. In Public Domain. Cuddalore Collection, TN.

Digitization by eGangotri-South Center

नान्यच्छृणोति नान्यद्विजानाति स भूमा', 'नेह नानास्ति किञ्चन', 'मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति।', 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति', 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्केन कं विजानीयात्', 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्', 'यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते। अथ तस्य भयं भवति।', 'तत्त्वमसि' इत्याद्यनन्तश्रुतिभिर्निरस्तसमस्तविशेषमेव ब्रह्म प्रतिपाद्यते।

न च, चेतनाचेतनात्मकस्य जगतः सत्यतया प्रत्यक्षादिप्रमाणविषयत्वेन ब्रह्मणः सप्रपञ्चत्वं सिद्ध्यतीति वाच्यम्। **'अनृतेन हि प्रत्यूढाः', 'मायामात्रं तु कार्त्स्न्येनाऽनभिव्यक्तस्वरूपत्वात्'** इत्यादिभिस्तत्त्वोपदेशपरैः श्रुतिसूत्रैर्निर्विशेषचिन्मात्रं ब्रह्मैव सत्यम्। तदन्यत् ज्ञातृज्ञेयज्ञानभेदादिसर्वं तस्मिन्नेव रज्जौ सर्प इव परिकल्पितं मिथ्याभूतमिति प्रतीयमानत्वात्।

ननु, रज्जौ सर्पकल्पनकारणभूतस्याऽज्ञानरूपदोषस्य विद्यमानत्वेन तत्र तत्कल्पनसम्भवेऽपि ब्रह्मणि तादृशदोषस्याऽसम्भावितत्वे नाऽत्र तत्कल्पनमसिद्धमिति वाच्यम्।

ब्रह्मण्यपि स्वरूपतिरोधानविविधविचित्रविक्षेपकारिण्यास्सदसदनिर्वचनीयाया अनाद्यविद्याया अभ्युपगतत्वेन तादृशदोषमूलस्य जगत्कल्पनस्य कारणत्वेन सिद्धत्वात्।

न च, ब्रह्मण्यविद्यारूपदोषाभ्युपगमोऽप्रमित इति वाच्यम्। **'अनृतेन हि प्रत्यूढाः', 'मायामात्रं तु कार्त्स्न्येनाऽनभिव्यक्तत्वस्वरूपत्वादि'**त्यादिश्रुतिसूत्रैर्दोषसद्भावस्य प्रमितत्वात्।

ननु, **'यः सर्वज्ञस्सर्ववित्', 'सत्यकामस्सत्यसङ्कल्प'** इत्यादिभिः श्रुतिभिस्सगुणत्वावगमेन तस्य निर्विशेषत्वमप्रमितमितिचेन्न। **'अस्थूलमनण्वहस्वम्', 'केवलो निर्गुणश्च'** इत्यादिश्रुतिशतैस्तस्य निर्गुणत्वनिर्धारणेन सगुणत्वबोधकवचनानामुपासनार्थकल्पितगुणपरत्वावसायात्। **'सदेव सौम्येदमग्र आसीत्।' 'एकमेवाऽद्वितीयं ब्रह्म'** इत्यादिवचनानां सजातीयविजातीयस्वगतभेदरहितसन्मात्रब्रह्मैकत्वप्रतिपादनपरत्वेन गुणतोऽपि सद्वितीयत्वस्य श्रुतिविरुद्धत्वादिति चेन्न।

एकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपदानमुखेन सच्छब्दवाच्यस्य परस्य ब्रह्मणो जगदुपादानत्व, जगन्निमित्तत्व, सर्वज्ञत्व, सर्वशक्तिमत्व, सत्यसङ्कल्पत्व, सर्वान्तरत्व, सर्वाधारत्व, सर्वनियामकत्व, सर्वजगदात्मकत्वाद्यनन्तमाङ्गल्यगुणप्रतिपादनपूर्वकमेवंभूतब्रह्मात्मकस्त्वमसीति श्वेतकेतुं प्रत्युपदेशाय प्रवृत्तत्वसद्विद्याया निर्विशेषत्वप्रतिपादकत्वाभावात्।

तथाहि, उपक्रमे तावत् **'उत तमादेशमप्राक्ष्यमि'**त्यत्रादेशशब्देन प्रशासितृब्रह्माऽभिधीयते। एवमुपक्रमे निरुपाधिकप्रशासनगुणयोग उक्तः। तथा **'येनाऽश्रुतं श्रुतं भवती'**त्यनेन जगदुपादानत्वं निमित्तत्वं तदनुगुणसर्वज्ञत्वसर्वशक्तिमत्त्वादिकं चाऽवगतम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उपसंहारे च, **'तत्त्वमसी'**ति सामानाधिकरण्येन जीवान्तर्यामित्वं विज्ञायते। अस्यैवाऽर्थस्याऽऽवर्तितत्वादभ्यासः सम्पद्यते। एवं ब्रह्मणो जगत्कारणत्वजगदन्तरात्मत्वादिगुणानां प्रमाणान्तराऽप्रतिपन्नत्वादपूर्वता सिद्धा। एवमुपासकस्य, **'तस्य तावदेव चिरम्। यावन्न विमोक्ष्ये। अथ सम्पत्स्य'** इति मोक्षश्रवणात्फलमपि सिद्धम्। पितुः पुत्रं प्रति प्रतिवचनरूपत्वादर्थवादः समुचितः। मृत्पिण्डादिदृष्टान्तोपपादनादुपपत्तिश्च। तस्मादियं सद्विद्या षड्विधतात्पर्यलिङ्गैः सविशेषपरमेश्वरपरैवेति विज्ञायते। अत्र दृष्टान्तत्रयेऽपि विवर्तपक्षानुगुणः कोऽपि न दृश्यते दृष्टान्तः। अपि तु परिणामपक्षानुगुण एव दृश्यते।

दार्ष्टान्तिकविषयवाक्येऽपि **'तत्तेजोऽसृजते'**त्येवोक्तं, न तु तदभ्रमदिति। अतोऽस्यां श्रुतौ विवर्तपक्षप्रसङ्ग एव नास्ति। श्रुत्यन्तरेषु च **'तदात्मानं स्वयमकुरुते'**त्यादिकं श्रूयते, न तु व्यवर्ततेति। सूत्रं च **परिणामादि**ति, न तु विवर्तादिति। अतः श्रुतिसूत्रस्वारस्यात्परिणाम एवाऽभ्युपगम्यते। स च परिणामस्सद्वारक एव भवितुमर्हति। निर्विकारत्वनिर्दोषत्वानुप्रवेशशरीरशरीरिभावादिविषयानेकश्रुतिस्वारस्यात्; अन्यथा तद्विरोधप्रसङ्गाच्च।

न च, **'अथ परा यया तदक्षरमधिगम्यते'**, **'यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुः श्रोत्रमि'**त्यादिना सकलविशेषनिषेधश्रवणेन ब्रह्मणो निर्विशेषत्वं सिद्ध्यतीति, वाच्यम्।

तत्र **अद्रेश्यमि**त्यादिना प्राकृतान् हेयगुणान्प्रतिषिद्ध्य **'नित्यं विभुं सर्वगतं सुसूक्ष्ममि'**त्यादिना नित्यत्वविभुत्वसूक्ष्मत्वसर्वगतत्वभूतयोनित्वसर्वज्ञत्वादिमाङ्गल्यगुणयोगस्य श्रूयमाणत्वात्। **'सत्यं ज्ञानमि'**त्यादिना सत्यज्ञानादिगुणविशेषस्यैवाऽम्नातत्वाच्च।

ननु, **'एकमेवाऽद्वितीयमि'**त्यत्राऽद्वितीयपदं गुणतोऽपि सद्वितीयतां न सहते। अतः सर्वशाखाप्रत्ययन्यायेन कारणवाक्यानामद्वितीयवस्तुप्रतिपादनपरत्वमूरीकरणीयम्। कारणतयोपलक्षितस्याऽद्वितीयब्रह्मणो लक्षणमिदमुच्यते **'सत्यं ज्ञानमनन्तं ब्रह्म'** इति। अतो लिलक्षयिषितं ब्रह्म निर्गुणमेव। अन्यथा निर्गुणं, निरञ्जनमित्यादिश्रुतिविरोधो दुष्परिहार इति चेन्न।

जगदुपादानस्य ब्रह्मणस्स्वव्यतिरिक्ताधिष्ठात्रन्तरनिवारणेन विचित्रशक्तियोगप्रतिपादनपरत्वादद्वितीयपदस्य। तथैव विचित्रशक्तियोगमेवाऽवगमयति **'तदैक्षत बहु स्यां प्रजायेयेति'**, **'तत्तेजोऽसृजते'**त्यादि। एवं श्रुतिजातस्य सविशेषब्रह्मप्रतिपादनपरत्वाऽवसायात्।

न चाऽद्वितीयपदस्य निमित्तान्तरनिषेधपरत्वमननुगतमिति वाच्यम्। सिसृक्षोर्ब्रह्मणः **'सदेव सौम्येदमग्र आसीदेकमेवे'**त्यनेन उपादानकारणत्वं प्रतिपाद्य कार्योत्पत्तिस्वाभाव्येन बुद्धिस्थनिमित्तान्तरवारणस्याऽद्वितीयपदेन करणीयतयाऽनुगतत्वात्। अन्यथा सर्वनिषेधे स्वाभ्युपगतनित्यत्वादीनां च निषेधापत्तेः।

सर्वास्वपि शाखासु कारणान्वयिनां सर्वज्ञत्वादीनां गुणानामुपसंहरणीयत्वेन सर्वशाखाप्रत्ययन्यायस्य निर्विशेषपक्षे विरुद्धत्वाच्च।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अतश्च कारणवाक्यस्वभावेनाऽपि **'सत्यं ज्ञानमनन्तमि'**त्यनेन सविशेषमेव ब्रह्म प्रतिपाद्यत इति विज्ञायते।

ननु, सविशेषत्वाभ्युपगमे **'निर्गुणं, निरञ्जनं, निष्कलं, निष्क्रियं, शान्तमि'**त्यादिनिर्गुणवाक्यानि व्याकुप्येयुरितिचेन्न। तेषां वाक्यानां प्राकृतहेयगुणविषयत्वात्।

न च, ज्ञानस्य ज्ञानादिगुणाश्रयत्वादर्शनेन ब्रह्मणो ज्ञानमात्रत्वाऽऽम्नातेन च निर्गुणत्वं फलितमिति वाच्यम्। ज्ञातुरेव ज्ञानस्वरूपत्वाऽविरोधात्। प्रकाशत्वरूपाणामेव मणि, द्युमणि, दीपादीनां प्रकाशाश्रयत्व-वज्जलरूपस्यैवाऽर्णवस्य जलनिधित्वव्यपदेशवच्च ज्ञानस्वरूपस्यैव तस्य ज्ञानाश्रयत्वस्य समुचितत्वाच्च।

न च, सगुणवाक्यानां निर्गुणवाक्यानां च विरोधेन सगुणवाक्यानां मिथ्याविषयताश्रयणमुचितमिति वाच्यम्। अपहतपाप्मेत्याद्यपिपास इत्यन्तेन हेयगुणान्प्रतिषिध्य **'सत्यकामस्सत्यसङ्कल्प'** इति ब्रह्मणः कल्याणगुणान् विदधत्या श्रुत्यैव निर्गुणवाक्यानां सगुणवाक्यानां च विषयस्य विविक्तत्वात्।

ननु **'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह'** इति वाङ्मनसनिवृत्त्यभिधानाद् ब्रह्मणो निर्गुणत्वस्य सिद्धत्वेन श्रुत्यन्तराणामपि निर्विशेषपरत्वमुपपद्यत इति चेन्न।

भीषास्माद्वातः पवत इत्यादिना प्रशासकत्वादिब्रह्मगुणानारभ्य **'ते ये शतमि'**त्यनेन क्षेत्रज्ञादानन्दा-तिशयमुक्त्वा **'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वानि'**ति ब्रह्मणः शुभगुणाऽऽनन्त्यस्यैवाऽत्यादरेण श्रुत्या निगदितत्वात्।

अत्र निर्विशेषत्वं प्रतिपिपादयिषितं चेद् गुणानां क्रमेण न्यूनतां प्रतिपाद्य सर्वाभावे पर्यवसानस्य दर्शनीयतया तद्व्यतिरेकेण प्रकृते क्रमेण गुणानामाधिक्यमुक्त्वा वाङ्मनसनिवृत्त्यभिधानेन माङ्गल्यगुणानामा-नन्त्यादेवेति स्फुटतरमवगम्यमानत्वात्।

ननु, **'यस्याऽमतं तस्य मतम्। अविज्ञातं विजानतामि'**त्यादिना ब्रह्मणो ज्ञानाविषयत्वस्योक्ततया निर्विशेषत्वमवगम्यत इति चेन्न।

'ब्रह्मविदाप्नोति परं।', 'ब्रह्म वेद ब्रह्मैव भवती'ति ब्रह्मज्ञानान्मोक्षोपदेशस्य श्रूयमाणत्वेन ब्रह्मण उपासनारूपज्ञानविषयत्वसम्प्रतिपत्त्या तस्य गुणत्वावश्यम्भावात्।

न च, **'न दृष्टेर्द्रष्टारं न मतेर्मन्तारमि'**ति श्रुत्या ब्रह्मणो ज्ञातृत्वस्य निषिद्धतया तस्य सविशेषत्वं निराकृतमिति वाच्यम्। तया श्रुत्या द्रष्टारं, मन्तारमप्यात्मानं दृष्टिमतिरूपमेव पश्येदिति वा, दृष्टेर्द्रष्टारं, मतेर्मन्तारं जीवात्मानं प्रतिषिध्य सर्वभूतान्तरात्मानं परमात्मानमेवोपास्वेति वाऽभिहितत्वेन तस्य ज्ञातृत्वनिषेधकत्वाऽसम्प्रतिपत्तेः। अन्यथा **'विज्ञातारम् अरे केन विजानीयादि'**त्यादिज्ञातृत्वप्रतिपादिकाः श्रुतयो विरुध्येरन्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ननु, **'यत्र हि द्वैतमिव भवति।', 'नेह नानास्ति किञ्चन।', 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति।', 'यत्र त्वस्य सर्वमात्मैवाऽभूत्तत्केन कं पश्येदि'**ति भेदनिषेधस्य बहुधा श्रूयमाणत्वेन निर्विशेषत्वमेव ब्रह्मणः श्रुतिसम्मतमिति चेन्न।

कृत्स्नस्य जगतो ब्रह्मकार्यतया तदन्तर्यामिकतया तदात्मकत्वेन चैक्यात्तद्विरुद्धमेव नानात्वं प्रतिषिद्ध्यत इत्यवगम्यमानत्वात्।

न च, **'एकधैवानुद्रष्टव्यमि'**त्यनेन भेदो निषिध्यत इति वाच्यम्। एकधा एकतया परमेश्वरशरीरत्वेन एकप्रकारेणेत्यर्थात्। तथा **'अहमेकः प्रथममासम्। वर्तामि च भविष्यामि च। नान्यः कश्चिन्मत्तो व्यतिरिक्त' इति, 'आत्मा वा इदमेक एवाग्र आसीत्। नान्यत्किंचनमिषत्'** इत्यादिषु च ऐक्यविधिशेषतया भेदनिषेधो दृश्यते। शेषत्वं च विहितैकत्वस्थिरीकरणलक्षणम्। तस्मात्परमेश्वरे यादृशमैक्यं विहितं निषेधस्य तादृशैक्यविरोधिभेदविषयत्व एव तत्स्थिरीकरणार्थत्वेन तच्छेषत्वं सिद्ध्येत्। न त्वविरोध्यर्थान्तरनिषेधे सार्थक्यमश्नुते। न हि मृदेव घट इत्युक्ते घटद्वित्वनिषेधो मृद्घटैकत्वोपकारको भवेत्। नाप्येको घट इत्युक्ते घटगतरूपपरिणामादिभेदनिषेधो घटाख्यधर्म्यैक्यविधेर्भवत्युपकारकः। रूपपरिणामादिभेदस्य घटव्यक्त्यैक्या-ऽविरोधित्वात्। किंतु विधेयविरोध्यर्थनिषेध एव हि भवेद्विध्युपकारकः।

किं च, न केवलमुपकारकभावः। परं त्वैक्यविधिविरुध्दं च कृत्स्नभेदनिषेधपरत्वम्। समानाधिकरण-वाक्येनैक्यविधानात्। भिन्नविशेषणाभिधायिशब्दानामेकविशेष्यवृत्तित्वं हि सामानाधिकरण्यम्। न च प्रकारभेदे तिष्ठति कृत्स्नभेदनिषेध उपपद्यते।

इदं च **'न चाऽस्य कश्चिज्जनिता न चाधिपः। न तत्समश्चाप्यधिकश्च दृश्यते।।', 'एकः सन् बहुधा विचारः।', 'एको देवो बहुधा निविष्टः।', 'त्वमेकोपि बहूननुप्रविष्टः।',** इति प्रकारनानात्वस्य प्रकार्येकत्वस्य स्पष्टं श्रूयमाणतया सविशेषमेव परम्ब्रह्मेति सिद्धम्।

ननु, नानात्वनिषेधाद् बहुभवनसङ्कल्पश्रुतिरपरमार्थविषयेति चेन्न। सकलप्रमाणावगतं नानात्वं ब्रह्मणः प्रतिपाद्य तदेव बाध्यत इति वादस्य हासाऽऽवहत्वात्। तस्माच्छक्तिविशिष्टाद्वितीयवैभवस्येति सूपपन्नम्।

ननु, ब्रह्मणः प्रतिपादकमुपनिषच्छास्त्रं विचारणीयमिति प्रतिज्ञायां यस्योपनिषच्छास्त्रं प्रतिपादकं स एव ब्रह्मशब्दार्थतया स्वीकरणीयः। न शिवस्य तत्प्रतिपादकम्।

तथा हि -

'सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीमि।।'

इत्युपक्रम्य,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदमि'ति कठवल्लीश्रुत्या, **'येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्यामि'**ति मुण्डकश्रुत्या च विष्णुपुरुषादिशब्दाभिधेयस्य नारायणस्यैव तत्प्रतिपादकमिति शङ्कां निवारयितुं सकलनिगमेति विशेषणम्। **'विष्णोः परमं पदमि'**त्यत्र पदशब्दो न स्थानवाचकः। पूर्वम् **'अव्यक्तात्पुरुषः पर'** इति निर्दिष्टस्य पुरुषस्यैव स्थानप्रमाणतः पदशब्दवाच्यत्वबोधात्। तथा च, पद्यते प्राप्यत इति व्युत्पत्त्या तत्रत्यपदशब्दस्य प्राप्यपुरुषपरत्वेन न विष्णुवाचकत्वं सिद्ध्यति। विष्णोः परमं पदं प्राप्यमिति तत्प्राप्यत्वाऽऽम्नानात्। किन्तु -

एकैव शक्तिः परमेश्वरस्य भिन्ना चतुर्धा विनियोगकाले।
भोगे भवानी पुरुषे तु विष्णुः क्रोधे च काली समरे तु दुर्गा।।

इति स्मृतेः शक्त्यवस्थाविशेषरूपस्य विष्णोः पुरुषावस्थाविलये साक्षात्प्राप्या स्वस्वरूपात्मिका शैवी शक्तिः तद्द्वारा प्राप्यत्वपर्यवसानभूमिः शिव इति तस्यैव विष्णोः परमपदत्वस्य युक्तत्वात्। न च, विष्णोरिति षष्ठ्यन्तत्वं युक्तमिति वाच्यम्। **उभयनिर्देशे पञ्चमीनिर्देशो बलीयानिति** न्यायव्याकोपात्। तस्मात् **सर्वे वेदा यत्पदमामनन्ती**त्युपक्रमस्याऽपि शिवविषयत्वमुचितम्।

अथवा, पदशब्द एव शिववचनः।

शिवो रुद्रो महादेवश्शङ्करो ब्रह्म सत्पदम्।
एवमादीनि नामानि विशिष्टानि परस्य तु।।

इति स्कान्दोक्तेः। एतेन **'तत्ते पदं सङ्ग्रहेण ब्रवीमी'**त्युपक्रमः पदश्रुत्यैव शिवविषय इति विज्ञायते। विष्णोरिति पदस्य परमशब्दोक्तोत्कर्षप्रतियोगिपरत्वेन पञ्चम्यन्तत्वमेव युक्तम्। **'येनाक्षरं पुरुषं वेद सत्यमि'**त्यत्राऽक्षरपुरुषपदेऽपि शिवमेवाऽभिधत्तः। न क्षरतीति योगेन चेतनमात्ररूढ्या च साधारणयोस्तयोः पूर्वं **'यः सर्वं यः सर्वज्ञः सर्वविदि'**ति मन्त्रे सर्वज्ञपदेन रूढ्या बोधिते शिवे समन्वयस्योचितत्वात्।

न च, तत्र सर्वज्ञपदं यौगिकमिति वाच्यम्। तस्य यौगिकत्वे सर्वविदिति पदस्य नैरर्थक्यात्। तस्य रूढत्वे तु तस्य प्राकरणिकानामक्षरादिपदानां देवताविशेषपर्यवसानाकाङ्क्षायां रूढ्याकृष्टतात्पर्य एवोपक्षीणं स्यादिति तदीययौगिकार्थसमर्पणार्थं सर्वविदिति पदं सार्थक्यमश्नुते। यथा -

तव प्रसादात्कुसुमायुधोऽपि सहायमेकं मधुमेव लब्ध्वा।
कुर्यां हरस्याऽपि पिनाकपाणेर्धैर्यच्युतिं के मम धन्विनोऽन्ये।।

इति पद्येपि पिनाकपाणिपदं सारतरायुधत्वद्योतनोपयोगितया यौगिकार्थवशीकृतं सत्तत्रैवोपक्षीणं स्यादिति मत्वा तदीयरूढ्यर्थप्रत्यानयनार्थं हरशब्दः प्रयुक्तः। तस्मादुदाहृतानि श्रुत्यन्तवचनानि शिवपराण्येव।

ननु, तथापि सर्वमप्युपनिषच्छास्त्रं न शिवपरं भवितुमर्हति। **हिरण्यगर्भः समवर्तताऽग्रे।, एको ह वै नारायण आसीदि**त्यादिवचनैरन्यपरत्वस्य प्रतीयमानत्वादित्याशङ्कां निराचिकीर्षुराह सामरस्य निधानस्येति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तथा विधानामापाततोऽन्यपरत्वेन प्रतीयमानानां केषाञ्चिद्वाक्यानां श्रूयमाणत्वेऽपि विचार्यमाणानि तानि शिव एव तात्पर्यमावेदयन्ति।

तथाहि वेदेषु, तदन्तेषु, पुराणादिषु चान्यपरत्वेन प्रतीयमानमपि पञ्चकृत्यान्तर्गतचरितवर्णनमखिलं तत्तदन्तर्यामिणि शिवे पर्यवस्यतीति केनोपनिषदावेदयति।

यथा **ब्रह्म हि देवेभ्यो विजिग्ये** इत्यारभ्य देवानामसुराणां च समरे देवानामन्तर्यामिप्रसादेन लब्धे जये तं जयं स्वशक्तिसमुपार्जितं मन्यमानानां दिवौकसां दर्पाऽपनिनीषया यक्षरूपतयाऽऽविर्भूते शिवे दहनपवनयोर्गर्वमपहृत्य तिरोभूते भगवत्या हैमवत्या उपदेशेनाऽन्तर्यामिणश्शिवस्यैव प्रसादेनाऽस्माकं जयः संवृत्त इति महेन्द्रादयो बुबुधिर इति वर्णितम्।

न च, तत्र यक्षरूपेण प्रादुर्भूतोऽन्तर्यामी देवतान्तरमिति वाच्यम्। तस्य शिवादन्यत्वे उमादेव्या दर्शस्याऽसम्भावितत्वात्। अनेनैवाशयेन वेदान्तादिरूपः कृत्स्नोपि शब्दराशिः शिवमेव बोधयतीत्यमुमर्थम् **इमा रुद्राय स्थिरधन्वने गिर** इति मन्त्रभागो निर्धारयति।

अत एवाह भगवान्पराशरोऽपि -

स्मृतयश्च पुराणानि भारतादीनि सत्तम।
शिवमेव सदा साम्बं हृदि कृत्वा ब्रवन्ति हि।। इति।

अयमर्थः स्कान्देऽपि निबद्धः -

कानिचिद्वेदवाक्यानि ब्राह्मणा वेदवित्तमाः।
रुद्रमूर्तिं समाश्रित्य शिवे परमकारणे।।

पर्यवस्यन्ति विप्रेन्द्रास्तथा वाक्यानि कानिचित्।
विष्णुमूर्तिं समाश्रित्य ब्रह्ममूर्तिं च कानिचित्।।

आग्नेयीं मूर्तिमाश्रित्य श्रुतिवाक्यानि कानिचित्।
सूर्यमूर्तिं मुनिश्रेष्ठास्तथैवान्यानि कानिचित्।।

एवं मूर्त्यभिधानेन द्वारेणैव मुनीश्वराः।
प्रतिपाद्यो महादेवः स्थितः सर्वासु मूर्तिषु।। इति।।

तस्मात्सकलनिगमसारसामरस्यनिधानस्येति समुचितम्। सामरस्यं नाम सर्वेषां वेदान्तानां तात्पर्येणैककण्ठ्यम्।

ननु, सर्ववेदान्ततात्पर्यपर्यवसानत्वं शिवे प्रतिज्ञातम्। तन्न सङ्गच्छते। तथा हि, कानिचिद्वेदान्तवाक्यान्यनन्तमाङ्गल्यगुणरत्नाकरमावेदयन्ति। यथा, **'यस्सर्वज्ञस्सर्वविदि'**त्यादि। कानिचिज्जगज्जन्मादिकारणतां

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ब्रह्मणः प्रतिपादयन्ति। यथा, **'यतो वा इमानि भूतानि जायन्त'** इत्यादीनि। अन्यानि च सर्वनियन्तृत्वमभ्युपयन्ति। यथा, **'तत्सृष्ट्वा तदेवानुप्राविशत्।', 'अन्तः प्रविष्टश्शास्ता जनानामि'**त्यादीनि। इतराणि चानन्दात्मकतां निरूपयन्ति। **'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्त'** इत्यादीनि। अपराणि च तदानन्दस्य निरतिशयत्वं विशदयन्ति। **'स एको ब्रह्मण आनन्द'** इत्यादीनि। एतत्सर्वं शिवे कथं सम्भवतीत्याशङ्कानिवारणार्थं लोकवेदप्रसिद्धतन्नामप्रवृत्तिनिमित्ततयैव तत्सर्वं तस्मिन् सम्भावयितुं भव शिवेत्यादिविशेषणम्।

भवत्यस्माज्जगदिति भवः। शिवं जगतः क्षेमं करोतीति शिवः। अथवा शिवाः सर्वे कल्याणगुणा अस्य सन्तीति च शिवः। शृणाति हिनस्ति जगदिति शर्वः। पशून् जीवान् गवाश्वादिवत्पाशैर्बध्वा स्वकार्यं कारयतीति पशुपतिः। सकलजगदीशनशील ईश्वरः। तत्र पूजार्थस्य परमपदस्य समासः। महति सर्ववैषयिकानन्दातिशायिनि स्वात्मानन्दे दीव्यति रमत इति महादेवः। भक्तानां संसाररुजं द्रावयतीति रुद्रः। शं सुखमस्माद्भवतीति शम्भुः। अत्र शिवनाम्ना सकलमाङ्गल्यगुणाकरत्वं, भवशिवशर्वपशुपतिरुद्रनामभिर्ब्रह्मणस्तटस्थलक्षणं पञ्चकृत्यपरायणत्वं, परमेश्वरनाम्ना तदाक्षेपकमन्तर्यामित्वं, शम्भुनाम्ना तदानन्दस्य निरतिशयत्वं च प्रवृत्तिनिमित्ततयोपनीयते। तस्मात्सर्ववेदान्तप्रतिपाद्यब्रह्मलक्षणलक्षितमुख्याभिधाननिधानत्वाच्छिव एव सर्वश्रुतितात्पर्यविषय इति युक्तम्।

ननु श्रवणमनननिदिध्यासनसाक्षात्कारैः प्रसन्नस्य मोक्षप्रदस्यैव सूत्रगतब्रह्मशब्दविषयत्वयोग्यतया **'मोक्षमिच्छेज्जनार्दनादि'**ति तदन्यस्यैव मोक्षप्रदत्वस्मृतेर्न शिवस्य प्रकृतब्रह्मपदवाच्यत्वमिति शङ्कानिवारणाय विशिनष्टि स्वशेषभूतेति।

सर्वपुरुषार्थप्रदत्वस्य **'फलमत उपपत्तेरि'**त्यधिकरणे, मोक्षप्रदत्वस्य **'तन्निष्ठस्य मोक्षोपदेशादि'**त्यादिसूत्रेषु समर्थयिष्यमाणत्वान्नेह मोक्षप्रदत्वमात्रस्यैव प्रकृते प्रदर्शनीयत्वेऽपि सामान्याभिधानरूपेणाऽप्रस्तुतप्रशंसालङ्कारेण प्रस्तुतो विशेष एव विवक्षितः। पुरुषार्थान्तरवर्णनमत्रैव दृष्टान्ततया पर्यवस्यति।

ननु, यदि प्रसादेन पुरुषार्थः सिद्ध्यति तर्हि सर्वेषामप्ययत्नेन सकलपुरुषार्थसिद्धिस्स्यात्। निर्व्याजकृपानिधेः सर्वानुग्राहकस्य शिवस्य सर्वेष्वपि सर्वदा प्रसादसम्भवादित्याशङ्कानिवारणाय प्रसादं विशिनष्टि समुपासनानुगुणसमुदितेति।

सर्वानुग्राहकतया शिवस्य सर्वदा सर्वत्र विद्यमानाऽपि कृपा तत्तदनाद्यपचारवशादनभिव्यक्ततया कर्मज्ञानरूपतत्तदाराधनानुगुण्येन तत्र तत्र तदभिव्यक्तौ सत्यां तदनुगुणपुरुषार्थदित्सारूपः प्रसादः समुल्लसतीति भावः।

ननु निखिलेति चेतनविशेषणमयुक्तम्। तिर्यगादीनां कर्मज्ञानाऽनधिकारादिति चेन्न। सर्वेषां चेतनानां पर्यायेण मनुष्यदेहादिग्रहणे सति तदधिकारस्योद्दिष्टत्वात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

किञ्च -

महादेवे महानन्दे महाकारुणिकोत्तमे।
प्रसन्ने सति कीटो वा पतङ्गो वा विमुच्यते।।

इत्यादिस्मृतिप्रामाण्येन तिर्यगादिष्वपि प्रसादभाजनत्वसम्भवात्। श्रीकालहस्त्यादिषूपासनारूपज्ञानानुष्ठानवर्णनेन पूर्वभवसञ्चितज्ञानानुभवस्य तिर्यक्ष्वपि सम्भावितत्वाच्च।

ननु पत्रपुष्पादिसमर्पणरूपसमाराधनमल्पीयः। तावता प्रसन्नः कथं महतः पुरुषार्थान् दद्यादित्याशङ्क्य स्वशेषभूतेति चेतनविशेषणमुपात्तम्।

दारादीनामिव सर्वेषां चेतनानां शिवस्य चाऽनादिसिद्धः शेषशेषिभावः। तेन सम्बन्धेन स्वल्पमपि भक्तिपूर्वकमाराधनं दृष्ट्वा प्रसीदतीति भावः।

ननु त्रिविधपरिच्छेदराहित्याद्गुणसामग्र्याज्जगज्जन्मादिकारणत्वरूपलक्षणयोगाच्च शिवस्यैव ब्रह्मत्वे कथं **तस्मादेतद्ब्रह्म नामरूपमन्नं च जायत** इत्यादिषु देवतान्तरेऽपि ब्रह्मशब्दप्रयोगो युज्येतेत्याशङ्कावारणाय परब्रह्मण इति परत्वविशेषणं गृहीतम्। अत्रायमाशयः। कार्यभूतहिरण्यगर्भस्याऽपि श्रुतिप्रामाण्याद् ब्रह्मत्वव्यवहारे सत्यपि स त्वपरं ब्रह्मैव, ब्रह्मशब्दप्रवृत्तिनिमित्तपौष्कल्याऽभावात्। शिवस्तु परं ब्रह्म तत्र तत्पौष्कल्यस्य प्रमितत्वात्। अत एव **ऋतं सत्यं परं ब्रह्म** इत्याम्नायते। अथर्वशिरोप्यमुमेवाऽर्थं निर्धारयति। यथा - **'अथ कस्मादुच्यते परं ब्रह्म, यस्मादुच्चार्यमाण एव बृहति बृंहयति तस्मादुच्यते परं ब्रह्मेति।'**

न च, अत्रत्यनामनिर्वचनं प्रणवविषयमिति वाच्यम्। **य ॐकारस्स प्रणवो, यः प्रणवः स सर्वव्यापी, यः सर्वव्यापी सोऽनन्तो, योऽनन्तस्तत्तारं, यत्तारं तत्सूक्ष्मं, यत्सूक्ष्मं तच्छुक्लं, यच्छुक्लं तद्वैद्युतं तत्परम्ब्रह्म। स एकः स एको रुद्रः स ईशानः स भगवान्स महेश्वरः स महादेव** इत्योङ्कारादिमहादेवान्तानां नाम्नामेकविषयत्वेनाऽनुक्रम्य, तेषामेकैकनिर्वचनस्य प्रदर्शनेन।

शिवो वा प्रणवो ह्येषः प्रणवो वा शिवस्तथा।
वाच्यवाचकयोर्भेदो नात्यन्तं विद्यते क्वचित्।।

इति शिवपुराणोक्तरीत्या प्रणवनाम्नां निर्वचने प्राक्प्रकृतेऽपि शिव एव पर्यवसानौचित्यात्। अत एवाथर्वशिखायामपि - **'ओङ्कारः प्रलयः प्रणवः सर्वदेववेदयोनिः सर्ववाच्यं समुद्धर्ता तारो विष्णुर्ब्रह्म प्रकाशो विद्युद्व्यापि'** इति नाम्नां महादेवो वाच्यत्वेन दर्शितः।

एवञ्च **'तदेव ब्रह्म परमं कवीनामि'**त्यन्तेन प्रजापतेः परब्रह्मभावः। यथा च, **'नारायणपरं ब्रह्म'** इति नारायणस्य, तथा हिरण्यगर्भादेरपि क्वचित्क्वचिदुच्यमानं गौणमेव भवितुमर्हतीत्यनवद्यम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अतः शब्दोऽयं वृत्तस्य हेतुभावे वर्तते। यतोऽधीतवेदेन धर्मो विचारितोऽतस्तदनुष्ठान-सम्पन्नचित्तशुद्धिना तत्कालसम्पन्नविवेकादिगुणसहकृतपरमभक्तिसंभावितेनाऽनेन ब्रह्माऽपि निरतिशयनिःश्रेयसकरं विचारणीयमिति।

एवं ब्रह्मप्रतिपादकस्य वेदान्तभागस्य ब्रह्मजिज्ञासेति सूत्रशेषेण यद्विचारणीयत्वं प्रदर्शितं तस्य धर्मविचारानन्तर्यमथशब्दोऽभिदधातीत्यावेदयन् धर्मं द्वादशलक्षणीप्रतिपाद्यैः प्रमेयविशेषैर्विशिनष्टि तन्नियोगेत्यादिना।

तत्र धर्मे चोदनायाः प्रामाण्यं तन्नियोगरूपेत्यादिविशेषणेन, मन्त्रार्थवादयोस्तत्र प्रामाण्यं तत्तदर्थवादेत्यादिविशेषणेन, स्मृत्यादीनां तत्र प्रामाण्यं स्वप्रमाणानुगुणेत्यादिविशेषणेन च दर्शितम्। तदाराधनेत्यादिविशेषणेन द्वितीयाध्यायार्थः कर्मभेदो दर्शितः। वेदचोदनानां **'श्रुतिस्मृती ममैवाज्ञे'** इति स्मृत्युक्तरीत्या परमेश्वराज्ञारूपत्वं, **'भोक्तारं सर्वयज्ञानामि'**त्याद्युक्तिरीत्या सर्वकर्मणां परमेश्वराराधनरूपत्वं च प्रमितमित्यनेन कृतस्यैव धर्मविचारस्य कर्मानुष्ठानपूर्वकं परमेश्वरप्रसादद्वारा चित्तशुद्धिसम्पादनेन ज्ञानहेतुत्वात् तथाभूतस्यैव धर्मविचारस्य ब्रह्मविचारापेक्षितपूर्ववृत्तत्वं युक्तम्। न त्वर्वाचीनव्याख्यात्रभिमतं निरीश्वरवादमवलम्ब्य कृतस्य धर्मविचारस्येत्याशयेन तन्नियोगरूपेति, तदाराधनरूपेति च विशेषितम्।

अर्थवादशब्देन मन्त्रस्याऽपि ग्रहणम्। इतिहास उपाख्यानप्रधाना महाभारतादयः अभियुक्तसूक्तयो हैरण्यगर्भाद्यागमाः। श्रुत्यादीतिविशेषणेन तृतीयपञ्चमसप्तमाष्टमनवमाध्यायगतं प्रमेयजातं प्रदर्शितम्। तत्रादिशब्देन श्रुतिलिङ्गादीनां वचननामधेयादीनां, प्रत्यक्षादिकार्यापत्तिप्रमाणानां च सङ्ग्रहः। विधिनिषेधादिविशेषणेन दशमाद्यवशिष्टाध्यायचतुष्टयप्रमेयजातं दर्शितम्। निखिलपुरुषार्थरत्नाकरस्येत्यनेन षष्ठाध्यायप्रमेयजातं दर्शितम्। एवं सर्वेणाऽपि रूपेणाऽनुष्ठानोपयोगिना द्वादशलक्षण्यां विचारितस्य धर्मस्यानुष्ठानद्वारा ज्ञानसाधनत्वमुचितमि-त्यभिप्रेत्याऽह परमेति।

न चैतावतां विशेषानामानर्थक्यं शङ्कनीयम्। धर्मानुष्ठानं प्रति द्वादशलक्षण्या कृतधर्मविचारस्येव शास्त्रान्तरविचारस्याऽनपेक्षिततत्वद्योतनद्वारा करिष्यमाणब्रह्मविचारं प्रति धर्मविचारस्य पुष्कलकारणत्वबोधनपरतया सार्थक्यात्।

ततः सूत्रगतमतश्शब्दं व्याचष्टे **अतश्शब्द** इति - ननु, पूर्ववृत्तस्य धर्मविचारस्य हेतुत्वमथशब्देनैव द्योतितम्। तस्य नियतसामग्रीरूपत्वाभावे पूर्ववृत्तत्वेन ग्रहणायोगादित्याशङ्क्य तस्य साफल्यं निरूपयति - **यत** इति।

अत्रेदं बोध्यम्। धर्मविचारस्य ब्रह्मविचारं प्रति पूर्ववृत्तत्वेन ग्रहणमयुक्तम्। तस्य तद्धेतुत्वायोगात्।

न च, अनुष्ठितैर्धर्मैः सम्पाद्यायाश्चित्तशुद्धेः ब्रह्मविचारसाधनतया तद्द्वारा धर्मविचारस्य हेतुत्वसिद्धिरिति वाच्यम्। विचारितधर्माणां सर्वेषां चित्तशुद्ध्यर्थमनुष्ठानाभावेन अनुष्ठितधर्माणां च नियमेन ब्रह्मविचारोपयुक्त-चित्तशुद्धिप्रदत्वादर्शनेन च तद्धेतुत्वानुपलम्भात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

न च, एतावता ब्रह्मविचारस्य धर्मविचारानन्तर्यनियमभङ्गेऽपि धर्मविचारस्य ब्रह्मविचारपूर्ववृत्तत्व-नियमोऽक्षत इति वाच्यम्। यदनन्तरं नियमेन ब्रह्मविचारो भवति, तथाभूतस्य तत्पुष्कलकारणस्यैवाऽथशब्देन पूर्ववृत्ततया ग्राह्यत्वात्। अन्यथा, उपनयनादेरपि पूर्ववृत्ततया ग्रहणौचित्याच्च। तस्माद्धर्मविचारस्य पूर्ववृत्तत्वेन ग्रहणमयुक्तमित्याशङ्कानिवर्तनार्थोऽयमतः शब्दः।

ननु, गृहीतेनाऽनेन कथं तन्निवृत्तिरितिचेदुच्यते। धर्मानुष्ठानजस्य चित्तशुद्धिद्वारैव धर्मविचारस्य ब्रह्मविचारोपयोग इति तदर्थं धर्मविचारे क्रियमाणे वेदचोदनादिप्रामाण्यं श्रुत्यादिस्वरूपबलाबलं च पूर्वतन्त्रोक्तमर्यादया परिज्ञातमेतच्छास्त्रसम्पादनीयतत्परिज्ञानद्रढिमन्युपयुज्यत इति तदप्यानुषङ्गिकं प्रयोजनमित्यभिप्रेत्य धर्मविचारापेक्षायां तस्यापि प्रयोजनत्वोक्तिः। न तु ब्रह्मविचारप्रयोजकतया।

एवञ्च धर्मविचारस्य तन्निर्णयजन्यधर्मानुष्ठानचित्तशुद्ध्यादिकं द्वारमिति स्थिते सर्वैरपि कृतस्य धर्मविचारस्य तद्द्वारा ब्रह्मविचारनिष्पादकत्वाऽदर्शनेन तस्य पुष्कलकारणत्वाभावात्। अथशब्देन पूर्ववृत्ततया गर्हणमनुपपन्नमित्याशङ्कावारणायैव सूत्रकृता तत्प्रभवानां धर्मानुष्ठानादीनां ब्रह्मविचारं प्रति हेतुत्वमतश्शब्देन कीर्त्यते। तेन द्वारभूतेन सर्वेषु कारणेषु सत्स्वयं धर्मविचारः पुष्कलकारणं भवति। न तु तेषां मध्ये प्रतिबन्धकदुरितादिबलात्कस्यचिदनिवृत्तावपीत्येतदर्थस्य लाभः।

न च, अथशब्देन यत्पूर्ववृत्ततया गृहीतं तेनाऽन्यदनपेक्ष्यैव पुष्कलकारणेन भाव्यमिति वाच्यम्। तादृशनियमाऽभावात्। अन्यथा अध्ययनानन्तरं माणवकबुद्धिभेदतन्मान्द्यादिना, गुरोर्माणवकस्य वा विघ्नेन वा, धर्मविचाराऽनिष्पत्तिदर्शनेन, **अथातो धर्मजिज्ञासे**त्यत्र अध्ययनस्याऽपि पूर्ववृत्तत्वाऽभावप्रसङ्गात्। तस्माद्धर्मविचारस्यैवाऽत्र पूर्ववृत्तत्वं युक्तमिति।

विवेको - मोक्षफलं नित्यमभ्युदयफलमनित्यमिति नित्यानित्यवस्तुविवेकः। धर्मविचारानन्तरं परमेश्वराराधनधियाऽनुष्ठितैः कर्मभिश्चित्तशुद्धिस्सम्भवतीत्यभिप्रेत्य तत्कालसम्पन्नेति विशेषणं कृतम्।

अत्रेदमवधेयम्। जन्मप्रभृति,

हिंस्राऽहिंस्रे मृदुक्रूरे धर्माधर्मावृतानृते।
तद्भाविताः प्रपद्यन्ते तस्मात्तत्तस्य रोचते।।

इति स्मृत्युक्तरीत्या पूर्वजन्मवासनानुवृत्त्या ये सहजशिवभक्तिभाविताः समाचरितपाशुपतव्रतास्त एवाऽस्मिन् शास्त्रे वस्तुतोऽधिकारिणः।

ननु, पाशुपतव्रतस्य ब्रह्मविद्याग्रहणयोग्यताप्रदत्वं न प्रमितमिति चेन्न। **'तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णमि'**ति श्रुत्यनुशासितत्वात्।

न च, तत्रत्यशिरोव्रतपदस्य पाशुपतव्रतबोधकत्वमसिद्धमिति वाच्यम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

व्रतं पाशुपतं चीर्णं यैर्द्विजैरादरेण तु।
तेषामेवोपदेष्टव्यमिति वेदानुशासनम्।।

इति सूतसंहितावचनेन शिरोव्रतपदस्य पाशुपतव्रतपरतयोपबृंहितत्वात्।

न च, शिरोव्रतस्य आथर्वणिकमात्राधिकारिकतया मीमांसायां नियमितत्वेन ब्रह्मविद्यायाधिकारप्रदत्वं न सिद्ध्यतीति शङ्क्यम्। सूतसंहिताविवरणे '**अत्र एकर्षिहोमशिरोव्रतादिकमध्ययनधर्मत्वादाथर्वणिकानामेव। अन्येषां तु शिरोव्रतपदपर्यायं पाशुपतं पूर्वोक्तं सर्वश्रोतृसाधारणमि**'ति माधवाचार्यैर्व्याख्यातत्वात्।

ननु, पाशुपतव्रतस्य भगवता भाष्यकृताऽप्रतिपादितत्वेन तस्याऽधिकारसमर्पकतया भाष्यतात्पर्यवर्णनमयुक्तमिति चेन्न। अङ्गावबद्धास्त्वित्यधिकरणे भाष्यकृद्भिस्सर्वैरपि ब्रह्मोपासकैः कार्या इति पाशुपतव्रतधर्माणां भस्मोद्धूलनादीनां सर्वविद्यासमनियतत्वस्य समर्थितत्वात्। सहकार्यन्तरविध्यधिकरणे पाशुपतव्रतस्य मुक्तिफलकतया समर्थितत्वाच्च।

ननु, भाष्यकृद्भिर्निरूपितं पाशुपतव्रतं भस्मोद्धूलनादिरूपमेव, न तु शिवलिङ्गधारणात्मकम्। तस्माल्लिङ्गधारणव्रतस्य न ब्रह्मविद्याधिकारप्रदत्वं सिद्धमिति चेन्न। प्रकृतभाष्यस्य कारिकारूपं विवरणं समाचरितवता श्रीनीलकण्ठशिवाराध्येन क्रियासारापरपर्याये निगमागमसारसङ्ग्रहे भाष्योक्तपाशुपतव्रतस्य लिङ्गधारणदीक्षापरतया बहुष्वधिकरणेषु राद्धान्तित्वात्।

न च, सूतसंहितायामुक्तं पाशुपतव्रतं भस्मरुद्राक्षधारणात्मकमितिचेन्न। पाशुपतव्रतस्य भस्मरुद्राक्षधारणात्मकतया बहुषु श्रुतिस्मृतिपुराणेषु निरूपितत्वेन तत्त्वस्य लिङ्गधारणसर्वस्वे ब्रह्मपथेपि च निपुणतरमस्माभिर्निरूपितत्वात्सूतसंहितानिगदितस्याऽपि तत्परत्वावसायात्।

ननु, सूतसंहितायां विशिष्य भस्मधारणस्यैव पाशुपतव्रतसंज्ञितत्वं निगदितमिति न तस्य लिङ्गधारणपरत्वं युज्यत इति चेन्न। प्रमाणान्तरानुरोधेन तत्रत्यभस्मपदस्य रुद्राक्षशिवलिङ्गयोरप्युपलक्षकत्वावगमादित्यन्यत्र विस्तर इति नेह पुनः।

एवंविधा अधिकारिणो धर्मविचारेण धर्मस्वरूपं विचार्य शिवाराधनधियैव कर्माण्यनुतिष्ठन्तश्चित्तशुद्धिमधिगम्य परब्रह्मणः शिवस्य स्वरूपप्रमाणादिनिर्णयार्थं प्रवृत्तस्याऽस्य शास्त्रस्य विषयप्रयोजनसम्बन्धाधिकारिणां न्यायतो निर्णयार्थं प्रवृत्तस्याऽस्य सूत्रस्याऽर्थपरिज्ञाने प्रवृत्ताः, अनेनैवाऽतः शब्देन विवक्षितं कर्मफलनित्यत्वमित्थं परामृशन्ति - **परीक्ष्य लोकान्कर्मचितान् ब्राह्मणो निर्वेद मायादिति**श्रुतौ कर्मफलेभ्यो वैराग्यार्थं तेषामनित्यत्वं श्रुत्यर्थसाधकयुक्तिपरामर्शरूपया परीक्षयाऽवगन्तव्यमिति। सा च युक्तिः **तद्यथेह कर्मचितो लोक** इत्यादिवाक्येनोपन्यस्यते। सा तु राजसेवादिन्यायेनामुष्मिककर्मणोऽपि फलं क्षीयत इत्युपपादयन्ती यद्यत्कर्मफलं तत्तत्सर्वमनित्यमिति व्याप्तिमूलतया कस्याऽपि कर्मफलस्य नित्यत्वं न सहते। एवमुपपत्तिरूपतात्पर्यलिङ्गोपबृंहितया-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासेति कर्मणि षष्ठी। 'परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो

प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययम्।
तस्माल्लोकात्पुनरेत्यान्यस्मै लोकाय कर्मण।।

इत्यादि समानार्थकश्रुत्यन्तरसहकृतया **अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति।, हिरण्यदा अमृतत्वं भजन्ते।, इन्द्रस्य सख्यममृतत्वमस्याम्। दिवि ज्योतिरजरमारभेतामित्यादिका** मन्त्रार्थवादा बाधिताः सन्तः प्रशंसामात्रपराः पर्यवस्यन्तीति।

ननु, आद्यसूत्रार्थपरिज्ञानाल्लभ्ये विषयप्रयोजनाधिकारिनिर्णये चित्तशुद्धिः क्वोपयुज्यत इति चेदुच्यते।

अध्ययनेनाऽक्षरावाप्त्यनन्तरं परस्परविरुद्धं द्वयं युगपदुपतिष्ठते। **आचार्यकुलाद्वेदमधीत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान्विदधदि**त्यादिश्रुत्या समावर्तनम्, तदनन्तरमेव दारपरिग्रहं कृत्वा समारब्धव्यानामग्निहोत्रादीनामनुष्ठानार्थं वेदार्थनिर्णयाय धर्मविचारश्च अनयोः क्व प्रवर्तितव्यमिति डोलायमानास्तन्निर्णयार्थं प्रवृत्तमिदं सूत्रमित्युपश्रुत्य धर्मजिज्ञासासूत्रार्थपरिज्ञाने स्वयमेव प्रवर्तन्त इति न तत्र चित्तशुद्ध्यपेक्षाऽस्ति। इह तु चित्तशुद्धिरहिताः प्रथमं धर्मविचारशास्त्राभ्यासादक्षय्यादिवाक्यमपि फलपरं मन्यमानास्तद्विरोधिन्यायं च तत्राव्युत्पादितं परामर्ष्टुमक्षमाः सन्तः अविद्यायां बहुधा वर्तमाना वयं कृतार्था इत्यभिमन्यन्ते बालाः।

यत्कर्मिणो न प्रवेदयन्ति रागात् तेनातुराः क्षीणलोकाश्च्यवन्ते।
इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयन्ते प्रमूढाः।
नाकस्य पृष्ठे सुकृतेऽनुभूत्वा इमं लोकं हीनतरं चाविशन्ति।।

इति मन्त्रविषयतामनतिवर्तमानाः स्वयमेव ब्रह्मजिज्ञासासूत्रार्थे न प्रवर्तन्ते। ये तु प्राग्जन्मानुष्ठितैरेव तथाभूतैः कर्मभिः सम्पन्नचित्तशुद्धयस्त एवैतत्सूत्रपरिज्ञाने प्रवर्तन्ते। तेषां विद्यासाधनस्य विद्यासहकारिणश्च कर्मणोऽनुष्ठानार्थं धर्मविचारापेक्षेति सर्वथा धर्मानुष्ठानानन्तरं शुद्धचित्ता एवैतत्सूत्रपाठेन नित्यानित्यवस्तुविवेकं लब्ध्वा तन्मूलमादिशब्दगृहीतमैहिकामुष्मिकफलेभ्यो वैराग्यं, शमादिसाधनम्, मुमुक्षुत्वं च प्राप्य सहजसिद्धायाशिव-भक्तेरतिशयं च प्राप्य ब्रह्मविचारे प्रवर्तन्त इति युक्तमुक्तम्।

परीक्ष्येति - अस्याऽयमर्थः,

यो ब्राह्मणः वेदाध्ययनधर्मविचारपूर्वकं धर्मानुष्ठानेन विशुद्धचित्तः कर्मफलभूतान् लोकान्परीक्ष्य धर्मविचार-शास्त्राभ्यासतः अक्षय्यादिवाक्यानां फलसमर्पकत्वं क्षिपन्त्या तद्यथेहेत्यादि श्रुतिप्रदर्शितयुक्त्या क्षयिष्णून्निर्धार्य **अकृतो नित्यो लोकः कृतेन कर्मणा नास्ति** इति निर्वेदं कर्मफलेभ्यो वैराग्यं प्राप्नुयात्। स समित्पाणित्वनियमयुक्तः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

निर्वेद मायान्नाऽस्त्यकृतः कृतेन। तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमि'त्यादिवाक्यं विषयः।

ब्रह्म विचारार्हं भवति न वेति संदेहः। पूर्वपक्षस्तु ब्रह्म विचारयोग्यं न भवति। तत्र

सन् तद्विज्ञानार्थं तस्य प्रकृतस्य ब्रह्मणो विज्ञानं मे स्यादिति ब्रह्मज्ञानेच्छया श्रोत्रियत्वादिगुणयुक्तं गुरुमभिगच्छेदेव। न तु स्वसमीपमानयेत्। एवं विधिवदुपपन्नाय, प्रशान्तचित्ताय, शमान्विताय, अतिसूक्ष्मब्रह्मविचारापेक्षित-मनःसमाधानहेत्वान्तबाह्येन्द्रियवते तस्मै स गुरुर्येन प्रकारेण अक्षरं **अथ परा यया तदक्षरमधिगम्यते** इत्यारभ्य प्रकृतमक्षरशब्दितं सत्यं पुरुषम्, **ऋतगं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलमि**त्यादिश्रुतिप्रसिद्धं परमेश्वरं वेद सम्यग्जानाति, तेन प्रकारेण तां स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामवधार्य ज्येष्ठपुत्राय प्राह - इति प्रागुपक्षिप्तां ब्रह्मविद्यां प्रोवाच ब्रूयादिति।

अत्र ब्राह्मणशब्दप्रदर्शितचित्तशुद्धिहेतुधर्मानुष्ठानार्थं परीक्ष्य शब्दोक्तकर्मफलनित्यत्वाऽनित्यत्व-प्रापकद्विविधवाक्यबलाबलविचारपूर्वकतदनित्यत्वनिर्णायकन्यायपरिज्ञानार्थं चाऽपेक्षितस्य धर्मविचारस्य पूर्ववृत्ततया आक्षेपादथशब्दार्थो लब्धः। परीक्ष्येत्यनेनैव नित्यानित्यवस्तुविवेको लब्धः। निर्वेद मायादित्यनेन विरागः। निर्विण्णस्याऽग्रे प्रशान्तचित्ताय शमान्वितायेत्यनुवादतः शमदमसम्पत्तिर्लब्धा। **नास्त्यकृतः कृतेने**ति विशेषणाच्छाश्वतशिवलोकप्रेप्सारूपं मुमुक्षुत्वं लब्धम्। एतावता अतःशब्दार्थो लब्धः।

तद्विज्ञानार्थमित्यनेन तु ब्रह्मजिज्ञासाशब्दार्थः। तत्रार्थशब्दः स्यादर्थे वर्तते। तद्धितार्थोत्तरपदेत्यादिसूत्रभाष्ये **दाराः स्युरस्माकमिति भिक्षामह** इत्यर्थे **दारार्थं भिक्षामह** इति प्रयोगमुदाहृत्य **स्यादर्थेप्यर्थशब्दोऽस्ती**ति भगवता पतञ्जलिना समर्थितत्वात्। स्यादर्थश्च तत्र इच्छैव। इच्छायामपि लिङ्विधानात्। एवञ्च तत्र विषयवाक्ये गुरूपसदनमात्रेणेष्यमाणब्रह्मज्ञानलाभात् द्वारतया विचार आक्षेप्य इति सूत्राक्षरानुगुण्यादिदमेव विषयवाक्यमिति युक्तम्।

विचाराङ्गसंशयं दर्शयति - **ब्रह्मे**ति। अयमिह संशयक्रमः। मुमुक्षूणां ब्रह्मविचारोपयोगीति सूत्रकृता समारभ्यमाणमिदं शास्त्रमारम्भविषयत्वयोग्यं न वेति प्रथमं संशयः। तदर्थमियं चिन्ता ब्रह्मविषयत्वयोग्यं सप्रयोजनज्ञानं च न वेति। तदर्थमियं चिन्ता अहमित्यनुभूयमानो जीव एव ब्रह्म। अथवा ततोऽन्यदिति। यदि जीवादन्यत्तदाऽपि ब्रह्म परिच्छेद्यं न वेति। यदा जीव एव ब्रह्म तस्याऽहमनुभवसिद्धत्वान्न विषयत्वयोग्यता। यदि वा जीवादन्यदप्यपरिच्छेद्यं तदा तस्याऽशक्यप्रतिपादनत्वान्न विषयत्वयोग्यता। पक्षत्रयेऽपि न तस्य सप्रयोजनज्ञानता। जीवान्यब्रह्मगोचरज्ञाने सत्यपि संसारनिवृत्तिपूर्वकनित्यफलप्राप्तेरदर्शनात्, अनादिसंसारस्य दुरपह्नवत्वाच्च। यदा ब्रह्मणो न विषयतार्हत्वं, सप्रयोजनज्ञानत्वं वा तदा न तस्य विचारार्हता। तदा उदाहृतं वाक्यमुक्तमर्थं विधातुं न शक्नोति। यदा न शक्नोति, तदा विचारस्याकर्तव्यात्तदर्थमिदं शास्त्रं नारम्भणीयमिति पूर्वपक्षे फलफलिभावः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सन्देहाऽभावात्। कथं सन्देहाऽभावः? 'अयमात्मा ब्रह्मे'ति श्रुतिरयमिति प्रत्ययेन प्रत्यक्षसिद्धमेवाऽऽत्मानं ब्रह्मेत्युपदिशति। ततः कुतोऽत्र सन्देहकलङ्कप्रसङ्गः? किं च विचारस्य फलं हि तद्विषयज्ञानम्। ज्ञानं च ज्ञेयपरिच्छेदः। वेदान्तविचारजन्यं ज्ञानं ब्रह्म परिच्छिनत्ति वा न वा? यदि परिच्छिनत्ति तदा तस्य परिच्छेदातीतत्वभङ्गप्रसङ्गः। यदि न परिच्छिनत्ति ब्रह्म तदा यथावन्न प्रकाशेत।

एवं संशयपरम्परोपलक्षणत्वेन मध्यगतस्संशयो भाष्ये दर्शितः। अत एव सिद्धान्तोपक्रमभाष्ये सर्वदा समारम्भणीयमिदमिति प्राथमिकसंशयैककोटिविषयतया सिद्धान्तप्रतिज्ञा दर्शयिष्यते। सकलशास्त्रोपोद्घातत्वादस्याऽधिकरणस्य नाऽध्यायपादसङ्गतयः।

सन्देहाभावादिति। **'अयमात्मा ब्रह्मे'**ति श्रुत्या, जीव एव ब्रह्मेत्यवगमात्तस्य चाऽहमित्यनुभवसिद्धत्वादिति भावः।

ननु, सा श्रुतिः जीवस्याऽहमित्यनुभवसिद्धेन कर्तृत्वभोक्तृत्वाद्यनेकानर्थव्रातकलुषितेन रूपेण ब्रह्मभावं न प्रतिपादयति, नित्यशुद्धत्वादिरूपब्रह्मशब्दार्थानुगमविरोधात्। किन्तु कर्तृत्वादिकल्पिताकाररहितेन निर्विशेषचैतन्यरूपेण। तत्तु संसारदशायामावृतं न प्रकाशत इति तत्र सन्देहो घटत इत्याशयेन पृच्छति - **कथमिति**।

उत्तरमाह - **अयमात्मेति** अयमाशयः। **अयमात्मा ब्रह्मेति** श्रुतिः जीवस्य यावद्रूपमहमित्यनुभवे प्रकाशते तावद्युक्तमेव तमिदंशब्देन परिगृह्य ब्रह्मेत्युपदिशति।

न च, ब्रह्मशब्दस्वारस्यानुरोधादिदंशब्दस्य प्रसिद्धार्थपरत्वं हातव्यं, प्रथमचरमश्रुतयोः प्रथमश्रुतस्यैवाऽनुरोध्यत्वात्।

न च, **'ध्यायतीव लेलायतीव'** इत्यादिश्रुतिभिर्जीवे कर्तृत्वादेरपारमार्थिकत्वप्रतिपादनाद्वस्तुतो निर्विशेषमेव जीवस्वरूपं, तदेव च ब्रह्म प्रतिपाद्यत इति वाच्यम्। करोमि, भुञ्जे इत्यादिप्रत्यक्षविरुद्धानां तासां श्रुतीनां जीवस्य कर्माद्यधीनकर्तृत्वादिमत्तया तत्पारतन्त्र्यमात्रपरत्वादिति। निर्विशेषं ब्रह्मस्वरूपं जीव इति पक्षमभ्युपेत्यापि तस्य विषयत्वाऽसम्भवमाह **किञ्चेति**।

परिच्छिद्यतेऽनेनेति परिच्छेदो विशेषणरूपो विशेषः। तथा च निर्विशेषत्वभङ्गप्रसङ्ग इत्यर्थः। तस्माज्जीवस्य निर्विशेषत्वे तस्य शब्देनाऽपि प्रतिपादनाऽसम्भवात् **'अयमात्मा ब्रह्मे'**ति श्रुत्या सविशेषमेव

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अयमिति हि परिच्छिन्नो घटोऽवगम्यते। ततो ब्रह्मविषयं ज्ञानमपि न संभवति। तथापि प्रयोजनं च न किंचित्पश्यामः। न मुक्तिः प्रयोजनम्। अनादिसिद्धसंसारस्य दुरपह्नवत्वादित्येवं प्राप्ते ब्रूमः -

सर्वदा समारम्भणीयं शास्त्रम्। ब्रह्मणः संदिग्धतया विषयत्वसंभवात्। तन्निर्णयस्य सप्रयोजनत्वाच्च। यत् अयमात्मा ब्रह्मेत्यादिश्रुतिरमुमेवाऽहङ्कारबद्धं संसारिणं ब्रह्मेत्यभिधत्ते, तत एव सन्देहः।

जीवस्वरूपं ब्रह्मतया प्रतिपाद्यत इति तस्याऽहमित्यनुभवसिद्धस्य न विचारविषयतेति प्रागुक्तमेव स्थितमिति भावः।

तथापीति - यदि ब्रह्मज्ञानात्किञ्चित्प्रयोजनमभविष्यत्तदाऽहमनुभवरूपाद्वेदान्तजन्याद्वा तज्ज्ञानाज्जायमानं तद् द्रक्ष्यामः। न तदिदानीं पश्यामः। अतो ज्ञायते, न प्रसिद्धजीवरूपस्य निर्विशेषजीवरूपस्य तदन्यस्य वा ब्रह्मणः परिज्ञानात्किञ्चित्प्रयोजनमस्तीति।

अनादिसिद्धेति - संसारनिवृत्तिपूर्विका हि निरतिशयानन्दावाप्तिः प्रयोजनमिहाभ्युपगम्यते। न चाऽनादेर्निवृत्तिः। द्रव्यस्य ज्ञानमात्रान्न निवृत्तिः। सर्वजीवगतानर्थनिदानस्यैकपुरुषमोक्षकारणान्निवृत्तिश्च न सम्भवतीति भावः। तस्माद्विषयप्रयोजनासम्भवादिदं शास्त्रं नारम्भणीयमित्याशयः।

अनाद्यज्ञानेति - एवं विरुद्धधर्माधिकरणत्वाद्भाव्यं ब्रह्मणा जीवादन्येन। ततश्च केनाऽभिप्रायेण जीवब्रह्मणोः सामानाधिकरण्यनिर्देश इति तद्गतिर्वक्तव्या। एवं विषयमुपपाद्य प्रयोजनमुपपादयति - **तत्रेति** - अयमिह क्रमः। विशिष्टाधिकारी **मुमुक्षुणा ज्ञातव्यं ब्रह्म किमिति** बहुविधवाक्यश्रवणवशात्सन्देहे सति तज्जिज्ञासया तन्निर्णायकस्याऽस्य शास्त्रस्य श्रवणे प्रवृत्तः, तेन तदनुकूलयुक्त्यनुसन्धानात्मकेन मननेन च तन्निश्चित्य स्वरूप, प्रमाण, साधनफलैस्तन्निश्चयतो लब्धेन भक्त्यतिशयेन चिरनिरन्तरासेवितेन तदुपासनेन तज्जन्यसाक्षात्कारेणाराधिततया स्वमुमुक्षोन्मुखस्य नित्यसिद्धाऽपारकरुणासागरतया सर्वानुग्रहैकरसिकस्य, अत एव ब्रह्मविद्योपदेष्टृस्वमहादेशिकरूपेण स्वस्य श्रवणमननादिकं सम्पादितवतस्तस्यैव परब्रह्मणः प्रसादातिशयेन पाशपटलप्रध्वंसपूर्विकां निरतिशयप्रकाशामानान्दरूपां तदत्यन्तसादृश्यात्मिकां मोक्षलक्ष्मीं प्रतिपद्यत इति। अतश्शाब्दज्ञानमात्रेण परमप्रयोजनस्याऽनभ्युपगमात्प्रयोजनं च न पश्याम इति दूषणस्य नाऽवकाशः।

पाशनिवृत्तौ **प्रधानक्षेत्रज्ञपतिर्गुणेशः।, संसारमोक्षस्थितिबन्धहेतुरि**ति प्रमाणसिद्धस्य हेतोरुपन्यासादनादिर्न निवर्तत इति दूषणस्याऽपि नाऽवकाशः। निवृत्तौ प्रमाणसद्भावोऽपि निवृत्त्यभ्युपगमे तन्त्रम्। न तु सादित्वमनादित्वं वा। इदानीमुत्पन्नव्यक्तिविशेषानुभवेन तदज्ञानस्याऽनादेरपि निवृत्त्यभ्युपगमात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

निरस्तसमस्तोपप्लवकलङ्कनिरतिशयज्ञानानन्दादि शक्तिमहिमातिशयवत्त्वं हि ब्रह्मत्वम्। अनाद्यज्ञानवासनावष्टम्भविजृंभितविचित्रकर्मफलभोगानुगुणबहुशरीरप्रवेशनिर्गमव्यापारपरवशनिस्सीमतापसहिष्णुत्वं तु जीवत्वम्। कथमेतयोः परस्परविलक्षणयोरेकभावमाहुः श्रुतय इति संशयः किं न स्यात्? अपि चैवमपि संदिह्यते। अन्नं ब्रह्म, प्राणो ब्रह्म, मनो ब्रह्म, विज्ञानं ब्रह्म, आदित्यो ब्रह्म, नारायणपरं ब्रह्म इत्यादयोऽन्यमन्यमर्थं ब्रह्मेत्याहुः। तत्र किं वा ब्रह्मेति बहुधा संदिग्धं ब्रह्मविचारार्हं भवति। तत्र श्रवणमननादिनिश्चितस्य भक्तिज्ञानविशेषाभिमुखस्य परमकारुणिकस्य महादेशिकस्य सर्वानुग्राहकस्य शिवस्य परब्रह्मणः प्रसादातिशयेनाऽस्याधिकारिणः प्रध्वस्तपाशपटलाप्रत्यक्षी-

---

गौतमसूत्रेऽप्यनादेः संसारस्य निवृत्तौ, **प्रागुत्पत्तेरभावान्नित्यत्ववदि**ति प्रागभावनिवृत्तिं दृष्टान्तीकृत्य प्रागभावासंप्रतिपत्तावनादिभावनिवृत्तौ दृष्टान्तेन भाव्य**मित्यनुशये चाऽणुश्यामतानित्यत्ववद्वे**ति परमाणुश्यामतानिवृत्तिदृष्टान्तेनाऽनादिभावनिवृत्तिरभ्युपगता। एतेन द्रव्यस्य ज्ञानमात्रान्निवृत्तिः। सर्वजीवगतानर्थनिदानस्यैकपुरुषमोक्षकारणान्निवृत्तिश्च न सम्भवतीति दूषणान्तरमप्यनवकाशीकृतम्। तत्तन्मुच्यमानजीवावरणभूतानां मलशक्तीनामेव निवृत्त्यभ्युपगमात्। श्रवणमननध्यानसाक्षात्कारैरुपचीयमानभक्त्युपबृंहितैः प्रसन्नस्य शिवस्यैव मोचकत्वाभ्युपगमेन तस्य द्रव्यनिवर्तकत्वसम्भवाच्च। तदभ्युपगमप्रदर्शनायैव सर्वानुग्राहकस्येति विशेषणम्। प्रसादातिशयस्तु तद्व्यापारत्वेन नोपन्यस्तः। न तु प्रसादातिशयो मुक्तिसाधनं, न परमेश्वर इत्यभिप्रायेण **फलमत उपपत्ते**रित्यधिकरणे परमेश्वरस्य फलसाधनत्वेन व्यवस्थापयिष्यमाणत्वात्। प्रसादेन परमेश्वरस्य सव्यापारीकरणे च श्रवणमननादिपुरुषप्रयत्नस्योपयोगः। लोके हि साधनं द्विविधं सिद्धमसिद्धं चेति। तत्राऽसिद्धं कृष्यादिफलकामेनोत्पादनीयम्। सिद्धं कुठारादिसव्यापारीकरणीयम्। परमेश्वरश्च मोक्षे सिद्धरूपं साधनमिति मुमुक्षुणा निगलमोचनार्थिना राजेव सप्रसादेन सव्यापारीकरणीय इति।

एवं शिवस्य मोचकत्वमाविष्कर्तुमेव ब्रह्मविद्योपदेष्टृगुरुमूर्तिमधिष्ठाय स एव श्रवणादीनामपि सम्पादक इति प्रदर्शनाय **महादेशिकस्ये**ति। पारम्यं करुणाया नित्यसिद्धत्वेन निरतिशयत्वेन च विवक्षितम्। एवं परमकारुणिकस्सर्वज्ञस्सर्वशक्तिश्च सर्वानपि युगपत्किमिति न मोचयतीत्याशङ्कापरिहाराय प्रध्वस्तपाशपटलेत्यत्र पाशः पटलमिवेत्युपमितसमासेन मलाख्यस्य प्राथमिकसंसारपाशस्य नयनपटलसादृश्यं प्रदर्शितम्। यथा नयनानां पटलावरणमतिकारुणिकेनाऽपि भिषजा पक्वभावं प्रतीक्ष्यैवाऽपास्यते - एवं परमेश्वरेणाऽपि पुंसां मलावरणमिति भावः। मलमायाकर्मरूपपाशसमूहार्थो वा पटलशब्दः। पाशपटलप्रध्वंसमात्रं नैयायिकमुक्तिवन्न स्वतः प्रयोजनमिति प्रयोजनरूपताप्रदर्शनाय प्रत्यक्षीभूतेत्यादिविशेषणम्। मुक्तौ ब्रह्मानन्दानुभवरूपपरमपुरुषार्थसद्भावप्रदर्शनार्थं सत्यसङ्कल्पत्वाद्युत्कृष्टब्रह्मगुणाविर्भावसद्भावप्रदर्शनार्थं तत्समानगुणसारेति विशेषणम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भूतनिरतिशयज्ञानानन्दस्वरूपा तत्समानगुणसारा कैवल्यलक्ष्मीः प्रयोजनं च भवति। ततस्सविषयं सप्रयोजनं वेदान्तश्रवणम्।

ननु प्रथमसूत्रं ब्रह्मणो जीवादिरूपतया सन्दिग्धत्वप्रदर्शनेन विषयत्वोपपादकमिति चेन्न। प्रथमसूत्रतः शास्त्रस्य प्रयोजनवत्त्वसिद्धिः। तस्य जीवादन्यत्वव्यवस्थापनेन तत्प्रसादलभ्यप्रयोजनोपपादकं चेत्ततो न विषयसिद्धिरिति चेदुच्यते। ब्रह्मणो विचारविषयत्वं, सप्रयोजनत्वं च सूत्रकृता तस्य जिज्ञासाकर्मत्वनिर्देशेन सूचितम्। तस्मिन् ब्रह्मशब्दनिर्देशेन तदुभयोपपादनं कृतम्। तन्निर्देश न हि किं तद्ब्रह्म यत्सामान्यतोऽवगतं विशेषतोऽनवगतं जिज्ञास्यमित्याकाङ्क्षायामधीतसाङ्गसशिरस्कवेदस्य **अयमात्मा ब्रह्म।, अन्नं ब्रह्म।, मनो ब्रह्म।, आदित्यो ब्रह्म।, तपसा चीयते ब्रह्म।, नरायणपरं ब्रह्म।, ऋतं सत्यं परं ब्रह्म।** इत्यादीनि सर्वाणि ब्रह्मनिर्देशवन्ति वाक्यान्यवतिष्ठन्ते। नत्वयमात्मा ब्रह्मेत्येकमेव वाक्यम्। विनिगमनाविरहात्। एवं ब्रह्मशब्दनिर्देशेन न्यायानुसन्धानरहितबहुवाक्यस्मारकेण सन्दिग्धत्वसूचनया विषयत्वमुपपादितं भवति। तस्य ब्रह्मशब्दस्याऽवयवशक्तिपर्यालोचनया श्रुतिप्रदर्शितनिरुक्त्यनुसन्धानेन तदर्थे निर्दोषत्वादिप्रतिपादकानेकवाक्यप्रदर्शनेन च लभ्यस्य भाष्योक्ततत्प्रवृत्तिनिमित्तस्य प्रदर्शकेन तेनैव ब्रह्मशब्दनिर्देशेन ब्रह्मणो जीवादन्यत्वसूचनया तत्प्रसादलभ्यपाशनिवृत्तिपूर्वकमनुभाव्यस्य तस्य प्रयोजनत्वमप्युपपादितं भवति। भाष्यप्रदर्शितायां हि ब्रह्मशब्दप्रवृत्तिनिमित्तभूतब्रह्मत्वनिरुक्तौ निर्दोषमङ्गलगुणवत्वमज्ञानाननुविद्धनिरतिशयज्ञानत्वं दुःखाऽननुविद्ध-निरतिशयसुखादिमत्त्वं च।

न च सर्वदा तापत्रयातुरस्य जीवस्य तत्सम्भवति। नाऽपि सर्वशक्तिमत्तया सकलतापप्रतिक्षेपसमर्थस्य ब्रह्मणस्तापलेशसहिष्णुत्वमपि। एवं यस्य निरतिशयज्ञानानन्दादिगुणकस्य जीवरूपत्वमपि न सम्भवति, दूरे तस्याऽचेतनाऽन्नादिरूपत्वम्।

एवं निर्दोषनिरतिशयज्ञानानन्दादिमति ब्रह्मणि जीवादन्नाद्यचेतनाच्चाऽन्यत्वेन प्रथमसूत्रगतब्रह्मशब्द-दर्शितन्यायतः सिद्धे जीवादीनामन्यतममन्यद्वेति सन्देहनिवृत्तावपि नारायणपरम्ब्रह्मेत्यादिश्रुतिविप्रतिपत्तितस्तद्ब्रह्म नारायणः शिवो वेत्यादिसन्देहस्य अयमात्मा ब्रह्मेत्यादिवाक्यानां का गतिरित्यादिसन्देहस्य चाऽनुवृत्तेरेवंभूत-सन्देहसन्दोहप्रतिक्षेपाय जन्मादिसूत्रप्रभृतिशास्त्रं प्रवर्तत इति नोक्तदोषावकाशः।

नन्वेवं ब्रह्मणो जीवान्यत्वनिश्चयेन प्रयोजनोपपादने तस्याऽपरिच्छेद्यत्वमापतति, सोयं मयूरनृत्तन्यायः। यथा मयूरस्य नृत्यत एक एव पादो भूमौ प्रतिष्ठितो भवति। एवमिहाऽपि यदि जीव एव ब्रह्माऽभ्युपगम्येत तर्हि शक्यस्तस्य परिच्छेदः। तदपरिच्छेद्यत्वश्रुतीनामर्थवादमात्रत्वप्राप्तेः प्रयोजनं तु नोपपद्यते। यदि ब्रह्म

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यदुक्तं ज्ञेयपरिच्छेदरूपत्वात् ज्ञानस्य तदपरिच्छिन्नब्रह्मविषयं न संभवतीति, तदज्ञानविलसितम्। ईदृगिदमिति ब्रह्मणः परिच्छेदाऽसंभवेऽपि लक्षणमुखेन इतरव्यावृत्ततामात्रेण परिच्छेदसंभवात्। लक्षणेन परिच्छेदो हि सर्वत्र लक्ष्यविषयमितरव्यावृत्ततया ज्ञानम्। उद्दिष्टस्य ब्रह्मणो लक्षणे वेदान्तवाक्यैर्निरूपिते परीक्षिते च तल्लक्षणशून्येभ्यः सजातीयविजातीयेभ्यस्तदितरसकलपदार्थेभ्यो व्यावृत्तरूपं यत्, तद्ब्रह्मेति विज्ञायते। अतस्समीचीनोऽयं ब्रह्मविषयः शास्त्रारम्भः। यदसन्दिग्धमप्रयोजनं

जीवादन्यत् अनन्तमङ्गलगुणशक्तियुक्तमिह प्रसाध्येत तदा प्रयोजनमुपपद्यते। अपरिच्छेद्यन्तु ब्रह्म स्यात्। तदपरिच्छेद्यत्वश्रुतीनां तस्मिन्नर्थे बाधाभावादित्यमुं दोषं परिहर्तुं पूर्वपक्षदर्शितामपरिच्छेद्यत्वशङ्कामनुवदति - **यदुक्तमिति**।

द्विविधः परिच्छेदः। करतलामलकवदीदृगिदमिदमित्थमिति परिच्छेद एकः। तदभावेपि लक्षणमुखेनेतर-व्यावृत्ततामात्रेण परिच्छेदो द्वितीयः। तत्राऽद्यस्य ब्रह्मण्यसम्भवेऽपि द्वितीयः सम्भवति। यथा, महासेनामध्ये रथगजतुरगभटवरविभूषणादियुक्तेषु बहुषु प्रभुषु दृश्यमानेषु सर्वत्राऽनिर्धारणेन राजबुद्धिप्रसक्तौ **श्वेतच्छत्रं राजलक्षणमित्युपदिष्टे** यस्य श्वेतच्छत्रं तदाकारविशेषणादीनां दूरत्वादिदोषादनिश्चयेऽपि अयं राजेति विशिष्य निर्धारयति। एवं वेदराशिमध्ये तत्तन्मन्त्रार्थवादादिप्रसिद्धमहिमातिशयेषु बहुषु विबुधेषु श्रूयमाणेषु सर्वत्राऽनिर्धारणेन परब्रह्मबुद्धिप्रसक्तौ यज्जगत्कारणं तद्ब्रह्मेत्युपदिष्टे यत्र जगत्कारणत्वं श्रुणोति तदेव ब्रह्मेति निर्धारयति। अतो नाऽपरिच्छेद्यत्वेनाऽविषयत्वप्रसङ्गः।

ननु, ब्रह्मणः सर्वात्मना परिच्छेद्यत्वाभावे **'वेदान्तविज्ञानसुनिश्चितार्थाः।', 'भक्त्या मामभिजानाति'** इत्यादिश्रुतिस्मृतिभ्यां सर्वात्मना परिच्छेदरूपेण ज्ञानेन प्राप्यतया वर्णितं प्रयोजनं न सिद्ध्येदिति स दोषस्तदवस्थ इतिचेन्न। इतरव्यावृत्तत्वपरिच्छेदमात्रावलम्बनेन श्रवणमननयोरेकैकविद्योपसंहार्यगुणमात्रावगत्या निदिध्यासनस्य च निवृत्तौ साक्षात्कारकाले सर्वात्मना परिच्छेदसम्भवात्।

न च, तथा सत्यपरिच्छेद्यत्वभङ्गप्रसङ्गो दोषः। अपरिच्छेद्यत्वश्रुतीनां **यतो वाचो निवर्तन्त** इत्यादिश्रुत्यन्तरानुसारेण मनोवागतीतत्वविषयत्वात्। न हि साक्षात्कारकाले ब्रह्म मनसा तद्गुणेयत्तादि-प्रतिपादकशब्देन वा परिच्छिद्यते। किंतु निवृत्तावरणेन सर्वतः प्रसृतेन स्वाभाविकज्ञानेनैव। यदाहुः -

शिवार्कशक्तिदीधित्या समर्थीकृतचिद्दृशा।
शिवं शक्त्यादिभिः सार्थं पश्यत्यात्मगतावृतिः।। इति।

तस्माद्विषयप्रयोजनयोरविरोधेन सिद्धेरुपपन्नः शास्त्रारम्भ इत्याशयेनोपसंहरति - **अत** इति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

च तत् खलु न प्रेक्षावतां विचारकक्ष्यामारोहति। अस्य तु वेदान्तशास्त्रविचारस्य प्रमाणयुक्त्याभास-प्रतिभासवशात् सन्देहास्पदं ब्रह्मविषयो भवति। 'ब्रह्मविदाप्नोति परम्', 'ज्ञात्वा शिवं शान्तिमत्यन्तमेति', 'ईशं तं ज्ञात्वा अमृता भवन्ति', 'तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम्', 'आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम्। ध्याननिर्मथनादेव पाशं दहति पण्डितः', 'ज्ञात्वा देवं मुच्यते सर्वपाशैः' इत्यादिश्रुत्यनुसारेण तदुपासनयाऽस्याऽधिकारिणः पाशविच्छेदलक्षणामुक्तिः

एवमिह सूत्रगतब्रह्मशब्दशक्तिपर्यालोचनालभ्येन ब्रह्मणो जीवादन्यत्वनिश्चयेन शास्त्रस्य प्रयोजनवत्ताया विधान्तरेण ब्रह्मणः सन्दिग्धतया तेन विषयतायाश्च उपपादने सिद्धान्तभाष्यस्य तात्पर्यं ग्राह्यम्। ब्रह्मणो जीवादन्यत्वसन्देहेनैव शास्त्रस्य विषयप्रयोजनवत्त्वोपपादने वाक्यस्य तात्पर्यमुन्नेयम्।

प्रमाणयुक्त्याभासप्रतिभासवशादिति। प्रमाणाभासाः - नैयायिकाद्युन्नीतान्यष्टगुणत्वादिना ईश्वरादिसाधकान्यनुमानादीनि केवलाद्वैत्याद्युदाहृताः **'मायाभासेन जीवेशौ करोति। माया चाविद्या च स्वयमेव भवति।', 'नारायणपरं ब्रह्मे'**त्यादीनि वचनानि।

युक्त्याभासाः - तत्तदनुग्राहकलाघवतर्कादयः। यद्दृश्यं तन्नश्यमित्याद्यनुमानानि। पूर्वं श्रुतिविप्रतिपत्त्या ब्रह्मणि सन्देहो दर्शितः। इदानीं वादिविप्रतिपत्त्येति विशेषः। प्रयोजनस्याऽर्थप्राप्त्यनर्थनिवृत्तिरूपतया द्वैविध्यम्। प्रयोजनोपयुक्तानां ध्यान, साक्षात्कार, परमेश्वरप्रसादादीनां द्वारद्वारिभावस्य प्रापकानि श्रुतिवाक्यान्युदाहरति ब्रह्मविदित्यादिना - ब्रह्मवित् हृदयगुहायां ब्रह्मोपासकः, परं महेश्वरं निरतिशयब्रह्मानन्दरूपं प्रयोजनमिति केचित्। तदसत्। परममुक्तेः परमेश्वरसायुज्यरूपत्वात्। **तदेषाभ्युक्ता** इत्युदाहृतया ऋचा तथा विवृतत्वात्। अनेनाऽर्थप्राप्तिरूपं प्रयोजनमुक्तम्। **ईशं तं ज्ञात्वे**त्यनेन अमृता अमरणधर्माण इति पुनरावृत्तिराहित्योक्त्या ब्रह्मानन्दानुभवरूपस्य प्रयोजनस्य स्थायित्वमुक्तम्। अनेनाऽनर्थनिवृत्तिरूपं द्वितीयमपि प्रयोजनं व्यञ्जितम्। **तमक्रतुं पश्यती**त्यनेन **अणोरणीयान्महतो महीया**नित्यल्पाधिकशरीरतत्तत्प्राणिहृदयगुहोपाध्यनुसारेणाऽणुमहत्तया अप्राकृतमहिमवन्तमीशं धातुर्जगद्धारकस्य तस्यैव प्रसादाद्वीतशोकः सन् पश्यतीति ब्रह्मलोकप्राप्त्यनन्तरभाविनी **स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षत** इति श्रुत्यन्तरप्रसिद्धे निरतिशयानन्दात्मकब्रह्मदर्शनरूपे सकलदुःखनिवृत्तिपूर्वके परमप्रयोजने साक्षात्कारणं तस्यैव परब्रह्मणः प्रसाद इत्याकूतम्। **ज्ञात्वा देव**मित्यनेन मलमायाकर्मरूपतया पाशबहुत्वं दर्शितम्। आदिशब्देन **भिद्यते हृदयग्रन्थि**रित्यादीनि श्रुत्यन्तराणि सङ्गृहीतानि। **परीक्ष्य लोका**नित्यादौ, पूर्वपक्ष्युत्प्रेक्षितार्थपरत्वकल्पनमयुक्तम्। ततः **तद्यथेह कर्मचितो लोकः क्षीयत** इत्यादिश्रुतिदर्शितकर्मप्राप्यस्वर्गाऽदिसकललोकाऽनित्यत्वप्रतिपादनपरतया एव तदर्थप्रत्यभिज्ञयाऽवधार्य-माणत्वादिति ग्राह्यम्।

इदं सूत्रं केवलाद्वैतिनां पक्षे न सङ्गच्छते। तन्मते विषयप्रयोजनयोरनुपपत्त्या शास्त्रस्याऽनारम्भणीयत्वात्। तथा च, विषयः किम् - ब्रह्म? उत भेदमिथ्यात्वम्? आहोस्वित् जीवब्रह्मणोरैक्यम्? न प्रथमः, ब्रह्मणो

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वेद्यत्वानभ्युपगमात्। वेद्यत्वे घटादेरिवाऽननुभूतित्वप्रसङ्गात्। व्यावहारिकं वेद्यत्वमस्तीति चेत् घटस्याऽपि वेद्यत्वं व्यावहारिकमिति तद्वदेवाऽननुभूतित्वप्रसङ्गो दुर्वारः स्यात्। वेद्यत्वेऽननुभूतित्वप्रसङ्गमनादृत्य ब्रह्मणो वेद्यत्वाङ्गीकारेऽपि तस्य शास्त्रविषयत्वमयुक्तम्। ब्रह्मणस्सन्मात्रत्वं, सन्मात्रस्य प्रत्यक्षग्राह्यत्वं चाऽभ्युपगच्छतस्तव मते शास्त्रानर्थक्यस्य दुर्वारत्वात्। अप्राप्ते हि शास्त्रमर्थवत्। न द्वितीयः। दृश्यत्वादिना लिङ्गेन भेदमिथ्यात्वमभ्युपगच्छतस्तव मते शास्त्रानर्थक्यस्याऽपरिहार्यत्वात्। तत्तद्धर्मिग्राहकप्रत्यक्षादिप्रमाणविरुद्धस्य प्रपञ्चमिथ्यात्वस्य यूपादित्यैक्यस्येव शास्त्रेण प्रतिपादनाऽयोगात् शास्त्रस्य निर्विषयत्वं स्यात्। अप्राप्ते हि शास्त्रमर्थवत्।

तृतीयश्च कल्पोऽनुपपन्नः। ब्रह्मणोऽपि वेद्यत्वप्रसङ्गात्। न हि घटपटयोरेकत्वमुच्यते शास्त्रेण। अपि तु जीवब्रह्मणोरेकत्वम्। तदानीं ब्रह्मशब्देन ब्रह्मण्यनवबोधिते कथं तस्य जीवस्य चैक्यं वक्तुं शक्यते। न हि जीव एक इत्युक्ते जीवब्रह्मणोरैक्यं सिद्ध्यति। घट एक इत्युक्ते घटपटैक्यवत्। किञ्च, उपदिश्यमानमैक्यं किम् - ब्रह्मस्वरूपानतिरिक्तम्, उताऽतिरिक्तम्? अनतिरिक्तत्वे स्वरूपवेद्यत्वपक्ष एव स्यात्। तथा चोपदेशवैयर्थ्यादिदोषप्रसङ्गः, स्वरूपमात्रस्य प्रतिपन्नत्वात्। अतिरिक्तत्वे तत्किं परमार्थभूतम्? उताऽपरमार्थभूतम्? प्रथमे निर्विशेषत्वभङ्गः। द्वितीये ज्वालैक्यदेहात्मैक्यापारमार्थ्ये ज्वालाभेददेहात्मभेदपारमार्थ्यवज्जीवब्रह्मभेदपारमार्थ्यं स्यात्।

किञ्च, जीवब्रह्मणोरैक्यं नाम किमन्तःकरणस्य संविदश्चैक्यम्? उत संविदवच्छिन्नान्तःकरणस्य संविदश्च, आहोस्विदन्तःकरणावच्छिन्नसंविदः केवलसंविदश्च? न प्रथमः अनभ्युपगमादनुपपन्नत्वाच्च। अभिन्नेन चेद्भेदप्रतीतिरस्ति वा? न वा? न चेदैक्योपदेशवैयर्थ्यम्। अस्तिचेद्भेदमिथ्यात्वोपदेश एवैक्योपदेशः स्यात्। भेदमिथ्यात्वस्य अनुमानमिथ्यात्वाभिमानाच्छास्त्रस्य निर्विषयत्वं स्यात्। भेदपारमार्थ्ये दृश्यत्वानुपपत्तिरित्यादितर्कानुगृहीतं शास्त्रं भेदमिथ्यात्वे प्रमाणमिति न शास्त्रस्य निर्विषयत्वमितिचेन्न। धर्मश्चेद्धिंसात्वं न स्यादिति तर्कानुगृहीतेन **न हिंस्यादि**ति शास्त्रेण वैधपश्वालम्भनस्याऽधर्मत्वप्रतिपादनानुपपत्तिवच्छास्त्रसिद्धभेदस्य शास्त्रेण मिथ्यात्वप्रतिपादनानुपपत्तेश्च।

एवं प्रयोजनं च न घटते। तथा हि, प्रयोजनं द्विविधं शास्त्रस्य। उपायभूतमवान्तरप्रयोजनं, तत्साध्यं परमप्रयोजनं चेति। तत्र बन्धनिवर्तकज्ञानसिद्धिरवान्तरम्। मोक्षस्तु परमप्रयोजनम्। तत्रेदानीमुपजायमानं वाक्यजन्यं ज्ञानमनिवर्तकमित्यविगीतम्। वसिष्ठपराशरद्वैपायनादीनामप्यनुत्पन्नं ज्ञानमन्येषामुत्पत्स्यत इत्यसम्भावितम्। तेषामुत्पन्नं चेद्भेदप्रतिभासो न स्यात्। स निवर्तिष्यत इति चेत्, तत एव तदभिन्नानामन्येषामपि निवर्तिष्यत इति न शास्त्रमारम्भणीयं स्यात्। प्रपञ्चस्य सत्यत्वादेव ज्ञाननिवर्त्यत्वाभावादनिवर्तकं ज्ञानं नाऽवान्तरफलमिति न तदर्थं शास्त्रमारम्भणीयम्। परमप्रयोजनं च न सिद्ध्यति। ज्ञातृज्ञेयभेदस्य सत्यस्य निवृत्तेरसम्भावितत्वात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रयोजनं चास्तीति प्रथमाधिकरणेऽत्र प्रतिपादितम्।

।। इति जिज्ञासाधिकरणम् ।।

***

किञ्च, शास्त्रश्रवणाधिकारो ज्ञप्तिमात्रस्य वा? ज्ञातुर्वा? न प्रथमः। ज्ञप्तिमात्रस्य श्रोतृत्वायोगात्। न द्वितीयः। ज्ञातुः स्वनाशस्याऽपुरुषार्थत्वेन श्रवणादौ प्रवृत्त्यनुपपत्तेः। यत्सम्बन्धि सुखं दुःखनिवृत्तिश्च पुरुषार्थः स खल्वहमर्थः। अहं निर्दुःखस्सुखी स्यामिति हि प्रतीतिः। तस्य पुरुषार्थवतो नाशः कथं पुरुषार्थः? पुरुषार्थान्तरं वा कथमर्थयितुस्तस्याऽभावे पुरुषार्थो भवेत्। एवं विषयप्रयोजनयोरनुपलम्भान्निर्विशेषत्ववादिनां पक्षे प्रकृतसूत्रमसङ्गतमेवेति सिद्धम्।

इदं सूत्रं शिवेतरदेवतापरत्ववादिनां मध्वरामानुजादीनां मतेऽपि न सङ्गच्छते। तथा च प्रकृतसूत्रे निबद्धस्य निरुपपदस्य ब्रह्मपदस्य शिवासाधारणाभिधानत्वेन तत्तदभिमतदेवतानां ब्रह्मपदवाच्यत्वं न सिद्ध्यति। तथा हि, **'एकमेवाऽद्वितीयं ब्रह्म'**त्यादिना श्रुतिषु श्रूयमाणस्य ब्रह्मशब्दस्य **'एक एव रुद्रो न द्वितीयाय तस्थुरि'**त्यादिना समानार्थकवाक्येषु निरुपपदस्य ब्रह्मशब्दस्य शिव एव वाच्य इति भगवती श्रुतिरेव स्पष्टीकरोति।

किञ्च, प्रकृतमीमांसारचयिता भगवान्पाराशर्योऽपि स्वकृते महाभारते -

युधिष्ठिरो धर्ममयो महाद्रुमः स्कन्धोऽर्जुनो भीमसेनोऽस्य शाखाः।
माद्रीसुतौ पुष्पफले समृद्धे मूलं कृष्णो ब्रह्म च ब्राह्मणाश्च।।

इति धर्ममयमहावृक्षमूलतयाऽभिमते शिवे निरुपपदब्रह्मपदं प्रयुञ्जानः स्वीयायां मीमांसायां निबद्धस्य ब्रह्मपदस्य शिव एवाऽभिधेय इति विशदीकरोति।

ननु, ब्रह्मपदं शिवपरमिति नाऽद्यापि सम्प्रतिपन्नम्। अस्ति हि ब्रह्मपदस्य विष्णौ ब्राह्मणजातौ, वेदे, तपसि च व्यवहार इति चेदुच्यते। तत्र विष्णोर्द्विजानां च पृथग्ग्रहणात्, वेदतपसोरचेतनयोश्चेतनमध्ये पाठाङ्गीकारे प्रायःपाठविरोधेन च नैतेषां ग्रहणं युक्तम्। किन्तु तेभ्योऽन्यस्यैव कस्यचिद्वृक्षस्थितौ मूलस्येव राजभावोपगूढधर्ममययुधिष्ठिरस्थितौ कारणभूतस्य ग्रहणं युक्तम्। अतस्तादृशस्य शिवस्यैव पारिशेष्याद्वाच्यत्वमवार्यम्। एवं श्रुत्यन्तव्यवहारेण प्रकृतमीमांसाकर्तृव्यवहारेण च ब्रह्ममीमांसानिबद्धस्य ब्रह्मपदस्य शिवैकान्तिकत्वावगमेन शिवेतरदेवतापरत्ववादिनामिदं सूत्रमसङ्गतमेवेत्यलम्।

।। इति जिज्ञासाधिकरणम् ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ जन्माद्यधिकरणम् २

इहोद्दिष्टस्य ब्रह्मणो यन्निश्चायकं तल्लक्षणं किमित्याकाङ्क्षायां तल्लक्षणाऽभिधायकं द्वितीयाधिकरणसूत्रमवतारयति भगवान् सूत्रकारः -

जन्माद्यस्य यतः ।।१-१-२।।

ज्ञाते लक्ष्ये लक्षणवैयर्थ्यादज्ञाते तदाकाङ्क्षानुपपत्तेः कथमत्र ब्रह्मणो लक्षणकथनप्रसङ्ग

अथ जन्माद्यधिकरणम् ।।२।।

द्विविधो लक्षणदोषः, लक्षणसामान्यदोषः, लक्षणविशेषदोषश्चेति। तत्र लक्षणसामान्ये तद्दोषनिराकरणेन लब्धोन्मेषे विशिष्य ब्रह्मलक्षणमुदाहृत्य तस्य दुष्टत्वाऽदुष्टत्वचिन्तनमवकाशं लभत इत्यभिप्रेत्य लक्षणसामान्यदोषं तावन्निराकर्तुमुद्भावयति - **ज्ञात** इत्यादिना। **अध्ययनादिति**।

अयमत्राऽशयः - **ब्रह्मविदाप्नोति परमि**त्यादिवाक्याध्ययनादापाततस्तावदिदमवगम्यते। अस्ति किञ्चिद्ब्रह्मप्रातिपादिकस्य वाच्यं बृहत्त्वार्थानुगमात्स्वरूपतो गुणतो विभूतितश्च निरतिशयमहत्त्वशालीति। तत्किं ब्रह्मेति श्रुतिष्वन्वेषणे मन्त्रार्थवादादिप्रसिद्धमहिमातिशयेषु हरिहरहिरण्यगर्भेन्द्रचन्द्रवह्निसूर्यादिष्वनिर्धारणेन ब्रह्मबुद्धिः प्रसजति। पतिंवरायाः कन्याया इव स्वयंवरणमण्डपसमागतेषु बहुषु राजकुमारेषु दूरे दृश्यमानेषु आप्तमुखाऽऽकर्णितानेकगुणस्वाभिमतवरबुद्धिरिव यतो वेत्यादिब्रह्मलक्षणेन श्रीमति साम्बशिवे ब्रह्मबुद्धिर्व्यवतिष्ठते। अयमेव निरतिशयमहिमशाली ब्रह्मशब्दवाच्यश्च। न तु सृष्टिप्रलयविषयबहुवाक्यावगतसृज्यसंहार्यभावा इतरे देवताविशेषा इति। यद्यप्येवं लक्षणवाक्यश्रवणमात्रेण **'यदा तमस्तन्न दिवा न रात्रिर्न सन्न चाऽसच्छिव एव केवलः।', 'अजात इत्येवं कश्चिद्भीरुः प्रपद्यते रुद्र यत्ते दक्षिणं मुखं तेन मां पाहि नित्यमि'**त्याद्यौपनिषदवाक्यानिकुरुम्बप्रदर्शितलक्षणानुगमाच्छिव एव ब्रह्मेत्यवगतिः सम्भवति। तथाप्यसाववगतिर्न स्थिरीभवति। **'सदेव सौम्येदमग्र आसीत्।', 'सत्यं ज्ञानमनन्तं ब्रह्म।', 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते।', 'हिरण्यगर्भः समवर्तताऽग्रे।', 'एको ह वै नारायण आसीदि'**त्यादिवाक्यैर्लक्षणस्य बहुषु प्रतीयमानत्वात्। अतो जगत्कारणं ब्रह्म सत्, ज्ञानम्, आनन्दः, हिरण्यगर्भः, हरः, हरिर्वेत्यादिरूपे संशये सति सच्चिदानन्दरूपः शिव एव जगत्कारणं ब्रह्मेति लक्षणस्य शिवैकान्तिकत्वव्यवस्थापनाय जन्मादिसूत्रसूचितन्यायावलम्बनमधिकरणं प्रवर्तयिष्यते।

तथा च, **ब्रह्मविदाप्नोति परमि**त्यादिवाक्याध्ययनात्सामान्यतो निरतिशयबृहत्त्वेनाऽवगते ब्रह्मणि मन्त्रार्थवादादिप्रसिद्धहरिहरादिदेवताविशेषाणां मध्ये अयमयं वा ब्रह्मेति विशिष्य सन्दिग्धे सति सकलदेवतान्तरव्यवच्छेदेन शिव एव ब्रह्मेति निर्णयार्थस्य लक्षणस्य युक्तत्वादित्यर्थः। अत्र केचित्, आद्यस्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इति न शङ्कनीयम्। अध्ययनादापाततो ज्ञाते ब्रह्मणि तद्योगात्। जन्मादि अस्य यतः, इति सूत्रपदच्छेदः। जन्मादिकं जन्म, स्थितिप्रलयतिरोभावाऽनुग्रहरूपं कृत्यमस्य चेतनाऽचेतनसम्मेलन-

---

सर्गादौ प्राथमिकस्य हिरण्यगर्भस्य जन्म यतो भवति **यो ब्रह्माणं विदधाति पूर्वमि**ति श्रुतेस्तद्ब्रह्मेति सूत्रार्थं वर्णयन्ति, तादृशविपरीतार्थव्युदासाय सूत्रपदविभागं दर्शयति - **जन्मादी**ति।

तद्गुणसंविज्ञानबहुव्रीहिणा कृत्यपञ्चकं विवक्षितमित्याह - **जन्मादिकमि**ति। जन्मप्रलयावुत्पत्तिविनाशौ प्रसिद्धौ। स्थितिर्जन्मप्रलययोर्मध्येऽवस्थानम्। तिरोभावः संसारिवर्गस्य नित्यसिद्धज्ञानक्रियाशक्त्याद्यावरणं सकलसांसारिकानर्थमूलभूतबन्धाख्यम्। अनुग्रहस्ततो मोक्ष इत्येतानि परमेश्वरस्य सृष्टिपालनसंहारतिरोधानानुग्रह-रूपस्वव्यापारसाध्यानि प्रपञ्चधर्मरूपाणि पञ्चकार्याणि। यद्यप्यनुग्रहः परमेश्वरधर्मः, तथाप्यत्राऽनुग्रहशब्देन तत्साध्यासंसारिवर्गधर्मरूपा बन्धनिवृत्तिर्लक्षणीया। प्रपञ्चधर्मसाहचर्यात्। किञ्च, अनुगृह्णाति कृतार्थी भवननिदाने कृतार्थीभावने वर्तते। एवं चात्राऽनुग्रहस्य परमेश्वरधर्मत्वेऽपि कर्मणः कर्तृत्वविवक्षया प्रपञ्चधर्मत्वमप्युपपद्यते। तथा च, अनुगृह्णाति भक्तं परमेश्वरः। कृतार्थीभवन्तं कृतार्थीभावयतीत्यर्थः। यदा तु भक्तस्य भक्तिवैराग्यादि-सौकर्यातिशयवशात्परमेश्वरव्यापारो न विवक्ष्यते तदा कृतार्थीभवनमात्रेऽनुगृह्णातिर्वर्तते। एवं चानुग्रहस्य प्रपञ्चधर्मत्वमप्युपपद्यते।

ननु, अनाद्यावरणरूपस्य तिरोभावस्य कथं परमेश्वरकर्तृकत्वम्? उच्यते। अनादित्वेऽपि तस्य तत्कर्तृकत्वं युक्तम्। तथा हि, सर्वज्ञत्वेन सर्वेषां संसारिणां दुःखं जानतः, सर्वशक्तिकत्वेन सर्वानपि तान्युगपदेव मोचयितुं शक्तस्य परमेश्वरस्य शिवशङ्करादिनामख्यापिता सर्वभूतविषयिणी करुणानिरुपाधिः परदुःखप्रहाणेच्छारूपा तेषामनादिभवसञ्चितनानाविधदुःखजनककर्मबृन्दसामर्थ्यं परिभूय सर्वानर्थमूलावरणोच्छेद-पूर्विकामात्यन्तिकदुःखनिवृत्तिं तेषां युगपदेव कथं न कुर्यात्। यदि तस्य तत्तत्कर्मानुवर्तनस्वभावतया तेषां सकलकर्मबृन्ददाहकस्वविषयसाक्षात्कारोदयपर्यन्तेषु सहजकरुणोन्मेषविरोधितत्तदावरणानुवृत्तिसङ्कल्पो न स्यात्। ततस्तथाभूतसङ्कल्पाऽवश्यम्भावे तदधीनानुवृत्तिकस्याऽवरणस्य **यस्मिन्सत्यग्रिमक्षणे यस्य सत्त्वं, यद्व्यतिरेके चाऽसत्त्वं तत्तज्जन्यमि**ति लक्षणानुसारेण तस्य तज्जन्यत्वसिद्धौ परमेश्वरकर्तृकत्वमपि तस्य सिद्ध्यति। कार्यानुकूलसङ्कल्पवत्त्वस्यैव कर्तृलक्षणत्वात्।

ननु, स्थितिः कथं परमेश्वरकार्येषु परिगण्यते। सृष्टं यावन्न संहरति तावत्तस्य स्थितेः स्वत एव सिद्धेः। यदि हि संहर्त्ताऽन्यः प्रसक्तः स्यात्तदा संहारे प्रवृत्तस्य तस्य निवारणं कार्यमिति राज्यस्थितौ राज्ञ इव प्रपञ्चस्थितावीश्वरस्याऽपेक्षा स्यात्। परमेश्वरः स्वयं यावन्न संजिहीर्षति तावत्तस्य नान्यो नाशकः प्रसज्यते। सत्यम्। घटादिस्थितौ कुलालादिकर्त्रपेक्षाभावेऽपि मृदाद्युपादानापेक्षाऽस्त्येव। परमेश्वरः प्रपञ्चस्योपादानमपीति प्रपञ्चस्थितौ तदपेक्षा केन वा वार्यते। किञ्च जन्मवतः प्रपञ्चस्य यावन्नाशं स्थितिः ऊह्यमानजलकुम्भस्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

समरसीभूतस्य प्रपञ्चविलासस्य यतो यस्मात्तद् ब्रह्मेति शेषः।

'यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व। तद्ब्रह्मेति।', 'प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थितिबन्धहेतुः।', 'सत्यं ज्ञानमनन्तं ब्रह्म।',

---

स्थितिर्देवदत्तस्येव, परमेश्वरस्य धारणव्यापारमपेक्षते। स च व्यापारो जन्मवदिदं यावन्नाशमित्थं तिष्ठत्वित्याज्ञारूपस्तस्य सङ्कल्प एष। **एतस्यैवाऽक्षरस्य प्रशासने गार्गि! सूर्याचन्द्रमसौ विधूतौ तिष्ठतः। द्यावापृथिव्यौ विधूते तिष्ठत** इत्यादिश्रुतेः। **अक्षरमम्बरान्तधृतेः, सा च प्रशासनादिति** सूत्रयोस्तथैव प्रतिपादयिष्यमाणत्वाच्च। अपि च, **परात्तु तच्छ्रुतेः, अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशादित्य**-धिकरणयोः सर्वस्याऽपि चेतनाचेतनव्यापारस्य परमेश्वरप्रेरणाधीनत्वस्य व्यवस्थापयिष्यमाणत्वाच्च। तस्मात्सौत्रेण जन्मादिशब्देन परमेश्वरकर्तृकं जन्मादिप्रपञ्चधर्मपञ्चकं ग्राह्यमिति युक्तमेव। जन्मादीति नपुंसकनिर्वाहार्थं भाष्ये कृत्यमिति बहुव्रीहिलभ्यान्यपदार्थप्रदर्शनम्। एवं सौत्रं जन्मादिपदं व्याख्यातम्।

अथाऽस्येति पदं व्याख्येयम्। **चेतनेति** - चेतनाचेतनयोः सम्मेलनं शरीरिशरीरभावेन सम्बन्धः। तेन समरसीभूतस्य विशिष्टात्मनैकीभावं प्राप्तस्येत्यर्थः। **प्रपञ्चविलासस्येति** - प्रपञ्चो विलास इव प्रपञ्चविलासः। तस्य लीलाकृतमन्दस्मितादिवदयत्नपूर्वकस्य प्रपञ्चस्येत्यर्थः। एवञ्चास्येत्येकवचनमेककार्यवत्परमेश्वरं प्रत्ययत्नसाध्योऽयं विचित्रानन्तकार्ययुक्तः प्रपञ्च इत्येतत्सूचनार्थमित्ययत्नसाध्यत्वलक्षकेन विलासशब्देन दर्शितं भवति। तेनाऽपि परमेश्वरस्याऽपरिच्छेद्याऽनन्तशक्तिमत्त्वरूपमहिमविशेषसिद्धिः। एवमस्येति पदं व्याख्यातम्। यत इति पदं व्याख्येयम्।

विभाषा गुणेऽस्त्रियामिति गुण एव हेतौ पञ्चमीविधानेन द्रव्ये ब्रह्मणि हेतौ पञ्चम्यसम्भवादितीमां शङ्कां निराकर्तुं व्याचष्टे यतो यस्मादिति - **पुत्रात्प्रमोदो जायत** इत्यादिप्रयोगदर्शनात् **विभाषा गुणेऽस्त्रियामिति** सूत्रे विभाषेति योगविभागेनाऽगुणवचनेभ्योपि हेतौ पञ्चमी समर्थनीयेति भावः। हेताविति सूत्रविहितहेतुतृतीयान्तादप्यत्र तसिल्प्रत्यय उपपद्यते। **इतराभ्योपि दृश्यत** इति तृतीयान्तादपि तद्विधानादित्यपि द्रष्टव्यम्। सूत्रस्यापेक्षितं पूरयति - **तद्ब्रह्मेति शेष** इति। यत्पदाक्षिप्तत्पदाऽध्याहारेण पूर्वसूत्रगतब्रह्मपदानुषङ्गेण योजनीयमित्याशयः। एवं प्रदर्शितस्य लक्षणस्य पूर्वपक्षसिद्धान्ताभ्यां शिवैकान्त्यव्यवस्थापनार्थमधिकरणशरीरप्रदर्शनाय विषयवाक्यमुदाहरति - **यतो वेति**।

प्रधानेति - **स विश्वजिद्विश्वकृदात्मयोनिर्ज्ञः कालकालो गुणी सर्वविद्यः** इति मन्त्रस्य पूर्वभागः। आत्मयोनिः स्वयम्भूः। आत्मनां योनिर्वा। कालकालः कालस्य क्षणादिनिचयस्य वैवस्वतस्य वा नियन्ता। गुणी सत्यसङ्कल्पत्वादिकल्याणगुणसम्पन्नः। सर्वा विद्या अस्येति सर्वविद्यः सर्वविद्याधिष्ठाता।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

'ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमः।।'

इत्यादिवाक्यं विषयः।

अत्र जगतो जन्मादिकं ब्रह्मणो लक्षणतया संभवति न वेति सन्देहः। न सम्भवति, सम्बन्धाभावात्। किञ्च, 'आनन्दो ब्रह्मेति व्यजानात्' इत्यत्राऽऽनन्दस्य जगज्जन्मादिलक्षणं पर्यवस्यति। अन्यत्र सदेव सोम्येदमग्र आसीदिति सतो जगत्कारणत्वमवगम्यते। 'सत्यं ज्ञानमनन्तं ब्रह्म' इति ज्ञानमेवाऽपरिच्छिन्नं जगत्कारणं ब्रह्मेत्येकत्र विज्ञायते। अपरत्र च 'यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केवल' इति शिवशब्दवाच्यं वस्तुकारणत्वेन सकलपूर्वभावि ब्रह्मेति विज्ञायते। अत्रानन्दादीनां ब्रह्मत्वे विकल्पो वा? समुच्चयो वा? विकल्पे श्रुतहान्यादिदोष-प्रसङ्गोऽव्यवस्था च। व्यवस्थितविकल्पेऽपि ब्रह्मानेकत्वप्रसङ्गः। समुच्चयपक्षे तेषां धर्मरूपत्वान्निखिल-जगन्निर्माणोपायज्ञानविशेषविशिष्टब्रह्मत्वाऽसंभवः। अपि च 'मायां तु प्रकृतिं विद्यात्' इति श्रुतिर्मायाया अचेतनाया जगत्कारणत्वमभिधत्ते तदेव युक्तम्। ब्रह्मणो ज्ञानरूपस्य जगत्कारणत्वे तस्य विकारापत्त्या 'निष्कलं निष्क्रियं शान्तम्' इत्यादि श्रुतिभङ्गप्रसङ्गः। अतः सर्वथाऽपि ब्रह्मणो जगत्कारणत्वादि-लक्षणमभिधातुमशक्यमित्येवमादौ पूर्वपक्षविक्षेपे प्राप्ते ब्रूमः -

यद्यपि जन्मादेर्जगन्निष्ठत्वेन ब्रह्मण्यसम्बन्धः, तथापि ताटस्थ्येन लक्षणत्वं युज्यते। यत्

ईशानस्सर्वविद्यानामिति श्रुतेः। प्रधानक्षेत्रज्ञयोः प्रकृतिपुरुषयोः पतिः पालकः। गुणेशः त्रैगुण्यनियन्ता। संसारः संततं सरणमिह परत्र च गताऽगतम्। तेन जन्मप्रलययोर्ग्रहणम्। बन्धः तिरोभावः। सूत्रे कृत्यपञ्चकं गृहीतमित्यस्य यत इति पञ्चम्या हेत्वर्थकत्वस्य स्पष्टीकरणार्थं विषयवाक्यान्तरोदाहरणम्। अनपायगुणद्वारकं तथाभूतविग्रहद्वारकं च स्वरूपलक्षणमप्यनेन सूत्रेण विवक्षितमिति दर्शयितुं **सत्यं ज्ञानम्।, ऋतं सत्यमिति** मन्त्रयोरुदाहरणम्। **ताटस्थ्येनेति** - यथा शाखाग्रस्य चन्द्रलक्षणत्वं तद्वदिति भावः। एतेन लक्षणसामान्य-प्रयोजनासम्भवशङ्का निराकृता। अथ विशिष्य ब्रह्मलक्षणस्य विवक्षितं प्रयोजनं न सम्भवतीति शङ्कां परिहर्तुमुपक्रमते - **यदित्यादिना**।

शिवो निरतिशयबृहत्त्वशाली। जगज्जन्मादिसमुदायादिहेतुभावेन प्रकृतलक्षणस्य विशिष्य विवक्षितमपि प्रयोजनं सम्भवति। बहुषु कारणत्वप्रतिपादकवाक्यानां मुख्यार्थाऽसम्भवेन किंचिद्विषयाणामेव तेषां मुख्यार्थपरत्वे वक्तव्ये किं विषयवाक्यानां तद्युक्तमिति तत्र न्यायगवेषणायां शिवस्य पञ्चकृत्यकारित्वोपपादकसर्वज्ञत्वादि-रूपषडङ्गप्रसिद्ध्या जन्मादिकारणत्व-तदुपपादक-प्रवृत्तिनिमित्तक-भवाऽदिनामाऽष्टकाऽभिधेयत्वप्रसिद्ध्या च

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सर्वज्ञत्वादिविशिष्टमष्टाभिधानाधिकरणं शिवतत्त्वं तदेव जगत्कारणं ब्रह्मेत्युच्यते। आनन्दादीनामत्रैव धर्माणां पर्यवसानं भवति। सर्वज्ञत्वं, नित्यतृप्तत्वमनादिबोधत्वं, स्वतन्त्रत्वमलुप्तशक्तिकत्त्वम-नन्तशक्तिमत्त्वं चेत्येतानि सर्वज्ञतादीनि। नित्यापरोक्षानपेक्षितबाह्यकरणनिष्कलङ्कानुभव-विषयनिखिलवस्तुत्वमिह सर्वज्ञत्वम्। 'यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तप' इत्यादिभिरिदं ब्रह्मणस्सिद्धम्। अनेन सकलचेतनबहुविधकर्मफलभोगानुकूलतत्तच्छरीरनिर्माणोपायसामग्रीविशेषज्ञं ब्रह्म निमित्तं भवति। निरस्तसमस्तोपप्लवकलङ्कनिरतिशयानन्दपरिपूर्णत्वमिह नित्यतृप्तत्वम्। अत एव आनन्दो ब्रह्मेति श्रूयते। यः खलु 'अन्योऽन्तर आत्माऽनन्दमय' इति प्रस्तुत्य 'सैषाऽनन्दस्य मीमांसा भवति' इत्यारभ्य अभ्यासान्निरतिशयानन्दशिरस्कत्वेन 'स एको ब्रह्मण आनन्द' इति

तद्विषयाणामेव कारणवाक्यानां यथाश्रुतार्थपरत्वस्य न्याय्यत्वाऽवधारणात्। जन्मादिकारणत्वोपपादकगुणजातस्य तत्र क्लृप्ततया तदाक्षेपाऽनपेक्षणेन बुद्धिलाघवाज्जन्मादिकारणत्वादिप्रवृत्तिनिमित्तकनामाष्टकसंवादाच्चेत्याशयेन सर्वज्ञत्वादिविशिष्टमष्टाभिधानाधिकरणमिति विशेषणद्वयमुपन्यस्तम्। शिवशब्दप्रवृत्तिनिमित्तपर्यालोचनया-प्युक्तार्थसिद्धिमभिप्रेत्य तेन विशेष्यनिर्देशः कृतः। शिव एव तत्त्वं शिवतत्त्वम्। तत्त्वशब्देनाऽत्र कालत्रयवर्ति शाश्वतं वस्तूच्यते। अत एव **ब्रह्म वेदा ब्रह्म तपो ब्रह्मज्ञानं च शाश्वतमि**ति प्राचीननानार्थकोशसङ्ग्राहके, **वेदस्तत्त्वं तपो ब्रह्मे**ति अमरकोशे शाश्वतज्ञानशब्दस्थाने तत्त्वशब्दप्रयोगः। एवं चाऽत्र तत्त्वशब्दप्रयोगेण शिवस्य **न सन्न चाऽसच्छिव एव केवल** इति मन्त्रोक्तसर्गाऽऽद्यकालावस्थायित्वप्रदर्शनेन कारणवाक्यान्तरेभ्यः प्रबलेन तेनाऽपि जगत्कारणत्वस्य शिवैकान्त्यसिद्धिरिति सूच्यते। एवं षडङ्गनामाष्टकशिवशब्दप्रवृत्तिनिमित्त यदा तमो मन्त्रप्राबल्यपर्यालोचनया सच्चिदानन्दरूपताऽपि छागपशुन्यायेन शिव एवाऽवतरतीत्याह - **आनन्दादीनामि**ति - एवं यत्सर्वज्ञत्वादिविशिष्टमित्यादिना संक्षिप्तमर्थजातं प्रपञ्चेनोपपादयति - **सर्वज्ञत्वमि**त्यादिना, **अत आनन्दादीनां कैवल्यादिचिन्ता निरर्थिके**त्यन्तेन ग्रन्थसन्दर्भेण। तत्र सर्वज्ञत्वादिषट्कं प्राणिनिकायस्य तत्तदनुष्ठितकर्मज्ञानानुसारेण वैषम्यनैर्घृण्ये विनाऽनादिकालप्रवृत्तपञ्चकृत्यकर्तृतायामुपयुज्यते। यः खलु सृज्य, पालनीय, संहार्य, तिरोभावनीयानुग्राह्यजातमशेषविशेषसंहितमनादिसिद्धेन बोधेन सदा प्रत्यक्षमनुभवति तदनुकूलाऽनाद्यसङ्ख्येयशक्तिशाली च भवति, सर्वं च प्रपञ्चमधितिष्ठति, स्वयं निरतिशयानन्दनित्यतृप्ततया स्वतः सिद्धतत्त्वावबोधोपहतभक्ताऽभक्तविषयरागद्वेषोन्मेषतया च स्वार्थपरार्थप्रयुक्तसृष्ट्यादिवैषम्यनैर्घृण्यरहितश्च भवति, स एवाऽस्य प्रपञ्चस्योक्तविधया पञ्चकृत्यानि कर्तुं शक्नोति। अलुप्तशक्तिकत्वमनन्तशक्तिमत्त्वञ्च प्रपञ्चोपादानभावेप्युपयुज्येते। भाष्ये सर्वज्ञतादिषु कस्यचित्क्वचिदुपयोगवर्णनं यथार्हमन्यत्राप्युपयोगस्योपलक्षणम्। एवं नामाष्टके शिवशब्दे च यथासम्भवं जन्मादिकारणत्वतदुपपादकप्रवृत्तिनिमित्तके भाष्यकृतां कस्यचिद्व्युत्पत्त्या प्रवृत्तिनिमित्तप्रदर्शनं व्युत्पत्त्यन्तरेण सम्भवतां प्रवृत्तिनिमित्तान्तराणामप्युपलक्षणम्। **प्रस्तुत्ये**ति - **अन्योन्तर आत्माऽनन्दमयः। तस्य प्रियमेव शिरः** इत्यादिप्रियमोदाद्यात्मकसुखविशेषरूपशिरः पक्षाद्यवयवयुक्तत्वेनानन्दमयं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

निरूपितः, परब्रह्मधर्मत्वेन च स एव आनन्दो ब्रह्मेति प्रचुरत्वात् ब्रह्मत्वेनोपचर्यते। तादृशानन्द-भोगरसिकं ब्रह्म नित्यतृप्तमित्युच्यते। ब्रह्मणो मनसैव महानन्दानुभवो न बाह्यकरणद्वारा। तथा हि श्रुतिः 'आकाशशरीरं ब्रह्म, सत्यात्मप्राणारामं मन आनन्दम्। शान्ति समृद्धममृतम्' इति। आकाशत इत्याकाशः, प्रकाशश्चिदम्बरमुच्यते न भूताकाशः, विशेषाभावात्। निखिलजगदण्ड-षण्डबुद्बुदनिकुरुम्बजलधिस्थानीया परप्रकृतिरूपा परमशक्तिर्हि चिदम्बरमुच्यते। तत्स्वरूपं ब्रह्म आकाशशरीरम्। परप्रकृतित्वं चिदाकाशस्य 'सर्वाणि ह वा इमानि भूतानि आकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्ति आकाशो ह वै नाम नामरूपयोर्निर्वहिता' इत्यादिश्रुतिसिद्धम्। सत्यात्मसत्तारूपं, प्राणारामं प्राणः सकलाधारभूता चिदम्बरशक्तिरुच्यते। स्वरूपभूतायां तस्यामारामो यस्य तत् प्राणारामम् मन आनन्दं मनस्येवाऽनन्दो यस्य न बाह्यकरणे तन्मन आनन्दम्। अत्राप्यानन्द

प्रस्तुत्येत्यर्थः। तेन सैन्धवखिल्ये लवणरसविरोधिनो रसान्तरस्येवाऽनन्दमये प्रमोदादिरूपसर्वावयवयुक्ते सुखविरोधिनो दुःखस्याऽनुप्रवेशो नास्तीत्याद्यविशेषणार्थसद्भावः सूचितः। निरतिशयशिरस्कत्वे नाभ्यासादित्यनेन द्वितीयविशेषणार्थो दर्शितः। ब्रह्मण आनन्द इति श्रुतिभागोदाहरणेन आनन्दस्य ब्रह्मधर्मत्वं दर्शितम्।

ननु, ब्रह्मधर्मस्तथाभूतानन्दः कथमिह वाक्ये ब्रह्मेति व्यपदिश्यत इत्याशङ्क्य **तद्गुणसारत्वादिति** वक्ष्यमाणन्यायेनाऽभेदोपचारादित्याह - **प्रचुरत्वाद्ब्रह्मत्वेनोपचर्यत** इति।

सर्वज्ञत्वनिरुक्तावनपेक्षितबाह्यकरणेति करणे बाह्यत्वविशेषणेन सूचितं ब्रह्मणो मनःसद्भावमिहाऽनन्दा-नुभवोपयोगितया निरूपयति - **मनसैवेति**। **न बाह्येति**। स्रक्चन्दनादिविषयसुखानुभववद्बाह्यकरणं परम्परयाऽपि नाऽपेक्ष्यत इत्यर्थः।

नन्वाकाशशब्दः प्रसिद्धप्राचुर्याद्भूताकाशपरः स्यादित्याशङ्क्याह - **विशेषाभावादिति**। सर्वप्रपञ्च-शरीरकस्य भूताकाशशरीरप्रतिपादनमात्रेण न कश्चिदतिशयो वर्णितो भवतीत्यर्थः। प्रसिद्धभूताकाशरूपाम्बर-व्यतिरेकेण किमिदं चिदम्बरं नामेत्याकाङ्क्षायामाह - **निखिलेति**। सकलप्रपञ्चपरिणामिनी परमेश्वरस्य चिच्छक्तिश्चिदम्बरमुच्यत इत्यर्थः। **तत्स्वरूपमिति** - स एवाऽकाशः स्वरूपं घटस्य घटत्ववत्स्वरूप-निरूपकधर्मोऽस्येति बहुव्रीहिः। चिच्छक्तिः परमेश्वरस्य जगद्व्यापारे छेदने कुठारवत्करणभूतैव केवलम्, न तु प्रपञ्चप्रकृतिरिति केचिदाहुः। तन्निरासार्थमाह - **परप्रकृतित्वमिति**।

यस्य सा परमा देवी शक्तिराकाशसंज्ञिता।
अनन्तैश्वर्ययोगात्मा महेशो दृश्यते हि सः।।

इति कौर्मवचने चिच्छक्तेराकाशसंज्ञास्तित्ववर्णनादुदाहृतश्रुत्योराकाशशब्दश्चिच्छक्तिपर इति भावः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इति चिदम्बरप्रकृतिरुच्यते। तथा च श्रूयते 'को ह्येवाऽन्यात्? कः प्राण्यात्? यदेष आकाश आनन्दो न स्यात्' इति। शान्तिसमृद्धं शिवतासंपन्नममृतमनादिमुक्तम्। अत्र सच्चिदानन्दरूपपरमाकाशरूपं ब्रह्मस्वरूपानन्दं मनसैवानुभवति बाह्यकरणनिरपेक्षमिति सिद्धम्। मन आनन्दमित्यनेन इदमेव ज्ञापकं ब्रह्मभावमापन्नानां निरतिशयस्वरूपानन्दानुभवसाधनं बाह्यकरणनिरपेक्षमन्तःकरणमस्तीति। अतोऽनादिबोधं ब्रह्म संसारनिवर्तकस्य ज्ञानस्याऽनादिसिद्धत्वात् नित्यनिवृत्तसंसारदोषं शान्तिसमृद्धममृतमिति श्रूयते। अन्यप्रेष्यताकार्पण्यरहितत्वेन स्ववशीकृतस्वेतरसकलवस्तुत्वं स्वातन्त्र्यम्। 'ज्ञाज्ञौ द्वावजावीशानीशौ', 'भोक्ता भोग्यं प्रेरितारं च मत्वा', 'विद्याविद्ये ईशते यस्तु सोऽन्य' इत्यादिषु ब्रह्मणो जडाजडप्रपञ्चप्रेरकत्वेन स्वतन्त्रत्वं सिद्धम्। सर्वविषयस्वातन्त्र्येण ब्रह्मणस्सर्वकर्तृत्वसिद्धिः। स्वाभाविकशक्तिमत्त्वमलुप्तशक्तिमत्त्वम्। तथा हि श्रवणं 'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' इत्यादि। चिदचित्प्रपञ्चरूपशक्तिविशिष्टत्वं स्वाभाविकमेव ब्रह्मणः कदाचिदपि न निर्विशेषत्वमित्यनेन सिद्धम्। अपरिच्छिन्नशक्तिविशिष्टत्वमनन्तशक्तिमत्त्वम्। अनन्ताभिरेव शक्तिभिर्जगतो जनकं शासकं ब्रह्म भवति। तथाहि श्रूयते, 'एक एव रुद्रो न द्वितीयाय तस्थुस्तुरीयमिमं लोकमीशत ईशनीयुर्जननीयुर्यः सर्वान् लोकानीशत

को ह्येवान्यादिति। अननं प्राणवायुव्यापारः। प्राणनं चक्षुरादिव्यापारः। आकाशशरीरमिति श्रुतिव्याख्यानं प्रकृते संगमयति - **अत्रेति**। प्रसङ्गात् **मन आनन्दमिति** लिङ्गानुगतं मुक्तानां मनस्सद्भावं दर्शयति - **इदमेवेति**। मुक्तेर्ब्रह्मसाम्यरूपत्वात् ब्रह्मणो मन स्यानन्दानुभवो मुक्तानामपि तथाभावे लिङ्गमिति भावः।

भट्टभास्करेणाऽपि यजुर्वेदारण्यकभाष्ये **मन आनन्दमिति** वाक्यमित्थमेव व्याख्यायोक्तम् - **इदमेव लिङ्गं मुक्तानामीश्वरस्य च मनोविशेषोऽस्तीत्यत्रेति**। **'संकल्पादेव तु तच्छ्रुतेरि'**तिसूत्रेणाप्ययमेवाऽर्थोऽवधारितः। मुक्तात्मनां मनसोऽभावे सङ्कल्पस्यैवाऽसिद्धेः। एतेन लिङ्गशरीरभङ्गमेव मोक्षमाचक्षाणाः परे पराहताः। अनादिबोधस्य परार्थप्रवृत्तसृष्टिवैषम्यापादकरागादिदोषाभावसिद्धावुपयोगमाह - **अतोऽनादिबोधमिति**। **'ज्ञाज्ञौ द्वावि'**ति, **'भोक्ता भोग्यमि'**ति, **'विद्याऽविद्ये'** इति च श्वेताश्वतरोपनिषदि पशुपाशपतिनिर्णायकानामेकैकः पादः। ज्ञाज्ञौ सर्वज्ञकिञ्चिज्ज्ञौ, द्वाऽवजौ सनातनौ, ईशाऽनीशौ नियन्तृनियम्यौ, भोक्ता भोज्यं पशुः पाशश्चेति द्वयं तयोः प्रेरकं परमेश्वरं च मत्वा ब्रह्मभावमेतीत्युत्तरत्राऽन्वयः। यस्तु, विद्याऽविद्ये पशुपाशौ, ईशते ईष्टे, स ताभ्यामन्यः। **इत्यादिष्विति** - आदिशब्देन **'क्षरं प्रधानममृताक्षरं हरः। क्षरात्मानावीशते देव एकः।', 'वशी सर्वस्य लोकस्य स्थावरस्य चरस्य च।', 'प्रधानक्षेत्रज्ञपतिर्गुणेशः।'** इत्यादिमन्त्रसंग्रहः। **एक एव रुद्र इति**। एक एव रुद्रः। द्वितीयाय द्वितीयस्तत्सदृशः। प्रातिपदिकार्थे छान्दसश्चतुर्थीप्रयोगः। न तस्थुः न तस्थौ। छान्दसं बहुवचनम्। इमं लोकं शुद्धमिश्राऽशुद्धाऽध्वरूपं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ईशनीभिर्जननीभिः परमशक्तिभि' इत्यादि। अनन्तशक्तिमत्त्वाद्ब्रह्मणोऽपरिच्छिन्नप्रपञ्चसमवायि-कारणत्वं सिद्ध्यति।

अष्टाभिधानाधिकरणमिति, भवशर्वेशानपशुपतिरुद्रोग्रभीममहादेवाऽभिधानाष्टकस्याधिकरणं वाच्यं परं ब्रह्म। तस्य सकलशब्दवाच्यत्वेऽपि परभावबोधकत्वेन मुख्यतया भवादिशब्दाभिधेयत्वेन, नाऽन्यशब्दाऽभिधेयत्वाऽभावप्रसङ्गः।

सर्वत्र सदा भवतीति भवशब्दवाच्यं ब्रह्म। भूधातोस्सत्तार्थत्वात् सर्वत्रानुवर्तमानं सद्रूपं ब्रह्मेति विज्ञायते। तथाहि श्रुतिः, 'सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम्', 'सत्यं ज्ञानमनन्तं ब्रह्म', 'सत्यात्मप्राणारामं मन आनन्दम्', 'सन्मह' इत्यादि। सन् घटः, सन् पटः इति सर्ववस्तुष्वनुगतवृत्त्यासद्रूपस्य ब्रह्मणस्सर्वोपादानत्वं सिद्ध्यति। मृदुपरक्तं हि घटादिकं मृदुपादानमिष्यते। ततस्सद्रूपं ब्रह्मभवशब्दवाच्यं भवति।

शर्वशब्देन शॄ हिंसायामिति धात्वर्थवशात् सकलसंहर्तृ ब्रह्म प्रतिपाद्यते। 'तस्मादुपसंहर्त्रे महाग्रासाय वै नमः।', 'यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः' इति सर्वहर्तृ ब्रह्म श्रूयते।

लोकत्रयम्। तुरीयमुक्तलोकापेक्षया चतुर्थम्। ईशते ईष्टे। ईशनीयुः ईशनानुकूलेच्छाशक्तिमान्। जननीयुः जननानुकूलेच्छाशक्तिमान्। ईशनमैश्वर्यम्। जननं जनयितृत्वम्। ईशनीभिः ईशनकारिणीभिः। जननीभिः जननकारिणीभिः। पूर्वोदाहृतश्रुतावीशनजननानुकूलेच्छाशक्तिमत्त्वमुक्तम्। इह तदनुकूलक्रियाशक्तिमत्त्वमिति भेदः। नन्वष्टाभिधानाधिकरणमिति किमुच्यते। सन्ति हि शम्भुशङ्करादीन्यन्यान्यपि शिवस्य नामानि। किं बहुना। **'इमा रुद्राय स्थिरधन्वने गिर'** इति श्रुतिः प्रत्यक्षादिसन्निधापितसकलशब्दवाच्यत्वं शिवस्य प्रतिपादयति। आश्वलायनोपि शिवं प्रस्तुत्याह **'सर्वाणि ह वा एतस्य नामधेयानी'**ति। तस्मादिदमनुपपन्नमि-त्याशङ्क्याह - **सकलशब्देति। परभावबोधकत्वेने**ति। विशिष्य जन्मादिकारणत्वतदुपपादकगुणबोधकत्वेनेत्यर्थः। इदमुपलक्षणं भवादिनामाष्टकस्य। आपस्तम्बीयानां मन्त्रेष्वाम्नानेन आपस्तम्बसूत्रे ईशानबलौ, बोधायना-श्वलायनसूत्रयोः शूलगवहोमे, बोधायनसूत्रे महादेवस्य प्रतिष्ठाविधौ नित्यपूजाविधौ होमतर्पणार्चनेषु विनियोगवर्णनेन च मुख्यत्वं द्रष्टव्यम्।

भवशब्दस्तावद्भूधातोरसधातोर्वा पचाद्यच्प्रत्ययान्त इत्युभयथाऽपि सत्तार्थकत्वाविशेषात्तस्याऽस्तिधातोः शत्रन्तस्य सच्छब्दस्य चैकार्थ्यमस्तीति भावः। न केवलं सच्छब्दभवशब्दयोः शक्तिपर्यालोचनयैकार्थ्यम्। किन्तु **'सदेव सौम्येदमग्र आसीदि'**ति वाक्यश्रुतसच्छब्दस्य **'पुरुषो वै रुद्रः सन्मह'** इति श्रुत्यन्तरे शिवपर्यवसायित्वस्य कण्ठतः प्रदर्शितत्वादपि शिवनाम्नो भवशब्दस्य तदैकार्थ्यमित्यभिप्रायेण सन्मह इति श्रुत्युदाहरणम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

निरुपाधिकपरमैश्वर्यविशिष्टत्वादीशानशब्दवाच्यं ब्रह्म। 'य इमान् लोकानीशत ईशनीभिः' इति श्रवणात्।

ईश्वरस्येशितव्यापेक्षतया पशुपतिशब्दवाच्यं ब्रह्म। तथा हि श्रूयते, 'येषामीशे पशुपतिः पशूनां चतुष्पदामुत च द्विपदाम्' इत्यादि। पाशसंबन्धेन पशुत्वव्यवहारात् पशुग्रहणात् पशुपाशद्वयं च गृहीतं भवति। अनेन चिदचिन्नियामकं ब्रह्मेति विज्ञायते।

संसाररुग्द्रावकत्वाद्रुद्रशब्दवाच्यं ब्रह्म। 'तरति शोकमात्मविदि' ति श्रवणात्।

परतेजोभिरनभिभवनीयत्वादुग्रशब्दवाच्यत्वं ब्रह्मणः। 'न तत्र सूर्यो भाति न चन्द्रतारकम्' इति श्रवणात्।

ईशानशब्दवाच्यमिति। ईशानशब्दः **'ताच्छील्यवयोवचनशक्तिषु चानश्'** इति सूत्रविहित-चानश्प्रत्ययान्तः। स्वाभाविकमसङ्कुचितं शिवस्यैश्वर्यमाचष्ट इति भावः।

तदैश्वर्यस्य सकलचेतनाचेतनविषयत्वं पशुपतिनाम्नाऽपि सिद्ध्यतीत्याह - **ईश्वरस्येति।**

ननु, तेन पशुशब्दोक्तचेतनविषयत्वमैश्वर्यस्य सिद्ध्यति न त्वचेतनविषयत्वमपीत्याशङ्क्याह - **पशुग्रहणादिति।**

ब्रह्माद्याः स्थावरान्ताश्च देवदेवस्य शूलिनः।
पशवः परिकीर्त्यन्ते संसारवशवर्तिनः।।

तेषां पतित्वाद्देवेशः शिवः पशुपतिः स्मृतः।
मलमायादिभिः पाशैः स बध्नाति पशून् पतिः।।

स एव मोचकस्तेषां भक्त्या सम्यगुपासितः।
चतुर्विंशतितत्त्वानि मायाकर्मगुणा अमी।।

विषया इति कथ्यन्ते पाशा जीवनिबन्धनाः।
ब्रह्मादिस्तम्बपर्यन्तान्पशून्बध्वा महेश्वरः।।

पाशैरेतैः पतिर्देवः कार्यं कारयति स्वकम्।।

इति हि पुराणेषु श्रूयते। अनेनैतत्सिद्धं भवति। पशुपतिनामान्तर्गतः पशुशब्दो न गवाश्वादिप्रसिद्धपशुवाची। नाऽपि **'प्रमथेपि पशुः पुमानि'**ति निघण्ट्वनुसारेण प्रमथवाची, किन्तु ब्रह्मादिस्थावरान्तसकलचेतनवाची। **'एषामीश'** इति मन्त्रे द्विपाच्चतुष्पाद्ग्रहणमपि सकलचेतनोपलक्षणम्। तद्वाचित्वं च न शक्त्या, किन्तु

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

नियामकत्वेन निखिलचेतनभयहेतुतया भीमशब्दाऽभिधेयं ब्रह्म। 'भीषाऽस्माद्वातः पवत' इत्यादिश्रुतेः।

महत्त्वेन दीव्यमानतया महादेव इत्युच्यते शिवः। तथाऽथर्वशिरसि, 'अथ कस्मादुच्यते महादेवः? यस्सर्वान् भावान् परित्यज्यात्मज्ञानयोगैश्वर्ये महति महीयते तस्मादुच्यते महादेव' इति।

निरस्तसमस्तसंसारकलङ्कतया निखिलमङ्गलाधारतया शिवतत्त्वं यदवगम्यते तदुक्तस्वभावतया सकलजगज्जन्मादिकारणं भवति। तत्र तादृशमहिम्नि जगदुभयकारणत्वसंभवात् तदेतादृशमहिमत्वात् ब्रह्मेत्युच्यते।

गवाश्वमहिषादयस्तत्स्वामिभिः पाशैराबध्य स्ववशीकृत्य वाहनदोहनादिकर्मस्विव सर्वेऽपि चेतनाः शिवेन मलमायादिभिः पाशैराबध्य स्ववशीकृत्य स्वाराधकरूपतया यथाकथञ्चित्स्वाराधनोपयोगितया वा स्वकीयेषु तत्तद्वस्तुसामर्थ्याऽधीनेषु कार्येषु विनियुज्यन्त इत्यनेन सादृश्येन गौण्या वृत्त्येति। एवं च पश्वधिष्ठानं पाशाधिष्ठानाधीनमिति तदुक्त्यैव पाशाधिष्ठानमप्यर्थतो लभ्यत इति भावः।

रुजं द्रावयतीत्यस्मिन्नर्थे रुद्रशब्दः।

रुग्दुःखं दुःखहेतुर्वा, तद्द्रावयति नः प्रभुः।
रुद्र इत्युच्यते तस्माच्छिवः परमकारणम्।।

इति पौराणिकैर्व्युत्पादितः; पृषोदरादिः।

शाम्यन्त्यस्मिन्दोषा इत्यर्थे **'सर्वनीघृष्वरिष्वलष्वशिवपद्वप्रह्वेष्वा'** इत्यौणादिसूत्रे शमिधातोर्वन्प्रत्ययेन इत्वमलोपाभ्यां च शिवशब्दो निपातितः। समस्तसांसारिकदोषराहित्यवाची। निखिलानि शिवशब्दवाच्यानि माङ्गल्यान्यस्य सन्तीति मत्वर्थीयोऽच्प्रत्ययान्तः शिवशब्दः सकलमङ्गलगुणवत्त्ववाची। **तदुक्तस्वभावतयेति।** तत्प्रकृतं शिवतत्त्वं जगत्कारणत्वोपपादकसर्वज्ञत्वसर्वशक्तिकत्वादिगुणस्वभावतया सृष्टिवैषम्यनैर्घृण्यापादकदोष-रहितस्वभावतया च जगदुभयकारणं भवितुमर्हतीति कृत्वा परस्परविरुद्धानेककारणवाक्यसमवायेऽपि तदेव जगज्जन्मादिकारणमङ्गीकर्तुं युक्तमित्यर्थः।

तदिति - तच्छिवतत्त्वमेतादृशमहत्वात्सर्वज्ञत्वादिकमङ्गषट्कमष्टाभिधानप्रवृत्तिनिमित्तजातमित्येवं-प्रकारान्महत्वात्कारणत्वाक्षेपकलिङ्गात् जगज्जन्मादिकारणत्वरूपब्रह्मलक्षणयोरिति तदेव **'ब्रह्मविदाप्नोति परमि'**त्यादिश्रुतिषु ब्रह्मेत्युच्यत इत्यर्थः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अत्र पूर्वपक्षे **यदा तमस्तदि**ति मन्त्रोदाहरणात्, सिद्धान्ते शिवतत्त्वमिति तत्रत्यशिवशब्देन व्यवहारात्तत्त्वशब्देन तदुक्ततमोमात्रावशिष्टकालविशेषावस्थायित्वप्रतिपादनादेतादृशशब्देनैवंप्रकारवाचिना **'तदक्षरं तत्सवितुर्वरेण्यं प्रज्ञा च तस्मात्प्रसृता पुराणी'** इति तदुत्तरार्थप्रतिपादिताक्षरशब्दप्रवृत्तिनिमित्तसवितृवरेण्यवत्त्वबहुभवनसङ्कल्परूपजगत्कारणत्वाक्षेपकलिङ्गान्तरसङ्ग्रहाच्च सर्वज्ञत्वादिषट्काष्ठाभिधानप्रवृत्तिनिमित्तसद्भावरूपस्य सर्वकारणवाक्यानां शिवे पर्यवसानोपपादकस्य न्यायजातस्याऽनुग्राह्यं प्रमाणं सर्वेषां कारणवाक्यानां शिवे पर्यवसानमाहत्य प्रतिपादयितुमेव प्रवृत्तो **'यदा तमो'** मन्त्र इति सूचितं भवति।

तदयं भाष्यसूचितोऽर्थः स्पष्टीक्रियते। **'यदा तम'** इति पूर्वार्थेन तमोवशेषाङ्कितं कालमनूद्य तत्कालवर्ती शिव इति विधीयते। तेन **'तमो वा इदमेकमास तत्परेणेरितं विषमत्वं प्रयाति। प्रजापतिर्वा इदमेक आसीत्। नाहरासीन्न रात्रिरासीत्। सोऽस्मिन्नन्धे तमसि प्रासर्पत्। नाऽसदासीन्नो सदासीत्तदानीं तम आसीत् तमसा गूढमग्रे प्रकेतः।'** इत्यादिषु तत्पुरोवादेषु तथा भूतकालविशेषावस्थायिकारणवस्तुसमर्पकाणां परप्रजापत्यादिशब्दानां शिवे पर्यवसानं दर्शितं भवति। तृतीयपादेन मुण्डकादिश्रुतकारणवाक्येषु कारणवस्तुसमर्पकाणामक्षरादिपदानामादित्यमण्डलवर्तिनि पुरुषे कारणत्वाक्षेपकलिङ्गं सर्वान्तर्यामित्वमुपवर्णयन्त्या गायत्र्याश्च तस्मिन्पर्यवसानं दर्शितम्। चतुर्थपादेन **'तदैक्षत बहु स्यां प्रजायेये'**ति, **'स ईक्षत लोकान्नु सृजा'** इति, **'सोऽकामयत बहु स्यां प्रजायेये'**ति, **'तपसा चीयते ब्रह्मे'**ति च स्रष्टुरादिसृष्टिपूर्वकालीनं स्रष्टव्यवस्तुजातालोचनं प्रतिपादयतां छान्दोग्यादिश्रुतकारणवाक्यानां तत्र पर्यवसानं दर्शितम्।

एवं सर्वेषां कारणवाक्यानां शिवे पर्यवसानं प्रतिपादयितुं प्रवृत्तेनाऽनेन मन्त्रेण शिव एव जगत्कारणं ब्रह्मेत्यवसीयते। एतेन **'यदा तम'** इति मन्त्रो न स्वयं कारणस्य तमसः प्रापकः। यदेति कालविशेषप्राप्तानुवादात्। प्राप्तिश्च **'अव्यक्तमक्षरे लीयते। अक्षरं तमसि लीयते। तमः परे देव एकीभवती'**ति सुबालोपनिषद्वाक्येन। तत्र च परशब्दो नारायणपरः। **'एष आत्माऽपहतपाप्मा, दिव्यो देव एको नारायण'** इति तत्र श्रवणात्। ततश्च नारायणाधिष्ठितस्य तमसः प्रापकं श्रुत्यन्तरमिह पुरोवाद इति तदनुरोधादनुवादमन्त्रश्रुततमोधिष्ठातृपरः शिवशब्दो नारायण एव वर्तयितव्य इति निरस्तम्। भवत्येव **'यदा तम'** इत्यनुवादः। न तु सौबालवाक्यमेव पुरोवादः। अन्येषामप्यनूद्यमानार्थप्रापकवाक्यानां सत्त्वात्। नाप्यस्मिन्मन्त्रे **'तन्न दिवे'**त्यादिरनुवादः। तद्वृत्तयोगेन तत्काले कस्यचिद्विधेयताप्रतीतेः। विधेयश्च तत्र न दिवानिशाविभागाऽभावः, सदसदात्मकप्रपञ्चाभावो वा। **'नाऽहरासीन्न रात्रिरासीदि'**ति, **'नासदासीन्नो सदासीदि'**ति च पुरोवादत एव तयोः प्राप्तेः। न हि किंचिदनूद्य किंचिद्विधातुं प्रवृत्तं वाक्यमनुवादायाऽवश्यमपेक्षितात्पुरोवादादेव प्राप्तेऽर्थे पर्यवस्यत्साफल्यमश्नुवीत। अतस्तत्रापि न दिवेत्यादिरनुवादः। एवं च शिवशब्दोऽपि यदि कथंचिदौत्सर्गिकार्थपरतां हित्वा पुरोवादविशेषप्राप्ते नारायणे पर्यवस्येत्, तदा **यदा तमस्तदि**ति किञ्चिद्विधातुमुद्यम्याऽर्थपथे स्थितं वाक्यं किं विधेयमासाद्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विश्राम्यतु। न हि तस्य नारायणवृत्तित्वे पुरोवादादप्राप्तं कंचिद्विधानार्हं तदर्थं पश्यामः। तस्मात्परमते वाक्यमेव तावद्वैयर्थ्यं प्राप्नुयात्। अतस्तत्तत्पुरोवादश्रुततमोधिष्ठातृपरब्रह्मप्रजापतिनारायणादिसकलशब्दार्थ-निर्धारणेदंपरैतद्विधिबलात्सौबालश्रुत्याम्नातस्य नारायणनाम्न एव शिवे पर्यवसानं स्यात्। न तु वैपरीत्यम्।

ननु शिवशब्दस्य नारायणे क्षेमङ्करत्वादियोगेन वृत्तिः सम्भवति। **पन्थानः सन्तु ते शिवाः।, पावकोऽस्मभ्यं शिवो भव**त्यादिलौकिकवैदिकव्यवहारेष्वन्यत्रापि तस्य योगेन प्रयोगदर्शनात्। नारायणशब्दस्य तु नारमयनमस्येत्यादियोगेन शिवे वृत्तिर्न सम्भवति। केवलयोगे णत्वाऽसिद्धेः। **पूर्वपदात्संज्ञायामग** इति पाणिनिसूत्रतः संज्ञाशब्दतयैव तत्र णत्वस्योपपादनीयत्वात्। तस्य शिवनामत्वाभावेन तत्र तत्संज्ञाशब्दत्वेन णत्वस्योपपादयितुमशक्यत्वादितिचेत्। यदि तस्य शिवनामत्वं नास्ति तदा विष्णुनाम्न एव तस्य भावितदवस्थोपलक्षिते सर्गाद्यसमयवर्तिनि शिवे लक्षणया वृत्तिः स्यात्। घटं करोतीति वाक्य इव घटशब्दस्य भाविघटावस्थोपलक्षिते मृत्पिण्डे। न तु तस्य शिवे योगो न सम्भवतीत्येतावता शिवशब्दस्य नारायणपरत्वं स्यात्। मन्त्रवाक्य-वैयर्थ्यापत्तेरुक्तत्वात्। योगाद्रूढिपूर्वकलक्षणाया एवाऽभ्यर्हितत्वाच्च। यदि तु **'सर्वाणि ह वा एतस्य नामधेयानी'**त्याश्वलायनस्मरणात्,

नामानि तव गोविन्द! यानि लोके महन्ति च।
तान्येव मम नामानि नात्र कार्या विचारणा।।

इति हरिवंशे शिववचनेन विष्णुनाम्नामन्येषां च प्रकृष्टप्रवृत्तिनिमित्तानां नाम्नां **'घनसारश्चन्द्रसंज्ञ'** इति वचनेन चन्द्रनाम्नां कर्पूरनामत्ववत् शिवनामत्वस्य विधानात्, कूर्मपुराणे -

वशित्वादप्यवश्यत्वादीश्वरः परिभाषितः।
ऋषिः सर्वगतत्वेन हरिः सर्वगणैर्युतः।।

अनुत्पादाच्च पूर्वत्वात्स्वयम्भूरिति स स्मृतः।
नारा अप्ययनं यस्मात्तेन नारायणः स्मृतः।।

हरः संसारहरणाद्विभुत्वाद्विष्णुरुच्यते।
भगवान् सर्वविज्ञानादवनादोमिति स्मृतः।।

सर्वज्ञः सर्वविज्ञानात्सर्वः सर्वमयो यतः।
शिवः स निर्मलो यस्माद्विभुः सर्वगतो यतः।।

इति साक्षादेव नारायणशब्दस्य शिवनामसु निर्वचनाच्च तन्नामत्वमपीष्यते, तदा न कश्चिच्छङ्कावकाशः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तदेव शिवशब्दवाच्यमानन्दादिधर्माश्रयतया सिद्धम्। अत आनन्दादीनां विकल्पादिचिन्ता निरर्थिका।

न च, नारायणशब्दस्य विष्ण्वैकान्तिकत्वमस्ति -

एकार्णवे तदा तस्मिन्नष्टे स्थावरजङ्गमे।
तदा समभवद्ब्रह्मा सहस्राक्षः सहस्रपात्।।

सहस्रशीर्षा पुरुषो रुक्मवर्णो ह्यतीन्द्रियः।
ब्रह्मा नारायणाख्यस्तु सुष्वाप सलिले तदा।।

इमं चोदाहरन्त्यत्र श्लोकं नारायणं प्रति।
ब्रह्मस्वरूपिणं देवं जगतः प्रभवाप्ययम्।।

आपो नारा इति प्रोक्ता आपो वै नरसूनवः।
अयनं तस्य ता यस्मात्तेन नारायणः स्मृतः।।

इति कूर्मपुराणे विरिञ्चिनामत्वेनाऽपि तन्निर्वचनदर्शनात्। तस्मात् **'यदा तम'** इति मन्त्रगते शिवपदे विष्णुविषयत्वशङ्काऽनवकाशात्सर्वेषां कारणवाक्यानां शिवे पर्यवसानं प्रतिपादयन् मन्त्रोऽयमिहाऽनुग्राह्यप्रमाणत्वेन विवक्षित इति युक्तमेव।

एतेनेदं निरस्तम्, जगत्कारणं वस्तु **'सदेव सोम्येदमग्र आसीदि'**त्यादिकारणवाक्येषु सद्ब्रह्मात्मशब्दैरुत्तरोत्तरं विशेषपर्यवसायिभिः सद्रूपं बृहच्चेतनं चेत्येतावत्पर्यन्तबुद्धिगृहीतम् **'एको ह वै नारायण आसीदि'**त्यादिष्वनितरसाधारणेन नारायणशब्देन निर्देशाच्छागपशुन्यायेन नारायण एवेति निश्चीयत इति। सर्वेषां कारणवाक्यानां शिवे पर्यवसानं साक्षादेव प्रतिपादयति मन्त्रे। अस्मदादीनामिव पूर्वमृषीणां सञ्जातं जगत्कारणं ब्रह्म किं देवतात्मकमिति संशयं प्रदर्श्य स्वयं निर्णेतुमशक्नुवन्तस्ते ध्यानयोगप्रसादित-परमेश्वरकटाक्षमहिम्ना शिव एवेति निश्चयं लेभिर इति मन्त्रजाते जाग्रति क्षुद्रबुद्धिकल्पितन्यायसंचारेणाऽन्यत्र पर्यवसानाऽसम्भवात्। तस्मान्मन्त्रोपनिषन्मन्त्रजातबलाच्छिव एव जगत्कारणमित्येतदुपपन्नम्।

अवधारणादिबलात्सदानन्दज्ञानानां भेदानापाद्य तेषां विकल्पेन समुच्चयेन वा कारणत्वमनुपपन्नमिति यच्छङ्कितं तदप्येवंसति नावकाशं लभत इत्याह - **तदेवेति**। यत्सर्वज्ञत्वनित्यतृप्तत्वाद्याश्रयतया प्रतिपन्नं तदेव सामान्यतः सकलमङ्गलगुणवत्त्वप्रतिपादकस्य शिवशब्दस्य वाच्यमिति तस्य सामान्यतो विशेषतश्च ज्ञानानन्दादिधर्माश्रयत्वसिद्धेस्तत्र कारणवाक्यश्रुतान्यवधारणानि न शाखान्तरगतकारणवाक्यश्रुतरूपान्तर-व्यावर्तनार्थानि। किन्तु आनन्दाद्ध्येवेत्यवधारणं स्थूलारुन्धतीन्यायेन ब्रह्मणि क्रमेण पूर्वप्रतिपन्नानामन्नादिविज्ञानान्त-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

'*मायां तु प्रकृतिं विद्यात्*' इति मायायाः प्रकृतित्वमीश्वरात्मिकाया एव, '*मायिनं तु महेश्वरम्*' इति वाक्यशेषात्। सूक्ष्मचिदचिद्विशिष्टं ब्रह्म कारणं स्थूलचिदचिद्विशिष्टं तत् कार्यं भवति। अतो जगज्जन्मादिलक्षणं ब्रह्मेति सिद्धान्तः।

।। इति जन्माद्यधिकरणम् ।।

***

रूपाणां व्यावर्तकम्। सदेवेत्यवधारणमिदानीं पृथिव्यादिषु दृश्यमानस्य स्थूलरूपस्य सर्गाऽद्यसमये व्यावर्तकम्। प्रज्ञानघनवाक्यं त्वत्युज्ज्वलस्य रत्नस्याऽन्तर्बहिश्च प्रभयेव ब्रह्मणः प्रज्ञानगुणेन व्याप्तिप्रतिपादकं न कस्यापि ब्रह्मणि व्यावर्तकम्। अतो नाऽवधारणादिविरोधोपीति भावः।

मायैवोपादानमिति शङ्कां निरस्यति - **मायाया** इति। सत्यं। मायोपादानमिति ब्रह्माऽप्युपादानमेव। अपृथक्सिद्धकार्यावस्थाश्रयत्वं हि मायाया उपादानत्वं समर्थनीयम्। तत्समर्थ्यमानमेव ब्रह्मपर्यन्तमायाति। नित्ययोगे खलु मायिनमिति मायाशब्दादिनिप्रत्ययः। ततश्च मायायाः ब्रह्माऽपृथक्सिद्धत्वैव तदपृथक्सिद्धायाः कार्यावस्थाया अपि ब्रह्माऽपृथक्सिद्धिः सिद्ध्यति।

एवं च यद्यपि ब्रह्माश्रया माया वियदाद्यचेतनरूपेण परिणमति, ब्रह्माश्रया तदीयजीवाश्रया च चिच्छक्तिर्ज्ञानरूपेण, न तु ब्रह्म केनाप्याकारेण परिणमति। तथापि तथा तथा परिणममानानां मायादीनां ब्रह्मैवाऽयुतसिद्धाश्रयत्वपर्यवसानभूमिरिति ब्रह्मपर्यन्तमुपादानत्वमायातीति भावः।

ननु, यद्येवं कार्यावस्थाश्रयत्वरूपमुपादानत्वमिष्यते तदा यथा मृदो भाविघटावस्थाश्रयभूतायाः पिण्डावस्थाविशिष्टत्वेन कारणत्वेऽपि घटावस्थाविशिष्टत्वेन कार्यत्वमपि, एवं ब्रह्मणः सर्गाद्यसमये सूक्ष्मचेतनाचेतनविशिष्टत्वेन कारणत्वेऽपि स्थूलचेतनाचेतनविशिष्टत्वेन कार्यत्वमपीत्याशङ्क्याऽभ्युपगमेन परिहरति - **सूक्ष्मे**ति।

एवं व्यक्तिविशेषव्यवस्थितब्रह्मत्वनिर्धारणरूपप्रयोजनपर्यवसायित्वाज्जगज्जन्मादिब्रह्मलक्षणमित्येतदुपपन्नमित्यधिकरणार्थमुपसंहरति - **अत** इति। एवं तटस्थलक्षणव्यवस्थितौ तदुपलक्षितस्य गुणविग्रहविशेषरूपं स्वरूपलक्षणमपि व्यवतिष्ठत इति भावः।

।। इति जन्माद्यधिकरणम् ।।

***

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ शास्त्रयोनित्वाधिकरणम् ३

लक्षणप्रमाणाधीना हि वस्तुसिद्धिः। जगत्कारणं ब्रह्म किं प्रमाणकमित्यत आह -

***शास्त्रयोनित्वात्* ।।१-१-३।।**

यतः शास्त्रं योनिः प्रमाणमत एव जगज्जन्मादिलक्षणं ब्रह्म भवतीति शेषः। अत्र जगत्कारणं ब्रह्म शास्त्रैकगम्यमुत प्रमाणान्तरेणाऽपि गम्यमिति सन्देहः।

जगदिदं सावयवं कार्यमेव। तच्च वैचित्र्यगर्भितत्वेन स्वोचितकर्तृकमिति कश्चित्कल्पनीयः सर्वज्ञत्वादिमान्। नासौ शास्त्रैकगम्य इति नास्मिन् शास्त्रस्य प्रामाण्यम्। शास्त्रस्य प्रमाणान्तराऽप्राप्तिविषयत्वादिति पूर्वःपक्षः।

सिद्धान्तस्तु जगत्कारणं ब्रह्म वेदान्तशास्त्रैकगम्यम्। 'नाऽवेदविन्मनुते तं बृहन्तम्' इत्यादिषु वेदान्तशास्त्रमन्तरेण ब्रह्मणो बोधासंभवश्रवणात्।

अथ शास्त्रयोनित्वाधिकरणम्

अवतारिकामारचयति **लक्षणे**त्यादिना - जन्मादिसूत्रेण लक्षणनिरूपणानन्तरं प्रमाणस्य तत्साधकस्याऽक्षिप्तत्वादेतेनाक्षेपसङ्गतिरपि प्रदर्शिता। ब्रह्मणि प्रमाणप्रदर्शनार्थमिदमधिकरणमारभ्यत इत्यर्थः। ननु, यतो वेत्यादिश्रुतिस्तत्र प्रमाणमिति पूर्वाधिकरण एवोदाहृतत्वात्पुनः प्रमाणनिरूपणमनावश्यकमिति चेन्न। तस्य वाक्यस्याऽनुमानसिद्धजगत्कर्तृरूपार्थानुवादरूपत्वेन प्रामाण्यं न युज्यत इति पूर्वपक्षनिरसनद्वारा जगत्कारणं ब्रह्म शास्त्रप्रामाण्यादेव सिद्ध्यति न त्वनुमानप्रामाण्यादिति निर्धारयितुमस्याऽधिकरणस्य प्रवृत्तत्वात्।

सूत्रं विवृणोति - **यत** इति। शास्त्रस्य योनित्वमिति षष्ठीसमासः। शास्त्रप्रामाण्यादित्यर्थः। शास्त्रप्रामाण्यादयमर्थः सिद्ध्यति, न त्वनुमानप्रामाण्यादित्यर्थोऽत एवेत्येवकारेण दर्शितः। अत्र **'यतो वे'**त्यादिवाक्यं ब्रह्मणि प्रमाणं - न वेत्यधिकरणाङ्गसंशयं मनसि निधाय तदर्थसंशयमाह - **अत्रे**ति। तथा च यदि शास्त्रमात्रगम्यं ब्रह्म, तदा तत्र तच्छास्त्रं प्रमाणम् **'अप्राप्ते हि शास्त्रमर्थवद्'** इति न्यायात्। अथ यदि प्रमाणान्तरेणाऽपि गम्यं, तदा तन्न प्रमाणमित्येतेन **'यतो वे'**त्यादिवाक्यं ब्रह्मणि प्रमाणं न वेति संशयः सिद्ध्यतीत्यर्थः। शास्त्रस्य प्रमाणान्तराप्राप्तविषयत्वादिति प्रत्यक्षप्रमाणसिद्धार्थानुवादरूपस्य **'अग्निर्हिमस्य भेषजमि'**ति वाक्यस्येवाऽप्रामाण्यादित्यर्थः। एवं च अङ्कुरादिकं सकर्तृकं, कार्यत्वाद्घटवदित्यनुमानरूपप्रमाणान्तरप्राप्तविषयत्वाद्यतो वेत्यादिवाक्यं जगत्कर्तरि न प्रमाणमिति पूर्वपक्षे प्राप्ते तस्य ब्रह्मणि प्रामाण्यमुपपादयितुं जगत्कर्तुः प्रमाणान्तरप्राप्तत्वं निराकुर्वन् सिद्धान्तयति - **सिद्धान्तस्त्वि**ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यदुक्तं सावयवत्वात् कार्यत्वसिद्धौ प्रपञ्चस्य कर्ता समुचितः कल्प्य एक इति, तदसत्। विचित्ररचनस्य गोपुरप्रासादादेर्बहुकर्तृकत्वदर्शनात्। तथा च नाऽनुमानेन एककर्तृकत्वसिद्धिः। व्याप्तिबलेन तस्य कर्मपारवश्यादिप्रसङ्गश्च। हेतोः पक्षधर्मताबलादनुमानेन जगतो विलक्षणैककर्तृकत्वसिद्धावपि निमित्तोपादानशक्तियुक्तैककर्तृकत्वसिद्धिर्नास्ति। ततो वेदान्तशास्त्रैकगम्यं तत्प्रमाणकं ब्रह्मेति सिद्धम्।

अनेन सूत्रेण पूर्वाधिकरणप्रतिपादितजगत्कारणत्वसिद्ध्युपयोगि सर्वज्ञत्वं ब्रह्मणः शास्त्राणां वेदानां योनित्वात् कारणत्वात्सिद्ध्यतीत्यपि प्रतिपाद्यत इति केचिदाहुः। सूत्रस्य सूचनात्मकस्यार्थद्वयाभिधाने श्लेषकाव्यवद्वाक्यभेदादिदोषाभावात् पुनरधिकरणान्तरप्रस्तावः।

अत्र 'अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेद' इत्यादि श्रूयते

इत्यादिष्वित्यादिपदेन **'नैषा तर्केण मतिरापनीये'**त्यादिवाक्यान्तरं गृह्यते। ननु **'नाऽवेदविदि'**त्यादिवाक्यजातं मुमुक्षुज्ञेयसकलविशेषणवैशिष्ट्येन ब्रह्मावगतिः प्रमाणान्तरेण न सम्भवतीत्याशङ्क्याह - **यदुक्तमिति।**

विचित्रेति। अत्राऽयं भावः। महीमहीध्रमहार्णवादीनामेकेन कर्त्रा युगपन्निर्मितत्वेनैव सकर्तृकत्वं निर्वाह्यमित्यत्र न विद्यते प्रमाणम्। महतो देवालयस्य क्रमेण बहुभिः कृतत्वेनाऽपि सकर्तृकत्वनिर्वाहादेककर्तृकत्वं न सिद्ध्यतीति एककर्तृकत्वसिद्धावपीति - **'तुष्यतु दुर्जन'** इति न्यायेन एककर्तृकत्वाभ्युपगमेपीत्यर्थः। वेदान्तप्रतिपाद्ययावद्धर्मवैशिष्ट्यनिर्वाहाय शुष्कतार्किकरीतिमपहाय वेदान्तैरेव जगत्कर्तृसिद्धेरङ्गीकर्तव्यतया ब्रह्म शास्त्रप्रमाणकमेव भवति, न त्वनुमानप्रमाणकमित्यवशतोऽङ्गीकर्तव्यमिति भावः।

अत्र सूत्रे कैश्चित्प्रदर्शितं वर्णकान्तरमप्यङ्गीकृत्य तदुपपादयितुमारभते - **अनेनेति।** ननु, जगत्कारणत्वोपयोगिसर्वज्ञत्वं जगत्कारणत्वेनैवाक्षिप्तम्। **'यः सर्वज्ञः सर्वविदि'**ति साक्षादेव श्रुतं चेति नात्र हेतुगवेषणं युक्तम्। अथ यदीदमुचितं तर्हि जगत्कारणत्व एवोपयोगिनि सर्वशक्तिकत्वेऽपि हेतोरन्वेष्यत्वादितिचेन्न। **'वाचा विरूपनित्यये'**त्यादि श्रुत्या वेदनित्यत्वस्यैवाम्नाततत्वेन ब्रह्मणो वेदकर्तृत्वाऽसिद्ध्या सर्वजगत्कारणत्वरूपलक्षणं न सम्भवतीति शङ्कानिरासायाऽन्यतः सिद्ध्यत्यपि सर्वज्ञत्वे, हेत्वन्तरप्रदर्शनस्य समुचिततरत्वाच्छ्लेषकाव्यवदिति।

प्रसन्नाः कान्तिहारिण्यो नानाश्लेषविचक्षणाः।
भवन्ति कस्यचित्पुण्ये मुखे वाचो गृहे स्त्रियः।।

इति श्लिष्टपद्ये यथा श्लेषकृतविच्छित्तिविशेषसिद्धये वक्तुरनेकार्थविवक्षावशात्स्वतन्त्रानेकार्थत्वकृतवाक्यभेदोऽनेकार्थप्रतीत्यर्था वाक्यावृत्तिश्च न दुष्यति, तथाऽत्राप्यनेकार्थसूचनसिद्धये सूत्रकृतस्तदनुकूलानेकार्थविवक्षासत्त्वात्तत्कृतो वाक्यभेदो वाक्यावृत्तिश्च न दुष्यत इत्यर्थः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विषयः। ब्रह्मणो वेदकर्तृत्वं युक्तं न वेति सन्देहः। न युक्तमिति पूर्वपक्षः। वाचा विरूपनित्ययेत्यादेर्वाचो

'अस्य महतो भूतस्ये'ति वाक्येन ब्रह्मणो वेदकर्तृत्वस्य सिद्धतया, तेन ब्रह्मणः सर्वज्ञत्वं सिद्ध्यति न वेत्यधिकरणाङ्गसंशयं सिद्धवत्कृत्य तदर्थसंशयमाह - **ब्रह्मण** इति।

पूर्वपक्षहेतुं दर्शयति - **वाचे**ति। न च, वर्णानां नित्यत्वेन नित्यया वाचेति विशेषणस्योपपन्नत्वेन तेन ब्रह्मणो वेदकर्तृत्वमविरुद्धमिति शङ्क्यम्। वर्णानां नित्यत्वेन लौकिकवाक्यगतानामपि नित्यतया, विशिष्य वेदवाचि नित्यत्वविशेषकथनेन वेदानां ग्रन्थरूपेणैव नित्यत्वस्य सिद्धत्वात्। नाऽपि आनुपूर्वीविशिष्टवर्णरूपस्य वेदस्य नित्यत्वमयुक्तम्। आनुपूर्व्याः कृतकत्वादिति शङ्क्यम्। अविच्छिन्नप्रवाहत्वरूपस्य प्रवाहनित्यत्वास्यैवेष्टत्वेन वेदनित्यत्वश्रुतेः स्वरूपनित्यत्वमर्थ इत्यनभ्युपगमात्। ननु, निश्वसनश्रुतितो वेदनित्यत्वश्रुतेः प्राबल्यस्याऽसिद्धतया वेदनित्यत्वश्रुतिविरोधान्निश्वसितश्रुतिसिद्धं ब्रह्मणो वेदकर्तृत्वमयुक्तमिति वक्तुं न युज्यत इति चेन्न। निरवकाशस्वरूपस्य तत्प्राबल्यकारणस्य सिद्धत्वात्।

तथाहि, निश्वसितश्रुतेर्ब्रह्मण इव प्रजापतेरग्न्यादीनां च वेदकर्तुत्वं श्रूयते। **'षड्ढोता भूत्वा प्रजापतिरिदं सर्वमसृजत। ऋचो यजूंषि सामानि। ऋग्वेद एवाऽग्नेरजायत। यजुर्वेदो वायोः सामवेद आदित्यादि'**त्यादिश्रुत्यन्तरेषु एकस्मिन्ग्रन्थे बहूनां स्वतन्त्रकर्तुत्वस्याऽसम्भवाद्वेदाभिमानिदेवतानां प्रजापतेरग्न्यादिभ्यश्च जननविषयाणि तानि श्रुत्यन्तराणीत्युन्नेयम्। एवमेव निश्वसितश्रुतेरपि योजना सङ्गच्छते। पृथिव्याद्यभिमानिदेवतावत्तत्तद्वेदाभिमानिन्योपि देवता वर्तन्त इति विज्ञायते। अत एव तन्त्रवार्त्तिके ग्रहैकत्वाधिकरणे,

शब्दब्रह्मेति यच्चेदं शास्त्रं वेदाख्यमुच्यते।
तदप्यधिष्ठितं सर्वमेकेन परमात्मना।।

तथा -

ऋग्वेदादयो वेदाः प्रोक्ता येऽपि पृथक्पृथक्।
भोग्यत्वेनात्मनां तेपि चैतन्यानुगताः सदा।।

इति तासां च देवतानां ब्रह्मणो जातानामपि कालक्रमेण नष्टानां समयान्तरे पुनः प्रजापतिभ्योऽपि प्रवर्तितत्वं युज्यते - यथैव ब्रह्मणो मानसपुत्राणां दक्षनारदवशिष्ठभृग्वादीनामिव समयान्तरे पुनरन्यतो जननम्। ततो वेदनित्यत्वश्रुतिविरोधाद् ब्रह्मणो वेदकर्तृत्वम् युक्तमिति युक्तमेव।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

नित्यत्वप्रतिपादिकायाः श्रुतेर्विरोधात्। वेदानां ब्रह्मकार्यत्वे पौरुषेयत्वादप्रामाण्यप्रसङ्गाच्च। तस्मात् ब्रह्मणो वेदकर्तृता कथमिति प्राप्ते ब्रूमः -

युक्तमेव ब्रह्मणो वेदकर्तृत्वम्। 'अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेद' इत्यादिश्रुतेर्निश्वसितवद्वेदराशेरप्रयत्नेन ब्रह्मणः प्रादुर्भावावगमात्,

अष्टादशानामेतासां विद्यानां भिन्नवर्त्मनाम्।
आदिकर्ता कविः साक्षाच्छूलपाणिरिति श्रुतिः।।

बाधकान्तरमाह **वेदानामिति**। **पौरुषेयत्वादिति**। स्वतन्त्रपुरुषप्रणीतत्वे तत्प्रणेतरि भ्रमप्रमादविप्रलिप्सा-करणापाटवादिशङ्कानामपरिहार्यत्वेन बुद्धाद्यागमवदेव तेषामप्रामाण्यं प्रसज्येतेत्यर्थः। न चेश्वरे सार्वज्ञ्यादिनिश्चयादुक्तशङ्का नाऽवतरतीति शङ्क्यम्। वेदादन्यतस्तन्निश्चयासम्भवाद्बुद्धादीनामपि सार्वज्ञ्यादेस्तदागमतो निश्चयसम्भवस्य तुल्यत्वात्।

ननु वेदस्य स्वतन्त्रवक्तृप्रमितत्वाभावे शुक्लः पट इत्यन्धवाक्यस्य चक्षुष्मत्प्रमितिपूर्वकत्वाभाव इव न प्रामाण्यं सम्भवतीति चेन्न। अपौरुषेयत्वेन वक्तृदोषाभावसिद्धौ शुकबालादिप्रमाणवाक्यसाधारण्येन योग्यवाक्यत्वेनैव प्रामाण्यसम्भवात्। अन्धवाक्यन्यायेन मूलापेक्षा तु पौरुषेयवाक्य एव। अर्थमुपलभ्यरचितं हि वाक्यं पौरुषेयम्। तत्स्वप्रामाण्यनिर्वाहार्थं शुक्लः पट इत्यन्धवाक्यं तन्मूलभूतस्योपदेष्टुश्चक्षुष्मत्तामिव स्वमूलोपलम्भस्य नियमेन प्रामाण्यमपेक्षते। अपौरुषेयं तु वाक्यं मूलप्रमाणनिरपेक्षं तदेव चक्षुष्मत्स्थानीयमिति न तत्र लौकिकन्यायोऽवतरति। न हि शुक्लः पट इत्यन्धवाक्ये चक्षुष्मद्वाक्यमूलकत्वं दृष्टमिति चक्षुष्मद्वाक्येपि चक्षुष्मद्वाक्यान्तरापेक्षकत्वं सम्भवति। तस्माद्वेदनित्यत्वश्रुतिविरोधाद्वक्तुर्भ्रमप्रमादादिसम्भवेन तत्प्रामाण्यसंशयप्रसङ्गाच्च न ब्रह्मणो वेदकर्तृत्वमतो न तेन सार्वज्ञ्यं च सिद्ध्यतीति पूर्वपक्षमुपसंहरति **तस्मादिति**। सूत्रसूचितं सार्वज्ञ्यहेतुमुपपादयितुं प्रतिजानीते **युक्तमेवेति**। ननु, ब्रह्मणो वेदोपादानत्वेन आधुनिकाध्यापकविधया सर्ववेदाध्यापकत्वेन वा निश्वसितश्रुतिरुपपन्ना। ततो न तस्याऽर्थमुपलभ्यरचयितृत्वरूपं वेदकर्तृत्वं वा तन्मूलं वा सार्वज्ञ्यं सिद्ध्यतीत्याशङ्क्योप-बृंहणानुसारात्तत्प्रतिपादकश्रुत्यन्तराच्चोक्तविधं वेदकर्तृत्वं निरूपयितुमुपबृंहणमुदाहरति - **अष्टादशानामिति**।

चत्वारो वेदाः, शिक्षा व्याकरणं छन्दो निरुक्तं ज्योतिषं तथा कल्पश्चेति षडङ्गानि, पुराणन्यायमीमांसा-धर्मशास्त्राणि चत्वारि, आयुर्वेदधनुर्वेदगान्धर्वार्थशास्त्रात्मका ऋग्वेदाद्युपवेदाश्चत्वारश्चेत्यष्टादश विद्यास्थानानि। एतानि विद्योत्पत्तिस्थानत्वाद्विद्याशब्देन लक्ष्यन्ते। तत्र परमेश्वराराधनभूतकर्मोपासनाद्वारेण साक्षाच्च परमेश्वरप्रतिपादकाश्चत्वारो वेदाः प्रधानभूताः। तदीयस्वरवर्णपदतदर्थावधारणसाधनानि शिक्षाव्याकरणनिरुक्तानि। तदुक्ताग्निहोत्रादिकर्मानुष्ठानविधाविधायकः कल्पः। कर्माङ्गमन्त्रेषु ज्ञातव्यानां गायत्र्यादिछन्दसां निर्णायकं छन्दः। कर्माङ्गकालविशेषनिर्णायकं ज्यौतिषम्। सृष्टिवाक्याद्यर्थप्रपञ्चनेन परमेश्वरमहाविभूत्युपबृंहणार्थानि पुराणानि।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इति परमेश्वरस्य सकलविद्याकर्तृत्वप्रतिपादनाच्च। सृष्टेः प्राक् स्वात्मनि विलीनानां वेदानां पूर्वपूर्ववर्णानुपूर्व्यनुरूपरचनया पुनः कर्ता भवति सर्वज्ञः परमेश्वरः। अत एव वेदानामपौरुषेयत्वमी-

---

वेदान्ततात्पर्यनिर्णयानुकूलषड्विधलिङ्गान्तर्गतोपपत्तिरूपानुमानतत्परिकरशोधनसाधनं न्यायशास्त्रम्। वेदार्थनिर्णयानुकूलन्यायविचारात्मिका मीमांसा। वर्णाश्रमानुगुणनिमित्तसाधारणधर्मप्रतिपादकं धर्मशास्त्रम्। सकलानुष्ठानसाधनदेहपाटवार्थ आयुर्वेदः। राज्यपालनोपयोग्यस्त्रजातपरिज्ञानार्थो धनुर्वेदः। सकलदेवताप्रीणनगीति-ज्ञानार्थं गान्धर्वम्। दृष्टादृष्टोपयोगिधनार्जनोपायज्ञानार्थमर्थशास्त्रम्। वैदिकहरिश्चन्द्राद्युपाख्यानार्थप्रपञ्चनप-राणामितिहासानां पुराणशब्देनैव सङ्ग्रहः। वैदिकदेवताराधनप्रकारविशेषप्रतिपादकानां शिवागमानां धर्मशास्त्रशब्देन ग्रहणम्। अधिकं विद्यास्थानविनिर्णयेऽस्माभिः प्रपञ्चितमिति नेह। एषां सर्वेषां विद्यास्थानानामादिकर्ता सृष्ट्यादौ प्रथमकर्ता शूलपाणिः। इममर्थं श्रुतिरप्याश्रावयति **'छन्दांसि यज्ञाः क्रतवो व्रतानि भूतं भव्यं यच्च वेदा वदन्ति। अस्मान्मायी सृजते विश्वमेतदि'**ति। न ह्ययमध्यापकवत्तत्तद्विद्यास्थानगतवर्णावलीमात्ररचयिता। किन्तु साक्षात्कविः। कवयो ह्यर्थविशेषमुपलभ्य श्लोकादिनिर्मातारः। ते तु परमेश्वरादन्ये पूर्वपूर्वकविच्छायापत्त्या कवयः। अयं तु स्वयमेव तत्तदर्थमुपलभ्य सर्वविद्यास्थाननिर्मातृत्वात्साक्षात्कविः। अत्रापि श्रुतिः। **'तदेव ब्रह्म परमं कवीनामि'**ति तत्परम्ब्रह्मैव कवीनां मध्ये परमं सर्वोत्कृष्टम्। अन्ये हि तत्तद्विद्यास्थानैकदेशनिर्मातारो देवमनुष्यादयः कवयः। अयं तु सकलविद्यास्थानप्रथमनिबन्धृत्वात्सर्वोत्कृष्टः कविरित्यर्थः। **'कविं कवीनामुपवश्रवस्तमम्', 'उदीरयं कवितमं कवीनामि'**त्यादीनि श्रुत्यन्तराण्यप्युक्तमर्थं निर्धारयन्ति। नन्वेवं कविशब्देन व्यवहारादीश्वरस्याऽर्थमुपलभ्यवेदादिरचयितृत्वमङ्गीकार्येत। तेन स्वेच्छाधीनयाऽऽनुपूर्व्या तद्रचयितृत्वं प्रसज्येत प्राक्सिद्धानुपूर्वीसहितं प्राचीनश्लोकं कीर्तयतः कविव्यवहाराभावात्। एवं च आनुपूर्व्यनन्यथात्वरूपस्य वेदनित्यत्वस्याऽभावेन वेदनित्यत्वश्रुतिः सर्वदा व्याहन्येतेत्याशङ्कां परिहरति - **सृष्टेः प्रागिति**।

अत्राऽयमाशयः। सर्वानुग्राहकः सर्वज्ञः परमेश्वरः प्रलये स्वस्मिन्विलीनान्वेदान् **'सृज्यमानाः प्राणिन एतेभ्यो वेदवाक्येभ्यः कर्मोपासनादिकमवगम्य तदाचरणेन कृतार्थाः सन्तु'** इत्याशयेन हि विरचयति। एवंविधभावमूलं वाक्यविरचनमर्थानभिज्ञाध्यापकोच्चरितवेदवाक्यमिवाऽर्थोपलब्धिमनपेक्ष्य वर्णावलीज्ञानमात्रेण न सम्भवतीत्यर्थमुपलभ्य रचयितृत्वमेव कविशब्देन विवक्षितमिति।

ननु, आनुपूर्वीव्यत्यासाभावेन वेदनित्यत्वश्रुतौ सङ्गतायामप्यर्थमुपलभ्य रचयितृत्वरूपस्य पौरुषेयत्वस्या-भ्युपगमेन तत्र भ्रमप्रमादादिशङ्कासम्भवेन वेदप्रामाण्यं शङ्काकलङ्कितमेव स्यादित्याशङ्कां निराकरोति - **अत एवेति**। वेदगतानां वर्णपदवाक्यप्रकरणतदानुपूर्वीतदर्थानामनादिसिद्धत्वादेतेषु पुरुषबुद्धिकृतस्य व्यत्यासस्याऽभावादेव वेदस्य प्रामाण्यमविशङ्कमिति, अर्थाभिज्ञाध्यापकोच्चरितवेदवाक्यस्येवाभिप्रायनिर्वाहार्थम-स्माद्वाक्यादयमर्थः प्रत्येत्वित्याशयवत्त्वमात्रेणैव अर्थमुपलभ्य रचयितृत्वस्य सम्भवाच्च, अर्थोपलम्भपूर्वकसकल-वेदकर्तृत्वेन परमेश्वरस्य सार्वज्ञ्यलाभाच्च सर्वं सुसङ्गतमिति च भावः। एवं च वेदानामपौरुषेयत्वं परमेश्वरकृतित्वं चाऽविरुद्धमिति सिद्धम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

श्वरकार्यत्वं च। येषां रागद्वेषादयस्तेषां वचनमप्रमाणमपि भवति। निरस्तसमस्तदोषकलङ्कस्य निरुपप्लवनिरतिशयज्ञानप्रत्यक्षाऽनुभूयमानत्रैकालिकवस्तुविलासस्य स्वतः प्रमाणस्य परमेश्वरस्य परमाप्तस्याऽवाप्तसमस्तकामस्य शिवस्य ब्रह्मणो वचनं तु प्रमाणमेव भवति। 'ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां।', 'स नो देवः शुभया स्मृत्या संयुनक्तु।' इति परमेश्वरस्य सर्वविद्याप्रवर्तकत्वं

एतेन तार्किकाणां वेदपौरुषेयत्वानुमानानि, पूर्वमीमांसकानां वेदापौरुषेयत्वानुमानानि च निरस्तानि। तथा च, तार्किकास्तावदेवमनुमानानि कल्पयन्ति - वेदः सजातीयोच्चारणानपेक्षोच्चारितजातीयः, वाक्यत्वाल्लौकिकवाक्यवदित्यादिना। पूर्वमीमांसकास्तावद्वेदापौरुषेयत्वाधिकरणे काठकं, कौथुकं, तैत्तरीयकमित्यादिसमाख्या तत्तद्वेदविषया लोके दृष्टा। तद्धितप्रत्ययश्च तेन प्रोक्तमित्यर्थे वर्तते। तथा सति व्यासेन प्रोक्तं वैयासिकं भारतमित्यादाविव पौरुषेयत्वं प्रतीयते। किञ्च **'विमतं वेदवाक्यं पौरुषेयं, वाक्यत्वात् कालिदासादिवाक्यवत्'** इति प्राप्ते ब्रूमः। अध्ययनसम्प्रदायप्रवर्तकत्वेन समाख्योपपद्यते। कालिदासादिग्रन्थेषु तत्तत्सर्गावसाने कर्तार उपलभ्यन्ते। तथा वेदस्याऽपि पौरुषेयत्वे तत्कर्तोपलभ्येत। न चोपलभ्यते। अतो वाक्यत्वहेतुः प्रतिकूलतर्कपराहतः। तस्मादपौरुषेयो वेदः। तथा सति पुरुषबुद्धिदोषकृतस्याप्रामाण्यस्याऽऽनाशङ्कनीयत्वाद्विधिवाक्यस्य धर्मे प्रामाण्यं सुस्थितमिति एवमादयः परेषां पक्षाः **छन्दांसि यज्ञाः क्रतवो व्रतानी**त्यादिश्रुतिपुराणविरोधादुपेक्ष्याः।

ननु, अनादिवर्णपदानुपूर्वीभङ्गाभावेन वेदानामपौरुषेयत्वमङ्गीकृत्याऽपि तेषां प्रलये लयं सृष्टौ पुनः परमेश्वरेण समुद्धरणमित्येवं परमेश्वरकर्तृकत्वाभ्युपगमेऽपि समुद्धर्तुः भ्रमप्रमादादिः सम्भावनीयः। तेषां प्रामाण्यमाशङ्कितमेव स्यादित्याशङ्क्याह - **येषामिति**। येषां विप्रलिप्सादिहेतवो रागादिदोषाः सम्भवेयुस्तेषामेव वचनं कदाचिदप्रमाणं भवेत्। परमेश्वरस्य तु न कदाचिदपि तादृशदोषसम्बन्ध इति तेनोद्धृतेषु वेदेषु तदप्रामाण्यशङ्का न सम्पद्यत इत्यर्थः। निरस्तसमस्तदोषकलङ्कस्येति सामान्यतो निगदितो दोषाभाव उत्तरविशेषणैर्विशिष्य तत्तद्दोषराहित्यप्रदर्शनेन समर्थ्यते। तत्र निरुपप्लवेति भ्रमाभाव उक्तः। स्वतःप्रमाणस्येति प्रमादाभावः। परमेश्वरस्येत्यनेन स्ववशीकृतसकलप्रपञ्चत्ववाचकेन करणाऽपाटवाऽसम्भव उक्तः। परमाप्तस्येति विप्रलिप्साभावः। तत्र कारणभूतरागाद्यसम्भवस्तु अवाप्तसमस्तकामस्येत्यनेन समर्थितः। समर्थितं शिवस्य भ्रमाद्यभावं श्रुत्युदाहरणेन स्थिरीकरोति - **ईशान** इति। **'ईशानः सर्वविद्यानामि'**ति श्रुतिः शिवस्य सकलविद्यैश्वर्यं प्रतिपादयन्ती तस्य विद्यासम्प्रदायप्रवर्तनविरोधिनां भ्रमादीनामभावं बोधयति। अन्यथा तदैश्वर्यानुपपत्तेरिति भावः। ननु, तत्त्वमुपदेष्टुं शक्तोपि विप्रलिप्सया विपरीतमुपदिशेदित्याशङ्क्य तदभावे श्रुत्यन्तरमुदाहरति - **स नो देव** इति। निरतिशयानन्दप्रापकतत्त्वबोधप्रदत्वं शिवस्य प्रतिपादयन्ती **'स नो देव'** इति श्रुतिस्तस्मिन्विप्रलिप्सा सम्बन्धं न सहत इति भावः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शुभस्मृतिहेतुत्वं च श्रूयते। अतः सर्ववस्त्ववभासकानां वेदानां परमेश्वरकर्तृकतया परमेश्वरस्य सर्वज्ञता निश्चीयते। अज्ञातस्य वक्तुमशक्यत्वात्। यद्यपि सर्वगतस्य परमेश्वरस्य सर्ववस्तुसंयोगेन सर्वज्ञत्वं सिद्ध्यति, तथापि सर्ववस्त्ववभासकानां वेदानां प्रणेतृता विशेषं दर्शयति। यथा दीपः स्वप्रभासंयुक्तेष्वपि रूपादिषु रूपमेव प्रकाशयति न रसादि, तथा न परमेश्वरः किन्तु स्वशक्तिसंयुक्तं सकलमपि प्रकाशयतीति।

ननु परमेश्वरस्य सर्वज्ञत्वं नाम वेदोक्तसकलपदार्थाभिज्ञत्वम्। तर्हि महर्षीणामपि वेदार्थवेदिनां सर्वज्ञत्वं सिद्धम्, किमत्र वैषम्यमिति चेन्न।

तत्कर्तुरीश्वरस्याऽधिकं ज्ञानमस्ति। व्याकरणादेरधिकार्थविदां हि पाणिनिप्रभृतीनां तत्प्रणेतृत्वं दृश्यते। वेदश्च सर्वार्थावभासकोऽपि न सर्वं मुख्यतः प्रकाशयति, किन्तु किमपि लक्षणया, किमपि सामान्येन, किमपि विशेषेण। परमेश्वरः सर्वसाक्षी सर्वं प्रत्यक्षयतीति वेदेश्वरयोरेतावद्वैषम्यमिष्यते।

ननु, परमेश्वरस्यैव वेदकर्तृत्वमिति न नियमः। 'षड्ढोता वै भूत्वा प्रजापतिरिदं सर्वमसृजत ऋचो यजूंषि सामानि' इत्यादि श्रवणाद्धिरण्यगर्भादेरपि तत्कर्तृत्वाऽवगमादितिचेन्न।

हिरण्यगर्भोत्पत्तेः प्रागपि वेदानां सद्भावात्। श्रूयते हि, 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' इति। यः सर्वदेवानामादिमस्य हिरण्यगर्भस्याऽपि कर्ता तस्मै सर्वान् वेदानुपदिशति स एव सर्वाधिको वेदकर्ता परमदेशिकः। तथा हि श्रुत्याऽभिव्यज्यते, 'यो देवानां

एवं शास्त्रयोनित्वहेतुमुपपाद्य तस्याऽध्याहृतेन साध्येनाऽन्वयं दर्शयति - **अत** इति। ननु, ब्रह्मणो वेदकर्तृत्वे सिद्धे तेन महर्षीणां सार्वज्ञ्यादीश्वरस्याऽधिकं सार्वज्ञ्यं सिद्ध्येत। तदेव न सिद्धम्। निश्वसितादिश्रुतिभिर्ब्रह्मण इव षड्ढोतादिवाक्यैः प्रजापत्यादीनामपि वेदकर्तृत्वस्य श्रूयमाणत्वादिति शङ्कते - **नन्विति**। प्रजापतेः परमेश्वराद्वेदप्राप्तिश्रवणेन तस्य वेदकर्तृत्वमनुपपन्नम्। अथ प्रजापतिसृष्टानामग्न्यादीनां कैमुत्यन्यायेनाऽसिद्धमित्याशयः। सृज्यमानाय प्रजापतये वेदप्रदानाम्नानेन ततः प्रागेव परमेश्वरेण वेदाः प्रणीता इति सिद्धत्वादित्याशयेन परिहरति - **नेति। स्मृत्येति** - प्राणलिङ्गानुसन्धानरूपा स्मृतिसन्ततिरुच्यते। तज्जन्यसाक्षात्कारस्तद्वाचकेन लक्ष्यते। स्मृतिलाभे सति सर्वग्रन्थीनां विप्रमोक्ष इति। श्रुत्यन्तरेऽपि मोक्षजनकज्ञाने स्मृतिपदं प्रयुज्यते। मन्त्रं व्याचष्टे **महर्षिरिति** - तस्मिन् जन्मन्यन्यस्मादध्ययनमनपेक्ष्य स्वयमेव सूक्तविशेषरूपवेदैकदेशद्रष्टारो हि वसिष्ठादय ऋषय उच्यन्ते। अतः परमेश्वरः कदाचिदप्यध्ययनमनपेक्ष्य सकलवेदप्रणेतृत्वान्महर्षिरिति निर्दिश्यते। एतेन यद्रुद्रस्य महर्षिपदेन ऋषिभ्यो विशिष्टत्वं प्रलपितमवैदिकैस्तन्निरस्तम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रथमं पुरस्ताद्विश्वाधिको रुद्रो महर्षिः। हिरण्यगर्भं पश्यत जायमानं स नो देवः शुभया स्मृत्या संयुनक्तु' इति। महर्षिर्वेदकर्ता यः सर्वज्ञत्वादिना विश्वस्माच्चिदचित्प्रपञ्चादधिको रुद्रः परब्रह्मभूतः सर्वेषां देवानामिन्द्रादीनां प्रथममादिमं हिरण्यगर्भं ब्रह्माणं स्वसङ्कल्पेन प्रकृतेरुपादानात्मनो जायमानं सृष्टिकाले सर्वज्ञानोपायसकलवेदोपदेशरूपयाऽनुग्रहदृष्ट्याऽपश्यत्, स परमदेशिको नः अस्मानपि सकलसंसारपाशमहाऽनर्थनिवृत्तिहेतुभूतया परमामृतलक्ष्मीसमावेशपराऽनन्दप्राप्तिकारिण्या अत एव परममङ्गलरूपया वेदान्तसारसामरस्य सिध्दया स्मृत्या बोधकलया स्वविषयया संयोजयत्विति तात्पर्यम्।

ततः सकलवेदकर्तृत्वमीश्वरस्य सिद्धम्। वाचो नित्यत्वश्रुतिरीश्वरेण पूर्वसत्ताऽनुवृत्त्या विहितत्वाद्वेदानामविरुद्धा। ततो वेदानामीश्वरप्रणीतत्वं नित्यत्वं चाऽविरुद्धमेव।

।। इति शास्त्रयोनित्वाधिकरणम् ।।

***

रुद्रशब्दोऽत्र संसाररुजां द्रावके परब्रह्मणि वर्तते, न तु संहाररुद्रादाविति विवृणोति - **रुद्र** इति। **परमामृतेति** - परमममृतं ब्रह्म तल्लक्ष्मीसमावेशः सत्यसङ्कल्पत्वादिना तदीयपरमसादृश्यप्राप्तिः परानन्दप्राप्तिः। अत्रोक्तः स्मृतिपदविशेषणार्थोऽखिलोपि शुभयेति विशेषणेन सम्पन्न इत्याशयेनाह - **अत एवेति** - सामरस्यमैककण्ठ्येन ब्रह्मणि तात्पर्यम्। एवं निश्वसितादिश्रुतीनां षड्ढोतृवाक्यादिवैलक्षण्यात्ताभ्यः सकलवेदकर्तृत्वं परमेश्वरस्य सिद्धमित्युपसंहरति - **तत** इति - नन्वेवं वेदनित्यत्वश्रुतिर्विरुध्येतेति पुनराशङ्क्य समाधानान्तरमाह - **वाच** इति। पूर्वं प्रलयेषु घटादीनामिव वेदानामसत्त्वेपि प्रतिकल्पं प्रादुर्भावात्प्रवाहनित्यत्वमस्तीति तद्विषयतया वेदनित्यत्वश्रुतेरविरोध उक्तः। इदानीं क्रमविशेषविशिष्टवर्णरूपाणां वेदानां प्रलयेऽपि सत्त्वे तेषां कथं परमेश्वरकृतित्वमुपपद्यत इत्याशङ्क्याह - **तत** इति। प्रलये वेदानां परमेश्वरबुद्धिगोचरतयैवाऽनुवृत्तिः। सर्गादौ तु तेषां परजनाकर्णनविषयवैखरीवृत्त्या परमेश्वरप्रणीतत्वमित्युभयमप्यविरोधेनोपपद्यते। अत एव,

अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।
आदौ वेदमयी भूता ततः सर्वाः प्रवृत्तयः।।

इति वेदानां नित्यत्वेऽपि परमेश्वरप्रणीतत्वं सुसङ्गतमेवेति भावः।

इति शास्त्रयोनित्वाधिकरणम्

***

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ समन्वयाधिकरणम् ४

प्रथमाधिकरणे जिज्ञास्यतया प्रतिपादितस्य परब्रह्मणः शिवस्य परिज्ञाने लक्षणापेक्षायां द्वितीयाधिकरणेन लक्षणं जगज्जन्मादिरूपमभिहितम्। तस्मिन् किं प्रमाणमित्याकाङ्क्षायां तृतीयाधिकरणेन वेदान्तशास्त्रस्य तद्विषये प्रामाण्यं तन्मूलत्वं च निरूपितम्। येन यदव्यभिचारेण सिद्ध्यति, तद्धि तस्य प्रमाणमुच्यते। वेदान्तवाक्यानां कथं वा ब्रह्मसाधकत्वमित्याकाङ्क्षायां चतुर्थाधिकरणमवतार्यते -

---

अथ समन्वयाधिकरणम् ४

ननु, प्रथमाधिकरणे शास्त्रानारम्भहेतुशङ्कानिराकरणेन शास्त्रारम्भमुपपाद्य जन्मादिसूत्रादिशास्त्रं प्रवर्तितम्। समन्वयाधिकरणे तु सिद्धरूपे ब्रह्मणि वेदान्तानां प्रामाण्यं न सम्भवतीति पूर्वपक्षनिराकरणेन ब्रह्मणि वेदान्तानां प्रामाण्यमुपपाद्यते। तस्माच्छास्त्रारम्भोपपादकतया जन्माधिकरणात्प्रागेव समन्वयाधिकरणं निवेशनीयम्। वेदान्तानां ब्रह्मणि प्रामाण्ये सिद्धे हि तन्निर्णयफलकवेदान्तविचारोपयोगिन्यायग्रथितं शास्त्रमारम्भणीयं स्यात्। न तु तेषां ब्रह्मणि प्रामाण्ये सिद्धे। ततश्चाऽस्याधिकरणस्य शास्त्रयोनित्वाधिकरणानन्तर्यमयुक्तमिति शङ्कां निराकर्तुं वृत्तसङ्कीर्तनेन समन्वयाधिकरणस्य शास्त्रयोनित्वाधिकरणानन्तर्यं सङ्गतिविशेषेण प्राप्तमित्युपपादयितुमाह - **प्रथमाधिकरण** इति। प्रथमाधिकरणे ब्रह्म विचार्यमिति प्रतिज्ञातम्। अपरिच्छेद्यत्वाद्ब्रह्म न विचारार्हमिति शङ्कानिराकरणार्थमिदमित्थमिति परिच्छेत्तुमशक्यत्वेऽपि लक्षणमुखेनेतरव्यावृत्त्या परिच्छेत्तुं शक्यमिति तेन सूचितम्। ततस्तत्किं लक्षणं, येन तत्तथा परिच्छेत्तुं शक्यमित्याकाङ्क्षायां जगज्जन्मादि तल्लक्षणमिति निगद्य, तस्य तल्लक्षणत्वं तदनुपपत्तिशङ्कानिराकरणेन निरूपितम्। ततो जगज्जन्मादिकारणे ब्रह्मणि किं प्रमाणमित्याकाङ्क्षायां शास्त्रं प्रमाणमिति प्रतिज्ञायानुमानगम्ये ब्रह्मणि शास्त्रस्य न प्रामाण्यमिति शङ्कानिराकरणेन तस्य तस्मिन्प्रामाण्यमुपपादितम्। ततोऽपि शब्दानां कार्य एव व्युत्पत्तेः सिद्धरूपब्रह्मबोधकत्वं न सम्भवतीति तस्य तस्मिन्प्रामाण्यमसिद्धमिति शङ्काया ब्रह्मणः शास्त्रप्रमाणकत्वनिर्णयानन्तरप्रसक्तत्वेन शास्त्रयोनित्वाधिकरणानन्तर्यमेवाऽस्याधिकरणस्य प्राप्तमित्यर्थः। एवमस्याऽधिकरणस्य प्राङ्निवेश्यत्वशङ्कां परिहृत्य, शास्त्रयोनित्वाधिकरणानन्तर्यमेव समर्थितुं तेनाऽऽक्षेपिकीं सङ्गतिं प्रदर्शयति - **येने**त्यादिना। ननु, येन यत्सिध्यति तस्य तत्प्रमाणमित्येतावत एव लक्षणत्वसम्भवाद्व्यभिचारेणेति विशेषणं किमर्थमितिचेदुच्यते। अनेन भाष्येण, न्यायमतेन वा मतान्तरेण वा सिद्धं प्रमाणसामान्यलक्षणं न निगद्यते। किन्तु **अप्राप्ते शास्त्रमर्थवदिति** मीमांसकमर्यादाप्रसिद्धं शास्त्रप्रामाण्यप्रयोजकं निगद्यते। वेदान्तानां ब्रह्मणि प्रामाण्यस्य पूर्वसूत्रकथितस्याऽऽक्षेपे तदनन्तरवाक्येन करिष्यमाणे तत्कथनस्योपयोगित्वात्। एवं वेदान्तानां ब्रह्मणि प्रामाण्यप्रयोजकं निगद्य, तदभावाद्वेदान्तानां ब्रह्मणि प्रामाण्यं न सिद्ध्यतीत्याक्षेपं दर्शयति **वेदान्तवाक्यानामिति** - कथमिति करिष्यमाणाक्षेपो निगद्यते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तत्तु समन्वयात् ।।१-१-४।।

तच्छब्देन प्रकृतं ब्रह्म परामृश्यते। तुशब्देन सर्वाणि वेदान्तवाक्यानि समाह्रियन्ते। समन्वयशब्देन तात्पर्येण संबन्ध उच्यते। तत् ब्रह्म वेदान्तवाक्यानि तात्पर्यलिङ्गसंबन्धाद्बोधयन्तीति सूत्रार्थः।

अस्य सर्वाणि वेदान्तवाक्यानि विषयः।

वेदान्तवाक्यानां ब्रह्मबोधकत्वं युक्तं न वेति संशयः।

सर्वत्र संबन्धग्रहणसापेक्षं शब्दस्याऽर्थावबोधकत्वम्। शब्दार्थयोः संबन्धज्ञानमन्तरेण हि पुरुषस्य शब्दार्थप्रत्ययो न भवति। संबन्धज्ञानं च वृद्धव्यवहारसापेक्षम्। व्यवहारश्च कार्यैकगोचरः। तथा हि, गामानय, गां बधानेति वृद्धवाक्यश्रवणसमनन्तरं प्रवर्तमानं प्रयोज्यवृद्धमवगम्य पार्श्वस्थो व्युत्पित्सुरेवमवधारयति, सर्वथाऽयं कार्यावगतिसमनन्तरमेव प्रवर्तते। सा च कार्यावगतिरेतस्मादेव वाक्यात्समुत्पन्ना। अन्यथा कथमस्यैतद्वाक्यश्रवणसमनन्तरं प्रवृत्तिरिति। पुनर्गवानयनबन्धनदर्शनात्कार्यविशेषं निश्चिनोति। तदेवं कार्यार्थत्वाद्व्युत्पत्तेर्न सिद्धे ब्रह्मणि शब्दस्य प्रामाण्यम्। किञ्च कार्यविशेषत्वाज्जगतः कर्तृविशेषस्य ब्रह्मणोऽनुमानादपि सिद्धेः कथमस्मिन्न प्राप्तविषयाणां वेदान्तवाक्यानां प्रामाण्यम्। अथवा विधिपराण्येव वेदान्तवाक्यानि, न ब्रह्मपराणि। उभयपरत्वे वाक्यभेदः स्यात्। अतो वेदान्तवाक्यानां न ब्रह्मबोधकत्वं युक्तमिति पूर्वः पक्षः।

युक्तमिति सिद्धान्तः। वेदान्तवाक्यानां तात्पर्यलिङ्गसमन्वयेन ब्रह्मबोधनसमर्थत्वात्। यदुक्तं कार्यार्थत्वाद्व्युत्पत्तेर्न सिद्धे ब्रह्मणि शब्दस्य प्रामाण्यमिति तदसत्। 'पुत्रस्ते जात' इत्यादिषु

सूत्रे द्वितीयान्तेन तदिति पदेन प्रकृतं ब्रह्म परामृश्यते। तुरवधारणार्थः। तस्याऽध्याहृतेन वेदान्ताः साधयन्तीत्यनेन सम्बन्धः। ततश्च साधकत्वलक्षणविशेषणसङ्गतस्याऽवधारणस्याऽयोग्यव्यवच्छेदपरत्वात्, कुमुदं श्वेतमेवेति वाक्ये विशेषणगतावधारणबलात्सर्वेषां कुमुदानां श्वैत्यमिव, सर्वेषां वेदान्तानां ब्रह्मसाधकत्वं लक्ष्यते। सम्यगन्वयः समन्वयः, उपक्रमादिलिङ्गबोधिततात्पर्यसङ्गतिः। पञ्चमी हेत्वर्था। एवं च सर्वे वेदान्ता ब्रह्म साधयन्ति। उपक्रमादिलिङ्गबोधिततात्पर्यकत्वादिति सूत्रार्थः। सूत्रं व्याचष्टे - **तुशब्देनेति**। एवं सूत्रार्थं निगद्य सूत्रार्थसूचितानधिकरणावयवान्प्रदर्शयति - **अस्येति**।

शब्दानां सिद्धार्थे शक्तिग्रहनिरूपणेन निष्पन्नं प्रथमपूर्वपक्षमुपसंहरति - **अत** इत्यादिना।

द्वितीयपूर्वपक्षमनूद्य पूर्वाधिकरणनिरूपितजगत्कर्त्रनुमानदूषणोद्घाटनेन निरस्यति - **यदुक्तमित्यादिना**। एवं तर्हि पूर्वपक्षाधिकरण एव निराकृतस्याऽनुमानस्य पुनरुत्थाने किं कारणमित्याशङ्क्य, साङ्ख्याधिकरण-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सिद्धार्थेष्वपि वाक्येषु संबन्धग्रहणदर्शनाद् वृद्धव्यवहारेऽपि व्युत्पित्सुः स्वस्य प्रवृत्तिहेतुभूतायाः कार्यावगतेः पदार्थज्ञानपूर्वकत्वावगमात्। प्रयोज्यवृद्धस्य प्रयोजकवाक्यं पदार्थज्ञानमुत्पादयतीति निश्चिनोति। ततः सिद्धार्थेष्वपि शब्दस्याऽभिधाननिश्चयः।

अथवा किमिह वृद्धव्यवहारेण। व्युत्पत्तेः प्रकारान्तरेणाऽपि सिद्धत्वात्। तथा हि बाला मात्रादिभिः शिशुपशुप्रभृतीनर्थानङ्गुल्यादिना निर्दिश्य तत्तच्छब्दांस्तेषु तेष्वर्थेषु प्रयुज्यमानैर्बहुशः शिक्षितास्तेषु तेष्वर्थेषु व्युत्पाद्यन्ते। काव्यनाटकानभिज्ञाः पुरुषास्तदभिज्ञपुरुषसमीपमेत्य पदविच्छेदं कृत्वा अस्य शब्दस्याऽयमर्थ इति सर्वशब्दानामर्थमवगच्छन्ति। अतः सिद्धार्थेऽपि व्युत्पत्तिसंभवात्तत्र शब्दस्य प्रामाण्यमस्ति। ततो वेदान्तवाक्यानां ब्रह्मणि प्रामाण्यम्।

यदुक्तं जगतः कार्यविशेषत्वात्कर्तृविशेषस्य ब्रह्मणोऽनुमानादपि सिद्धिरिति तन्न संभवति। विचित्ररचनस्य रथप्रासादादेरनेककर्तृकत्वदर्शनादनुमानेनाऽस्य जगत एककर्तृकत्वसाधनायोगात्। व्याप्तिबलात्कर्मवश्यत्वादीनां कर्तरि प्राप्तेश्च पूर्वमुक्तत्वात्। अतो नाऽनुमानगम्यं ब्रह्म भवति। किञ्च श्रुत्याऽऽनुगुण्यादनुमानमपि ब्रह्मणि प्रमाणं भवतु नाम। यत्र वाक्यानां तात्पर्यं तत्र हि तेषां प्रामाण्यम्, न प्रत्यक्षादीनामिव सर्वत्र। वेदान्तवाक्यानां ब्रह्मणि तात्पर्यनिर्णायकानि कानि लिङ्गानीति चेदुपक्रमादीनि। तथा पठन्ति,

उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये।। इति

तदिह उपक्रमादिभिर्लिङ्गैर्वेदान्तवाक्यानां ब्रह्मणि तात्पर्यं निश्चीयते। य उपक्रमादिभिस्तात्पर्यनिर्णयस्तदेव वेदान्तवाक्यानां श्रवणमित्युच्यते। तथा ह्युच्यते,

---

पर्यालोचनया वेदान्तानुगुणं तदनुमानप्रामाण्यं सिद्धान्तेऽप्यूरीकार्यमित्येतदेव निदानमिति सूचयन्ननुमानप्रामाण्याभ्युपगमस्य वेदान्तानुगुण्यकृतत्वेन स्वातन्त्र्यकृतत्वाऽभावाद्वेदान्तप्रामाण्यबाधको न भवतीत्याशयेनाह - **किञ्चेति**। अथ ब्रह्मपराणां वेदान्तानामुपासनाविधावपि तात्पर्ये वाक्यभेदप्रसङ्ग इति तृतीयपूर्वपक्षनिराकरणपूर्वकं तेषामुभयत्रापि तात्पर्यमुपपादयति - **यत्र वाक्यानामित्यादिना**। **तज्ज्ञानविधिपरा अपि ज्ञायन्त** इत्यनेन वेदान्तानां ब्रह्मणि तात्पर्यं तत्प्रमाणप्रश्नमुखेन निरूपितुमुपक्रमते **वेदान्तवाक्यानामिति**।

ननु, उपक्रमादिलिङ्गनिर्णीततात्पर्येणाऽन्वयस्य सिद्धवद्धेतूकरणेनाऽत्राऽधिकरणे उपक्रमादिभिस्तात्पर्यनिर्णयोक्तिरसङ्गतेत्याशङ्क्याह - **तदिहेति**।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अज्ञानप्रभवं दुःखं ज्ञानं तस्य निवर्तकम्।
सर्ववेदान्तवाक्यानां श्रवणं तत्प्रवर्तकम्।।

श्रवणं नाम वाक्यानां वैदिकानां परात्परे।
उपक्रमादिभिर्लिङ्गैः शिवे तात्पर्यनिर्णयः।। इति

उपक्रमोपसंहारावेकं लिङ्गं वेदान्तशब्दानां ब्रह्मणि शिवे तात्पर्यनिर्णये। तत्र तात्पर्यं नाम तत्स्वरूपोपासनाविषयत्वम्।

यतोऽस्मिन्नधिकरणे समन्वयस्य सिद्धवद्धेतूकरणमुपक्रमादिलिङ्गानां तात्पर्यप्रसाधनं विना न सम्भवति, ततः शास्त्रेऽस्मिन्नीक्षत्यधिकरणं स्थालीपुलाकन्यायेन केषाञ्चिद्वाक्यानामुदाहरणे सर्वेषां वेदान्तवाक्यानां तात्पर्यं निर्णीयत इत्यर्थः। तत्प्रवर्तकमिति तस्य ज्ञानस्य प्रवर्तकमित्यर्थः।

ननु, उपक्रमादयः प्रमाणश्लोके सप्त परिगणिताः। कथं षड्विधं तात्पर्यलिङ्गमिति प्रसिद्धिरित्याशङ्क्याह - **उपक्रमे**ति। किं तत्तात्पर्यं यस्योपक्रमादिभिर्निर्णय इत्याशङ्क्याह - **तात्पर्यमि**ति। परशब्द इष्टवाची। **'ततस्तदालोकनतत्पराणामि'**त्यादिप्रयोगदर्शनात्। तदर्थरूपं वस्तु परमिष्टमस्येति तत्परं वाक्यम्। वाक्यस्येच्छाभावात्तद्वक्तुरर्थविवक्षारूपेच्छा तदीयत्वेनोपचर्यते।

ननु, वेदे स्वतन्त्रवक्तुरभावात्तस्येच्छा न सिद्ध्यतीति चेदुच्यते। कल्पादौ सकलवेदप्रवर्तकस्य शब्दब्रह्माधिष्ठातुः परमेश्वरस्य प्रत्येकमृग्वेदाद्यभिमानिनां देवताविशेषाणां चेच्छा प्रवाहाऽनादिन्यायसिद्धा अर्थविषयिणी विद्यत एव। यथोक्तं ग्रहैकत्वाधिकरणवार्तिके -

शब्दब्रह्मेति यच्चेदं शास्त्रं वेदाख्यमुच्यते।
तदप्यधिष्ठितं सर्वमेकेन परमात्मना।।

तथर्ग्वेदादयो वेदाः प्रोक्ता येऽपि पृथक्पृथक्।
भोग्यत्वेनात्मनां तेऽपि चैतन्यानुगताः सदा।।

तेषामन्तर्गतेच्छानां वाक्यार्थप्रतिपादने।
विवक्षा चाऽविवक्षा च ज्ञायते शब्दशक्तितः।।

विधिशक्त्या गृहीतं यत्तत्सर्वं हि विवक्षितम्।
तथैव तु परित्यक्तं व्याख्येयमविवक्षितम्।।

इति एतेन च यद्वाक्यं वक्त्रा यदर्थविवक्षया प्रणीतं, तद्वाक्यं तत्परमिति पर्यवस्यति। एतच्च लोके वक्तृविवक्षयाऽवगम्यते। वेदे न्यायेन। **तत्स्वरूपोपासनाविषयत्वमि**ति - तस्य ब्रह्मणः स्वरूपं चोपासना च ते

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उपक्रमोपसंहारौ - 'सदेव सौम्येदमग्र आसीत्' इत्युपक्रमः। 'तत्त्वमसि' इत्युपसंहारः। 'धातुः प्रसादान्महिमानमीशम्' इत्युपक्रमः। 'यः परः स महेश्वर' इत्युपसंहारः। एवमन्यत्रापि द्रष्टव्यम्।

'तत्त्वमसि', 'सर्वो वै रुद्रः', 'अम्बिकापतय उमापतये', 'यो वै रुद्रः स भगवान्, भूर्भुवः सुवः' इत्यभ्यासः।

अपूर्वता वेदेतरप्रमाणाप्राप्तता।

फलं ब्रह्मज्ञानम्।

अर्थवादो जगत्सृष्टिस्थितिप्रध्वंसादयः।

उपपत्तिर्विरोधाभावः सर्वज्ञतादिसंपत्तिर्वा।

एतैर्लिङ्गैर्ब्रह्मणि तात्पर्यमवगन्तव्यं वेदान्तवाक्यानाम्। न केवलं ब्रह्मपरा वेदान्ताः, किन्तु, 'आत्मा वा अरे द्रष्टव्य' इत्यादिषु तद्ज्ञानविधिपरा अपि ज्ञायन्ते। उभयपरत्वे वाक्यभेदप्रसङ्ग इति

विषयावेषामिति तत्स्वरूपोपासनाविषया वेदान्ताः। तेषां भावतत्त्वम्। **एवमन्यत्रापीति** - आनन्दमयाद्यधिकरणेषूदाहरिष्यमाणे विषयवाक्य इत्यर्थः। तत्त्वमसीति नवकृत्वो जीवशरीरकत्वाभ्यासः। **सर्वो वै रुद्रः।, पुरुषो वै रुद्रः सन्महः।, सर्वो ह्येष रुद्रः** इति सर्वात्मत्वाभ्यासः। **यो वै रुद्रः स भगवान्यश्च ब्रह्मे**त्यादिषु ब्रह्मविष्णुमहेश्वरादिपर्यायेषु प्रतिपर्यायं भगवच्छब्दोक्तकल्याणगुणवत्त्वाभ्यासः। **वेदेतरेति** - वेदग्रहणं तदुपजीविनां स्मृतिपुराणादीनामप्युपलक्षणम्। फलं ब्रह्मज्ञानमिति निरतिशयानन्दरूपब्रह्मसाक्षात्कार इत्यर्थः। अत्र **धातुः प्रसादान्महिमानमीशमि**त्युपक्रमोदाहरणमेवोदाहरणं भविष्यतीति पृथगुदाहरणं दर्शितम्।

अणोरणीयान्महतो महीयानात्मा गुहायां निहितोऽस्य जन्तोः।
तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम्।।

इतिमन्त्रस्याऽस्यायमर्थः – अणोरणुत्वेन प्रसिद्धात्, परमाण्वादेरप्यणीयानणुतरः। महतो गगनादेरपि महीयान्महत्तरः सर्वव्यापकत्वात्। एवम्भूतः परमेश्वरः अस्य जन्तोः प्राणिवर्गस्य हृदयगुहायां निहितः प्राणलिङ्गरूपेण वर्तते। तं महेश्वरमक्रतुं सकलकर्मास्पृष्टं, महिमानं महत्वशालिनं सर्वात्मत्वमहाविभूतिमन्तं, धातुः सकलजगद्धारकस्य लिङ्गाङ्गसङ्गेनोपासितस्य तस्यैव प्रसादाद्वीतशोकः विगतसांसारिकक्लेशः सन् पश्यति निरतिशयानन्दरूपं परमेश्वरं साक्षात्करोति परमसायुज्यमनुभवतीति।

एवं वेदान्तानां ब्रह्मणि तात्पर्यं प्रदश्यं तेषामुपासनाविधावपि तात्पर्यं प्रदर्शयितुमाह - **न केवलमिति। तज्ज्ञानविधिपरा अपि ज्ञायन्त** इति। अन्यथा उपासनाविधानाभावेन ब्रह्मप्राप्तिरूपफलासिद्धिप्रसङ्गादिति भावः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यदुक्तं तन्न। रूपप्रत्यायकेन चक्षुषा यथा द्रव्यस्याऽपि सिद्धिस्तथा विधिपरैरपि वेदान्तैर्ब्रह्मसिद्धिरिति नोभयपरत्वविरोधः। शाब्दं हि ब्रह्मज्ञानम्, तत् ब्रह्मवादिशब्दादेव प्राप्तम्। तद्विधिना किं प्रयोजनमिति चेत्, प्राप्तावपि मन्त्रादिष्विव विधेरविरोधः। यथा द्रव्यदेवतादिप्रकाशकेषु मन्त्रेष्वधीयमानेषु द्रव्यादिज्ञाने जातेऽपि पुनरनुष्ठानकाले मन्त्रैरनुस्मर्तव्यमिति प्रयोगविधिर्ज्ञानान्तरमनुष्ठापयति तथाऽत्रापि।

न चोत्पत्तिविनियोगाधिकारविधीनामभावात्प्रयोगविध्यसंभव इति शङ्कनीयम्। उत्पत्तिविधेरध्याहारेण सिद्धौ प्रकरणवशाच्छमादिकं विनियोजयन् आत्मानं पश्येदिति विनियोग-विधिरुपपद्यते। ततश्च रात्रिसत्रन्यायेन 'ज्ञात्वा देवं मुच्यते सर्वपाशैः' इत्याद्यर्थवादावगतमोक्षकामोऽधिकारी कल्पनीयो भवति। अतो मोक्षकामः शमादियुक्तो ब्रह्मज्ञानं संपादयेदिति प्रयोगविधिलाभः।

एवमुभयत्र तात्पर्ये प्रदर्शिते, सम्प्राप्तं तृतीयपूर्वपक्षमनुवदति - **उभयपरत्व** इति। ननु उभयत्र तात्पर्यस्य सत्त्वे वाक्यभेदस्याऽदोषत्वादयं पूर्वपक्षो न युज्यत इति चेन्न। वाक्यभेदप्रसक्तिरेव नास्तीति परिहर्तृमस्याऽनूदितत्वात्। एकदेशिमतेन परिहरति - **तन्ने**ति।

यथा रूपग्राहकं चक्षुस्तत्संयुक्तं द्रव्यमपि तत्संसर्गवशादाह्वयति तथा ज्ञानविधिपरा वेदान्तास्तज्ज्ञेयं ब्रह्माऽपि तत्संसृष्टं बोधयेयुः। न चोभयपरत्वे दोष इति शङ्क्यम्। स्वतन्त्रोभयपरत्वस्याऽनङ्गीकारादित्याशयेनाह - **रूपे**ति। **शमादिक**मिति - **शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवाऽऽत्मानं पश्येदि**ति विधिः। फलसाधनमात्मज्ञानं प्रति शमादीन्यङ्गत्वेन विनियोजयन्विनियोगविधिः सम्पद्यत इत्यर्थः। एवमेव **ज्ञात्वा देवं मुच्यते सर्वपाशै**रित्यर्थवादप्रतीतमोक्षकामाधिकारिकज्ञानविधिरुत्पत्तिविधिर्भवति। एवं च **पाशमोक्षकामः शमादियुक्तो वेदान्तैर्ब्रह्म जानीयादि**ति प्रयोगविधिरुपपद्यते। **रात्रिसत्रन्यायेने**ति - अष्टमे चिन्तितम्। सत्रकाण्डे प्रत्येकं श्रूयते। **प्रतितिष्ठन्ति ह वा एते, य एता रात्रीरुपयन्ति** इति। **ब्रह्मवर्चस्विनोऽन्नादा भवन्ति। य एता उपयन्ति।** इति च। तादृशे रात्रिसत्रे विश्वजिन्न्यायेन स्वर्गः फलत्वेन कल्पनीय इति प्राप्ते, ब्रूमः। अस्य रात्रिसत्रविधेः स्तावकेऽर्थवादे प्रतिष्ठा श्रुता। सा चाऽस्मिन्वाक्येऽत्यन्तमश्रुतात्स्वर्गात्प्रत्यासन्ना। तस्मात् **प्रतिष्ठाकामो रात्रिसत्रं कुर्या**दित्येवं प्रतिष्ठैव फलत्वेन कल्पनीया इति।

तेन प्रयोगविधिना प्राग्वेदान्तैः परोक्षब्रह्मज्ञाने स्वतो जातेऽपि पुनरपि वेदान्तकरणकमपरोक्षज्ञानं फलायाऽनुष्ठाप्यत इति युक्तमित्याह - **अत** इति। ज्ञाने विध्यसम्भवात्तत्र चतुर्विधविध्युपन्यासो न सङ्गच्छत

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ननु, ब्रह्मज्ञानस्य विधेयत्वमनुपपन्नम्, 'आत्मा वा अरे द्रष्टव्य' इत्यादौ नित्ये ब्रह्मणि निर्विकारे विशुद्धे चात्मनि न कर्मकारकभावो युज्यते, येन विधिसंभवः। उत्पत्तिप्राप्तिविकारसंस्काराणामत्राऽसंभवात्। न च, स्वतन्त्रफलाय सक्तुन्यायेन कर्मकारकतां परित्यज्य करणत्वविपरिणामेन आत्मना पश्येदिति विधातुं शक्यं, वैषम्यात्। तथा हि, क्रियाकृताऽतिशय्य भस्मीभावलक्षणस्य सक्तुषु संभवात् तेषु शब्दतः करणत्वेऽप्यर्थतः कर्मत्वमस्ति। न तस्याऽत्मनि संभवः। अतो वेदान्तानां न ब्रह्मज्ञानविधिपरत्वमिति चेत्, न।

आत्मनि कर्मत्वप्रयुक्तोत्पत्त्याद्यभावेऽपि कर्तृस्थमोक्षफलाय विध्युपपत्तेः। प्राप्ते कथं विधिरिति

इत्याशङ्कते - **नन्विति**। किमत्र स्वतन्त्रफलाय धात्वर्थेर्थकर्मरूपज्ञानविधिरभ्युपगम्यते ? उत कर्मकारकगतफलाय गुणकर्मरूपज्ञानविधिः? इति विकल्प्य आद्यं विधायकत्वाभिमतावाक्योदाहरणेन निराकरोति **आत्मा वा रे** इति। **आत्मा वा अरे द्रष्टव्यः।, आत्मानं पश्येदि**त्यादिवाक्येषु ज्ञानविधिमभ्युपगच्छता कर्मोपसर्जनक्रियाविधानमेवाऽभ्युपगन्तव्यम्। न स्वतन्त्रक्रियाविधानमित्याशयः। द्वितीयं निराकरोति - **नित्य** इति। इह कर्मोपसर्जनक्रियाविधानमपि नाऽभ्युपगन्तुं युज्यते। आत्मन्युत्पत्त्यादीनां क्रियाजन्यफलानामसम्भवेन तस्य विधेयक्रियाकर्मत्वासम्भवादित्याशयः। वेदिं करोतीत्यत्र वेद्या इवोत्पत्त्यसम्भवे हेतुः नित्य इति विशेषणम्। ब्रह्मणीति बृहत्वाद्व्यापकत्वेन नित्यप्राप्तत्वात् **पयो दोग्धी**त्यत्र पयस इव प्राप्तत्वासम्भवे हेतुगर्भविशेषणम्। **निर्विकार** इति। बर्हिर्लुनातीत्यत्र बर्हिष इव विकार्यत्वासम्भवे **व्रीहीन्प्रोक्षती**त्यत्र व्रीहीनामिव गुणाधानलक्षणसंस्कारासम्भवे च हेतुगर्भं विशेषणम्। विशुद्ध इति गृहं सम्मार्ष्टीत्यत्रेव शुद्ध्याधानलक्षणसंस्काराऽसम्भवे हेतुगर्भं विशेषणम्। ननु, सक्तुन्यायेन विपरीतो गुणप्रधानभावोऽस्तु। तथाच, **सक्तून् जुहोती**त्यत्र अघटमानं गुणकर्मत्वं परित्यज्य सक्तुभिरिति तृतीयाश्रयणेन क्रियाप्राधान्यमुपादायाऽर्थकर्मत्वमाश्रितम्। एवमिहाप्यस्त्वित्याशङ्क्याह - **वैषम्यादि**ति। होमकरणतया विवक्षितानामपि सक्तूनां प्रक्षेप्यत्वेनाऽर्थकर्मत्वापरित्यागादस्ति जुहोतेः सकर्मकत्वनिर्वाहः। आत्मानि कर्मत्वनिर्वाहकानामुत्पत्त्यादीनामसम्भवात्तथाऽत्राऽनिर्वाह इत्याशयः। **नेति** - होमेन सक्तूनां प्रक्षेप्यत्वेनेव ज्ञानेनाऽत्मनोऽवभास्यत्वेन व्यवहार्यत्वेन चार्थतः कर्मत्वमिहापि सम्भवतीति भावः। ननु, ज्ञानप्रसादितस्य परमेश्वरस्य मोक्षप्रदानेऽस्त्युपयोग इति सिद्धान्तदृष्ट्या गुणकर्मत्वमपि सिद्ध्यतीति चेत्सत्यम्। एवमिहैकदेशिमतेन समाहितत्वाददोषः। सफलत्वाद्विधेः सिद्धिमुपपादयति - **कर्तृस्थमोक्षफलाय विध्युपपत्ते**रिति। एतेन यत्परैः **विकार्यत्वे च तयोः पक्षयोर्मोक्षस्य ध्रुवमनित्यत्वं न हि दध्यादिविकार्यम् उत्पाद्यं वा घटादिनित्यं दृष्टं लोक** इत्यादिना वेदान्तानां विधिपरत्वं व्याहन्तुं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चेत्, प्राप्तिः पाक्षिकी नित्या वा? उभयथाऽपि नियमादिविधिः संभवति। ननु, तथा सति वेदान्तानां विधिपरत्वेन ब्रह्मपरत्वमनुपपन्नम्। यदुक्तं रूपप्रत्यायकेन चक्षुषा द्रव्यसिद्धिवद्विधिपरैरपि वेदान्तैर्ब्रह्मसिद्धिरिति, तदयुक्तम्।

चक्षुर्हि संप्रयोगे सति निरपेक्षमेव प्रतिवस्तु प्रमापकम्। न तथा शब्दः। किन्तु यत्र तात्पर्यं तत्र प्रमाणम्। तस्माद्वेदान्तानां ब्रह्मप्रमाणकत्वं ब्रह्मज्ञानविधायकत्वं च न संभवतीति चेन्न। समिधो यजतीत्यादीनां वाक्यानां पञ्चप्रयाजविधायकत्वं तदनुष्ठानक्रमविधायकत्वं चेत्युभयपरत्व-

---

यदकाण्डताण्डवमारचितं तत्सर्वं प्रकृते नित्ये निर्विकार इत्यादीना निर्धूतत्वात्कुणपमवलम्ब्य नीरधिनिस्तरणमनुकरोति।

यदपि ध्यानविधिनिरासाय परैरधिकं निगदितमन्त्राऽधिकरणे तदप्यशेषं वेदान्तार्थपरिष्कारे, ध्यानविधिपरिष्कारेऽस्माभिः प्रत्युक्तमिति तत एवावगन्तव्यमिति नेह। एकदेशिमतमेवमुपन्यस्येदं निराकृत्य वेदान्तानामुभयत्र तात्पर्यमुपपादयिष्यन् चक्षुर्दृष्टान्तमयुक्तमिति शङ्कते - **नन्विति**।

चक्षुर्हि सन्निकर्षवशात्सर्वमपि प्रमापयतीति युक्तं तस्य रूपे तत्संयुक्तद्रव्ये च प्रामाण्यम्। नैवं शब्दः, स्वस्य यत्र यत्र शक्तिरस्ति न तत्सर्वं प्रमापयति। किन्तु यत्र तात्पर्यं तदेवेति प्रकृते तादृशशब्द एव दृष्टान्तीकरणीयो नतु चक्षुरित्याशयः। शब्दमेव दृष्टान्तीकुर्वन्तसमाधत्ते - **नेति**।

ननु समिदादिवाक्यानां न तदनुष्ठानक्रमेपि तात्पर्यं, किन्तु केवलं तद्विधाय एव। तथापि तेषां पाठक्रमेण तदर्थानुष्ठानक्रमो लभ्यत इति नेदमेकस्योभयत्र तात्पर्यवत्वे समीचीनमुदाहरणमिति चेन्न। समिदादिवाक्यानि पाठक्रमेणाऽध्येतृणां तदर्थानुष्ठानक्रमं प्रत्याययन्त्वितीच्छया परमेश्वरेण क्रमविशेषेणोच्चारितानीति तेषां यथा तद्विधाने क्रमविशेषे चोभयत्र तात्पर्यमनिवार्यं, तथा प्रकृतेपीति सामञ्जस्यात्। अत एव शिवाराधने गन्धो लेपनीयः, धूपः प्रसरणीयः, पुष्पाणि विन्यासनीयानीति बृवन्तः प्रति नायं क्रमः, किन्तु गन्धो लेपनीयः, पुष्पाणि विन्यसनीयानि, धूपः प्रसारणीय इति प्रत्युक्तिरुपलभ्यते।

इह यदि क्रमेणोच्चारितानां विधिवाक्यानां तदनुष्ठानक्रमे तात्पर्यं न स्यात्, तर्हि तदभिमतक्रमनिषेधपूर्वकं क्रमान्तरोपदेशपरैर्वंविधप्रत्युक्तिर्न युज्येत। एवं वेदान्तवाक्यानां ब्रह्मणि विधौ च तात्पर्यनिर्णये एकदेश्युक्तदृष्टान्तं निरस्य स्वाभिमतशब्दरूपदृष्टान्तः समर्थितः। अथ तेषां वेदान्तकरणकज्ञानविधौ तात्पर्यमिति तन्मतं निरस्य तन्मूलकोपासनाविधौ तात्पर्यमिति स्वमतं समर्थयितुं तत्राऽनुपपत्तिमाशङ्कते - **नन्विति** - अत्रायं भावः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दर्शनाद्वेदान्तवाक्यानामपि ब्रह्मप्रमाणकत्वम्। ब्रह्मज्ञानं मोक्षोपकारकं प्रति विधायकत्वं च युक्तमेव।

ननु, ब्रह्मणि वेदवाक्यादेव ज्ञाते तत् ज्ञानविधि अप्रयोजनः। तत्प्रयोजनस्य पूर्वज्ञानादेव संभवादिति चेन्न।

वाक्येन परोक्षत्वेन ज्ञाते ब्रह्मणि तत्साक्षात्काराय ज्ञानविधेरुपपत्तेः। कथं भेद इति चेत्, यच्छब्दजन्यं न तत् साक्षात्कारहेतुः। किन्तु उपासनारूपं ज्ञानमेव। तथा च श्रूयते, 'ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात्', 'ज्ञाननिर्मथनादेव पाशं दहति पण्डितः' इत्यादिषु, 'ज्ञात्वा देवं मुच्यते सर्वपाशैः', 'ईशं तं ज्ञात्वा अमृता भवन्ति' इत्यादिषु च। तथाहि,

श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः।
ज्ञात्वा च सततं ध्येय एते दर्शनहेतवः।।

इत्यत्र श्रवणमननसंपन्नज्ञानाऽविनाभूतं निदिध्यासनं ब्रह्मणः साक्षात्कारे निमित्तमिति स्मर्यते। अत उपासनारूपज्ञानं मोक्षफलं विधीयते 'आत्मन्येवाऽत्मानं पश्येत', 'शम्भुराकाशमध्ये

~~~~~~

यदि वेदान्तकरणकं शब्दजं ब्रह्मज्ञानं मोक्षं जनयेत्तर्हि वेदान्तेभ्यः स्वतः प्राप्तस्य तस्यैव मोक्षजनकत्वसिद्धेस्तत्र विधिकल्पनं व्यर्थमेवेति। न खलु स्वतोऽशक्तं विधियोगेन शक्तिं लभत इति एतां शङ्कां निराकरोति - **नेति।** शाब्दज्ञानमात्रमूलकं यद् ज्ञानमत्यन्तचित्तैकाग्र्यसाध्यं तदेव मोक्षार्थमभ्युपगन्तव्यम्। न तु शाब्दज्ञानमात्रमिति भावः। स्वयं तथाभूतज्ञानानन्तरं विधेयं प्रदर्शयन् समादधाति - **वाक्येने**ति। यत्साक्षात्कारं जनयितुं शक्नुयाच्छाब्दज्ञानविलक्षणं तत्किमिति पृच्छति - **कथ**मिति। ध्यानोपासनादिशब्दवाच्यं निरन्तरस्मृतिसन्तानरूपं ज्ञानं तदित्याह - **यदि**ति। एतेन **'अहं ब्रह्मास्मी'**ति महावाक्यजन्यज्ञानेनैव कार्तार्थ्यं मन्वानाः परे परास्ताः। उपासनारूपमेव ज्ञानं वेदान्तेषु फलाय विधेयमित्युपासनावाचिपदविशेषघटितवाक्योदाहरणेन निरूपयति - **तथा च श्रूयत** इति। इत्यादिष्वित्यनेन **'परं पुरुषमभिध्यायीत।', 'निदिध्यासितव्यः'** इति ध्यानोपासनादिपदघटितानि फलयुक्तवाक्यानि गृह्यन्ते। एतेन फलवाक्येषु श्रुतानां ज्ञानसामान्यवाचिपदानां छागपशुन्यायेनोपासनारूपज्ञाने पर्यवसानमित्याशयेन तथाभूतानि वाक्यानि पृथगुदाहरति - **ज्ञात्वे**ति। उक्तार्थमुपबृंहणेन द्रढयति - **तथाही**ति। श्रवणेन जातमुपपत्त्यनुचिन्तनरूपेण मननेन स्थिरं च ज्ञानं श्रवणमननसम्पन्नज्ञानं, तेनाविनाभूतं निदिध्यासनं ध्यानम्। **अत** इति - मोक्षजनकसाक्षात्कारसाधनत्वादेव उपासनारूपं ज्ञानं मोक्षफलं विधीयते। ननु साक्षान्मोक्षसाधनत्वादित्याशयः। पूर्वं फलयुक्तान्युपासनावाक्यान्युदाहृतानि। इदानीं गुणयुक्तान्युदाहरति - **आत्मनी**ति।

CC-0. In Public Domain. Cuddalore Collection. TN.
~~~~~~

Digitization by eGangotri-South Center

ध्येयः', 'तज्जलानिति शान्त उपासीत' इति, 'प्राचीनयोग्योपास्व' इत्यादिषु च। तथा, 'ब्रह्मविदाप्नोति परम्' इत्यादिषु ब्रह्मस्वरूपोपासनातत्फलादिकमुपदिश्यते। अन्यथा सत्यत्वादिविशिष्टब्रह्मणा सह कथं सकलकामावाप्तिः फलं, तादृशब्रह्मसाक्षात्करणं च सिद्ध्यति। तस्मात् 'सत्यं ज्ञानमनन्तं ब्रह्म', 'आनन्दो ब्रह्म', 'आकाशशरीरं ब्रह्म', 'सत्यात्म प्राणारामं मन आनन्दं शान्तिसमृद्धममृतम्', 'ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्। ऊर्ध्वरेतं विरूपाक्षम्' इति सत्यज्ञानानन्दरूपं स्वात्मारामुपशान्तसकलोपद्रवकलङ्कं सकलमङ्गलात्मकं परमशक्त्याऽविनाभूतया शबलरूपत्वेन कृष्णपिङ्गलं विरूपाक्षं त्रिलोचनं ब्रह्म उपक्रमादितात्पर्यलिङ्गैर्निरूप्यते। 'यो वेद निहितं गुहायाम्'

शरीरे हृदयाकाशमध्य इत्यर्थः। परमेश्वरस्य प्राणलिङ्गरूपेण तत्रैव विद्यमानत्वात्। तत एव हंसोपनिषदि **लिङ्गे सुषुप्तिरिति** हृदयाकाशमध्यवर्तिनः शिवस्य लिङ्गरूपत्वमुक्तम्। **तदोकोग्रज्वलनमित्यादिसूत्रे हार्दानुगृहीतः शताधिकयेति** सूत्रकारेण च हृदयगुहावर्तिप्राणलिङ्गोपासनापराणामेव तदनुग्रहेण ब्रह्मनाड्या निष्क्रमणं निर्धारितम्। अथ ब्रह्मस्वरूपं तदुपासनाप्रकारं तत्फलविशेषं च निर्धारयन्तीं श्रुतिमुदाहरति - **तथेति**। **'ब्रह्मविदाप्नोति परमि'**त्युपक्रम्य किं तद्ब्रह्म? कथं तद्वेदनीयम्? तद्वेदनेन प्राप्यं च फलं कीदृग्? इत्याकाङ्क्षायां तत् त्रितयनिरूपणार्थमृक्सद्भावं तदेषाभ्युक्तेति प्रतिज्ञाय सा ऋगुदाहृता। **'सत्यं ज्ञानमनन्तं ब्रह्म।', 'यो वेदनिहितं गुहायां परमे व्योमन्।', 'सोऽश्नुते सर्वान्कामान्त्सह ब्रह्मणा विपश्चिते'**ति। अत्र प्रथमपादेन ब्रह्मस्वरूपमुक्तम्। द्वितीयपादेन प्राणलिङ्गरूपतदुपासनाप्रकारः। तृतीयपादेन निरतिशयानन्दरूपं फलमुक्तम्। चतुर्थपादेन ब्रह्मविद्यया तत्सारूप्यपूर्वकसायुज्यप्राप्तिः। अत्र ब्रह्मणा सहेत्यनेन सायुज्यमेव निगद्यते। अत्र यत्परैर्न्यायरक्षामण्यादौ विपरीतमुक्तं तदखिलमस्माभिर्ब्रह्मपथे प्रत्युक्तमिति नेह पुनः। ननु, वेदान्तेषूपासनाविधयस्तत्र तत्र सन्तु नाम, तेषां ब्रह्मण्येव प्रामाण्यं तात्पर्यलिङ्गसद्भावान्नोपासनाविधिष्वित्याशङ्क्य तेष्वपि तात्पर्यलिङ्गसद्भावमुपपादयति - **अन्यथेति**। यद्युपासना न विधीयेरन् तथोक्तफलवाप्तिस्तदुपयोगि-ब्रह्मसाक्षात्कारसिद्धिश्च न स्यात्। तदभावे वेदान्तैरखिलैरपि महातात्पर्येण ब्रह्मणः प्रतिपादनमपि वैयर्थ्यमेवापद्येत। तत्प्राप्त्युपायोपदेशाभावे ब्रह्मणः प्रतिपादनस्य विफलत्वात्। तस्माद्ब्रह्मपरवाक्यानां पुरुषार्थप्रदत्वं तत्प्राप्त्युपायभूतोपासनाविधानं विना न सिद्ध्यतीत्युपपत्तिरूपं तात्पर्यलिङ्गमुपासनाविधिष्वप्यस्तीति भावः। एवं वेदान्तानां ब्रह्मणि विधौ च तात्पर्यसत्त्वादुभयत्राऽपि प्रामाण्यं सिद्धमित्युपसंहरन् ब्रह्मपरवाक्यान्युपासना-विधिपरवाक्यानि च विविच्योदाहरति - **सत्यं ज्ञानमनन्तं ब्रह्मे**त्यादिना। उदाहृतब्रह्मपरवाक्येषु सिद्धं रूपं विवृणोति - **सत्यज्ञाने**त्यादिना। **उपक्रमेति** - उपक्रमादितात्पर्यलिङ्गानि येषां तैर्वेदान्तवाक्यैर्निरूप्यते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इति 'प्राचीनयोग्योपास्व' इति ज्ञानाविनाभूतं तदुपासनं च विधीयते। 'सर्वान् कामान्' इत्यादिषु सकलकामावाप्तिर्ब्रह्मणा सहोपासकानामवगम्यते। अतो निष्काम निजधर्मोपेतश्चीर्णशिरोव्रतो निषिद्धकाम्यकर्मरहितो यथाश्रुतिस्मृतिचोदितकर्मानुष्ठानसंपन्नचित्तशुद्धिः शमाद्यनुगृहीतपरमशिव-भक्तिभावित एव मुमुक्षुः श्रुतिसारेभ्यः शिवाभिधेयं परं ब्रह्म विदित्वा तदुपासीतेति ज्ञानोपासना-विधिरुपपन्नः।

अत्र शिवोपपदग्रहणं विरूपाक्षस्य ब्रह्मणः परमविशुद्धिमङ्गलभाजनत्वान्मुमुक्षूणामु-पासनैकविषयत्वद्योतनार्थम्। तथाऽथर्वशिखायां 'शिव एको ध्येयः शिवङ्करः सर्वमन्यत्परित्यज्य' इति श्रूयते शिवशब्दवाच्यस्य वस्तुन एव ध्येयत्वमिति। अन्यथा कथं संसारनिवृत्तिः? निरस्तसमस्त-दोषकलङ्कनिरतिशयमङ्गलाधारत्वं हि शिवत्वं, यद्विज्ञानान्मोक्षरूपं फलमुच्यते।

उक्तरूपं परंब्रह्म निर्धार्यत इत्यर्थः। ज्ञानाविनाभूतं श्रवणमननसम्पन्नज्ञानसहितमित्यर्थः। **सकलकामावाप्तिर्ब्रह्मणा सहोपासकानामिति**। उपासकानामेव ब्रह्मणः सारूप्यपूर्वकसायुज्यावाप्तिरिति वेदान्तानामुपासनाविधिषु तात्पर्यलिङ्गसद्भावं पूर्वोक्तदृढीकरणाय स्मारयित्वा ब्रह्मपरेषु वेदान्तेषूपासनाविधिरप्युपपन्न इत्युपसंहरन्नुपासनाविधौ यावदुक्तविशेषणविशिष्टमधिकारिणं दर्शयति - **अत** इत्यादिना। चीर्णशिरोव्रत इति - **'व्रतमेतत्पाशुपतं तत्समाचरेदिति, तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णमि**त्यादिश्रुतिभिः।

व्रतं पाशुपतं चीर्णं यैर्द्विजैरादरेण तु।
तेषामेवोपदेष्टव्यमिति वेदानुशासनम्॥

इति सूतसंहितावचनेन चाऽनाचरितपाशुपतव्रतानां ब्रह्मविद्यायामनधिकारावगमाच्च पाशुपतदीक्षासम्पन्न एवाधिकरीति भावः। **ज्ञानोपासनाविधिरि**ति - ज्ञानाविनाभूतोपासनाविधिरित्यर्थः। उपासनायाः श्रवणमननसम्पन्नज्ञानाभावोक्त्या उपासनाविध्यपेक्षितज्ञानोत्पत्त्यर्थे श्रवणे मनने च स्वतः प्राप्तिसम्भवेन तस्य विध्यनपेक्षा सूचिता। शिवाभिधेयं परं ब्रह्मेति भाष्यकारः शिवोपपदग्रहणं कृत्वा **स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुरि**ति भाष्यलक्षणानुसारेण - **अत्रे**ति विवृणोति।

संसारमलनिवृत्तिरूपा परमविशुद्धिः सत्यसंकल्पत्वादिमङ्गलगुणवत्त्वं च मुमुक्षुणा प्रेप्सितम्। तदुभयमपि शिवशब्दार्थ इति प्राग्वायुसंहितावचनोदाहरणेन दर्शितम्। तस्मात्तत्क्रतुन्यायेन मुमुक्षोः शिव एवोपास्य इत्यर्थे श्रुतिमुदाहरति - **तथे**ति। एतेनाऽनामकतत्त्वपराण्यन्यनामदेवतापराणि च भाष्यणि निर्धूतानि। तथाभूतस्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः।

तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यति।। इति,

'शिव एको ध्येयः शिवङ्करः सर्वमन्यत्परित्यज्य' इति शिवव्यतिरिक्तस्य मुमुक्षूणां ध्येयत्वं परिसङ्ख्यायते। अतः शिव एव परं ब्रह्म मोक्षकामैर्ध्यातव्यो ज्ञातव्यश्चेति। अतस्तात्पर्यलिङ्गसमन्वयेन ब्रह्मपरा वेदान्तास्तदुपासनापराश्चेत्यविरोधः।

।। इति समन्वयाधिकरणम् ।।

***

शिवस्योपासनां विना मुक्तिर्न सम्भवतीत्याह - **अन्यथेति**। प्रकृतार्थसाधिकां श्रुतिमुदाहरति - **यदेति**। अत्र यदापदं यद्यर्थकम्। एवं च शिवोपासनां विना मुक्तेरसम्भवात्, देवतान्तरेषु मुमुक्षुप्रेप्सितस्य नित्यसिद्धस्य शिवत्वस्याऽभावाच्च सकलेतरपरित्यागेन मुमुक्षुभिः शिव एव ध्येय इति निर्धारयन्त्यथर्वशिखाश्रुतिः सर्वोपपन्नार्थेत्याह - **शिव एक** इति। तस्मान्मोक्षार्थिभिः शिव एव ध्यातव्यः साक्षात्कर्तव्यश्चेत्याह - **अतः शिव एवेति**। परमप्रकृतमुपसंहरति - **अत** इति।

卐 卐 卐 卐 卐 卐 卐 卐

शास्त्रारम्भसाधिकेयं चतुस्सूत्री शुद्धाद्वैतिनां न सङ्गच्छते। तत्पक्षे विषयप्रयोजनयोरनुपलम्भात्। तथा च सामान्येन ज्ञातो विशिष्य न ज्ञातो हि विषयः। केवलमज्ञाते, विशिष्य ज्ञाते च जिज्ञासाऽनुपपत्तेः। एवं च निर्विशेषस्य ब्रह्मणः सामान्येनाऽज्ञातत्वाद्विशिष्य ज्ञातुमयुक्तत्वाच्च तस्मिन् जिज्ञासाऽनुपपन्ना।

किञ्च विषयः, किं ब्रह्म ? उत भेदमिथ्यात्वम् ? आहोस्विज्जीवब्रह्मणोरैक्यम् ? न प्रथमः, ब्रह्मणो वेद्यत्वानभ्युपगमात्। वेद्यत्वे घटादेरिवाऽननुभूतित्वप्रसङ्गात्। व्यावहारिकं वेद्यत्वमस्तीति चेद्घटस्याऽपि वेद्यत्वं व्यावहारिकमिति तद्वदेवाननुभूतित्वप्रसङ्गो दुर्वारः।

न द्वितीयः, दृश्यत्वादिना लिङ्गेन भेदमिथ्यात्वमभिमन्यमानस्य शास्त्रानर्थक्यप्रसङ्गात्। तत्तद्धर्मिग्राहक-प्रत्यक्षादिप्रमाणविरुद्धस्य प्रपञ्चमिथ्यात्वस्य यूपादित्यैक्यस्येव शास्त्रेण प्रतिपादनायोगात् शास्त्रस्य निर्विषयत्वं स्यात्।

तृतीयश्च कल्पोऽनुपपन्नः। ब्रह्मणो वेद्यत्वप्रसङ्गात्। ब्रह्मशब्देन ब्रह्मण्यवबोधिते कथं तस्य जीवस्य चैक्यं वक्तुं शक्यते? नहि जीव एक इत्युक्ते जीवब्रह्मणोरैक्यं सिद्ध्यति, घटः एकः इत्युक्ते घटपटैक्यवत्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यद्यैक्योपदेशवाक्येषु **अयमात्मा ब्रह्मे**त्यादिषु शब्दबोध्यत्वं सोढव्यं, तर्हि प्राधान्येन ब्रह्मण एव शास्त्रप्रतिपाद्यत्वं किमिति नाऽभ्युपगम्यते?

तथा प्रयोजनं च न घटते। तथाहि, प्रयोजनं द्विविधं शास्त्रस्य। उपायभूतमवान्तरप्रयोजनं, तत्साध्यं परमप्रयोजनं चेति। तत्रेदानीमुपजायमानं वाक्यजन्यज्ञानमनिवर्तकमित्यविगीतम्। वसिष्ठपराशरकृष्णद्वैपायनादीनामप्यनुत्पन्नं ज्ञानमन्येषामुत्पत्स्यत इत्यत्यन्तासम्भावितम्। तेषामुत्पन्नं चेद्भेदप्रतिभासो न स्यात्। स निवर्तिष्यत इति चेत्तत एव तदभिन्नानामन्येषामपि निवर्तिष्यत इति न शास्त्रमारम्भणीयं स्यात्।

परमप्रयोजनं च न सिध्यति। ज्ञातृज्ञेयभेदस्य सत्यस्य निवृत्तेरसम्भावितत्वात्।

किञ्च तत्पक्षे प्रथमसूत्रं न सङ्गच्छते। तैर्जीवब्रह्मणोरैक्यस्य शास्त्रविषयतया अङ्गीकृतत्वेन ब्रह्मजिज्ञासापादस्याऽसङ्गतत्वात्। ब्रह्मणो जिज्ञास्यत्वं हि शब्दादवगम्यते, न जीवब्रह्मणोरैक्यस्य। यथा धर्मजिज्ञासापदं धर्ममात्रस्य जिज्ञास्यतां वक्ति, नतु धर्माधर्मयोरैक्यस्य जिज्ञास्यत्वं तद्वदेव हि ब्रह्मजिज्ञासापदम्।

अपि च, लक्षणसूत्रं द्वितीयमपि निर्विशेषपक्षे विरुद्धम्। तथाहि, जगत्कारणत्वलक्षणविशेषो लक्ष्यस्य निर्विशेषत्वं न सहते, सार्वज्ञ्यादिगुणाक्षेपकत्वात्तस्य। आक्षिप्तमपि सार्वज्ञ्यादिकं वस्तुमात्रोपलक्षणमितिचेन्न। अज्ञत्वादेरपि वस्तुमात्रोपलक्षकत्वेन सर्वज्ञत्वादेरनुपयोगात्। अतो युक्तमुक्तम्।

तथा तृतीयं सूत्रमपि न घटते। निर्विशेषवस्तुनि तात्पर्यविषये सति कारणत्वाक्षिप्तसर्वज्ञत्वादिसमर्थनं क्वोपयुज्यते ? सर्वज्ञत्वसमर्थन एव हि तत्सूत्रस्य प्रवृत्तिः। प्रसङ्गादपि तत्समर्थनं न न्याय्यम्, निर्विशेषत्वविरोधात्।

एवं चतुर्थं च सूत्रं न सङ्गच्छते। अत्र हि वेदान्तवाक्यानां भ्रमनिवर्तकवाक्यार्थज्ञानजनकतया प्रयोजनपर्यवसायित्वमुक्तम्। न तद्युक्तम्। वाक्यार्थज्ञानमात्रेण बन्धनिवृत्तेः शास्त्रप्रत्यक्षविरोधविध्वस्तत्वात्। विस्तरस्तु व्यासपथे द्रष्टव्य इति ततो युक्तमुक्तम्।

अथ शिवेतरदेवतापराणि पाञ्चरात्रभागवतादितान्त्रिकाणां भाष्याणि यानि, तान्यपि श्रुतिसूत्रविरुद्धानीति व्यासपथे निरूपितानीति नेह पुनः।

ततश्च श्रीकराभिधं यद्भाष्यं तदपि न समञ्जसम्। तथाहि, तत्र सिद्धान्तो हि भेदाभेदः परस्परविरुद्धः। तथा ब्रह्मापि सगुणनिर्गुणम्। जीवश्च खद्योतवत्प्रकाशाप्रकाशरूप इत्यादिनाऽन्योन्यविरुद्धसर्वपदार्थबन्धुरत्वादबहुकर्तृकत्वादतिनवीनत्वादपभ्रंशनिर्भरगर्भत्वाच्चेत्यलमनर्हकृतिगर्हणेन।

।। इति समन्वयाधिकरणम् ।।

***

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ ईक्षत्यधिकरणम् ५

उक्तस्य ब्रह्मलक्षणस्य प्रधानेऽतिव्याप्तिमाशङ्क्याह -

ईक्षतेर्नाऽशब्दम् ।।१-१-५।।

छान्दोग्ये श्रूयतेऽस्य विषयः, 'सदेव सोम्येदमग्र आसीदेकमेवाऽद्वितीयम्।', 'तदैक्षत बहुस्यां प्रजायेय।' इत्यादि।

इह पूर्वभावितया सकलस्य प्रपञ्चस्य कारणत्वेन श्रूयमाणं सदिति वस्तु ब्रह्म प्रधानं वेति सन्देहः।

प्रधानस्यैव जगत्कारणत्वं युक्तम्, 'अजामेकां लोहिकशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम्' इति श्रुत्यन्तरे श्रवणात्। अत्र हि, बहुप्रजाजनकत्वं लोहितादिवर्णानुमितरजःसत्व-तमोरूपायाः साङ्ख्यप्रकृतेरवगम्यते। तदानुगुण्येनात्माऽपि सच्छब्दवाच्यं जगत्कारणं प्रधानमेव।

अथ ईक्षत्यधिकरणम्

पूर्वस्मिन्नधिकरणे वेदान्तानामखिलानां तात्पर्यलिङ्गयुक्ततया ब्रह्मणि प्रामाण्यं निरूपितम्। तदसङ्गतम्। सद्विद्यायाः प्रधानपरत्वादिति समन्वयाधिकरणेनाक्षेपसङ्गतिरिह यद्यपि प्रसजति, तथापीयं प्रकृताधिकरणपूर्वपक्ष-प्रदर्शनेनैव व्यक्तीभविष्यतीत्येनामपहाय तत्फलरूपां प्रमाणेन लक्षणे प्रदर्शिते ततस्तत्परीक्षायाः कर्तव्यतया-ऽवसरलक्षणामतिव्याप्तमिदं लक्षणमसिद्धमित्याक्षेपरूपां सङ्गतिं दर्शयन्नुत्तराधिकरणमवतारयति - **उक्तस्येति**।

आत्मपुरुषशिवशम्भ्वादिपदयुक्तकारणवाक्यानां सत्तासामान्यवाचिसत्पदयुक्तसद्विद्याया इव पूर्वपक्षे प्रधानपरत्वसाधकत्वाऽभावेन सद्विद्यैवाऽस्याऽधिकरणस्य विषयः, न सर्वाणि कारणवाक्यानीत्याशयेनाह - **छान्दोग्य** इति। ईक्षणस्य मुख्यत्वगौणत्वे संशयबीजमित्यभिप्रेत्य संशयं दर्शयति - **इहेति**। **लोहितादिवर्णानुमितेति** - अनुमितशब्दोऽत्र लक्षितपरः। सुखदुःखमोहात्मकतया अनुमेयसत्त्वरजस्तमोमयस्य जगतस्तथाविधेनैव कारणेन भवितव्यमित्युदाहृतश्रुतेः प्रधानवत्त्वसिद्ध्यनुकूलयुक्तिरप्यनेन सूचिता **साङ्ख्यप्रकृतेरिति** - साङ्ख्यसम्मताया युक्तिकल्पितायाः प्रकृतेरित्यर्थः। **तदानुगुण्येनेति** - साङ्ख्याः किल अचेतना प्रकृतिश्चेतनाधिष्ठिता जगत्सृष्ट्यादिव्यापारे स्वयमेव प्रवर्तते। सैव च बन्धमोक्षहेतुरिति ब्रुवाणाः स्वानुमानसिद्धां प्रकृतिं कारणवाक्यान्यनुवदन्तीति कल्पयन्ति। तदानुगुण्यं सद्विद्यायां लक्ष्यते। तथा च मृत्पिण्डाद्यचेतनदृष्टान्तास्तावदचेतनकारणत्वस्यानुगुणाः। **तत्तेजोऽसृजतेति** सृष्टौ स्वातन्त्र्यप्रतिपादनं चेतनाधिष्ठितं तदचेतनं कारणमिति कल्पनस्याऽनुगुणम्। चेतनाचेतनशुकनिबन्धनदृष्टान्तपूर्वकं **प्राणबन्धनं हि सोम्य मन** इति, **तावदेव चिरं यावन्न विमोक्ष्य** इति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

रजःसत्त्वयोगादस्य क्रियाज्ञानशक्तिसंबन्धोऽपि युज्यते, येन जगत्कारणत्वसिद्धिः। अचेतनस्य प्रधानस्य जगदाकारपरिणामो युक्तो, न चेतनस्य परमेश्वरस्य कूटस्थस्य। कारणविकृतिरूपत्वात्परिणामस्य। ततो न्यायतः श्रुत्या च प्रधानमेव जगत्कारणं सत्पदवाच्यमिति प्राप्ते ब्रूमः -

अशब्दमानुमानिकं प्रधानं न जगत्कारणं सच्छब्दवाच्यं वस्तु, अपि तु ब्रह्मैव चेतनमीक्षतिश्रवणात् 'तदैक्षत बहुस्यां प्रजायेय' इति न ह्यचेतने प्रधाने चेतनधर्म ईक्षतिः संभवति।

यदुक्तं बह्वीं प्रजां जनयन्तीमिति श्रवणात्साङ्ख्यप्रकृतेरत्र जगत्कारणत्वमिति, तदसङ्गतम्। 'चमसवदविशेषाद्' इति सूत्रे हि परमेश्वरकारणिकाया एव प्रकृतेर्बहुप्रजाजनकत्वमित्युपपादयिष्यामः।

च तदेवाऽचेतनं पुरुषस्य बन्धमोक्षयोर्हेतुरिति कल्पनानुगुणं चेत्याशयः। ननु, चेतनानधिष्ठितस्याऽचेतनस्य क्वचिदपि प्रवृत्तेरसम्भवादचेतनस्य पञ्चकृत्यानुगुणसङ्कल्पवत्त्वरूपं तत्कर्तृत्वं न सम्भवतीति कथं लक्षणस्याऽतिव्याप्तिरित्याशङ्क्याऽऽह - **रजःसत्त्वे**ति। अत्रेदं बोध्यम्। लघुः सत्त्वगुणः प्रकाशकार्यः। चलो रजोगुणः प्रवर्तनकार्यः। गुरुस्तमो गुणो नियमनकार्यः। एष्वक्रियत्वात्प्रकाशाख्यज्ञानवृत्तिरूपकार्यजनने स्वयमप्रवर्तमानं सत्त्वं चलो रजोगुणस्तत्र प्रवर्तयति। तच्च गुरुणा तमसा नियम्यमानं भोजकादृष्टमनुसृत्य कस्यचिदेवाऽर्थस्य प्रकाशे प्रवर्तयति। न सर्वत्र। स्वयं च रजोगुणश्चलस्वभावोऽपि तमसा नियम्यमानः क्वचिदेव व्याप्रियते। एवं सत्त्वरजोवृत्तितया त्रिगुणात्मकप्रकृतिधर्मयोरेव ज्ञातृत्वकर्तृत्वयोर्विवेकाऽग्रहणे चेतनधर्मत्वव्यवहारः। एवं च स्वाभाविकज्ञातृत्वकर्तृत्वयुक्तायाः प्रकृतेः पञ्चकृत्यानुकूलसङ्कल्पवत्त्वरूपं निमित्तत्वं जगदाकारेण परिणामक्रियारूपमुपादानत्वं चोपपद्यत इति विद्यत एव तत्र लक्षणस्याऽतिव्याप्तिरिति।

न च चेतनानधिष्ठितस्याऽचेतनस्य स्वयमेव कार्ये प्रवृत्तिर्नोपपद्यत इति वाच्यम्। वत्सविवृद्ध्यर्थमूधस्थपयसः स्वयमेव क्षरणदर्शनेन तद्वत्प्रकृतेरपि पुरुषस्य भोगापवर्गार्थं कार्ये प्रवृत्त्युपपत्तेः। **न्यायत** इति - सुखदुःखमोहात्मकस्य जगतस्तद्धेतुभूतसत्त्वरजस्तमोरूपगुणत्रयात्मकप्रकृतेः कार्यानुरूप्यमचेतनमृत्पिण्डादिदृष्टान्तानुगुण्यं कार्यलिङ्गेन, कारणानुमानप्रदर्शनानुगुण्यं परमेश्वरस्य परिणामित्वासम्भवश्च न्यायः। **श्रुतितः - अजामेकामि**त्यादिकाया इत्यर्थः।

सूत्रगतमशब्दपदं पक्षभूतप्रधानपरतया योजयन्तद्व्याचष्टे - **अशब्दमानुमानिकमि**ति। **अशब्दमि**ति नञः पर्युदासार्थत्वस्य मत्त्वर्थीयाच्प्रत्ययान्तत्वस्य चाश्रयणेन शब्देतरानुमानप्रमाणवत्त्वमुच्यते। निषेध्यमध्याहृत्य साध्यं दर्शयति न जगत्कारणं सत्पदवाच्यं वस्त्विवति, अपि तु ब्रह्मैव चेतनमिति - पर्यवसानलब्धार्थमाह। ईक्षतिपदं **इक्स्तिपौ धातुनिर्देश** इति विहितधातुनिर्देशकतिप्प्रत्यायान्तमीक्षिधातुपरमिति विवृणोति - **ईक्षतिश्रवणादि**ति। ननु, सत्त्वगुणवृत्तिविशेषरूपमीक्षणं प्रधान एव सम्भवाद्युज्यत इत्याशङ्क्य परिहरति - **नही**ति। सत्त्ववृत्तेर्जडपरिणामरूपत्त्वेन तस्याः स्वयं चिद्रूपत्वं न सिद्ध्यति। किन्तु स्वच्छतया चित्प्रतिबिम्बग्राहकत्वेन ज्ञानव्यपदेशस्तत्र गौण इति भावः। पूर्ववाद्युदाहृतश्रुतिं वक्ष्यमाणपरिहारसारांशेन सङ्गमयति - **यदुक्तमि**ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

रजःसत्त्वरूपतया क्रियाज्ञानशक्तिसंबन्धः प्रधानस्येति यदुक्तं तदयुक्तम्। त्रिगुणात्मिकायाः प्रकृतेस्तमःपार्थक्येन रजःसत्त्वयोगाऽभावात्। न च तमस्यभिभूते रजःसत्त्वयोरुद्रेके ज्ञानक्रियासंबन्धः प्रधानस्येति वाच्यम्। सत्त्वरजस्तमसां साम्यावस्था प्रकृतिरित्यङ्गीकारात्।

कूटस्थस्य परमेश्वरस्य जगदाकारेण परिणामो विकरणे हेतुरिति यदभाणि, तदज्ञानविलसितम्। नामरूपविभागानर्हसूक्ष्मचिदचिच्छक्तिविशिष्टस्य परमेश्वरस्य कारणत्वं, नामरूपविभागार्हस्थूलचिद-चिच्छक्तिविशिष्टस्य कार्यत्वमिति वदतामस्माकं तत्प्रसङ्गाऽभावात्।

ननु, 'सदेव सोम्येदमग्र आसीदेकमेवाऽद्वितीयम्' इत्यादिना सद्रूपं वस्तु निर्विशेषमेवा-ऽवधारणादवगम्यते। कारणावस्थमेतत्कथं सूक्ष्मप्रपञ्चविशिष्टमित्युच्यत इति चेन्न। सदेवेत्यवधारणेन न विशेषनिषेधः, किन्त्वसत्कारणत्वनिषेधः। 'असद्वा इदमग्र आसीत्, ततो वै सदजायत' इति श्रवणादसत्कारणत्वस्य भ्रान्तिप्रसक्तिसत्वात्।

किञ्च, 'सदेव सोम्येदमग्र आसीदेकमेवाऽद्वितीयम्' इत्यत्र कथं निर्विशेषत्वं ब्रह्मणः?

क्रियाज्ञानशक्तियोगात्प्रकृतेरुपादानत्वं पञ्चकृत्यनिर्वाहकत्वं चोपपद्यत इति यदुक्तं तदनूद्य निराकरोति **रज** इति - **त्रिगुणात्मिकाया** इति - अत्राऽयं भावः। मृत्पिण्डकुलालयोः क्रियाज्ञानव्यक्त्यभावे घटनिवृत्तेरदर्शनेन केवलशक्त्यात्मना क्रियाज्ञानयोगस्योपादानकर्तृत्वनिर्वाहकत्वं न सम्भवति। न च व्यक्त्यात्मना प्रकृतेः क्रियाज्ञानयोगमुपपाद्य सर्वनिर्वाहकत्वमूरीक्रियत इति वाच्यम्। तमो विना केवलं रजस्सत्वयोः प्रकृता वुद्रेकानङ्गीकारेण तदुपपादनस्याऽशक्यत्वात्। तदङ्गीक्रियत इत्याशङ्क्य परिहरति - **न चेति। तमसीति** - सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः। वैषम्यावस्था महदहङ्कारादिविकृतिरिति साङ्ख्या अभ्युपगच्छन्ति। तद्वैपरीत्येन प्रकृतेः कारणत्वाङ्गीकारस्याऽयुक्तत्वादित्याशयः।

अथ परमेश्वरस्य परिणामित्वाऽसम्भवेन जगदुपादानत्वं न सिद्ध्यतीति परोक्तदोषं प्रकृत्यधिकरण-वक्ष्यमाणन्यायप्रदर्शनेन परिहरति - **कूटस्थस्येति**। सद्विद्याप्रतिपाद्यमुपादानत्वं शक्तिद्वारकमपि पारमेश्वरमेवा-ऽवगन्तव्यमीक्षतिलिङ्गानुरोधादिति हृदयम्। ननु, भवता ब्रह्मणः स्थूलसूक्ष्मचिदचिच्छक्तिविशिष्टत्वमभ्युपेत्य सद्विद्यागतसत्पदवाच्यत्वं प्रसाद्ध्यते, तन्न घटते। सकलभेदवस्तु प्रत्याख्यानपरसदेवेत्यवधारणविरोधात्। तदनुरोधेन तस्याऽखण्डविशेष्यमात्रपरताया अवश्याङ्गी करणीयत्वादिति तटस्थः शङ्कते - **नन्विति**। इह तावत्सदेवेत्यवधारणविरोधो न विद्यते। तस्य श्रुत्यन्तरेष्वापाततः प्रतिपन्नासत्कारणत्वनिषेधमात्रपरत्वादित्याह - **सदेवेति**।

ननु सदिति पदेनैवाऽसत्कारणत्वनिषेधो लभ्यते, पुनः किमवधारणेन फलमित्याशङ्क्याह - **किञ्चेति**। अत्राऽयमाशयः। अत्रैव वाक्ये आसीदिति सत्तारूपक्रियाविशेषस्य, अग्र इति कालविशेषस्य च श्रवणादवधारणेन

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

आसीदिति हि क्रियाविशेषः। अग्र इति हि कालविशेषः। एकमेवेत्यवधारणमधिष्ठात्रन्तरनिषेधपरम्। अद्वितीयमिति जगदुपादानत्वमुच्यते। अत एव सर्वज्ञमनन्तशक्तिविशिष्टं च। कथं सर्वज्ञत्वसर्वशक्तित्व-विशेषमन्तरेण जगदुभयकारणत्वं ब्रह्मणो भवति? अथवा प्रकृतिप्रत्ययात्मकस्य सत्पदस्य नैकवस्तुपरत्वं युक्तम्। प्रकृत्या प्रत्ययेन च सत्पदस्य वस्तुद्वयप्रतिपादनपरत्वात्। तथाऽभियुक्तसूक्तिः,

शक्तिः शिवश्च सच्छब्दप्रकृतिप्रत्ययोदितौ ।
तौ ब्रह्मसामरस्येन समस्तजगदात्मकौ ।।

इति स्थूलसूक्ष्मचिदचित्प्रपञ्चरूपशक्तिविशिष्टः परमेश्वर एव कार्यकारणरूपः सत्पदविषय इति निर्णयः।

पुनराशङ्क्य परिहरति -

गौणश्चेन्नाऽत्मशब्दात् ।।१-१-६।।

सकलविशेषाणां निषेधस्याऽनुपपन्नतया सत्पदसिद्धासत्कारणत्वव्यावृत्त्यनुवादेनाऽवधारणस्य तद्दार्ढ्यार्थत्वमेवा-ऽवशतोऽङ्गीकार्यम्। तेन सदसद्विषय श्रुत्योर्बलाबलनिर्णयो लभ्यत इति। एवमेव एकमेवेत्यत्राप्येवकार एकत्वोक्तिसिद्धस्याधिष्ठात्रन्तरनिषेधस्याऽवधारणेन स्थिरीकरणार्थमेवेत्याह - **एकमेवे**ति। **अद्वितीयमि**ति पदेनाऽप्युपादानान्तरनिषेधेन परमेश्वरस्यैव सकलजगदुपादानत्वमुच्यत इत्याह - **अद्वितीयमि**ति। एवञ्च एकमेवाऽद्वितीयमिति विशेषणद्वयेन ब्रह्मणः सकलजगन्निमित्तोपादानरूपोभयकारणत्वं प्रतिपाद्यते। तेन तन्निर्वाहकतया ब्रह्मणः सर्वज्ञत्वं सर्वशक्तिमत्त्वं च सिद्ध्यतीत्यत्र न किमपि पदं कस्यापि विशेषस्य निषेधकं विद्यते। एवञ्च प्रकृतवाक्यगतपदान्तरसामर्थ्यपर्यालोचनयापि सत्पदं सविशेषपरमेवेति सिद्ध्यतीत्याह - **अत एवे**ति। एतेन **एकमेवाऽद्वितीयमि**ति पदत्रयेण ब्रह्मणः सजातीयविजातीयस्वगतरूपस्त्रिविधोपि भेदो निषिध्यत इति यः परेषामुद्घोषः स निर्मूलितः। सजातीयस्य जीवस्य, विजातीयस्य जडस्य, स्वगतस्य ज्ञानानन्दादिरूपस्य च विशेषस्य दुरपलपत्वेन तादृशार्थस्याऽनर्थत्वाऽवसायात्। सत्पदस्य सविशेषपरत्वसिद्धिं प्रति पदान्तरसामर्थ्य-पर्यालोचनापर्यन्तमपि न गन्तव्यम्, तत्सामर्थ्यपर्यालोचनयैव सिद्ध्यतीत्याह - **अथवे**ति। प्रकृतिभागः सत्तां प्रत्ययभागस्तदाश्रयं चाभिदधातीति सत्पदस्य विशिष्टपरत्वमवार्यमित्यर्थः। तत्र विशेषणीभूता सत्ता चिच्छक्तिरेवेत्यभियुक्तोक्तिसम्मतिं दर्शयति - **तथे**ति। तौ शक्तिशिवौ विशिष्टरूपेण ब्रह्म। न तु विशेषणमात्रं विशेष्यमात्रं वेत्यर्थः। सिद्धमर्थं निष्कृष्य दर्शयति - **स्थूले**ति।

तदसङ्गतमेवेति - परमेश्वरस्य निर्विकारत्वादीक्षणं तस्य धर्म इति नोरीकर्तुं युज्यते। किन्तु तत्परिणामिन्याश्चिच्छक्तेरेव। न हि परमेश्वरे चिच्छक्तेरिव तद्धर्मस्यापि व्यवहारो युज्यत इति वक्तुं युक्तम्। तथा

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ईक्षतेश्चेतनधर्मस्याऽचेतने प्रधाने योगाभावाच्चेतनमेव परं ब्रह्म सत्पदवाच्यं कारणमिति प्रतिपादितं तदसङ्गतमेव। 'तत्तेज ऐक्षत', 'ता आप ऐक्षन्त' इत्यादिष्वचेतनेऽपीक्षतिर्यथा गौणः श्रूयते, तथा प्रधानेऽपि गौण इति चेन्न। चेतनवाचिन आत्मशब्दात्। 'सदेव सोम्येदमग्र आसीत्' इत्याद्यारभ्य उपसंहारे 'स आत्मा तत्त्वमसि' इति श्रवणात् तेजःप्रभृतिष्वपि न गौणमीक्षतिश्रवणं तत्तदात्मतया परमेश्वरस्य चेतनस्याऽनुवृत्तेः।

नन्वीक्षतिश्रवणं गौणमभ्युपेत्याप्यचेतनं प्रधानं सद्रूपं जगतः कारणमिति वक्तुं न शक्यम्। तस्य चेतनत्ववाचिन आत्मशब्दादिति निरूपितम्।

भवतु नाऽत्मशब्दस्याऽचेतनं प्रधानमर्थ इति, भवति तु चेतनस्य जीवस्याऽत्मशब्दवाच्यत्वं मुख्यम्। ततो जीव एव चेतनो जगत्कारणं सद्रूपमित्यत आह -

---

सति सकलजगच्छरीरके तस्मिन् शक्तेरिव सुखी दुःखीत्यादिव्यवहारस्यापि मुख्यत्वप्रसङ्गात्। एवञ्च प्रधान इव परमेश्वरेऽपि मुख्यमीक्षणं न सम्भवतीत्येवकाराशयः। न च परमेश्वरे प्रधाने च मुख्येक्षणाऽसम्भवे कथं प्रधान एवाऽमुख्यमीक्षणमङ्गीकार्यमिति चोद्यम्। अचेतनरूपप्रायपाठानुरोधेन प्रधान एव तदभ्युपगमस्योचितत्वादित्याह - **तत्तेज** इति। **तत्तेज ऐक्षत।, ता आप ऐक्षन्ते**त्यादिष्वचेतनेपीक्षणं श्रूयते। अचेतने चेतनधर्मस्याऽसम्भवाच्चेतनधर्मत्वाश्रयणेन गौणमेवाऽङ्गीक्रियते। एवं प्रधानेऽपि भवतु। यदि तस्य गौणत्वमनङ्गीकृत्य चेतन एव तत्समन्वीयेत, तर्ह्यचेतनप्रायपाठो भज्यते। तस्मादंशत ईक्षणस्य गौणत्वमेवाऽङ्गीकृत्य प्रधान एवाऽन्वयो युक्त इति भावः।

उत्तरसूत्रमवतारयितुं शङ्कते - **नन्विति**। **आत्मशब्दवाच्यत्वमिति** - आत्मशब्दप्रतिपाद्यत्वं जीवस्य मुख्यं भवतीत्यर्थः। न च जीवस्य सर्वं प्रत्यात्मत्वं सम्भवतीति जीवपरत्वं न युज्यत इति वाच्यम्। **ऐतदात्म्यमि**ति तद्धितयत्प्रत्ययान्ततया सर्वमिदं प्रकृतसद्रूपात्मसम्बन्धीत्येतदर्थपरत्वात्। नाऽपि **स आत्मा** इत्यनेनाऽपि तत्प्रतिपाद्यते, तत्र सर्वस्येति विशेषणाऽश्रवणात्। प्राचीनवाक्यगतस्य तस्याऽनन्वयित्वात्। एवं च चेतनाचेतनसाधारणेन सच्छब्देनोपक्रमस्य विशेषपर्यवसानाकाङ्क्षायां स आत्मेत्युक्तैव चेतनरूपविशेषे पर्यवसानं सिद्ध्यति। नन्वेवं **स आत्मे**त्युक्ते स जगत्कारणभूत आत्मा क इत्याकाङ्क्षायां **तत्त्वमसी**त्युपसंहारात्संबोध्यः श्वेतकेतुरेव स आत्मेति पर्यवस्येत्। एवञ्च बहुभवनसङ्कल्परूपमीक्षणं तेजस्सृष्ट्यादिकं च तदनुभवबाधितं तेन बोद्धुमशक्यमिति चेदुच्यते। सर्गाद्यकालवृत्तान्तस्य अनेकजन्मव्यवहितस्य विस्मरणसम्भवाद्बाधस्याऽसिद्धेः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तन्निष्ठस्य मोक्षोपदेशात् ।।१-१-७।।

सत्पदवाच्यतत्त्वनिष्ठस्य मोक्ष उपदिश्यते। 'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य' इति। तस्मात्प्रधानं जीवश्च नाऽत्र सत्पदविषयः। प्रधानकारणवादिनामपि साङ्ख्यानां तन्निष्ठस्य

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन!
तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप!।।

इति गीतोक्तरीत्या शिष्येण विस्मृतस्यापि तद्वृत्तान्तस्य सर्वज्ञेन गुरुणा उपदेष्टुं शक्यत्वेन जीवपरत्वे न कापि विप्रतिपत्तिरिति पूर्ववाद्याशयः।

तस्मान्न प्रधानं जीवश्चेति प्रधानपरत्वशङ्कानिरकरणार्थयुक्त्यन्तरपरेणाऽनेनैव सूत्रेण आत्मश्रुत्यादिमूल-जीवपरत्वशङ्कानिराकरणमपि सिद्ध्यतीत्याशयेन जीवपरत्वशङ्कासूत्रावतारिकायां दर्शिता। न तु सूत्रस्य जीवपरत्वशङ्कामात्रनिराकरणार्थत्वमित्याशयेन जीवश्चेति चकारेण सूचितम्।

प्रकृतसूत्रेण निराकार्या प्रधानपरत्वशङ्कात्वेवंविधा - यथा ईक्षतिवदात्मशब्दोपि गौण एव। **'ममाऽत्मा भद्रसेनोऽयम्, मम प्राण इदं धनम्, मम चक्षुरयं पुत्रः .....'** इत्यादिष्वात्मादिशब्दानां गौणप्रयोगस्य दृष्टत्वात्। जीवानां सकलपुरुषार्थनिदानस्य प्रधानस्य तान्प्रत्येवं निर्देशहेतुतया **सन्मूलाः सोम्येमाः सर्वाः प्रजा** इति तत्रत्यवाक्यानुरोधेन **ऐतदात्म्यमिदं सर्वमि**ति सर्वशब्दस्य जीवसामस्त्यपरत्वस्योपपन्नत्वादिति। ननु प्रकृतिनिष्ठस्य मोक्षो नास्तीतिचेन्न। प्रकृतिज्ञानन्मोक्षसिद्धेः साङ्ख्यैरङ्गीकृतत्वात्। तथा च,

रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्तात्।
पुरुषस्य तथाऽत्मानं प्रकाश्य विनिवर्तते प्रकृतिः।।

प्रकृतेः सुकुमारतरं न किञ्चिदस्तीति मे मतिर्भवति।
या दृष्टाऽस्मीति पुनर्न दर्शनमुपैति पुरुषस्य।। इति।

अत आह - **साङ्ख्यानामपी**ति। अत्राऽयं भावः। सूत्रे तन्निष्ठस्येतिपदेन तद्वेदनमात्रं नोच्यते। किन्तु स्वात्मतया तदुपासनम्। कथम्?, **तत्त्वमसी**ति श्वेतकेतुं प्रति सत आत्मा तामुपदिश्य, **'आचार्यवान्पुरुषो वेदे'**ति तद्वेदनोपायमुक्त्वा **'तस्य तावदेव चिरमि'**ति तद्वेदनवतः पुरुषस्य तावानेव विलम्बः, यावत्प्रारब्धकर्माधीनशरीरान्न विमोक्ष्यते, ततस्तद्विमोचनानन्तरं ब्रह्म सम्पद्यत इति। **'अस्माच्छरीरात्समुत्थाय परंज्योतिरूपसम्पद्ये'**ति वाक्यान्तरसिद्धशरीरविमोक्षपूर्वकब्रह्मसम्पत्तिरूपफलश्रवणात्। तस्याऽपि वेदनस्य **'आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य'** इत्यादिश्रुत्यन्तरानुसारेणोपासनरूपत्वमवगम्यते। ननु साङ्ख्यमते बुद्धिरूपमापद्य संसरन्त्यां प्रकृतावसङ्गोदासीनसाक्षिरूपस्य पुरुषस्य स्वात्मतया वेदनं भ्रान्तिरूपमस्ति। **'पूर्णं वर्षसहस्रन्तु तिष्ठन्त्यव्यक्तचिन्तकाः'** इति वचनसिद्धं सावधिफलं तदुपासनमप्यस्तीति प्रधानपक्षेऽपि सूत्रं सङ्गतमितिचेन्न।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मोक्षो नाभिमतः, त्याज्यत्वात्। न च जीवनिष्ठस्य। निषेधात् - 'शिव एको ध्येयः शिवङ्करः सर्वमन्यत्परित्यज्य' इति।

पुनरपि स्पष्टयति हेतुं प्रधाननिराकरणे -

हेयत्वाऽवचनाच्च **।।१-१-८।।**

यदि प्रधानमेवाऽत्र विवक्षितं, तदाऽस्य हेयत्वमेवोच्येत। तत्त्वमसीति मोक्षहेतुतया ध्येयत्वमुच्यते। ततो न प्रधानमिति युक्तम्।

मुक्तिफलकस्य स्वात्मतया प्रकृत्युपासनस्याऽविद्यमानत्वात्। प्रत्युत तन्मते प्रकृति विविक्तत्वेनाऽसंसारिस्वभावस्यात्मदर्शनस्यैव मोक्षजनकत्वाभ्युमगमाच्च। तथा च,

तस्मान्न बध्यते नाऽपि संसरति कश्चित्।
संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः।।

रूपैः सप्तभिरेवं बध्नात्यात्मानमात्मना प्रकृतिः।
सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण।।

एवं तत्त्वाभ्यासान्नाऽस्ति न मे नाऽहमित्यपरिशेषम्।
अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम्।

तेन निवृत्तप्रसवामर्थवशात्सप्तरूपविनिवृत्ताम्।
प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थितः स्वस्थः।। इति।

तस्मात्साङ्ख्यमते प्रकृतिनिष्ठस्य मोक्षो नास्तीति सिद्धम्। एतेन तत्त्वमसीत्यादिवचनं **ममाऽत्मा भीमसेन** इत्यादिवदर्थवाद इति शङ्का निरस्ता। अथ तत्त्वमसीति जगत्कारणस्य जीवस्यैवोपासनं मोक्षहेतुतयोपदिश्यत इति शङ्का निराकरोति - **न चेति**। निषेधान्मोक्षार्थं शिवातिरिक्तस्योपास्यत्वनिषेधादित्यर्थः।

उत्तरसूत्रमवतारयति - **पुनरपीति**।

तत्त्वमसीति न वस्तुगत्या सत आत्मत्वमुपदिश्यते। किन्तु स्थूलतारायामरुन्धत्यात्मतामिव। ततः प्रधानस्य सत्परत्वेपि सत आत्मत्वोपदेशः सुसङ्गत एवेत्याशङ्कापरिहारेण पूर्वोक्तहेतुविशदीकरणार्थं हेतुं दर्शयतीत्यर्थः। स्पष्टयतीति तत्करोतीति ण्यन्तात्पचाद्यच्।

यदीति - तत्त्वमसीत्यत्र स्थूलारुन्धतीन्यायेनैव सदात्मकत्वमभिमन्येत, तर्हि तस्य स्थूलतारायामिव त्याज्यत्वमेव निगद्येत। न हि तथा निगद्यते। किन्तु मोक्षसाधकत्वेन ध्येयत्वमेव निगद्यते। तस्मात्सत्पदं प्रधानपरं न भवतीति युक्तमिति भावः। तदात्मत्वेनैवोपदेशपरसमापनेन तस्य यथार्थमेव सिद्ध्यति, ननु स्थूलारुन्धतीन्याया-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

किंच प्रधानपक्षे विरोध इत्याह -

प्रतिज्ञाविरोधात् ।।१-१-९।।

इतश्च न प्रधानं सत्पदवाच्यम्। एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाविरोधात्। सत्पदवाच्यतत्त्वज्ञानेन तत्कार्यतया सकलचेतनाचेतनवस्तुविज्ञातं भवतीति 'येनाऽश्रुतं श्रुतं भवति' इत्यादिना प्रतिज्ञायते। प्रधानकारणत्वे विरुद्धमेतत्। चेतनस्य प्रधानकारणत्वाऽयोगात्।

प्रधाने कारणे ज्ञाते जाड्यविकारास्पदं तत्कार्यमिदं सर्वं ज्ञायते। यथा मृदि ज्ञातायां तत्कार्यं घटादिकम्।

नुसरणमिति हृदयम्। पूर्वसूत्रे समासतोप्यपेक्षावशात्तच्छब्दोऽनुषज्य अत्र षष्ठ्यन्ततया विपरिणम्यते। ततश्च, तस्य सदात्मत्वस्य हेयत्वावचनादिति सूत्रार्थः। चकारः पूर्वसूत्रेणैकवाक्यताकरणार्थः। न केवलं तन्निष्ठस्य मोक्षोपदेशात्प्रधानं सत्पदवाच्यम्। किन्तु तद्धेयत्वावचनसमुच्चितादित्यर्थः।

उत्तरसूत्रमवतारयति - **किञ्चेति**। एवं सद्विद्यायाः प्रधानपरत्वे साधकभावं प्रदर्श्य तत्र साधकमस्तीत्याह विरोध इति।

सर्वविज्ञानेति - **येनाऽश्रुतं भवतीति** प्रतिज्ञा सर्वज्ञानविषया, श्रुतादिपदानामर्थसङ्कोचे कारणाऽभावात्। **कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति** वाक्यान्तरैकार्थ्याच्च। ननु ब्रह्मपरत्व इव प्रधानपरत्वेपि कार्यकारणयोरभेदा प्रकृतिविज्ञानेन तत्कार्यभूतसर्वप्राकृतवस्तुविज्ञानं सम्पद्यत इत्याशङ्क्याह - **सकलचेतनाचेतनेति**। अत्राऽयं भावः। प्रधानस्याऽचेतनतया कारणभूततद्विज्ञानेन तत्कार्यभूतजडवर्गविज्ञाने सिद्धेऽपि चेतनजातस्याऽविदिततया सर्वविज्ञानं न सम्भवति। ततस्तद्विरोधः समापद्यत इति। ननु सर्वविज्ञानप्रतिज्ञायाश्चेतनाचेतनविषयत्वं न सिद्ध्यति। मृद्घटादिदृष्टान्तानुरोधेनाऽचेतनविषयतयैवाऽवगम्यमानत्वादिति चेदुच्यते। **असङ्कोचेन सर्वविषयत्वे सिद्धे, सङ्कोचेन यत्किञ्चिद्विषयत्वमन्याय्यमिति** न्यायेन सर्वविज्ञानप्रतिज्ञा सकलवस्तुविज्ञानविषयैवेति सिद्ध्यति। ततश्च सूक्ष्मसकलचिदचिद्वस्तुविशिष्टब्रह्मरूपे श्रुत्यन्तरसिद्धे कारणे सत्पदवाच्येऽङ्गीकृते सर्वमपि चेतनाचेतनात्मकं वस्तुस्थूलरूपवैशिष्ट्येन सत्कार्यकोटावन्तर्भवतीत्यसङ्कोचेन यथा प्रतीत्युपपद्यते। अथ साङ्ख्य सन्मते प्रधाने कारणे सत्पदवाच्यतयाऽङ्गीकृते तु चेतनवर्गस्य प्रधानकार्यत्वाभावात्सर्ववस्तुविषयतयाऽसङ्कोचेन प्रतीता सा विरुध्यत इति भाष्याशयः।

सूत्रान्तरमवतारयति - **प्रधाने कारण** इति। इह सर्वविज्ञानप्रतिज्ञाया जडमात्रपरत्वेन सङ्कोचेऽभ्युपगम्यमाने निष्कारणः सङ्कोचो न युक्त इति दोषोऽनेन सूचितः। इतश्चेति पूर्वहेतुं सिद्धवत्कृत्य स्वाप्ययो हेत्वन्तरत्वेन विव्रियते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अतः कोऽत्र विरोध इत्याशङ्क्याह -

स्वाप्ययात् ।।१-१-१०।।

इतश्च न प्रधानं सच्छब्दवाच्यम्। 'स्वप्नान्तं मे सोम्य विजानीहि, यत्रैतत् पुरुषः स्वपिति नाम सता सोम्य तदा संपन्नो भवति स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते' इति जीवस्य चेतनस्य सता संपन्नस्य स्वाप्ययवचनात्। अप्ययः प्रलयः। अचेतने प्रधाने चेतनस्य लयो न युक्तः। ततो न प्रधानं सदित्युच्यते।

सद्विद्याप्रकरणे स्वपिति नामनिर्वचनं श्रूयते - **स्वप्नान्तमि**त्यादि। तस्यार्थः - स्वप्नान्तं सुषुप्तं, मे मत्तः बोधयतो विजानीहि, इतिपदस्य इत्युक्त्वा चेति पूर्वेण सम्बन्धः। इदं शिष्यावधानसम्पत्त्यर्थमुद्दालकस्य वचनम्। सुषुप्तिस्वरूपप्रतिपादनप्रकारो यत्रैतदित्यादिः। यत्र यदा, पुरुषः पुरुषस्य, एतत्स्वपिति नाम स्वपितीत्येव तन्नाम भवति, यस्यामवस्थायां स्थितमेनं स्वपितीत्याचक्षत इत्यर्थः। तदा सता **सदेव सोम्ये**ति प्रस्तुतेन सम्पन्नः सङ्गतो भवतीत्यर्थः। तस्याः सङ्गते सति लयरूपत्वबोधनार्थं स्वपितिनामनिर्वचनं क्रियते स्वमपीत इति - अपिपूर्व इति लयार्थः। पुरुषः स्वशरीरके ब्रह्मणि लीनो भवतीत्यर्थः। अपितेः सकर्मत्वाद् द्वितीया। तस्मात् स्वाप्ययरूपप्रवृत्तिनिमित्तात् एनं स्वपितीत्यताचक्षते तत्त्वविद इत्यर्थः। ननु ञिष्वप् शये इति धातोर्निष्पन्नः स्वपितिशब्दो, न तु स्वशब्दोपपदादपीतेरिरितिचेन्न। अशनायादिनिर्वचनवदस्यार्थवादत्वात्। अत्र स्वमपीतो भवतीति स्वाप्ययवचनात्प्रधानं सत्पदवाच्यं न भवतीति हेतुं योजयति इतश्चेत्यादिना स्वाप्ययवचनादित्यन्तेन।

ननु इण् गताविति धातोर्निष्पन्नोप्ययशब्दः प्राप्त्यर्थः। न तु लयार्थ इत्याशङ्क्याह - **अप्ययः प्रलय** इति। प्रभावप्ययावित्युत्पत्तिलययोः प्रयोगदर्शनादिति भावः। ननु प्रधाने सत्पदवाच्येपि स्वाप्ययवचनं न विरुध्यते। स्वपदस्यात्मीयवाचित्वात्। न च प्रधानस्य जीवं प्रत्यकारणत्वेन तत्र लयो न सम्भवतीति शङ्क्यम्। ब्रह्मणोपि तथाविधत्वेन तदसम्भवदोषस्य समानत्वात्। जीवस्याऽनादितया तं प्रति ब्रह्मणोऽकारणत्वेन तत्र जीवस्य घटवल्लयस्याऽसम्भवात्। तस्मात्सत्पदस्य प्रधानपरत्वेपि स्वाप्ययवचनमुपपद्यत इत्याशङ्क्याह - **अचेतने प्रधान** इति। - अत्राऽयमाशयः। यत्रैतत्पुरुषः स्वपितिनामेत्युपक्रमः स्वमपीतो भवतीति पर्यन्तः वाक्यार्थः स्वपिति नाम निर्वचनार्थवादोपस्कृतं स्वाप्ययं निरूपयितुं प्रवृत्त इत्युपक्रमोपसंहाराभ्यामवगम्यते। तत्र यदि **सता सोम्य तदा सम्पन्नो भवती**तिवाक्यं स्वविवरणरूपताज्ञापनेन स्वपदस्य सद्विषयताज्ञापनार्थं न स्यात्, तर्हि तत्प्रकृतानुपयुक्तमेव स्यात्। तस्मात्सत्सम्पत्तिवाक्यस्य स्वाप्ययविषयोपक्रमोपसंहारमध्य-निवेशनसामर्थ्येन स्वपदसत्पदयोरेकार्थत्वावश्यंभावे सति जीवस्याऽकारणे प्रधाने लयाऽनुपपत्तेस्तस्य सत्पदवाच्यत्वाऽभ्युपगमे स्वाप्ययवचनस्याऽनुपपत्तिरवार्यैव। नन्वेवं तस्य ब्रह्मण्यपि लयो नोपपद्यते,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सच्छब्देन परमेश्वर एव प्रतिपाद्यते, न प्रधानमित्याह -

***गतिसामान्यात्* ।।१-१-११।।**

यथाऽस्यामुपनिषदि सत्पदस्य परमेश्वरवाचित्वेन गतिः, तथा श्रुत्यन्तरेऽपि समाना। 'पुरुषो वै रुद्रः सन्महो नमो नमः' इत्यादौ। अतः सत्पदवाच्यः परमेश्वरः।

व्यक्तमेवास्यामुपनिषद्यात्मनः सर्वोत्पत्तिः श्रूयत इत्याह -

***श्रुतत्वाच्च* ।।१-१-१२।।**

तदकारणत्वतौल्यात्। अतः सूक्ष्मावस्थे स्वस्मिन्नेव लयोऽभ्युपगन्तव्यः स्यादितिचेन्न। जीवशरीरकस्य ब्रह्मणो जीवद्वारेणाऽपृथक्सिद्धतदाश्रयतया स्थूलावस्थजीवं प्रति सूक्ष्मावस्थजीवस्येव तदुपादानकारणत्वेन तत्र जीवलयस्योपपन्नत्वात्। न चैवमत्यन्तभिन्नयोर्जीवब्रह्मणोः कार्यकारणभावे कार्यकारणानन्यत्वभङ्गेन तदनन्यत्वसूत्रं व्याकुप्येदिति वाच्यम्। न खल्वनन्यत्वं नाम भेदाभावः। किन्तु लम्बकर्ण देवदत्तवत्कदाचिदपि पृथगवस्थितेरभावः। स तु जीवब्रह्मणोर्भेदेपि नीलघटवदयुतसिद्धत्वान्न लुप्यते। नीलघटयोरयुतसिद्धिर्गुणगुणिभावेन; जीवब्रह्मणोस्तु शरीरशरीरिभावेनेति विशेषः। आरम्भणाधिकरणेऽप्येवमेव कार्यकारणानन्यत्वं भाष्यकृतोपपादयिष्यत इति तत्रैव विस्तरः। एवं जीवस्य ब्रह्मणि लयसमर्थन एव, **सता सम्पन्नः, स्वमपीतः, प्राणबन्धनं हि सोम्य मनः, सति सम्पद्य, सत आगम्य** इत्यादिष्वप्येतृस्थानयोर्भेदव्यपदेशाः सङ्गच्छन्ते। **प्राज्ञे नात्मना सम्परिष्वक्तो न बाह्यं वेद नाऽन्तरमि**त्यादिश्रुत्यन्तरैकार्थमप्युपपद्यते। नहि तत्रापि सम्परिष्वक्तशब्दस्य ब्रह्मपर्यन्तत्वं वक्तुं शक्यम्। **सुषुप्त्युत्क्रान्त्योर्भेदेने**ति सूत्रेण प्राज्ञजीवयोर्भेदस्य राद्धान्तयिष्यमाणत्वात्। ननु यदि जीवस्य भिन्नेपि ब्रह्मणि लय इष्येत, तर्हि प्रधानेपीष्यताम्। ब्रह्मण इव तस्यापि जीवद्वारा तदवस्थाश्रयत्वकल्पनेन तदुपादानत्वोपपादनस्य शक्यत्वादिति चेदुच्यते। चेतनस्य ब्रह्मणो जीवं प्रति शरीरित्वं **यस्यात्मा शरीरमि**ति श्रुतिसिद्धम्। तेन **'यथा सुदीप्तात्पावकाद्विस्फुलिङ्गास्सहस्रशः प्रभवन्ते सरूपाः। तथाऽक्षराद्विविधास्सोम्य भावाः प्रजायन्ते तत्र चैवाऽपियन्ती'**ति श्रुतिसिद्धं जीवोपादानत्वमुपपादयितुं शक्यम्। न त्वशब्देनाऽचेतनेन प्रधानेनेति विशेषाद्यथोक्तमेव युक्तम्।

अनन्तरसूत्रमवतारयति - **सच्छब्देने**ति। प्रकृतस्य सत्पदस्य तत्प्रकारणगतैरीक्षत्यादिभिर्यथा परमेश्वरो वाच्यस्तथैव श्रुत्यन्तरगतविवरणेनापि स एवेत्यनन्तरसूत्रेण बोधयतीत्यर्थः।

गतिसाम्यादित्यर्थः। तदेव दर्शयति - **यथे**ति।

उत्तरसूत्रमवतारयति - **व्यक्तमेवे**ति।

ननु श्रुत्यन्तरेषु ब्रह्मणः कारणत्वमस्तु तदप्रतिक्षिप्यैव सद्विद्यया कल्पभेदे प्रधानस्य कारणत्वमाम्नायते। एवञ्च प्रकरणान्तरे ब्रह्मकारणत्वश्रवणान्न सद्विद्यायाः प्रधानकारणसत्त्वं न हीयत इत्याशङ्क्याह - **व्यक्तमेवे**ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अत्राऽपि आत्मनः 'प्राण आत्मत आकाश' इत्यारभ्य आत्मन एवेदं सर्वमिति श्रूयते। ततो जगत्कारणत्वेन सत्पदवाच्यं ब्रह्मैव, न प्रधानमिति सिद्धम्।।

।। इति ईक्षत्यधिकरणम् ।।

***

अस्याऽयमाशयः। छान्दोग्ये सद्विद्यानन्तरं भूमविद्या प्रस्तुता। सा च सद्विद्यायां सच्छब्दोक्तस्यैव कारणस्य विशेषान्तरोपदेशाय प्रवृत्ता कथमिति चेत्सद्विद्यायां **तत्सत्यं स आत्मे**ति नवकृत्वोऽभ्यस्तस्य सत्यशब्दस्य **तस्यामेष तु वा अतिवदति यः सत्येनाऽतिवदती**ति प्रस्तुत एवात्मनि प्रयोगात्। तस्माद्विद्याद्वयस्यैकार्थकत्वात्सद्विद्याया न प्रधानकारणत्वमाख्यात इति पूर्वपक्षशङ्का परिह्रियत इति।

भूमविद्यायां **तरति शोकमात्मविदि**त्यात्मोपासननिरूपणमुपक्रम्य तदवसाने **आत्मनः प्राण आत्मन आकाश** इत्यादिना प्रागुपास्यत्वेनोपक्रान्तस्य नामादिप्राणपर्यन्तस्य वस्तुजातस्य प्रकृतादात्मन उत्पत्तिमुक्त्वा **आत्मन एवेदं सर्वमि**ति सर्वस्यापि जगत उत्पत्तिनिरूपणे नोपसंहृतं तत्समानायां सद्विद्यायामपि कारणत्वेनाम्नातं सत्पदवाच्यं ब्रह्मैव भवितुमर्हति, न प्रधानमित्यर्थः। सिद्धमित्यधिकरणार्थ उपसंह्रियते।

卐 卐 卐

इदमधिकरणं शुद्धाद्वैतिनां पक्षे न सङ्गच्छते। तथाहि, अत्र ईक्षतेश्चेतनधर्मतयाऽचेतनस्य प्रधानस्य जगत्कारणत्वं प्रतिषिध्यते। परपक्षे जगतो भ्रान्तिसिद्धतयाऽचेतनस्याऽपि स्थाण्वादेर्भ्रमाधिष्ठातृत्वसम्भवेन नैतत्प्रतिषेद्धुं युज्यते। न च गौणेक्षणमप्याश्रयितुं शक्यम्। गौणश्चेदिति प्रतिषेधात्। तस्माद्यथोक्तं युक्तम्।

एवं श्रीभाष्यकृतः पक्षेपि। तथा च, तेन **श्रुतत्वाच्च** इति सूत्रविवरणे -

न तस्य कश्चित्पतिरस्ति लोके न चेशिता नैव च तस्य लिङ्गम्।
स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिप।।

इति श्वेताश्वतरोपनिषन्मन्त्र उदाहृतो ब्रह्मणः सर्वनियन्तृत्वोपपादनाय। मन्त्रोपनिषदः शिवमहेश्वराद्यनितरसाधारणश्रुतिशतैः, शैवत्वसम्प्रतिपत्त्या, पाञ्चरात्रपरासु सुबालादिषु ब्रह्म लक्षणाऽलाभादवशतस्तदाश्रयणेन स्वाभिमतासिद्धान्तस्य भङ्गादित्यलम्।

।। इति ईक्षत्यधिकरणम् ।।

***

CC-0. In Public Domain. Cuddalore Collection. TN.

अथ आनन्दमयाधिकरणम्

इह ब्रह्मलक्षणस्य जगत्कारणत्वस्य शास्त्रैकसमधिगम्यस्य तान्त्रिके प्रधानेऽतिव्याप्तिमाशङ्क्य चेतनत्वादिहेतुना यथा तस्मिन्नतिव्याप्तिर्न भवति तथा निरूपितम्। अचेतने प्रधान इव चेतनेऽपि जीवे तत्रातिव्याप्तमिति वक्तुमधिकरणान्तरमारभ्यते -

आनन्दमयोऽभ्यासात् ॥१-१-१३॥

'तस्माद्वा एतस्मादात्मन आकाशः सम्भूत' इत्यारभ्य 'तस्माद्वा एतस्माद्विज्ञानमयात् अन्योऽन्तर आत्माऽऽनन्दमय' इति कश्चिदाकाशादिसर्वभूतकारणत्वेनाऽन्नमयादिकोशकक्ष्यान्तरनिगूढ आत्माऽऽनन्दमय इत्यानन्दमयात्माऽऽम्नायते।

अत्राऽऽनन्दमय आत्मा जीवो वा ? परमेश्वरो वेति सन्देहः।

जीव इति पूर्वः पक्षः। तद्धर्माणामत्रोपलम्भात्। तथाहि 'पृथिव्या ओषधयः, ओषधीभ्योऽन्न

आनन्दमयाधिकरणम् ६

[illegible]

Digitization by eGangotri-South Center

अन्नात्पुरुष' इत्यादिना पञ्चावयवं शरीरादिकं निरूप्यते। अत्र अन्नमय इति शरीरमुच्यते। प्राणमय इति तदन्तर्वर्ती प्राणः। मनोमय इति तदन्तरवर्ती मनः। विज्ञानमय इति तदन्तर्वर्तिनी बुद्धिः। आनन्दमय इति सर्वेषामन्नमयादीनामाश्रयो जीव एव। अन्नादीनां शिरः प्रभृतिकल्पना समुपासनार्था। अन्नादीनां ब्रह्मत्वेनोपासनात् तत्तदन्नादिसमृद्धिः फलमुक्तम्। कथमस्य संसारसागरदुःखमग्नस्य

ननु, आत्मशब्दे साधारणेऽपि **'ब्रह्मविदाप्नेति परमि'**ति ब्रह्मोपक्रमात्परिच्छिन्नस्य जीवस्य ब्रह्मशब्दवाच्यत्वाभावात्, **'सत्यं ज्ञानमनन्तमि'**ति लक्षणस्य तत्रानन्वयाच्च ब्रह्मविषय एव भवति। कुतः संशय इतिचेदुच्यते। उपक्रमे उपास्यस्य ब्रह्मणस्तदुपासकस्य जीवस्य च श्रूयमाणतया तयोरात्मशब्देन कस्य परामर्शो युक्त इत्यनिर्णयात्संशयः। जीव इति पूर्वपक्ष इति। तत्रात्मशब्देन ब्रह्मविदो जीवस्यैव परामर्शो युक्तः। समानविभक्तिकत्वात्। न च **'सत्यं ज्ञानमनन्तं ब्रह्म'** इति मन्त्रे ब्रह्मापि प्रथमान्तमेवेति शङ्क्यम्। यो वेदेति कर्मसमर्पकत्वेन ब्रह्मपदस्य द्वितीयान्तत्वात्। नापि सर्गादौ शरीररहितस्य जीवस्य सङ्कल्पाऽसम्भवात्प्रपञ्चकर्तृत्वं न सम्भवतीति शङ्क्यम्। ब्रह्मोपासनया ब्रह्मप्राप्तस्य **'अभावं बादरिः'** इत्यधिकरणन्यायेन शरीररहितस्यापि सङ्कल्पसम्भवात्। नन्वत्र नोपलभ्यन्ते जीवधर्माः। कथमस्यानन्दमयस्य जीवत्वम् ? न चान्नमयादयो जीवधर्माः। तेषां पक्षित्वेनोत्तरोत्तरमभ्यन्तरत्वेन च वर्णितानां जीवधर्मत्वेनाऽप्रसिद्धतया तैर्निर्धारणाऽसम्भवादित्याशङ्क्य तेषां जीवधर्मत्वमुपपादयति - **तथाही**ति। अन्नमय इति शरीरमेवोच्यते। अन्नात्पुरुष इति पुरुषस्यान्नविकारत्वोक्तेः। एवं प्राणमयः प्राणवायुरेव। शरीरान्तर्वर्तित्वलिङ्गात्। तथा मनोमयविज्ञानमयौ मनोबुद्धी। उत्तरोत्तरं सूक्ष्मत्वेन तयोस्तदभ्यन्तरत्वव्यवहारयोग्यत्वात्। पञ्चावयवं शिरः पक्षद्वयपुच्छमध्यरूपमित्यर्थः। शरीरादीनां शिर आदिपञ्चावयवयुक्तत्वं काल्पनिकं, मुखचन्द्रादिवद्रूपकमात्रसिद्धम्। तत्कल्पना तूपासनार्थेत्याशयः। आत्मा देहस्य मध्यभागः। **मध्यं ह्येषामात्मे**ति श्रुतेः। अनेनानन्दमयस्य जीवत्वे प्रियमोदयोगो हेत्वन्तरत्वेन सूचितः। तत्रेष्टवस्तुदर्शनतल्लाभतदुपयोगप्रयुक्ताः सुखविशेषाः प्रियमोदप्रमोदाः। यावत्तृप्तिविषयभोगानन्तरं निवृत्ते विषयसम्पर्के तृप्तिरूपतयाऽनुवर्तमानं सुखमानन्दः। तेषामानन्दमयं प्रति शिरस्त्वादिना निरूप्यमाणानां तत्सम्बन्धः कश्चित्सम्बन्धो विवक्षितः। तेषां च जीवेन भोक्तृभोक्तव्यरूपः सम्बन्धः प्रसिद्धः।

ननु, अन्नमयाद्युपासनानामन्नसमृद्ध्यादिः फलमुक्तम्। न त्वानन्दमयोपासनस्य। अतस्तदुपासनस्य **'ब्रह्मविदाप्नोति परमि'**त्यनेनैव फलप्रतिपादनाद्वेद्यत्वेनोपक्रान्तं ब्रह्म आनन्दमय एवेति सिद्ध्यति। स्थूलारुन्धतीन्यायादन्नमयादिक्रमेण बुद्ध्यवतारणमपि ब्रह्मणि सम्भवति। अन्यथा, भृगुवल्ल्यां **'यतो वा इमानि भूतानि जायन्त'** इति जगज्जन्मादिकारणं ब्रह्म प्रस्तुत्य **'अन्नं ब्रह्मेति व्यजानादि'**त्यदिना अन्नप्राणमनोबुद्धिषु (विज्ञानेषु) ब्रह्मबुद्ध्यवतारणक्रमेण आनन्दे ब्रह्मबुद्धिः प्रतिष्ठापिता। न च तत्राऽप्यानन्दो जीव इति वक्तुं शक्यम्। **'अधीहि भगवो ब्रह्मेति'**, **'तद्विजिज्ञासस्व'**, **'तद्ब्रह्मेति व्यजानादि'**त्यादिमध्यान्तपरामर्शेनाऽन्नादिषु ब्रह्मबुद्ध्यवतारणेन आनन्दस्यैव ब्रह्मत्वावधारणात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

जीवस्याऽनन्दमयत्वाभिधानमिति चेन्न। अत्रानन्दशब्देन परं ब्रह्मोच्यते। आनन्दो ब्रह्मेति श्रवणात्। मयट्शब्दस्य विकारार्थत्वात् तत्कार्यभूतो जीव एव आनन्दमय इत्युच्यते। नित्यसम्पन्नशिवतत्त्वस्य ब्रह्मण आनन्दमयत्वाङ्गीकारे 'अन्नमय प्राणमय मनोमय विज्ञानमयाऽनन्दमया मे शुध्यन्ताम्' इति शुद्धिप्रार्थना व्यर्था स्यात्। अतोऽयमानन्दमय आत्मा जीव एव, न परमेश्वर इति प्राप्ते ब्रूमः -

आनन्दमयोऽयमात्मा परमेश्वर इति। कुतः? अस्यानन्दस्य निरतिशयत्वेनाभ्यासात्। कथमभ्यस्यते? 'सैषानन्दस्य मीमांसा भवति' इत्यारभ्य मानुषविशेषादि प्रजापतिपर्यन्तं

न च, अन्नमयादिप्रायपाठानुरोधेनानन्दमयशब्देऽपि मयटः विकारार्थत्वात्तत्पदवाच्यो जीव एवेति शङ्क्यम्। अत्र मयटः प्राचुर्यार्थकत्वाद्ब्रह्मण्येव सङ्गच्छते न तु जीवे। दुःखसागरनिमग्नेन तेनानन्दकणिकाया अपि दुष्प्रापत्वात्। तस्मादन्नादिपञ्चमपर्यायस्थत्वादपि स्थानप्रमाणेनानन्दमयशब्दवाच्यो ब्रह्मैव, न तु जीव इत्यभिप्रायेण शङ्कते - **कथमस्ये**ति। अत्रेत्यादिपरिहारभागस्याऽयमाशयः। आनन्दमयो ब्रह्मेति न वक्तुं युक्तम्। **ब्रह्मपुच्छं प्रतिष्ठे**ति ततोऽन्यत्वेन ब्रह्मणः श्रवणात्। न चाऽत्र पुच्छशब्दः प्रणवपरः। **असन्नेव स भवति। असद् ब्रह्मेति वेद चेत्। अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो** विदुरित्यनन्तरश्लोके ब्रह्मविषय सदसत्त्वज्ञानयोरिष्टाऽनिष्टफलाऽम्नानेन तस्य ब्रह्मपरत्वाऽवगमात्। लोकप्रसिद्धेषु प्रणवादिष्वसत्त्वज्ञानशङ्काया अनवकाशाच्च। यत्तु आनन्दमये मयटो प्राचुर्यार्थ इति तन्न। अन्नमयादिषु मयटो विकारार्थतया प्रायपाठेनाऽस्यापि तदर्थकत्वाऽवसायात्। शुद्धिवाक्यस्य प्रकृतत्वाभावेप्यन्नमयादिक्रमेण तत्वाच्छुद्धिप्रार्थनाविषयोप्ययमेवाऽऽनन्दमयो भविष्यतीति।

पूर्वपक्षमुपसंहृत्य सिद्धान्तम्प्रतिजानीते - **अत** इति।

ननु अत्राऽभ्यासो यदि शतगुणत्वेनानन्दानुवृत्तिस्तर्हि तस्या गन्धर्वादिष्वपि विद्यमानत्वेन तया आनन्दमयस्य न ब्रह्मत्वं सिद्ध्येदित्याशङ्क्याह - **निरतिशयत्वेने**ति। **'स एको ब्रह्मण आनन्द'** इत्याद्यनन्तरं **'तदप्येष श्लोको भवती'**ति स्वोक्तार्थसाधकत्वेनोपक्रान्ते **'यतो वाचो निवर्तन्त'** इति श्लोके ब्रह्मानन्दस्य निरतिशयत्वप्रतिपादनेन **'ते ये शतं प्रजापतेरानन्दा'** इत्यत्र शतशब्दः सङ्ख्याविशेषपरो न भवति, किन्तु आनन्त्यपर इति भावः। यद्यपि सूत्रे निरतिशयत्वबोधकविशेषणं नास्ति तथाप्यभ्यासस्यानन्दविषयत्वं तन्निरतिशयत्ववैशिष्ट्यमपि हेतूकरणसामर्थ्याल्लभ्यते।

नन्वयमानन्दाभ्यासः **'ब्रह्मपुच्छं प्रतिष्ठा'** इत्यानन्दमयस्याधारत्वेन श्रुतस्य ब्रह्मण एवेत्याशङ्क्याह - **अस्ये**ति। अत्रायं भावः। शिरःपक्षपुच्छादियुक्तमानन्दमयकोशं निरूप्य **'सोऽकामयते'**त्यादिना कामनापूर्वकं जगत्सृष्ट्यादिकं निगद्य, **'रसो वै सः। रसँ ह्येवायं लब्ध्वाऽऽनन्दी भवती'**ति यस्यानन्दरूपस्याऽनुभव एव जीवस्य परमपुरुषार्थत्वेनाऽऽम्नातस्तस्य निरतिशयानन्दस्तदनन्तरवाक्येन **'सैषाऽऽनन्दस्य मीमांसे'**त्यादिना

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तत्तदानन्दस्योपर्युपरि शतगुणमतिशयमभिधाय 'स एको ब्रह्मण आनन्द' इति ब्रह्मानन्दो निरतिशयशिरस्कत्वेनाभ्यस्यते। तदेतन्निरतिशयानन्दभाजनत्वमस्य संसारिणो न संभवति।

यदुक्तमानन्दमयस्येश्वरत्वे नित्यशुद्धस्य तस्य कथं विशुद्धप्रार्थनेति, तत्रेदमुत्तरम्। यथा प्रकृष्टप्रकाशस्य चन्द्रस्य तिरोधायकघनापगम एव प्रसादस्तथा तस्य नित्यशुध्दस्य तिरोधानमलापनयनमेव शुद्धिः। तस्मादानन्दमयः परमेश्वर एव।

नन्वानन्द एव ब्रह्मेत्युच्यते। तद्विकार आनन्दमयः। मयटो विकारार्थत्वात्। आनन्दमयस्येश्वरत्वाभ्युपगमे ब्रह्मणोऽन्य ईश्वर इति प्राप्नोति। तथा सति तस्य विकाररूपत्वादनित्यत्वं चेत्याशङ्कायामाह -

विकारशब्दान्नेति चेन्न प्राचुर्यात् ।।१-१-१४।।

अन्नमयादीनां यथाऽन्नादिविकाररूपत्वं तथाऽत्रानन्दमय इत्यानन्दविकारः यथा मृद्विकारो हि मृण्मयो घटादिः। अतः परमेश्वरस्य विकारत्वासंभवादयं जीव एवेति चेन्न।

मयट् शब्दस्यात्र प्राचुर्यार्थत्वात्। अन्नमयप्राणमयमनोमयपर्यन्तमेव मयट् विकारार्थः। विज्ञानमयो विज्ञानप्रचुरो जीवः। आनन्दमयोप्यानन्द प्रचुरः परमेश्वरः।

वर्ण्य इत्याकाङ्क्षायोग्यतासन्निधिभिर्निश्शङ्कमवगम्यते। एवंविधस्त्ववयवी आनन्दमय एव, नतु पुच्छं ब्रह्म, पुंलिङ्गश्रुतेः। तस्मादयमानन्दाभ्यास आनन्दमयविषय एवेति निर्णीयत इति। शुद्धिप्रार्थनालिङ्गमनूद्य परिहरति - **यदुक्तमित्यादिना**। यथा घनमलिनश्चन्द्रः शुद्धो भवत्विति प्रार्थना स्वदृष्टितिरोधायकघनापगमविषया, तथैवानन्दमयशुद्धिप्रार्थना स्वचिच्छक्तितिरोधायकमलापगमविषयेति पर्यवस्यतीति हृदयम्।

उत्तरसूत्रमवतारयितुं मयटो विकारार्थत्वमाशङ्कते - **नन्विति**।

अन्नमयादीनामिति - अनेन **'स वा एष पुरुषोऽन्नरसमय'** इत्यादिप्रायपाठोपि पूर्वपक्षहेतुतया सूत्रे शङ्काविषय इति दर्शितः। प्राचुर्यात् प्राचुर्यार्थत्वादित्यर्थः। मनोमयपर्यन्तमेव मयटो विकारार्थ इति - अत्रायं भावः। अन्नमयस्तावदन्नविकारः। अन्नात्पुरुष इति वाक्यशेषात्। तत्प्रायपाठानुरोधेन प्राणमयमनोमययोरेव मयड्विकारार्थः। नतु विज्ञानमये। तत्र **'द्व्यचश्छन्दसी'**ति सूत्रस्याऽप्रवृत्तेः। एवं विज्ञानमयशब्दस्य प्राचुर्यार्थमयडन्तत्वे विकारार्थ प्रायपाठरूपपूर्वपक्षहेत्वसिद्धिस्तेन तस्य जीवपरत्वासिद्ध्या विज्ञानमयादन्योऽन्तर आत्मेत्याम्नातस्याऽऽनन्दमयस्य परमेश्वरत्वसाधकजीवान्यात्मत्वरूपहेत्वन्तरसिद्धश्च भवतीति प्रयोजनद्वयार्थतया विज्ञानमयगतस्यापि मयटः प्राचुर्यार्थत्वं सूत्रेणैव विवक्षितमित्यावेदयितुं विज्ञानमयपदस्यापि प्राचुर्यार्थमयडन्तत्वम्। तेन तस्य जीवपरत्वं च भाष्ये प्रदर्शितम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सर्वथा विकारप्रकरणपठितत्वाद्विकारार्थ एव समुचितो मयट् शब्दस्येत्याशङ्क्याह -

तद्धेतुव्यपदेशाच्च **।।१-१-१५।।**

'एष ह्येवानन्दयाति' इति जीवन् प्रत्यानन्दहेतुतया आनन्दमयः श्रूयते। स्वयं प्रचुरानन्दो

ननु विकारार्थमयटः प्रायपाठाद्विज्ञानमये क्वचिदसम्भवात्त्यागेपि मनोमयपर्यन्तमनुवृत्तस्य तस्य बुद्धिसन्निहितत्वादानन्दमये त्यागो न युज्यते। न च विज्ञामयशब्दादिवाऽऽनन्दशब्दाच्छन्दसि मयटोऽसम्भवः वृद्धत्वात्। **नित्यं वृद्धशरादिभ्य** इति सूत्रे नित्यग्रहणस्य छन्दसि विकल्पार्थत्वादित्यभिप्रायेण शङ्कामुद्भाव्य तदुत्तरत्वेनाऽनन्तरसूत्रमवतारयति - **सर्वथे**ति।

एष ह्येवेति। अत्रायं भावः। आनन्दमये विकारप्राचुर्ययोः साधारणस्य मयटो वाक्यशेषसिद्धाऽर्थो ग्राह्यः **एष ह्येवानन्दयाती**ति वाक्यशेषे च **सोऽकामयते**त्यानन्दमयं प्रस्तुत्य **आनन्दमय एव जीवानानन्दयती**ति श्रूयते। तस्य च यथा, स्वयं निर्धनोपि योगी अनुग्रहेण अन्यान् धनवतः करोतीति नार्थः, किन्तु स्वानन्दैकदेशैरानन्दवतः करोतीति। **एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती**ति श्रुत्यन्तरात्। पूर्वमत्रापि **रसो वै सः, रसँ ह्येवायं लब्ध्वानन्दी भवती**ति श्रवणाच्च। ननु विषयविशेषसम्पर्केण जायमानैरानन्दैरानन्दवत्त्वेन प्रवर्तमानानां जीवानां कथं नित्यसिद्धब्रह्मानन्दैकदेशैरानन्दवत्वोक्तिरुपपद्यत इति चेदुच्यते। विषयविशेषादिकारणवशात्तारतम्येन चाभिव्यक्तो ब्रह्मानन्द एव जीवैरास्वाद्यते। स एव च मानुषानन्दप्रभृति उत्तरोत्तरशतगुणत्वेनाम्नायत इति भाष्यकार एव **भावे जाग्रद्वदि**ति सूत्रे वक्ष्यति। एवं च वाक्यशेषे सर्वजीवापेक्षया प्रचुरानन्दशालित्वमानन्दमयस्य सिद्धमिति स एव मयडर्थो युक्तः। एतेन तत्र प्राचुर्यस्य समानाधिकरणविजातीयाल्पत्ववैशिष्ट्यमवार्यमिति शङ्का निरवकाशीकृता। वाक्यशेषेण व्यधिकरणसजातीयाल्पत्वस्यैव सिद्धत्वात्। एवं च **एष ह्येवानन्दयाती**ति ब्रह्मणः सकलजीवानन्दसन्धायकत्वेन तस्य प्रचुरानन्दवत्त्वं सिद्ध्यति। यथा अन्यान्धनिनः समाचरतः प्रचुरधनित्वमिति भावः। सूत्रे चकारेण **आनन्दमयोऽभ्यासादि**ति साधकतया पूर्वसूत्रोक्तस्याभ्यासरूपहेतोः समुच्चयार्थः।

अथवा, समुच्चयस्योन्नेयत्वेनाऽनुक्तहेतुसमुच्चयार्थः। तेन **सोऽकामयत बहुस्यां प्रजायेये**ति बहुभवनसंकल्पयितृत्वं, **इदँ सर्वमसृजते**ति सर्वकारणत्वं, **तत्सृष्ट्वा तदेवानुप्राविशदि**ति स्वसृष्टसर्वान्तर्यामितया तदनुप्रवेशः, **भीषाऽस्माद्वातः पवत** इत्यादिना सर्वनियन्तृत्वं चेत्येतानि ब्रह्मलिङ्गानि समुच्चितानि। यद्यप्येतान्यानन्दमयस्य ब्रह्मत्वे साक्षात्साधकानि न तु तदुपपादकस्य मयटः प्राचुर्यार्थत्वस्य, तथाप्येष **ह्येवानन्दयाती**ति आनन्दहेतुत्वव्यपदेश**स्यैतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती**ति श्रुत्यन्तरानुसारेण तत्र साक्षात्साधकत्वमपि सम्भवतीति तेनैतेषां समुच्चयो नाऽनुपपन्नः। अनेनैव सूत्रेण प्रियमोदादीनां ब्रह्मधर्मकत्वानुपपत्तिरप्यर्थात्परिहृता। तेषामिह ब्रह्मानन्दाभिव्यक्तिविशेषरूपत्वसिद्धेः। एवञ्च सत्यानन्द आत्मेति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

हि परानानन्दयति। अतः परमेश्वर एवानन्दमयः। आनन्दप्रचुरः परमेश्वर आनन्दमय इत्युक्तेऽपि ब्रह्मणोऽन्य एवायमिति गम्यते। 'ब्रह्म पुच्छं प्रतिष्ठे'ति ब्रह्माधारत्वेनाऽस्यावगमात्। परमेश्वराद-न्यत्वाङ्गीकारे ब्रह्मणोऽस्वातन्त्र्याज्जगत्कारणत्वाद्यसम्भवः। अतो जीवपक्ष एव समीचीन इत्यत आह -

मान्त्रवर्णिकमेव च गीयते ।।१-१-१६।।

यत् 'सत्यं ज्ञानमनन्तं ब्रह्म' इति मन्त्रवर्णोदितं ब्रह्म, तदेव 'अन्योन्तर आत्माऽऽनन्दमय' इति आनन्दप्रचुरतया आनन्दमय इति गीयते। 'ब्रह्म पुच्छं प्रतिष्ठा' इति ब्रह्मशब्दः प्रणववाचकः। तस्य परमेश्वरवाचकत्वादाधारत्वम्।

अत्र केचिदाहुः - परमाकाशरूपः प्रकृत्यात्मा आनन्दमय इति श्रूयते न विश्वाधिकं निमित्तं परं ब्रह्म यत् 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्युच्यते। 'तस्माद्वा एतस्मादात्मन आकाशः

निरूपणमपि प्रियमोदप्रमोदरूपवीचीतरङ्गपरम्परापरिवृतमाहासमुद्रायमाणवक्ष्यमाणब्रह्मानन्दविषयतयोपपद्यत इति न तत् क्षुद्राव्यपदिष्टतृप्तिरूपानन्दविषयत्वेन योजनीयम्।

प्रतिष्ठात्वेन निरूपिताद् ब्रह्मणोन्यत्वादानन्दमयो जीव इति शङ्कामनूद्य तदुत्तरत्वेनोत्तरसूत्रमवतारयति - **आनन्दप्रचुर** इति।

यत् सत्यं ज्ञानमिति। अत्रायमाशयः। **'ब्रह्मविदाप्नोति परमि'**त्यानन्दवल्ल्यां प्रतिपाद्यस्य कृत्स्नस्याऽप्यर्थस्य संग्राहकं सूत्रम्। तत्र किं तद्ब्रह्म ? कथं च तद्वेदनम् ? किं च तद्वेदनप्राप्यं परमोत्कृष्टं फलमित्याकांक्षायां तत् त्रयं स्पष्टीकर्तुं **'सत्यं ज्ञानमनन्तं ब्रह्म।', 'यो वेद निहितं गुहायां परमे व्योमन्।', 'सोऽश्नुते सर्वान्कामानि'**त्यादिमन्त्रभागः प्रवृत्तः **सोऽकामयते**त्यादिना बहुभवनसङ्कल्पयितृ प्रकृतं ब्रह्मैव एवं, स इति पुंलिङ्गेन प्रकृतस्यानन्दमयस्यैव परामर्शात्। कारणवाक्यसमानविषयत्वेनाऽप्यानन्दमयवाक्यस्य मान्त्रवर्णिकब्रह्मविषयत्वमवार्यमिति।

नन्वेवमपि **ब्रह्मपुच्छं प्रतिष्ठे**ति प्रतिष्ठारूपब्रह्मान्यत्वप्रतीतेरानन्दमयस्य ब्रह्मत्वं न सिद्ध्यतीत्याशङ्क्याह - **ब्रह्मपुच्छमिति**। उपक्रमगत ब्रह्मपदानुसारेणानन्दमयस्य ब्रह्मत्वसिद्धावुपसंहारे ततोऽन्यत्र प्रयुक्तं ब्रह्मपदं ब्रह्मवाचकतया तत्प्रतिष्ठाप्यत्वनिर्देशयोग्ये प्रणवे वर्तनीयमिति भावः।

अत्र केचिदिति - तेषामाकूतमिदम्। **सत्यं ज्ञानमि**तिमन्त्रे विवरणीयेष्वानन्त्यं कारणवाक्यैरुपपद्यते। तथा कोशचतुष्टयरूपा तदनन्तर्वर्तिनो ब्रह्मणो गुहाऽन्नमयादिवाक्यैः प्रदर्श्यते। एवमेव सर्वकामावाप्तिरूपं फलमानन्दमीमांसया विशदीक्रियते। तथैव गुहान्तराले तदास्थानप्रदेशतया निर्दिष्टं परमं व्योमापि विशिष्येदमित्थमिति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सम्भूत' इत्याकाशादिप्रपञ्चप्रकृतित्वेन श्रुत आनन्दमयः परमाकाशः। परमाकाशरूपत्वमस्य 'यदेष आकाश आनन्दो न स्यात्' इत्यतोऽवगम्यते। 'ब्रह्मपुच्छं प्रतिष्ठा' इति ब्रह्म आनन्दाकाशस्याधारत्वेनावगम्यते। अत एव 'स एको ब्रह्मण आनन्द' इति ब्रह्माश्रितत्वेनावगम्यते। पुनरेष एव 'आनन्दो ब्रह्मेति व्यजानात् आनन्दाध्द्येव खल्विमानि भूतानि जायन्ते' इत्यादिना सकलभूतप्रकृतित्वेनाभिधीयते। तत्र आनन्दो ब्रह्मेत्यानन्दस्य ब्रह्मत्वव्यपदेशस्तु ब्रह्मधर्मत्वेन तदभेदात्। 'सैषा भार्गवी वारुणी विद्या परमे व्योमान् प्रतिष्ठिता' इति ब्रह्मधर्मस्वरूपे परमानन्दरूपे प्रपञ्चप्रकृतौ परमशक्तिपर्याये चिदात्मनि परमे व्योमनि वारुणी विद्या समाप्तेत्युच्यते। ततो ब्रह्मधर्मस्वभावः

प्रदर्शनीयम्। तत्प्रदर्शनपरम् आनन्दमयवाक्यम्। तत्र निहितं ब्रह्म तु **'ब्रह्म पुच्छं प्रतिष्ठा'** इति वाक्येन निर्दिश्यते। न प्रणवः। न च तत्र स्थितस्य तत्प्रतिष्ठात्वनिर्देशो नोपपद्यत इति शङ्क्यम्। भुविस्थितस्याऽचलस्य भूधरत्ववत्स्वशक्तिरूपे परमासने स्थितस्य परब्रह्मणस्तत्प्रतिष्ठात्वस्य निर्बाधम्।

नन्वेवं **'तस्माद्वा एतस्मादि'**त्यादिकारणवाक्यस्य ब्रह्मविषयत्वे तत्प्रतिपाद्यकारणभूतात्मनिर्धारणस्य **'तस्माद्वा एतस्मादि'**तिवाक्यशैलीसमाप्त्यवगमितमानन्दमये पर्यवसानं विरुध्येत। आनन्दमयविषयत्वे तस्य ब्रह्मानन्त्यप्रतिपादनार्थतयाऽऽनन्दमयमतिलंघ्य प्रतिष्ठारूपे ब्रह्मणि पर्यवसानं च विरुध्येतेतिचेन्न। उभयथाप्युपपत्तेः। ब्रह्मविषयत्वे कोशचतुष्टयात्मकगुहानिरतिशयानन्दात्मपरमव्योमरूपयोः प्रकारचतुष्टयपर्यङ्करीत्या हार्दपरब्रह्मस्थानयोर्निरूपणार्थमेव **'तस्माद्वा एतस्मादि'**ति श्रुतिशैली प्रवृत्ता। न तु कारणभूतस्याऽऽत्मनः सर्वान्तरत्वनिर्धारणार्थमित्युपपत्तेः। आनन्दमयविषयत्वेपि तदपृथक्सिद्धाश्रयस्य ब्रह्मण एवानन्त्यासिद्धेः। **तस्मादि**ति मन्त्रब्राह्मणप्रकृतब्रह्मपरामर्शि। एतस्मादिति तदव्यवहितमन्त्रमात्रप्रकृतपरमव्योमपरामर्शि। उभयोः सामानाधिकरण्यमभेदोपचारेण। अभेदोपचारश्च तन्मूलभूताऽपृथक्सिद्धाश्रयाश्रयिभावद्योतनेनानन्दमयविषयकारणविषयवाक्यानां ब्रह्मानन्त्योपपादनपर्यवसायित्वज्ञापनपरत्वमिति सर्वोपपत्तेश्च।

ननु, यद्यानन्दमयो ब्रह्मधर्मभूत आनन्दस्तर्हि कथं सूत्रकारेण आनन्दमयो ब्रह्मेत्युक्तमित्याशङ्क्य श्रुतिवदभेदोपचारेणेत्याह प्रतिष्ठाभूतादिति।

अस्मिन् पक्षे त्वधिकरणशरीरमेवम् - जगत्कारणमानन्दमयो जीवः? उत ब्रह्मानन्दरूपा चिच्छक्तिः? इति संशयः।

अत्र पूर्वपक्षः -

तस्मादिति वाक्येन ब्रह्मविज्जीव एव परामृश्यते। तस्य प्रथमानिर्दिष्टतया प्राधान्यात्। ननु परमव्योम्नोपि व्याख्यातव्यत्वेनार्थतः प्राधान्यात्तद्रूपा चिच्छक्तिरेव परामृश्यत इति चेन्न। व्योम्नो भूताकाशतया प्रसिद्धत्वेन तस्य व्याख्यतव्यत्वाभावात्। एवञ्च जगत्कारणमानन्दमयो जीव एवेति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रकृत्यात्मा परमाकाशरूपा परमशक्तिरानन्दमय इत्युच्यते, तद्धर्मित्वेन प्रतिष्ठेत्युच्यते परं ब्रह्म। विज्ञानमयस्तदुपासको जीवः। प्रतिष्ठाभूताद्धर्मिणो ब्रह्मणो धर्मभूतस्याऽनन्दमयस्य शक्त्यात्मनो भेदादर्शनादानन्दमय आत्मा ब्रह्मेत्याभिप्रायेण 'आनन्दमयोऽभ्यासात्' इति सूत्रकारेण सूत्रितमिति।

अथ सिद्धान्तः -

आनन्दमयो ब्रह्मानन्दरूपा चिच्छक्तिः। अस्यानन्दस्य मानुषादिब्रह्मान्तेषूत्तरोत्तरशतगुणत्वे नाभ्यस्तत्त्वेन जीवस्य तथाविधानन्दत्वाऽसम्भवादिति। पूर्ववदेव द्वितीयसूत्रं योजनीयम्। प्रायपाठेन मयटो विकारार्थत्वप्रतीत्या प्रसक्ताया जीवपरत्वशङ्काया निराकरणार्थं पूर्ववदेव तत्र हेत्वन्तरप्रतिपादनपरं तृतीयसूत्रम्। तत्रार्थयोजनायामयं विशेषः। **'रसो वै सः।, एष ह्येवानन्दयाती'**ति। यथा प्रचुरो जलराशिः स्वैरेकदेशैः केदारान्जलवतः कुर्यात्। न त्वप्रचुर इति वाक्यशेषे श्रुतस्यानन्दवत्वस्य तदन्यथानुपपत्त्या प्राचुर्यस्य प्रतीयमानतया तदेव मयडर्थ इति। मान्त्रवर्णिकसूत्रं तु आनन्दमयशब्देन ब्रह्मविदेव परामृश्यत इति शङ्कानिराकरणार्थम्। मान्त्रवर्णिकं परमव्योमैव **'तस्माद्वा एतस्मादि'**त्यादिषु गीयते। न तु ब्रह्मविदितसूत्रगतेन नपुंसकलिङ्गेन द्योत्यते। तस्मात्सैव चिदम्बरशक्तिरुदाहृतश्रुतिवशादुक्तविशेषणविशिष्टतया सिद्ध्यति। तस्मान्न जीवे ब्रह्मलक्षणस्यातिव्याप्तिरिति।

ननु यद्येवमनेनाधिकरणेन जीवे ब्रह्मलक्षणातिव्याप्तिनिराकरणार्थं प्रवृत्तेन तन्निराकृत्य चिच्छक्तावतिव्याप्तिरुपपादिता स्यात्, न च तस्या अपृथक्सिद्धब्रह्मधर्मतया तत्र तल्लक्षणस्थितिर्नाऽतिव्याप्तिरिति शङ्कम्। जातौ व्यक्तिलक्षणस्येव तस्याऽतिव्याप्तित्वाविशेषणात्। अन्यथा जीवेपि तल्लक्षणप्रसक्तिर्नातिव्याप्तिः स्यात्। तस्याऽप्ययुतसिद्धतद्विशेषणत्वाविशेषादितिचेन्न। शिववत्तदीयायाश्चिच्छक्तेरपि प्रपञ्चकृत्यकारणतया तत्र तल्लक्षणस्थितेरतिव्याप्तित्वाभावात्। परमेश्वरस्य शक्तिविशिष्टस्यैव शुद्धाऽशुद्धात्मकसकलप्रपञ्चविषयपञ्चकृत्यकारणत्वात्।

तथाहि शिवपुराणवचनानि -

शक्तिः साक्षान्महादेवी महादेवस्तु शक्तिमान्
तयोर्विभूतिलेशो वै सर्वमेतच्चराचरम्।।

वस्तु किञ्चदचिद्रूपं किञ्चिद्वस्तु चिदात्मकम्
इदं शुद्धमशुद्धं च परं चापरमेव च।।

यत्संसरति चिच्चक्रमचिच्चक्रसमन्वितम्
तदेवाशुद्धमपरमितरत्तु परं शुभम्।।

अपरं च परं चैव द्वयं चिदचिदात्मकम्
शिवस्य च शिवायाश्च स्वाम्यं चैतत्स्वभावतः।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यथा शिवस्तथा देवी यथा देवी तथा शिवः
नाऽनयोरन्तरं विद्याच्चन्द्रचन्द्रिकयोरिव।।

चन्द्रो न खलु भात्येव यथा चन्द्रिकया विना
न भाति विद्यमानोपि तथा शक्त्या विना शिवः।।

एवं परस्परापेक्षा शक्तिशक्तिमतोः स्थितिः
न शिवेन विना शक्तिर्न शक्त्या च विना शिवः।।

शक्तो यया शिवो नित्यं भुक्तौ मुक्तौ च देहिनाम्
यामाहुरखिलेशस्य तैस्तैरनुगुणैर्गुणैः।।

समानधर्मिणीमेव शिवस्य परमात्मनः
यथा न जायते पुत्रः पितरं मातरं विना।।

तथा भवं भवानीं च विना नैतच्चराचरम्
स्त्रीपुंसप्रभवं विश्वं स्त्रीपुंसात्मकमेव च।।

स्त्रीपुंसयोर्विभूतिश्च स्त्रीपुंसाभ्यामधिष्ठितम्
तस्मात्सह तया शक्त्या हृदि पश्यन्ति ये शिवम्।।

तेषां शाश्वतिकी मुक्तिर्नेतरेषामिति श्रुतिः।। इत्यादीनि

एवञ्च यानि श्रुतिस्मृतिपुराणेषु शिवस्य पञ्चकृत्यकारित्वादिप्रतिपादकानि वचनानि, यानि च चिच्छक्तेः वधुर्जजान नवगज्ञनित्री। एका सती बहुघोषो व्युच्छस्य जीर्णात्वं जरयसि सर्वमन्यदित्यादीनि श्रुतिवचनानि।

सा शक्तिः सर्वदा सूक्ष्मा प्रबोधानन्दरूपिणी
शक्तिमानुच्यते देवश्शिवः शीतांशुभूषणः।।

महदादिविशेषान्तास्त्वजाद्याश्चैव मूर्तयः
यच्चान्यदस्ति तत्सर्वं तस्याः कार्यं न संशयः।।

सा देवी मायया सर्वं ब्रह्माद्यं सचराचरम्
मोहयत्यप्रयत्नेन मोचयत्यपि लीलया।।

या सा माहेश्वरी शक्तिर्ज्ञानरूपातिलालसा
व्योमसंज्ञा पराकाष्ठा सेयं हैमवती तथा।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सेयं करोति सकलं तस्याः कार्यमिदं जगत्
न कार्यं नापि करणमीश्वरस्येति सूरयः।।

सैषा माहेश्वरी गौरी मम शक्तिर्निरञ्जना
शान्ता सत्या परानन्दः परंपदमिति श्रुतिः।।

अस्याः सर्वमिदं जातमत्रैव लयमेष्यति
एषैव सर्वभूतानां गतीनामुत्तमा गतिः।।

इत्यादीनि शैवलैङ्गकौर्मादिवचनानि च पञ्चकृत्यकारित्वप्रतिपादकानि, तानि सर्वाणि विशेषवचनानुसारेण तयोः परस्परापेक्षया पञ्चकृत्यकारित्वादिविषयाणि। शिवस्य शक्तेर्वा तन्निषेधवचनानि चाऽन्योन्यनैरपेक्ष्येण तन्निषेधपराणीति व्यवस्थापनीयम्।

एवं सत्यपि शिवस्य सर्वात्मना स्वातन्त्र्यं, शक्तेः शिवमात्रे पारतन्त्र्यमित्येतावान्नास्ति विशेषः।

सैका परा च चिद्रूपा शक्तिः प्रसवधर्मिणी
विभज्य बहुधा विश्वं विदधाति शिवेच्छया।।

एवमेषा पराशक्तिरीश्वरेच्छानुवर्तिनी
स्थिरं चरं च यद्विश्वं सृजतीति विनिश्चयः।।

इत्यादिवचनप्रामाण्यात्। अत एव शक्तिशिवयोर्ब्रह्मभावे विशेषणविशेष्यता। तत एव च तयोः पूजायां विशेषाभावेऽपि पौर्वापर्यं शिवपुराणे विधीयते।

यथा देवस्य देव्याश्च कुर्यात्स्नानादिकां क्रियाम्
नतु कश्चिद्विशेषोस्ति तत्र तौ सदृशौ यतः।।

प्रथमं देवमुद्दिश्य कुर्यात्स्नानादिकां क्रियाम्
पश्चाद्देव्यै प्रकुर्वीत देवदेवस्य शासनात्।।

इति शिवशक्त्योः ब्रह्मभावे समानेऽपि विशेष्यतया प्राधान्यम्।।

युजे वां ब्रह्म पूर्व्यं नमोभि र्विश्लोका यन्ति पथ्येव सुरेः।
श्रुण्वन्ति विश्वे अमृतस्य पुत्रा आ येधामानि दिव्यानि तस्थुः।।

इति श्वेताश्वतरमन्त्रे पूर्वविशेषणबलादवसीयते। अस्य ह्ययमर्थः - वां युवयोः, शिवशक्त्योर्मध्ये पूर्व्यं पूर्वं स्वर्थे यत्प्रत्ययः। विशेष्यतया प्रधानभूतं ब्रह्म शिवरूपं, नमोभिः युजे युनज्मि। छान्दसो विकरणव्यत्ययः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अन्ये पुनः - 'अस्माल्लोकात्प्रेत्य एतमन्नमयमात्मानमुपसंक्रम्य' इत्यादावन्नमयादीनां प्रत्येकं चेतनवाचकात्मश्रुतिसंबन्धात्संसारलोकादुत्क्रान्तस्य मुक्तस्य क्रमप्राप्यत्वावगमाच्च एते सर्वदाऽन्नमयादय आत्मानः पञ्च चेतना अन्नाद्यनुमितपञ्चभूताधिष्ठातारः कारणभूताः पुरुषा ब्रह्मविष्णुरुद्रेश्वरसदाशिवसंज्ञाः।

शिवस्य सर्वनमस्कारपर्यवसानभूमित्वात्तन्नमस्काराङ्कितैः श्लोकैर्भजामीत्यर्थः। नमस्कारश्लोका विशेष्यन्ते। सूरेः विदुषः शिवस्वरूपाभिज्ञस्य, ज्ञानान्मुक्तिं प्राप्तस्य मम, श्लोकाः वाचिकशिवनमस्कारसन्दर्भरूपाः **अहं श्लोककृदिति** मुक्तकृत्यत्वेन श्रुतिप्रसिद्धाः। पथ्येव पथि हिताः। त्वरित निर्विकारमार्गगमनाः सदश्वा इव, यन्ति निरर्गलप्रवाहतया निर्गच्छन्ति। पथ्यशब्दात् **सुपां सुलुगिति** सूत्रेण जस आकारादेशः। विश्वे सर्वेऽपि, अमृतस्य शिवस्य, **एतानीह वा अमृतस्य नामधेयानी**ति श्रुतिप्रसिद्धामृतनामधेयस्य, पुत्राः **दिव्या गणा बहुरूपाः पुराणा** इत्यादि श्रुतिप्रसिद्धाः, स्कन्दनन्दिकेश्वरादयः, श्रृण्वन्ति मम श्लोकानादरेणाकर्णयन्ति। अमृतस्य पुत्रा विशेष्यन्ते - **ये दिव्यानि दिवि भवानि चिदाकाशरूपे नित्यकैलासे स्थितानि धामानि भवनान्यातस्थुः आस्थितवन्त** इति। यद्यप्यत्र द्वयोर्मध्ये पूर्वं ब्रह्मेत्युक्त्वा द्वयोरपि प्रत्येकं ब्रह्मता प्रतीयते, तथापि विशेषणविशेष्यात्मकविशिष्टब्रह्मावलम्बन एव तदेकदेशस्य ब्रह्मत्वव्यवहारः।

ऋतं सत्य परं ब्रह्म पुरुषं कृष्णपिङ्गलमिति परब्रह्मणः कृष्णपिङ्गलताश्रवणेन शबलस्य ब्रह्मतावगमात्। एवञ्च लक्ष्यब्रह्मशब्दार्थभूतविशिष्टैकदेशे विशेष्य इव विशेषणेऽपि लक्षणस्य वर्तनं नाऽतिव्याप्तिरिति। विशिष्टे लक्ष्ये स्वतो लक्षणाऽभावेन तदेकदेशगतलक्षणेनैव तस्य लक्षणवत्तायाः समर्थनीयत्वादिति।

एवमन्नमयाद्याः शरीरप्राणमनोजीवाः, आनन्दमयस्तु ब्रह्मानन्दरूपा चिच्छक्तिरिति केषांचिन्मतमुपन्यस्तम्।

अत्र पुनर्मतान्तरं दर्शयति **अन्ये पुनरि**ति। **अन्नाद्यनुमिते**ति। **पृथिव्या ओषधयः। ओषधीभ्योऽन्नम्। अन्नात्पुरुष** इति श्रुतेरन्नकारणतयाऽन्नशब्दलक्षितायाः पृथिव्या देवतात्वादन्नमयश्चतुर्मुखः। **आपोमयः प्राण** इति श्रुतेः प्राणशब्दलक्षितानामपां देवतात्वात्प्राणमयो विष्णुः। एवं मनोमयविज्ञानमयावपि केनचित्सम्बन्धेन लक्षणया रुद्रेश्वरसदाशिवा इति विज्ञेयम्। चेतनत्वमुक्तप्राप्य परशिवनेदिष्ठलोकाधिष्ठातृत्वलिङ्गाभ्यामनुगृहीतया पञ्चसङ्ख्यया अन्नमयादयो ब्रह्मादय इति निश्चिते अन्नमयप्राणमयशब्दयोः प्रसिद्धसम्बन्धाधीनलक्षणामूल्या वृत्त्या ब्रह्मविष्णुपरत्वे सिद्धे मनोमयादिशब्दानां रुद्रादिपरत्वस्य निश्शङ्कत्वात्।

कारणभूताः पुरुषा इति - तदधिष्ठातुः परमशिवस्यैव कारणत्वं तेषूपचर्यते। तस्मात्कारणपुरुषा इति व्यपदिश्यन्ते। एवञ्च आनन्दमयः सदाशिवः। तत्प्रतिष्ठारूपं ब्रह्म परमशिव इति भावः। सदाशिवपरमशिवयोरपृथक्सिद्धत्वरूपादभेदादानन्दमयशब्दो ब्रह्मपर इत्याशयेन सूत्रकारेणोक्तमिति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अन्नमयाद्यात्माधारस्य सदाशिवस्यानन्दमयस्यापि कारणं परमशिवाख्यं ब्रह्म तत्प्रतिष्ठेत्युच्यते। तदभेदादानन्दमयस्य ब्रह्मत्वव्यपदेश इति सर्वदा आनन्दमयः परमेश्वर इति सिद्धम्।

।। इति आनन्दमयाधिकरणम् ।।

***

अस्मिन्पक्षे अधिकरणशरीरमेवंविधम् -

सोऽकामयतेत्यादिना जगतः कारणमिति प्रतिपाद्यमान आनन्दमयः किमाकाशाभिमानि सदाशिवाख्य आधिकारिकपुरुषः? उत परमशिवाख्यं ब्रह्म? इति संशयः।

पूर्वपक्षस्तु - चेतनत्वलिङ्गेनोपासनाप्राप्यत्वलिङ्गेन च सहितया पञ्चसङ्ख्यया च अन्नमयादयः पञ्चभूम्यादिभूताभिमानिनः आधिकारिकपुरुषा इति निर्णीते स्थानप्रमाणादानन्दमय आकाशाभिमानी सदाशिव इत्येव युज्यते। तत एव **यदेष आकाश आनन्दो न स्यादि**त्याकाशशब्दः श्रूयते। आकाशशब्दसामानाधिकरण्येना-नन्दशब्दश्रवणमप्यानन्दमयशब्दस्य स्वार्थिकमयडन्ततया आकाशाभिमानिदेवताज्ञापकत्वेनोपपन्नं भवति। **को ह्येऽवान्यात्कः प्राण्यादि**ति वाक्यमप्याकाशाभिमानिना सदाशिवेन यदि प्राणिनामसङ्कटमवस्थानं न सम्पादितं तर्हि नीरन्ध्रनिबिडीभूतानां तेषां श्वासचेष्टादिकमपि न सम्भवेदिति प्राणनहेतुतया सर्वानन्दकरत्वात् **एष ह्येवानन्दयाती**त्यादिकमपि तत्रैव सङ्गच्छते। न च मुक्तेः प्राक्परिच्छिन्नस्याधिकारिकपुरुषस्य बहुभवनतत्सङ्कल्पादिकं नोपपद्यत इति शङ्क्यम्। मुक्तेः प्रागपि विद्यासामर्थ्येन चिच्छक्तिविकासस्या-ऽङ्गीकर्तव्यत्वात्। अन्यथा सौभरिप्रभृतीनां कायव्यूहपरिग्रहादिकं नोपपद्येत। तस्मादन्नमयादिशब्दोक्तब्रह्माद्युपासनया क्रममुक्तिफलकतत्तल्लोकावाप्त्युक्तिरप्युपपद्यत इत्येवं प्राप्ते, सिद्धान्तः -

आनन्दमयो ब्रह्म, निरतिशयत्वेनाऽभ्यस्तस्यानन्दस्य ब्रह्मत्वेनोपपन्नत्वात्। आनन्दयितृत्वश्रवणाद-प्यानन्दमयो ब्रह्म। मान्त्रवर्णिकं ब्रह्मैवानन्दमय इति गीयते। तस्मादन्नमयाद्युपासनापि **येऽन्नं ब्रह्मोपासीत** इत्यादिवाक्यशेषानुरोधेन तत्तद्विशिष्टब्रह्मोपासने चतुर्मुखाद्यवच्छिन्नब्रह्मोपासनया तत्तल्लोकप्राप्तिपूर्वक**मानन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चने**ति मन्त्रोक्तमुक्तिप्राप्तिरिति सर्वमुपपद्यत इति।

ननु उपन्यस्तमतत्रयमध्ये ग्राह्यं मतं किमित्याशङ्क्याह **सर्वदे**ति - आनन्दमयः साक्षाद्ब्रह्मेति वा? अथ तदीया चिच्छक्तिरिति वा? सदाशिवेऽभिव्यक्तं परं ब्रह्मेति वा? भवतु। सर्वदाप्यानन्दमयो न जीवः। किन्तु परमेश्वर एवेति सिद्धत्वात्तद्विशेषविचारेणालमित्याशयः।

卐 卐 卐

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पुच्छब्रह्मवादः

इतरे तु **आनन्दमयोऽभ्यासात्** आनन्दमयवाक्ये श्रुतं पुच्छब्रह्म स्वप्राधान्येन वाक्यप्रतिपाद्यमिति व्याचक्षते।

ननु, यथावृत्ति आनन्दमयब्रह्मवादः किमिति नाङ्गीकृत इति चेदत्राहुः। आनन्दमयो ब्रह्मेति न युज्यते।

१ - अन्नमयादिगतविकारार्थप्रायपठितेन मयटा तस्य विकारत्वावगमात्।

२ - शिरः पक्षाद्यवयवयोगात्।

३ - पुच्छत्वेन निर्दिष्टाद् ब्रह्मणस्तस्य व्यतिरेकप्रतीतेः।

४ - अन्नमयादिपर्यायेषु प्रधानानां तत्तत्पर्यायगतश्लोकविषयत्वदर्शनेन स्वपर्यायगतश्लोकविषयस्य तस्याप्राधान्यात्।

५ - **तस्यैष एव शारीर आत्मा यः पूर्वस्ये**ति अन्नमयादीनामिव तस्याऽप्यात्मत्वश्रवणात्।

६ - **अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमया मे शुद्ध्यन्ताम्**इति शोध्यत्वश्रवणाच्च।

***

पुच्छब्रह्मवादाक्षेपः

अत्र तावद्विकारत्वावगमो सिद्धः। विकारार्थकल्पकत्वेनावगतस्य प्रायपाठस्याभावात् यद्यप्यन्नमये विकारार्थ उपक्रान्तः तथाऽपि तावता नाऽनन्दमयेऽपि स एवाऽर्थ इत्यायाति। प्राणमयादिषु तत्परित्यागात्। प्राणनवृत्तिप्राचुर्येण हि पञ्चवृत्तिर्वायुः **प्राणमय** इति व्यपदिष्टः। न तु प्राणकार्यत्वेन। एवमन्तःकरणजीवावपि। मननविज्ञानप्राचुर्येण मनोमय इति विज्ञानमय इति निर्दिष्टौ। ततश्चानन्दमयेऽपि प्राचुर्यमेव मयडर्थः। न चानन्दप्राचुर्यमपि ब्रह्मणि न सम्भवति। प्राचुर्यस्य स्वसमानाधिकरणविजातीयाल्पत्वप्रतियोगिकतायाः **ब्राह्मणप्रचुरो ग्राम** इत्यादौ दृष्टत्वेन आनन्दप्राचुर्यार्थस्वाभाव्यादीषद्दुःखसंभिन्नत्वावश्यम्भावादिति वाच्यम्। **प्रचुरप्रकाशः सविते**त्यादौ व्यधिकरणसजातीयाल्पत्वप्रतियोगिकताया अपि दृष्टत्वेन ब्रह्मणि जीवगतानन्दाल्पत्वमपेक्ष्य तत्प्राचुर्यसंभवात्। इह च वाक्यशेषे **सैषाऽऽनन्दस्य मीमांसे**त्यारभ्य व्यधिकरणजीवानन्दाल्पत्वमपेक्ष्यैव ब्रह्मानन्दस्य प्राचुर्यदर्शनात् ।। १।।

शिरः पक्षादिरूपेण कल्पितमवयवित्वं तु न ब्रह्मत्वविरोधि। अन्यथा ब्रह्मणोऽवयवित्ववदवयवत्वमपि नास्तीति पुच्छब्रह्मणोप्यब्रह्मत्वप्रसङ्गात् ।। २।।

आनन्दमयस्य पुच्छं ब्रह्मेति निर्देशोपि नाऽऽनन्दमयस्य ब्रह्मत्वविरोधी। अन्नमयस्य स्वस्मादनतिरिक्तैः स्वावयवैरेव **तस्येदमेव शिरः** इत्यादिना शिरः पक्षपुच्छादिमत्त्वकल्पनापाठानुगुण्येन ब्रह्मानन्दमययोरेव पुच्छतद्वद्भावनिर्देशे तात्पर्यकल्पनस्योचिततया ततो व्यतिरेकाप्रतीतेः।। ३।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

आनन्दमयस्य स्वपर्यायगतश्लोकाविषयत्वमप्यसिद्धम्। अन्नमयादिपर्यायश्लोकानां पुच्छमात्राविषयत्वाभावेनाऽस्यापि तद्वदेव पुच्छवद्विषयत्वौचित्यात्। न च पुच्छवति प्रयुक्तस्य ब्रह्मशब्दस्यैव श्रवणात्पुच्छविषय एवाऽसौ न पुच्छवद्विषय इति शङ्क्यम्। **सत्यं ज्ञानमनन्तं ब्रह्म।, तस्माद्वा एतस्मादात्मन** इत्युपक्रान्तस्यैवानन्दमयवाक्ये प्रतिपादनेन ब्रह्मत्वानन्दमयशब्दानामैकार्थ्यस्यावघृततया तेष्वन्यतमनिर्देशमात्रेण श्लोकस्यानन्दमयविषयत्वसिद्धेः। न च प्रियमोदादिमत्तया प्रसिद्ध आनन्दमये श्लोकदर्शिता सत्त्वाऽसत्त्वशङ्का नान्वेतीति वाच्यम्। जीवस्य तथा लोके प्रसिद्धत्वेपि ब्रह्मणोऽप्रसिद्धत्वात् ।। ४।।

तस्यैष एव इत्यादावानन्दमयस्यात्मान्तरश्रवणमप्यसिद्धम्। तस्य पूर्वस्य विज्ञानमयस्य **एष एव शारीर आत्मा।, य एष आनन्दमय** इत्यर्थाङ्गीकारात्। तस्यानन्दमयस्य एष एव शारीर आत्मा यः पूर्वस्य विज्ञानमयस्येत्यर्थाङ्गीकारेऽपि विज्ञानमयस्य य आकाशादिस्त्रष्टा वक्ष्यमाणन्यायसिद्धपरमात्मभाव आनन्दमयः शारीर आत्मा स एव स्वस्यापि स्वयमेवात्मेति पर्यवसानेन **पतिं विश्वस्यात्मेश्वरमि**त्यात्मेश्वरत्वोक्त्या ईश्वरान्तरस्येवात्मान्तरस्य निराकृतेरेव सिद्धेः ।। ५।।

शोध्यत्वं न ब्रह्मत्वविरोधि। सर्वत्र शुद्धिस्तत्तदर्थानुगुणेति ब्रह्मण्यप्यनादिभवसञ्चितानेकजीवापराधकालुषिते मुक्त्यर्थं प्रसाद्यत्वरूपस्य शोध्यत्वस्य सम्भवात् ।। ६।।

***

तस्मात्पुच्छब्रह्मवाद्युक्तयुक्तीनामसाधकत्वात्पुच्छवदानन्दमयोपि ब्रह्मैव। प्रकरणस्य स्वस्मादनतिरिक्तैः स्वावयवैः पक्षपुच्छादिरूपणपरत्वेन तस्य पुच्छब्रह्माभेदप्रतीतेः ।। १।।

प्रकरणगतश्लोकानां पुच्छवद्विषयत्वेन तत्रैव श्लोकगतस्य ब्रह्मशब्दाभ्यासस्य सत्त्वाऽसत्त्वशङ्कालिङ्गस्य च पर्यवसानात् ।। २।।

सत्यं ज्ञानमिति प्रकृतं ब्रह्म **तस्माद्वा एतस्मादात्मन** इत्यात्मशब्देन निर्दिश्य, तस्याकाशादिकारणत्वप्रतिपादनाऽनन्तरं सर्वान्तरत्वेन तस्यात्मत्वविवरणार्थं प्रवृत्तस्य सन्दर्भस्य तत्रैव परिसमापनेन तदनन्तरं **तस्माद्वा एतस्मादानन्दमयादन्योन्तर आत्मा ब्रह्म** इति तदान्तरस्य ब्रह्मणो निरूपणाभावात् ।।३।।

सोऽकामयतेत्यनन्तरवाक्यगतेन स इति पुंलिङ्गान्तेनाऽव्यवहितप्रधानप्रकृतार्थपरामर्शिना परामर्ष्टुं योग्यत्वात् ।। ४।।

भृगुवल्यामेतं **विज्ञानमयमात्मनमुपसंक्रम्य एतमानन्दमयमात्मानमुपसंक्रम्य** इत्यत्राऽनन्दमयशब्दस्य **विज्ञानं ब्रह्मेति व्यजानात्।, आनन्दो ब्रह्मेति व्यजानादि**ति तत्रत्यसम्प्रतिपन्नब्रह्मपरभावेनानन्दशब्देन सह स्थानसाम्येन ब्रह्मपरत्वनिश्चयात् ।। ५।।

आनन्दमयोऽभ्यासादिति सूत्रस्वारस्याच्च ।। ६।। इति।

***

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पुच्छब्रह्मवादमण्डनम्

१

अत्रोच्यते यत्तावदुक्तमानन्दमयस्य विकारत्वावगतिर्नास्तीति तन्न। विकारार्थमयट्प्रायपाठेन तत्राऽपि मयटो विकारार्थत्वात्। तथाहि, **स वा एष पुरुषोऽन्नरसमय** इति न देह एवोच्यते। तस्याऽन्नपरिणामत्ववाचिनाऽन्नमयशब्देनोक्तिसम्भवे **अन्नरसमय** इत्यस्य वैयर्थ्यात्। पुरुषशब्दस्य च चेतनवाचित्वात्। **अन्नात्पुरुष** इत्यव्यवहितपुरुषपरामर्शस्य **एष** इत्यनेन सिद्धतया **स** इत्यस्य व्यवहिताऽऽकाशादिकारणात्मपरामर्शार्थत्वाच्च। किन्तु सः प्रागाकाशादिकारणत्वेन निरूपित एषः अनुपदमन्नकार्यत्वेन निरूपितश्च। पुरुषोन्नरसमयः - अन्नरसो देहमनुप्रविश्य तदवच्छिन्नतया तत्कार्य इत्युच्यते। तथा च अन्नात्पुरुषः इति निर्दिष्टमाकाशादिकारणरूपस्य पुरुषस्याऽन्नकार्यत्वमन्नकार्यदेहावच्छेदलब्धपरिच्छिन्नाकारतयेति विवृतं भवति। एवं प्राणमयो मनोमयो विज्ञानमयश्च प्राणमनोबुद्ध्यवच्छिन्नतया तद्विकारभूतो जीव एवेति युक्तम्। न च, स्वतः कार्य एव विकारार्थप्रत्ययः, न त्वौपाधिककार्यताभागीति व्युत्पत्तिकल्पना प्रमाणवती। किञ्च मयटः प्राचुर्यार्थत्वं वदतस्तवाऽपि मते जीव एवानन्दमय इति सिद्ध्यति। आनन्दप्राचुर्यस्य प्रतियोगिदुःखाल्पत्वगर्भत्वात्। प्राचुर्यस्य विशेषणत्वे व्यधिकरणसजातीयाल्पत्वस्य निरूपकत्वेऽपि विशेष्यत्वे समानाधिकरणविजातीयाल्पत्वमेव निरूपकमिति हि व्युत्पत्तिसिद्धम्।

अत एव **प्रचुरब्राह्मणो ग्रामः** इत्यत्र प्राचुर्यस्य ग्रामान्तरगतब्राह्मणाल्पत्वापेक्षत्वेऽपि **ब्राह्मणप्रचुरो ग्राम** इत्यत्र तद्ग्रामगतशूद्राल्पत्वापेक्षमेव प्राचुर्यं प्रतीयते। न च, प्रचुरप्रकाशः सवितेतिवत्प्रकाशप्रचुरः सवितेति प्रयोगेऽपि नक्षत्रादिगत प्रकाशाल्पत्वापेक्षमेव प्राचुर्यमवगम्यते। न तु सवितृगततमोल्पत्वापेक्षम्। तत्र तमसो बाधितत्वादिति शङ्क्यम्। तत्रापि घनतुहिनसैंहिकेयाच्छादनारोपिततमोल्पत्वमपेक्ष्यैव घनाद्यपसरणसमये तथा प्रयोगात्। तदभावे तथा व्युत्पन्नप्रयोगाभावात्।

ननु बलवत्तरश्चैत्र इत्यादौ तरबाद्यर्थस्य प्राचुर्यस्य विशेष्यत्वेऽपि मैत्रादिगतबलाद्यल्पतापेक्षत्वं दृष्टमिति चेन्न। तत्र द्विवचनविभज्योपपदे तरबीयसुनाविति द्विवचनादिविशेषणवशादातिशायनिकप्रत्ययेषु व्युत्पत्त्यनन्तरकल्पनेऽपि मयटि तत्कल्पकाभावेन औत्सर्गिकव्युत्पत्तिलंघनायोगात्। न च **प्रज्ञानघन एवानन्दमयः** इति ब्रह्मण्यानन्दमयशब्दप्रयोगदर्शनात्। मयट्यपि व्युत्पत्त्यन्तरं कल्प्यमिति वाच्यम्। तस्य सुषुप्तस्थान एकीभूतः इति विशेषणानुसारेण प्राज्ञशब्दितसुषुप्तजीवविषयत्वात्। वाक्यशेषे एष सर्वेश्वर एष सर्वज्ञ इत्यादि परमेश्वरधर्मकथनस्याध्यात्मिकाधिदैविकतृतीयपादरूपप्राज्ञेश्वरैक्याभिप्रायात्। अपि चाऽन्यत्र व्यधिकरणसजातीयाल्पत्वमपेक्ष्य मयटः प्रयोगसम्भवेऽपि, प्रकृते त्वदभिमतप्रायपाठानुसारेण समानाधिकरणविजातीयाल्पत्वमपेक्ष्यैव तत्प्रयोगो निर्वाह्यः। तथा हि, प्राणमये तावत्पञ्च वृत्तिवायुगतमेव व्यनाद्यल्पत्वमपेक्ष्य तत्र प्राणनवृत्तिप्राचुर्यम्। न तु तदन्यगतप्राणनवृत्त्यल्पत्वमपेक्ष्य। ततोन्यत्र प्राणनवृत्तीनामभावात्। एवं मनोमयेऽपि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

करणभावेन मननवृत्तिसंबन्धिनोऽपि मनसस्तत्प्राचुर्यं तद्गतवृत्त्यन्तराल्पत्वमपेक्ष्यैव। विज्ञानमय इति विज्ञानमयेऽपि, जीवे ज्ञानवृत्तिप्राचुर्यं तद्गताज्ञानात्मकसंस्कारादिरूपवृत्त्यन्तराल्पत्वमपेक्ष्यैव पर्यवस्यति। किं बहुना? एवं त्रिषु प्राचुर्यार्थमुपगतोन्नरसमयेऽपि देहे अवयवान्तराल्पत्वमपेक्ष्यान्न परिणामरूपावयवप्राचुर्यमेव मयडर्थ इति वैरूप्यपरिहारार्थं बलादायाति।

एवञ्चाऽऽनन्दमयेऽपि समानाधिकरणदुःखाल्पत्वापेक्षमानन्दप्राचुर्यं मयडर्थ इत्यापतितं दुःखमिश्रत्वं केन वार्यते? न च तथापि समानाधिकरणयत्किंचिद्विजातीयाल्पत्वमपेक्ष्यानन्दप्राचुर्यनिर्वाहसम्भवे कुतो दुःखमिश्रत्वापादनमिति वाच्यम्। सुखप्राचुर्यस्य तद्विरोधिदुःखाल्पतापेक्षायामेव प्रथमं बुद्ध्यवतरणेन तदुल्लंघनाऽऽयोगात्। न चैवं सत्यानन्दमयो जीवोऽपि न स्यात्। तत्र दुःखाल्पत्वस्य सुखबाहुल्यस्य चाभावादिति शङ्क्यम्। जीवस्य मुक्तौ भोग्यान्निरतिशयोत्कर्षादुत्तरावधिरहितात् **श्रोत्रियस्य चाकामहतस्य** इति श्रुतिदर्शितात्सुखात्सर्वमपि सांसारिकं दुःखमल्पमिति सम्भवात्।

नन्वानन्दमये मयट् प्राचुर्यार्थोऽपि मा भूत्, स्वार्थिकोस्त्विति चेन्न। प्रायपाठप्राप्तेऽतिरिक्तार्थे सम्भवति स्वार्थिकत्वेन वैयर्थ्यकल्पनायोगात्। तस्मादानन्दमयस्य मयटा जीवत्वावगतिर्निष्प्रत्यूहा।

२

यदुक्तं ब्रह्मणोवयवित्वमवयवत्ववत्कल्पनया सम्भवतीति तन्न। अस्माभिः पुच्छपदस्याधारलक्षकत्वस्य उक्ततया अवयवत्वकल्पनानङ्गीकारेण दृष्टान्ताऽसम्प्रतिपत्तेः। अध्यारोपापवादाभ्यां निष्प्रपञ्चब्रह्मप्रतिपत्तिप्रकरणे प्रियमोदादिरूपशिरःपक्षाद्यवयवकल्पनाया विरोधेनानुपयुक्तत्वेन चायुक्तत्वाच्च। प्रकरणस्य निष्प्रपञ्चपरत्वञ्च **भेदव्यपदेशाच्च** इति सूत्रविवरणे समर्थितम्।

स्यादेतत्। **यतो वाचो निवर्तन्त** इति मन्त्रो ब्रह्मणि द्वैतवस्तुमुखेन प्रवृत्तानां लौकिकानां वैदिकानां च सर्वासां वाचां निवृत्तिं वदतीत्यमुमर्थमवलम्ब्य हि तत्र तत्समर्थनं कृतम्। न तु तद्युक्तम्। एकस्य **वाच** इत्यस्य **निवर्तन्त** इत्यस्य च स्वारस्यमनुरुध्य बहूनां सप्रपञ्चवाक्यानां स्वार्थे प्रामाण्यात् प्रच्यावनस्य न्यायविरुद्धत्वादिति चेदुच्यते। विज्ञानमयं न ब्रह्मेति प्रतिक्षिप्य आनन्दमयं ब्रह्मेति व्यवस्थापयति। त्वय्यपि तुल्योऽयमाक्षेपः। तथाहि, विज्ञानमयस्य **विज्ञानमय** इत्येतावतैव तावत्परब्रह्मत्वं प्रतीयते। तत्र मयट् प्रत्ययस्यानन्दमयैक्यरूप्याय त्वया व्यधिकरणसजातीयाल्पत्वापेक्षप्राचुर्यार्थत्वस्याभ्युपगन्तुं युक्ततया जीवादन्यस्य सङ्कुचितज्ञानस्याभावात् जीवगताऽज्ञानाल्पत्वापेक्षज्ञानप्राचुर्य एव तत्पर्यवसानात्। मन्त्रवर्णोपात्तविपश्चित्व-प्रत्यभिज्ञानाच्च। तथा **विज्ञानं देवाः सर्वे ब्रह्मज्येष्ठमुपासते** इत्यत्र मान्त्रवर्णिकब्रह्मशब्देन **तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम्** इति श्रुत्यन्तरसिद्धदेवोपास्यत्वप्रत्यभिज्ञानेन **विज्ञानं ब्रह्म चेद्वेद। तस्माच्चेन्न प्रमाद्यति। शरीरे पाप्मनो हित्वा। सर्वान्कामांत्समश्नुत** इति तदनन्तरश्लोकेऽपि ब्रह्मशब्देन मान्त्रवर्णिकब्रह्म-विद्याफलप्रत्यभिज्ञानेन च तस्य ब्रह्मत्वं प्रतीयते। **विज्ञानं यज्ञं तनुते** इति तु ब्रह्मण्युपपद्यते यज्ञादेर्हेतुकर्तरि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तस्मिन्नपि स्वव्यापारद्वारा प्रयोज्यव्यापारकर्तृत्वसत्त्वात्। हेतुकर्तृत्वविवक्षायां णिजन्तप्रयोगनियमेपि स्वव्यापारद्वारा प्रयोज्यव्यापारकर्तृत्वविवक्षायां णिजन्तप्रयोगस्याऽविरुद्धत्वात्। साक्षाद्विलेखनमकुर्वति संविधानसम्पादने कर्षणप्रयोजके स्वामिन्यापि **षड्भिर्हलैः कर्षती**ति प्रयोगदर्शनात्। यज्ञकृद्यज्ञभृद्यज्ञी (सहस्रनाम) इति ब्रह्मण्येव प्रयोगदर्शनाच्च। एवमपि विज्ञानमयस्य यदब्रह्मत्वमुच्यते **तस्माद्वा एतस्माद्विज्ञानमयात् अन्योन्तर आत्मे**ति तमतिक्रम्य तदन्यस्य तदन्तरस्यात्मनः प्रतिपादनमात्रादेव। आनन्दमयत्वस्य प्रियाद्यवयवयोगस्य च विज्ञानमयेऽप्यविरोधात्। ततश्च यथा विज्ञानमयादन्यस्य तदान्तरस्य परमात्मनः प्रतिपादनदर्शनाद्विज्ञानमय पर्यायगतवाक्यजातं स्थूलारुन्धतीन्यायेन आरोपितपरमात्मभावतद्धर्मवैशिष्ट्यविषयमिति त्वयाऽभ्युपगम्यते। एवं प्राणमयादिपर्यायगतात्मत्वप्रतिपादनमपि। तथा **यतो वाचो निवर्तन्त** इत्यपवाददर्शनादारोपितप्रपञ्चवैशिष्ट्य-विषयं सप्रपञ्चवाक्यजातमिति कुतोऽभ्युपगन्तुं न युज्यते।

ननु युक्तम्। **विज्ञानमयादन्योन्तर आत्मा** इत्येतावतापि विज्ञानमयविषयवाक्यजातस्यारोपित-विषयत्वाऽऽपादनम्। **तस्माद्वा एतस्मादि**त्यत्रोपक्रान्तमात्मत्वं सर्वान्तरत्वेनोपपादयितुं प्रवृत्ते **स वा एष पुरुषोन्नरसमय** इत्येतस्मिन्प्रकरणे विज्ञानमयादान्तरत्वस्यैव सर्वान्तरत्वरूपत्वेन तस्योपक्रान्तात्मत्वोपपादकतया तात्पर्यवत्त्वेन बलवत्त्वात्। अन्यथा पदमात्रेण चरमपठितेन प्रथमपठिताऽऽनेकवाक्याऽऽन्यथाभावापादना-योगादितिचेत्।

तर्हि अस्मिन्मतेऽपि **यतो वाचो निवर्तन्त** इत्यस्य परमोपक्रमगतानन्तत्वोपपादनार्थत्वेन तात्पर्यवत्वं समानमिति पश्य। यतो वाच इत्यस्य स्वप्रकरणगतेन **अदृश्येऽनात्म्येऽनिरुक्त** इति विशेषेण न प्राकरणान्तरगतैर्ब्रह्मणो निष्प्रपञ्चत्वादिप्रतिपादकैश्चोपष्टम्भोऽस्तीति विशेषः। तस्मान्निर्विशेषब्रह्मप्रकरणे प्रियाद्यवयवयोगात्सविशेष आनन्दमयो न प्रतिपाद्यं ब्रह्म भवितुमर्हतीति युक्तमेव।

३

यच्चोक्तं तस्य **ब्रह्म पुच्छं प्रतिष्ठे**ति निर्देशेन व्यतिरेकप्रतीतिरसिद्धा, प्रकरणस्य स्वस्मादनतिरिक्तैः शिरःपक्षादिमत्त्वनिरूपणपरत्वादिति, तदयुक्तम्। शिरःप्रभृतीनामन्नमयादिशब्दोदितचेतनातिरिक्तविषयत्वात्। अन्नमयादिशब्दानां चेतनपर्यन्तत्वाऽनङ्गीकारेपि मनोमयपक्षशिरःपुच्छानां ऋक्सामयजुरथर्वाङ्गिरसां तदतिरिक्तत्वेना-ऽन्नमयादिष्वप्यवयवावयविभावादिकृतभेदसद्भावेन च तथा प्राकरणासिद्धेः स्वरसतः प्रतीयमानस्य व्यतिरेकस्य त्यागायोगात्।

४

यत्तु आनन्दमयस्य श्लोकाप्रतिपाद्यत्वमसिद्धं श्लोकानां पुच्छवद्विषयत्वनियमदर्शनादित्युक्तं तदप्ययुक्तम्। **यतो वाचो निवर्तन्त** इति मनोमयपर्यायश्लोकस्य ब्रह्मविषयस्य पुच्छवद्विषयत्वाऽभावात्। **अप्राप्य मनसा सहे**ति श्रवणात्। तत्रापि यथा कथञ्चित्पुच्छवद्विषयत्वमस्तीति चेत् तर्हि **असन्नेव स भवती**त्यत्र स इत्यस्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रकृतानन्दपरत्वात्तस्यापि यथा कथञ्चित्पुच्छवद्विषयत्वं सम्पन्नमिति सन्तुष्यतु भवान्। अयुक्तं च श्लोके स इति पुंलिङ्गेन प्रकृतपरामर्शिना तत्पदेनाऽवश्यं परामर्शनीयस्यानन्दमयस्य श्लोकगतब्रह्मशब्दाभ्याससत्त्वा-सत्त्वशङ्कालिङ्गविषयत्वम्।

५

यत्तु **तस्यैष एव शारीर आत्मा** इत्यत्रात्मान्तरश्रवणं नास्ति अनन्यात्मपरत्वादित्युक्तम्। तदप्ययुक्तम्। पूर्वपर्यायस्थानामिव आनन्दमयपर्यायस्थस्यापि तस्य वाक्यस्य पुच्छ ब्रह्मरूपात्मान्तरपरत्वोपपत्तौ प्रक्रमविरुद्धार्थकल्पनायोगात्।

यच्च प्रसाद्यत्वरूपं शोध्यत्वं ब्रह्मणोपि सम्भवतीत्युक्तं तत्तुच्छम्। प्रागशुद्धिमतो हि शुद्धिराधेया। न च जीवापराधानुसारेण तेषु ब्रह्मणोऽप्रसादः कथमप्यशुद्धिशब्दमर्हति। तथा सति ब्रह्मणो नित्यशुद्धत्वश्रुतीनां सङ्कुचितार्थत्वप्रसङ्गात्। लोकेप्यपराधानुगुण्येन भृत्यादिषु राजादीनामुचितस्याऽप्रसादस्याऽशुद्धिशब्देन व्यवहाराभावाच्च।

६

तस्मात्पुच्छब्रह्मवाद्युक्तयुक्तीनां निराकरणमनुपपन्नम् इत्यादिना यद्यपि श्रीमदप्पयदीक्षितेन्द्रैः न्यायरक्षामणौ मण्डनमारचितं तथापि तत्कुणपविषयमिव न शोभते।

***

पुच्छब्रह्मवादखण्डनम्

तथा च मयटो विकारार्थप्रायपाठमुज्जीवयितुं प्राणमयो मनोमयो विज्ञानमयश्च प्राणमनोबुद्ध्यवच्छिन्नतया तद्विकारभूतो जीव एवेति युक्तमिति यदुक्तं तदयुक्तमेव। **तस्माद्वा एतस्मादन्योन्तर आत्मा प्राणमय** इत्यादिना श्रवणेन तत्तदन्तरभूतप्राणमयादिकोशानामेव तात्पर्यसिद्धत्वेन तेषु प्राचुर्यार्थस्यैवोपपन्नत्वात्। न च आत्मपदेन जीव एवेत्यवगम्यत इति शङ्क्यम्। आत्मपदस्य देहपरत्वेन कोशपरत्वाऽविरोधात्। शरीराभिमानिनो जीवस्यैकत्वेन तद्बहुत्वस्याऽसम्भवात्। प्राणमयादिशब्दानां तत्तदवच्छिन्नजीवपरत्वरूपार्थग्रहणस्य विकाररूपप्राय-पाठसाधकत्वमन्तरेण निरर्थकत्वाच्च। अथ आतिशायनिकप्रत्ययेषु व्युत्पत्त्यन्तरकल्पनेऽपि मयटि तत्कल्पकाभावेन औत्सर्गिकव्युत्पत्तिलंघनायोगादिति यदुक्तम् तदप्यसङ्गतम्। प्राचुर्यातिशययोरविशेषेण तदप्यङ्गीकृताया व्युत्पत्तेर्मयट्यनङ्गीकारे कारणाभावात्। प्रज्ञानघन एवानन्दमय इति ब्रह्मण्यानन्दमयशब्दप्रयोगेन मयट्यपि व्युत्पत्त्यन्तरस्याऽङ्गीकार्यत्वाच्च।

ननु, तस्य सुषुप्तस्थान एकीभूत इति विशेषणानुसारेण प्राज्ञशब्दितसुषुप्तजीवविषयत्वात्। वाक्यशेषे **एष सर्वेश्वर एष सर्वज्ञ** इत्यादिपरमेश्वरधर्मकथनस्याध्यात्मिकाधिदैविकतृतीयपादरूपप्राज्ञेश्वरैक्याभिप्रायत्वादिति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चेन्न। सुषुप्तस्थाने **प्राज्ञेनात्मनान्वारूढ** इत्यादिवचनान्तरानुरोधेन प्राज्ञशब्दस्य परमेश्वरपरत्वेनाऽनन्दमयस्याऽपि तत्परत्वावसायात्। **सुषुप्त्युत्क्रान्त्योर्भेदेन** इति सूत्रप्रामाण्यात्सुषुप्तौ जीवेश्वरयोर्भेदस्येष्टत्वेनानन्दमयशब्दस्य जीवविषयत्वाभावात्।

न च, प्राणमयमनोमयविज्ञानमयेषु त्रिषु समानाधिकरणविजातीयाल्पत्वमपेक्ष्यैव मयडर्थस्य सिद्धत्वेन प्रायपाठानुरोधेन आनन्दमयेऽपि समानाधिकरणदुःखाल्पत्वापेक्षं मयडर्थ इत्येवाऽऽपततीति वाच्यम्। समानाधिकरणयत्किञ्चिद्विजातीयाल्पत्वमपेक्ष्य आनन्दप्राचुर्यस्य सम्भावितत्वेन दुःखमिश्रितत्वापादनस्याऽयुक्तत्वात्।

ननु, सुखप्राचुर्यस्य तद्विरोधिदुःखाल्पत्वापेक्षायामेव प्रथमं बुद्ध्यवतरणेन तदुल्लंघनायोगात् समानाधिकरणदुःखाल्पत्वाऽपेक्षमेवानन्दप्राचुर्यमिति सिद्ध्यतीति चेन्न। प्रमाणान्तरसिद्धस्य प्रामाणान्तराऽविरुद्धस्य च प्रतियोग्यपेक्षत्वस्य युक्तत्वमेव प्रमाणान्तरविरुद्धप्रतियोग्यपेक्षत्वस्यायुक्तत्वात्। सुखविरोधिदुःखाल्पत्वापेक्षायामेव प्रथमं बुद्ध्यवतरणेऽपि दुःखयोगस्याऽपहतपाप्मेत्यादिप्रमाणबाधितत्वेन तदुल्लंघनस्यैव युक्तत्वाच्च। तत्प्राचुर्यस्य तदल्पत्वमात्रनिवर्तकत्वेन तद्विजातीयवस्तुसत्तावगमकत्वाभावात्। **स एको मानुष आनन्द** इत्यादिना मानुषाद्यानन्दगताल्पत्वस्य प्रमाणसिद्धत्वेन तत्प्रतियोगित्वापेक्षस्यैव प्रामाणिकत्वाच्च। समानाधिकरणकदुःखाल्पत्वापेक्षमेवानन्दप्राचुर्यमित्यभ्युपगमे जीवेऽपि दुःखाल्पत्वस्य सुखबाहुल्यस्य चाऽभावेन आनन्दमयशब्दस्य तत्राप्ययुक्तत्वाच्च।

न च, जीवस्य मुक्तौ भोग्यान्निरतिशयोत्कर्षादुत्तरावधिरहितात् **श्रोत्रियस्य चाकामहतस्येति** श्रुतिदर्शितात्सुखात्सर्वमपि सांसारिकं सुखमल्पमिति सुखातिशयसम्भवेन युज्यत इति वाच्यम्। **परमं साम्यमुपैति।, मुक्तः शिवसमो भवेदि**ति च वचनानुसारेण मुक्तौ परमेश्वरसाम्यस्येष्टत्वेन परमेश्वरपरस्याप्यानन्दमयशब्दस्य मुक्तजीव इष्टापत्तेः। एवमानन्दमयशब्दवाच्यं मुक्तजीवमवशतोऽभ्युपगच्छद्भिः परैः घट्टकुटीप्रभातन्यायेनानन्दमयशब्दस्य परमेश्वरपरत्वमेवाङ्गीकृतमित्यलम्।

ततश्च **यतो वाचो निवर्तन्त** इत्यस्याऽपवादपरत्वं यन्निगदितं तदसत्। एकस्य वाच इत्यस्य निवर्तन्त इत्यस्य च स्वारस्यमनुरुध्य बहूनां सप्रपञ्चवाक्यानां स्वार्थे प्रामाण्यात् प्रच्यावनस्याऽन्याय्यत्वात्। न च, विज्ञानं न ब्रह्मेति प्रतिक्षिप्य आनन्दमयो ब्रह्मेति व्यवस्थापयति त्वय्यपि तुल्योऽयमाक्षेपः। तथाहि यथा विज्ञानमयस्य ब्रह्मत्वप्राप्तावपि तस्याऽब्रह्मत्वमुच्यते **तस्माद्वा एतस्मादन्योन्तर आत्मे**ति तमतिक्रम्य तदन्यस्य तदन्तरस्यात्मनः प्रतिपादनमात्रादेव। तथा **यतो वाचो निवर्तन्त** इत्यपवाददर्शनादारोपितप्रपञ्चवैशिष्ट्यविषयं सप्रपञ्चवाक्यजातमिति कुतोऽभ्युपगन्तुं न युज्यत इति वाच्यम्। **यतो वाच** इति वाक्यस्य **आनन्दं ब्रह्मणो विद्वा**नित्यनन्तरवाक्योक्तब्रह्मानन्देयत्ताविषयवाङ्मनोनिवृत्तिमात्रपरत्वावगमेनाऽपवाद-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रतिपादकतया सप्रपञ्चवाक्यजातस्य यथार्थविषयत्वावसायात्। अध्यारोपापवादयोर्जगन्मिथ्यात्वसाधनार्थमेव परैः कल्पितत्वेनास्तिकानामनुपादेयत्वात्। यदि जगन्मिथ्यात्वमिष्येत श्रुतीनां तर्हि जगन्मिथ्येति चतुरक्षर्यैव सिद्धे **आत्मन आकाशः सम्भूत** इत्यादिनाऽध्यारोपमुपदिश्य **यतो वाच** इत्यादिनाऽपवादं नोपदिशेयुरध्यारोपादिनिरूपणस्याऽनर्थकत्वादित्यलम्।

अथाऽऽनन्दमये शोध्यत्वमयुक्तमिति यदुक्तं तद्दुरुक्तमेव। **आनन्दमया मे शुद्ध्यन्तामि**ति वाक्यविद्भ्यामेव ब्रह्मसूत्रतद्वृत्तिकृद्भ्यां महामुनिभ्यामानन्दमये ब्रह्मत्वस्य राद्धान्तितत्वेनानन्दमयविषयशुद्धेर्जीवविषयचिच्छक्तितिरोधायकमलापनोदनरूपत्वस्यैव तात्पर्यसिद्धतया तद्विषयदूषणस्य श्रुतिविषयत्वेनाऽनुपादेयत्वात्।

अत्र परैः सिसाधयिषितो वादः श्रुतिविरुद्ध इति व्यक्तमेव। तथाहि, **आनन्दमयोऽभ्यासादि**तिसूत्रवृत्तौ न्यायरक्षामणौ **आनन्दमयो जीव** इति पूर्वपक्षे ब्रह्मेति सिद्धान्त इत्यधिकरणशरीरं वृत्तिकृता सूत्रार्जवं मन्यमानेन वर्णितम्। श्रुतिविरोधात्तदयुक्तमिति भगवता भाष्यकारेण पूर्वपक्षे सिद्धान्ते च आनन्दमयस्य जीवत्वमुररीकृत्य प्रकारान्तरेण वर्णितमित्युक्तम्। एवं भामत्यामानन्दमयाधिकरणे श्रुतिसूत्रयोर्विरोधे **गुणमुख्यविरोधे तु गुणे त्वन्याय्यकल्पने**ति सूत्राण्यन्यथा नेतव्यानीति च। एवञ्च सूत्रेषु श्रुतिविरोधः परैरङ्गीकृत इति सिद्धम्।

इदमिह सञ्चिन्त्यमार्यवर्यैः - परैः किमर्थं प्रणिनीषितं भाष्यं ब्रह्मसूत्राणामिति। किं सूत्रजातं सदर्थसार्थतया परिष्कर्तुम्? अथ विरुद्धार्थबन्धुरतया निराकर्तुम् ? इति। आदौ सूत्रेषु श्रुतिविरुद्धताऽऽपादनस्याऽयुक्ततया द्वैतीयिक एव पक्षस्तदीप्सित इति पर्यवस्यति। अतश्च विज्ञायते - यद्यपि परैः स्वमतस्य श्रुतिसम्मतत्वं प्रत्याययितुमेव प्रारब्धं भाष्यं सूत्राणां, तथाऽपि तेषां स्वमतानुकूलतया व्याख्यातुं दुश्शकतया स्वमतगतः श्रुतिविरोधस्तेष्वेवाऽरोपित इति।

ननु यद्यपि सात्यवतेयेनैव श्रुत्यन्तार्थनिर्दिधारयिषया प्रारब्धानि सूत्राणि तथापि भ्रान्त्या विप्रलिप्सया वा तानि श्रुतिविरुद्धार्थतयैव समाचरितानि। तत्त्वविद्भिः शुद्धाद्वैतभाष्यकृद्भिस्तु सूत्राणि प्रत्याख्याय श्रुत्यन्तार्थो निर्धारित इति कुतो नाभ्युपगन्तव्यमितिचेदुच्यते। यद्येवं तर्हि सूत्राण्यादित एव प्रत्याख्याय निषदामेव भाष्यं समाचरणीयं स्यात्। न हि तथा कृतम्। तस्मात्स्वमतविरुद्धतयैव सूत्रेषु श्रुतिविरोध आरोपितः। शुद्धाद्वैतगतः श्रुतिसूत्रविरोधो ब्रह्मपथे वेदान्तार्थपरिष्कारे चाधिकं निरूपित इत्यलमधिकेन।

।। इत्यानन्दमयाधिकरणम् ।।

***

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ इतरानुपपत्त्यधिकरणम्

ब्रह्मणः परमशिवस्य समन्वयसिद्धं जगत्कारणत्वादिकं लक्षणं प्रधानजीवयोर्न व्यभिचारतीति स्थापितम्। अतः परं जीवसमष्टिरूपस्य हिरण्यगर्भस्य जगत्कारणत्वादिकं श्रूयत इत्यत आह -

नेतरोनुपपत्तेः ।।१-१-१७।।

'यतः प्रसूता जगतः प्रसूती तोयेन जीवान् व्यससर्ज भूम्याम्। यदोषधीभिः पुरुषान्पशूंश्च विवेश भूतानि चराचराणि' इति महोपनिषदि श्रूयतेऽस्य विषयः।

अत्र सकलजगत्प्रसूत्यादिहेतुत्वेन श्रूयमाणः पुरुषः परमेश्वरो वा? अन्यो वा? इति संशयः।

हिरण्यगर्भ इति पूर्वपक्षः। कथम्? तल्लिङ्गात्।

एकार्णवे तु त्रैलोक्ये ब्रह्मा नारायणात्मकः।
भोगिशय्यायुतः शेते त्रैलोक्यग्रासबृंहितः।।

अथ इतरानुपपत्त्यधिकरणम्

नन्वेवं व्यष्टिजीवे ब्रह्मलक्षणस्याऽतिव्याप्तिर्माभूत्। सकलजीवशरीराभिमानिनि समष्टिजीवे हिरण्यगर्भे तु **अम्भस्य पार** इति परमात्मसूक्तोपक्रमोपसंहारमध्यपरामर्शेन ब्रह्मलक्षणस्यावगम्यमानतया स्यादिति शङ्कानिराकरणार्थतया प्रत्युदाहरणसङ्गत्या अनन्तराधिकरणमवतारयति ब्रह्मण इति।

यतः प्रसूतेति। जगतः प्रसूती जगत्प्रसवशीला प्रकृतिर्यस्मात्प्रसूता। ङीप्छान्दसः। यद्वस्तु, भूम्यां तत्तल्लोकस्थाने विद्यते, तत्तत् तोयेन जलप्रधानेन पृथिव्यादिद्रव्येण, जीवान्, देवादीन् व्यससर्ज सृजति स्म। ओषधीभिः स्थावरैः सह, पुरुषान्, सुरनरादीन्, पशून्, तिर्यञ्चोपि एवं चराचराणि जङ्गमस्थावरात्मकानि भूतान्यन्तर्यामितया विवेशेत्यर्थः। अस्मिन्मन्त्रे विशेषाश्रवणात् पूर्वापरमन्त्रेषु हिरण्यगर्भपरमेश्वरविषयश्रुतिलिङ्गानां बलाबलाऽनिर्णयात्संशय इत्याह - **अत्रेति**। **नेतारोऽनुपपत्तेरिति** सूत्राऽनुसारेणाऽन्यो वेति सन्देहाकोटिर्दर्शिता। अन्यो नाम हिरण्यगर्भ इति पूर्वपक्षप्रदर्शनवाक्ये विशदीकृतम्।

ननु कुतो हिरण्यगर्भ इत्यवगम्यते उभयत्र प्रमाणसद्भावादित्याशङ्कते - **कथमिति**। प्रबलात्समुद्रशायित्वलिङ्गादित्याह - **तल्लिङ्गादिति**। समुद्रशायित्वस्य तल्लिङ्गत्वं विष्णुपुराणसम्मत्या निरूपयति - **एकार्णवेत्विति**। नारायणात्मकः जलनिवासेन नारायणसंज्ञित इत्यर्थः। यद्वा, नारायणस्य देहं प्राप्त इत्यर्थः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इति पुराणवचनात् ब्रह्मणः समुद्रशायित्वमवगम्यते। तदिह श्रूयते। तल्लिङ्गम् - 'यमन्तः समुद्रे कवयो वयन्ति' इति, 'प्रजापतिश्चरति गर्भे अन्तः' इति स एवोपक्रमे सर्वानुप्रविष्टतयावगम्यते। उपसंहारे च 'सूर्या चन्द्रमसौ धाता यथापूर्वमकल्पयत्। दिवं च पृथिवीं च....' इत्यादिना तस्यैव कारणतामवगम्यते। तस्मादुपक्रमोसंहारसिद्धस्य हिरण्यगर्भस्यावान्तर सिद्धधर्मोपपत्तिः। किञ्च

ततोऽवतीर्य विश्वात्मा देहमाविश्य चक्रिणः।
सुष्वाप योगशयन एकीभूयाऽथ चक्रिणा।।

इति कूर्मपुराणवचनात्। यद्यपि **यमन्तस्समुद्र** इति समुद्रस्थानत्वमात्रमवगम्यते, तथापि तत्र निद्राणत्वमेवोपबृंहणानुसारेण व्यज्यते। तच्च लिङ्गमनन्यथासिद्धत्वात्प्रबलम्। तमोवश्यस्यैव हि तत्सम्भवति। न तु तमोऽतीतस्य परब्रह्मणः।

ननु समुद्रनिद्राणत्वं विष्णोरपि साधारणम्। कथं हिरण्यगर्भलिङ्गमित्याशङ्क्याह - **तस्मादिति**। उपक्रमोपसंहारगतप्रजापतिधातृश्रुतिभ्यां मध्यगतसमुद्रनिद्राणत्वलिङ्गेन च हिरण्यगर्भ एव जगत्कारणत्वादिधर्मैः प्रतिपाद्य इति निर्णये सति तदनुसारेण मध्यगतान्यलिङ्गान्यपि नेतव्यानीति भावः। तत्र परात्परत्वम् **परात्परतरो ब्रह्मेति** श्रुत्यनुसारेणापेक्षिकं नेतव्यम्।

ननु, **अद्भ्यः सम्भूत** इत्यनुवाको विष्णुपरः **ह्रीश्च ते लक्ष्मीश्च पत्न्यौ** इति श्रुताल्लक्ष्मीपतित्वलिङ्गादिति-चेन्न। उपक्रमगतप्रजापतिश्रुतिविरोधादुपसंहारगतं लक्ष्मीपदं लज्जावाचिह्रीपदसमभिव्याहारेण पुरुषश्रैष्ठ्यापादक-सद्गुणान्तरपरत्वेन नेतव्यम्।

ननु पूर्वानुवाकरूपपुरुषसूक्तैकवाक्यत्वादस्यानुवाकस्य पुरुषसूक्तस्य च नारायणपरत्वात्कथमस्य हिरण्यगर्भपरत्वमुपपद्यत इति चेत् उच्यते। पुरुषसूक्ते **सहस्रशीर्षा पुरुषः** इत्यादिभिः श्वेताश्वतरोपनिषदि शिवपरत्वेन निर्ज्ञातैर्मन्त्रैः शिवं प्रस्तुत्य **तस्माद्विराडजायत विराजोधिपूरुष** इति शिवाद्धिरण्मयतया विविधं राजमानस्याऽण्डस्य तदनन्तरं तत्र हिरण्यगर्भस्य चोत्पत्तिमभिधाय तस्यैव मुखाद्यवयवेभ्योऽग्न्यादिदेवानां ब्राह्मणानां चोत्पत्तिरभिहिता। न तु नारायणस्यावयवेभ्यः; पूर्वं तत्प्रसङ्गाऽभावात्। मानवे धर्मशास्त्रे परमेश्वरब्रह्माण्डोदरजातं हिरण्यगर्भमेव प्रस्तुत्य

लोकानां तु विवृद्ध्यर्थं मुखबाहूरुपादतः।
ब्राह्मणं क्षत्रियं वैश्यं शूद्रञ्च निरवर्तयत्।।

इति स्मरणाच्च। याज्ञवल्क्ये धर्मशास्त्रे परमेश्वरं प्रस्तुत्य **मुखबाहूरुपज्जाः स्युस्तस्य वर्णा यथा क्रममिति** स्मर्यत इतिचेन्न। तस्योदाहृतश्रुतिस्मृत्यनुसारेण हिरण्यगर्भशरीरानुप्रविष्टतदात्मकपरमेश्वरविषयत्वेनोपपन्नत्वात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तत्प्रतिपादनप्रदेशान्तरोपसंहारश्च कृतः। 'अद्भ्यः संभूतो हिरण्यगर्भ इत्यष्टौ' इति। अद्भ्यः संभूत इत्यत्र प्रजापतिरेव हि प्रतिपाद्यः। 'प्रजापतिश्चरति गर्भे अन्तः' इति दर्शनात्। 'हिरण्यगर्भः समवर्तताग्रे' इत्यत्रापि 'प्रजापति वै हिरण्यगर्भ' इति श्रवणात्। ततो हिरण्यगर्भ एव जगत्प्रसूति-हेतुत्वादिनाऽत्र प्रतिपाद्य इति प्राप्ते ब्रूमः -

परमेश्वरादितरो भिन्नो हिरण्यगर्भोऽत्र न प्रतिपाद्यः। जगत्प्रसूतिहेतुत्वादीनां परमेश्वरधर्माणां तस्मिन्ननुपपत्तेः। 'यतः प्रसूता जगतः प्रसूति' इत्यारभ्य जगत्प्रसूतिहेतोस्तस्य 'अतः परं नान्यदणीयसं हि परात्परं यन्महतो महान्तम्। यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात्' इत्यादिना सर्वोत्कृष्टत्वं तमसः प्रकृतिमण्डलास्परत्वं चावगम्यते। तदण्डान्तर्वर्तिनो हिरण्यगर्भस्य न सम्भवति। किञ्च 'य एनं विदुरमृतास्ते भवन्ति' इत्यस्य ज्ञानादमृतत्वं मुक्तिरभिधीयते। तन्न हिरण्यगर्भे संभवति परमेश्वरस्य हि मुक्तिहेतुत्वमसाधारणं लिङ्गम्। 'यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यति' इति श्रवणात्।

यदुक्तमुपक्रमोपसंहारसिद्ध इति तदप्रयोजकम्। अनुपपत्त्या प्रजापतिधातृशब्दौ हिरण्यगर्भे

तस्मात्पुरुषसूक्तमारभ्य प्रकृतमेव हिरण्यगर्भमुद्दिश्य प्रवर्तमानस्य **ह्रीश्च त** इत्यादेरेतदनुवाकेनैकावाक्यतां प्रापितानां हिरण्यगर्भमन्त्राणां न कथमप्यन्यपरत्वशङ्का अवकाशं लभते। एवं चोक्तमहिमा स एव हिरण्यगर्भः पूर्वकल्पानुष्ठितपरमेश्वरोपासनालब्धसत्यसङ्कल्पत्वादिशाली जगत्प्रसूत्यादिसकलप्रपञ्चहेतुतया प्रतिपाद्यत इति तत्र ब्रह्मलक्षणमतिव्याप्तमिति पूर्वपक्षमुपसंहरति - **तत** इति। **तस्मिन्ननुपपत्तेरि**ति। जगत्प्रसूतिर्हि जगज्जननी पराशक्तिः परमेश्वरस्य नित्यानपायिनी प्रपञ्चमहावृक्षाङ्कुरभूता। **प्रज्ञा च तस्मात्प्रसृता पुराणी** इति श्रुत्या परमेश्वरादेव प्रसृतेत्याम्नायते। **तदेव ब्रह्म परमं कवीना**मित्यसाधारणब्रह्मशब्दाभिधेयत्वोक्त्या त्रिविधपरिच्छेदराहित्यं परमेश्वरस्यैव धर्म इत्यवगम्यते। **तदेव भूतं तदु भव्यमाहु**रिति भूतभाविवर्तमानसकल-कल्पानुयायिसकलप्रपञ्चात्मकत्वं तस्मिन्नेव सम्भवति। **यतः प्रसुते**ति यस्य जगत्प्रसूत्यादिहेतुत्वमुक्तम्। यतः परं प्रकृष्टं चान्यत्पृथग्भूतं नास्तीत्युक्तम्। **य एनं विदुरमृतास्ते भवन्ती**त्येतत्कल्पभेदेनाऽपि हिरण्यगर्भे नोपपद्यते। **यदा चर्मवदाकाश**मिति मन्त्रेण शिवविज्ञानं विना मुक्तेर्गगनवेष्टनवदसम्भावितत्ववर्णनादिति भावः।

उपक्रमोपसंहारसिद्धो हिरण्यगर्भ इति शङ्कामनूद्य परिहरति - **यदुक्तं....तदप्रयोजक**मिति। मध्यगतैरपि बहुप्रमाणैर्विरोधे उपक्रमोपसंहारैकरूप्यमसाधकमित्यर्थः। सूत्रे बहुप्रमाणविरोधं द्योतयितुमेव

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विहाय प्रजानां पशूनां पतिं जगद्धारकं परमेश्वरमेव प्रतिपादयतः। 'अद्भ्यः सम्भूतो हिरण्यगर्भ' इत्युभयत्राऽपि परमेश्वर एव प्रतिपाद्यः। 'य ईशे अस्य द्विपदश्चतुष्पदः', 'आदित्यवर्णं तमसः परस्तात्' इति विश्वेश्वरत्वविश्वातीतत्वलिङ्गात्। ततो जगत्कारणत्वादिना प्रजापति शब्दवाच्यः परमेश्वरो न हिरण्यगर्भः।

परमेश्वरेण हिरण्यगर्भस्याऽभेदाज्जगत्कारणत्वमस्त्वित्याशङ्क्याह -

भेदव्यपदेशाच्च **।।१-१-१८।।**

लिङ्गविशेषमनुपन्यस्य अनुपपत्तेरित्युक्तम्। तस्मादुपक्रमोपसंहारगतशब्दौ योगेन परमेश्वरे योजनीयावित्याह - **अनुपपत्त्येति**। धातृशब्दस्तु **अम्भस्य पार** इति सूक्तोपसंहारगतो न भवति। **पुरुषस्य विद्म सहस्राक्षस्य महादेवस्य धीमहि। तन्नो रुद्रः प्रचोदयात्।, तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयादि**त्येतदवसानत्वात्परमात्मविषयसूक्तस्य तदनन्तरं रुद्रगायत्रीप्रसङ्गागतानां गणेशगायत्र्यादीनां स्नानार्थदुर्वाधारणादिमन्त्राणां च परमात्मसूक्तान्तर्भावाभावात्। तथैव भट्टभास्करेण सूक्तमर्यादायाः स्थापितत्वात्।

एवञ्चोपक्रमोपसंहारपर्यालोचनायां प्रजापतिश्रुतेरुपक्रमस्थत्वेऽपि तत एकस्याः प्रत्येकमभ्यस्तयोरौपसंहारिकरुद्रमहादेवश्रुत्योः प्रबलत्वात्सूक्तस्य परमेश्वरपरत्वमचलम्। अथ धातृपदस्यौपसंहारिकत्वाभ्युपगमेऽपि मध्यगतबहुश्रुतिलिङ्गानुसारात्तस्याऽपि योगेन परमेश्वरपरत्वमेवाऽभ्युपगन्तुं युक्तम्। उत्तरनारायणादेकवाक्यतापादनेनाऽपि नाऽस्य हिरण्यगर्भपरत्वप्रत्याशेत्याह - **अद्भ्य** इति। उत्तरनारायणे हि **वेदाऽहमेतं पुरुषं महान्तमिति** द्वितीयमन्त्रः। तत्र श्रूयमाणं तमसः परस्ताद्वर्तमानत्वमनन्योपायमुक्तिहेतुवेदनविषयत्वञ्च हिरण्यगर्भे न सम्भवतीति तस्य शिवपरत्वमवश्यमभ्युपगन्तव्यम्। तथा हिरण्यगर्भमन्त्राष्टकमध्ये **य ईशे।, अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेमे**ति पठ्यते। तेन शिवाऽसाधारणं पशुपतित्वं वर्ण्यते। **एतावन्तो वै पशवो द्विपदश्चतुष्पदश्चे**ति श्रुत्यन्तरदर्शनात्। सिद्धान्तमुपसंहरति - **तत** इति। तस्माद्युक्तं **नेतरोऽनुपपत्तेरि**ति।

तत्र न हिरण्यगर्भ इति निर्देष्टव्ये नेतर इति निर्देशो हिरण्यगर्भः परमेश्वरान्न भिद्यते, अतस्तत्र लक्षणसत्वं न दोषायेति केषांचिन्मतं निरसितुं कृतः। तन्निरासहेतुप्रदर्शनार्थत्वेनोत्तरसूत्रमवतारयति - **परमेश्वरेणे**ति। तेषामाशङ्का त्वेवंविधा। प्रपञ्चसृष्टिहेतुकामनाशालित्वं शिवासाधारणमिति निश्चितम्। तद्धि हिरण्यगर्भस्य **प्रजापतिरकामयत। प्रजाः सृजेये**ति बहुषु प्रदेशेषु श्रूयते। अतस्तन्मूलादनुमानात् **ब्रह्मा शिवो मे अस्तु सदा शिवोम्।, यो ब्रह्मा ब्रह्मण उज्जहार।, प्राणैः शिरः कृत्तिवासाः पिनाकी** इति शिवहिरण्य-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अस्यां महोपनिषदि परमेश्वरहिरण्यगर्भयोर्भेदो व्यपदिश्यते, कारणत्वेन कार्यत्वेन च। 'यो देवानां प्रथमं पुरस्ताद्विश्वाधिको रुद्रो महर्षिः। हिरण्यगर्भं पश्यत जायमानम्' इति। ततो हिरण्यगर्भादेः सर्वप्रपञ्चस्य कारणत्वमीश्वरस्येति सिद्धम्।

पुनराशङ्क्याह -

कामाच्च नाऽनुमानापेक्षा ।।१-१-१९।।

'प्रजापतिरकामयत प्रजाः सृजेयेत्' इति सर्वत्र श्रुतिषु संकल्पो हिरण्यगर्भस्य जगत्सृष्टौ श्रूयते। तथाऽपि तस्य जगत्कारणत्वेऽनुमानपेक्षा युक्त्यपेक्षा नास्ति। तस्य कामस्याऽवान्तर-सृष्टिविषयत्वात्। परमेश्वरस्यैव हिरण्यगर्भात्मनाऽवान्तरसृष्टिश्चेति वक्ष्यति 'संज्ञामूर्तिक्लृप्तिस्तु...' इत्यत्र।

'अनेन जीवेनाऽऽत्मनाऽऽनुप्रविश्य नामरूपे व्याकरवाणि' इति हिरण्यगर्भात्मना प्रपञ्चानुप्रविष्टस्य परमेश्वरस्य नामरूपकर्तृत्वश्रवणादनयोरभेद एवाभ्युपेतव्य इत्यत आह -

अस्मिन्नस्य च तद्योगं शास्ति ।।१-१-२०।।

गर्भाभिधानसामानाधिकरण्याच्च हिरण्यगर्भः शिवाभिन्नः। एवं हिरण्यगर्भस्य शिवाभिन्नत्वात्तत्र लक्षणत्वं न दोषः। ततस्तद्व्यावर्तनमनावश्यकमिति। एतच्छङ्कानिराकरणार्थं सूत्रं **भेदव्यपदेशाच्च** इति।

व्यवहितोत्तरसूत्रादस्मिन्नस्येति पदद्वयमानीय व्याचष्टे - **अस्यामिति**। अस्मिन्निति पदमुपनिषद्ग्रन्थपरम्। अस्यामेवोपनिषदि शिवहिरण्यगर्भयोर्भेदे प्रतीयमाने तदभेदाभिप्रायेण यतः प्रसूतीत्यादिना जगज्जन्मादिकारणत्ववर्णनं हिरण्यगर्भस्याऽन्यतमयुक्तमित्यर्थः।

उत्तरसूत्रमवतारयति - **पुनरिति**।

जगत्कारणत्व इति। जगत्कारणशिवाभिन्नत्वे यदनुमानं तन्न ग्राह्यमित्यर्थः। अवान्तरसृष्टिः देवमनुष्यादिसृष्टिः। तत्रापि न हिरण्यगर्भस्य स्वातन्त्र्यम्। किन्तु तदन्तर्यामिणः शिवस्यैवेत्यर्थः।

उत्तरसूत्रमवतारयति - **अनेनेति**। नामरूपव्याकरणं चतुर्मुखकर्तृकमिति पुराणेषु प्रसिद्धम्। तत्र व्याकरवाणीत्युत्तमपुरुषप्रयोगेण कर्ता परमेश्वर एवेति निगदन्ती श्रुतिः परमेश्वरस्य तच्छरीरित्वेन वा तदभेदेन वा कर्तृत्वं प्रतिपादयतीत्युपपादनीया। तच्छरीरित्वपक्षे जीवेनात्मनेति सामानाधिकरण्यस्य क्लिष्टतया तदभेदेनैवेति पर्यवस्यतीत्याशयः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अस्मिन्नुपनिषत्तन्त्र एवास्य हिरण्यगर्भस्य तद्योगं तस्य परमेश्वरस्य शेषत्वसंबन्धं शास्ति मन्त्रभागो 'ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिः' इति। ततः परमेश्वर एव जगत्कारणं तच्छेषभूतो हिरण्यगर्भ इति सिद्धम्।

।। इति इतरानुपपत्त्यधिकरणम् ।।

***

अथ अन्तरधिकरणम् ८

तदितः पूर्वैरधिकरणन्यायैः सर्वज्ञं नित्यतृप्तमनादिबोधं स्वतन्त्रमलुप्तशक्तिकमनन्तशक्तिकं सकलजगदुभयकारणं समस्तोपनिषत्तन्त्रसमन्वयैकप्रतिपाद्यं स्वप्रकाशनिखिलप्रपञ्चविशिष्टाद्वितीय-स्वभावं सच्चिदानन्दस्वरूपं संसारपाशच्छेदकारणं चिदचिदर्थान्तरं शिवतत्त्वं परं ब्रह्मेति सिद्धम्।

ब्रह्माधिपतिरिति - ईशानः सर्वविद्यानामित्यनेन वेदाधिपत्यस्य **ईश्वरः सर्वभूतानामित्यनेन** ब्राह्मणाधिपत्यस्य च सिद्धत्वादभ्यासेन हिरण्यगर्भाधिपत्यमेव विधीयते। तेन श्रुत्यन्तेष्वापाततः प्रतिपन्ना हिरण्यगर्भस्योत्कर्षविषया परमेश्वराभेदविषया च भ्रान्तिरुन्मूल्यत इति भावः। परैः प्रकृताधिकरणसूत्राण्या-नन्दमयाधिकरणशेषत्वेनैव विवृतानि। तत आनर्थक्यमेव प्रापितानि।

श्रीभाष्यकृद्भिर्मुक्तजीवस्यानन्दमयशब्दवाच्यत्वाभावपरतया व्याख्यातानि। **आनन्दमयोऽभ्यासादित्यनेनैव** मुक्ताऽमुक्तजीवनिषेधस्य प्राप्ततया तैरपि वैयर्थ्यमेव गमितानि। यद्यप्यानन्दतीर्थेन तु चतुर्मुखादीनामानन्दमय-शब्दप्रतिपाद्यत्वाभावपरतया व्याख्यातानि तथापि हिरण्यगर्भकारणत्वसूचकसूक्तानां चतुर्मुखपरत्वं निराकृत्य स्वाभिमततत्त्वे योजयितुमशक्यतयोपेक्षितानि नैरर्थक्यमेव नीतानीति च विशदम्।

।। इति इतरानुपपत्त्यधिकरणम् ।।

***

अथ अन्तरधिकरणम् ८

अन्तरधिकरणमवतारयितुं पूर्वसिद्धं माङ्गल्यगुणजातमनुवदति - **तदितः पूर्वैरिति**। उभयकारणमित्यन्तेन जन्माद्यधिकरणार्थोऽनूदितः। समस्तेत्यादिविशेषणेन शास्त्रयोनित्वसमन्वयाधिकरणद्वयार्थः, स्वप्रकाशेत्यादि-विशेषणेन ईक्षत्याधिकरणविषयवाक्यगतसच्छब्दार्थः सच्चिदानन्दस्वरूपमित्यनेन आनन्दमयाधिकरणविषयवाक्य-गतसत्यज्ञानादिवाक्यार्थः, संसारेत्यादिविशेषणेन इतरानुपपत्त्यधिकरणविषयवाक्यान्तर्गतस्य **य एनं विदुरमृतास्ते भवन्तीत्यादिवाक्यस्यार्थः**, चिदचिदर्थान्तरमित्यनेन अचेतने प्रधाने, चेतने मुक्ते हिरण्यगर्भे चाऽनतिव्याप्तं जगत्कारणत्वमस्येतरवैलक्षण्यमित्येवमीक्षत्याद्यधिकरणत्रयनिष्पन्नार्थश्चानूदितः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तस्य साधकानां संसारभेषजं मनस्समाधानयोग्यं किमपि रूपं प्रदर्शयितुमिदमधिकरणमारभ्यते -

अन्तस्तद्धर्मोपदेशात् **।।१-१-२१।।**

'य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुः हिरण्यकेश आप्रणखात्सर्व एव सुवर्णः, तस्य यथा कप्यासं पुंडरीकमेवमक्षिणी' इति छांदोग्येऽस्य विषयः श्रूयते।

ततोऽनन्तराधिकरणेन प्रतिपादयिष्यमाणमर्थं दर्शयति - **तस्येति**। संसारभेषजं मोक्षप्रदम्। **मनस्समाधानेति**। दहरविद्यादिषूपास्यस्य रूपस्यानुसन्धानं दुस्संपादं तत्स्थानस्य हृदयपुण्डरीकादेरप्रसिद्धत्वात्। वक्ष्यमाणरूपस्य तु स्थानं सौरमण्डलमागोपालाङ्गनमतिप्रसिद्धमिति तदनुसंधानं सम्पादमिति भावः। किमपि अप्राकृतं रूपमित्यर्थः।

ननु, अत्र गताऽर्थानुवादः ? प्राणाकाशादीनां निरासेऽकृतेऽपि चेतनाचेतनेष्वतिव्याप्तिनिरासेन सिद्ध्यतोऽर्थस्य चिदचिदर्थान्तरमिति विशेषणेन कथमुपन्यासः। अतिव्याप्तिनिरासार्थं पेटिकामध्ये साधनाध्यायनिरूपणीयध्यानोपयुक्तरूपविशेषप्रतिपादकाधिकरणस्य कथं प्रस्तावः? तस्य समन्वयाध्याये का सङ्गतिः? इति चेत् श्रृणु।

लक्षणपरिष्कारपेटिकासूचनार्थो लक्षणसूत्रमारभ्य गतार्थानुवादः। तत एव चातिव्याप्ति निरासससिद्धार्थोपन्यासः।

प्राणाकाशाधिकरणद्वयं तु न तत्रातिव्याप्तिनिरासार्थम्। किन्तु प्राणाकाशवाक्ययोर्ब्रह्मणि तात्पर्यप्रदर्शनार्थम्। तेन वाक्यशेषगतकारणत्वजन्यमन्दरशङ्काविषयातिव्याप्तिनिरासोपि सिद्ध्यतीत्यानुषङ्गिकप्रयोजनसूचनपरं तदवतारिकाभाष्यम्।

इदमधिकरणमप्यनन्तरादित्यविद्यावाक्यस्य ब्रह्मणि तात्पर्यप्रतिपादनार्थमेव। ध्यानरूपविशेषार्थसिद्धिरप्यनेनाधिकरणेन लभ्यत इत्यानुषङ्गिकप्रयोजनसूचनपरमेतदवतारिका भाष्यमपि। पूर्वाधिकरणविषयवाक्ये हिरण्यगर्भविषयोपक्रमोपसंहारैकरूप्यस्य मध्यगतबहुप्रमाणविरोधान्न साधकत्वमित्युक्तम्।

इह तु तद्विषयोपक्रमोपसंहारैकरूप्यस्य तादृशविरोधो नास्तीति प्रत्युक्तिसम्भवात्प्रत्युदाहरणरूपा समनन्तराधिकरणसङ्गतिः। सा देवताविशेषो वेति संशयवाक्येन भाष्ये सूचयिष्यते।

मण्डलान्तर्वर्तित्वेन प्रसिद्धो देवताविशेषो हि तत्र भवति ग्राह्यः। हिरण्यगर्भस्तथा प्रसिद्ध इति पूर्वाधिकरणे प्रदर्शितम्। न च आदित्यस्य प्रसिद्धतया स एव देवताविशेषपदेन पूर्वपक्षकोटितया निर्दिष्ट इति शङ्क्यम्। पक्षे तस्याऽपि पूर्वपक्षावलम्बनत्वेऽपि हिरण्यगर्भस्य तथा प्रसिद्धस्य दुर्वारत्वात्। अत एव भाष्ये सामान्येन देवताविशेषो वेत्येव संशयः प्रदर्शित इति सर्वं समञ्जसम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अयमादित्यान्तर्वर्ति हिरण्मयः पुरुषः परमेश्वरो देवताविशेषो वा? इति संशयः।

एवं सति सर्वाधारस्य सर्वगतस्य परमेश्वरस्याऽदित्यान्तर्वर्तित्वं हिरण्मयरूपत्वं च न संभवति। स्वेच्छया रूपाङ्गीकारे त्रिलोचनत्वं नियतम्। तदिह न विद्यते। *'पुण्डरीकमेवमक्षिणी'* इति लोचनद्वयमेव श्रूयते। अथवा स्वेच्छागृहीतोऽपि देहः संसारिणामिव परमेश्वरस्याऽपि दुःखमुत्पादयेदेव। स्वेच्छासंबन्धेऽपि पावकस्य दाहकत्वं हि स्वभावः। ततः परमेश्वरस्य शरीरसंबन्धो न युक्तः। तस्मादयं कश्चिद्देवताविशेष एव न परमेश्वर इति पूर्वपक्षन्यायः।

सिद्धान्तस्तु परमेश्वर एव। कुतः? तद्धर्माणामुपदेशात्। 'स एषः सर्वेषां लोकानामीष्टे सर्वेषां कामानां तस्योदिदितिनाम स एषः सर्वेभ्यः पाप्मेभ्य उदित' इत्यादिना प्रतिपादिताः

अत्र **अन्तरादित्य** इति साधारणत्वोक्त्या हिरण्मय इति शरीरवत्त्वोक्त्या च आधारशरीरयोः सम्भवाऽसम्भवाभ्यां संशय इत्याह - **अयमिति**।

अथ पूर्वपक्षः -

सर्वाधारत्वं परमेश्वरस्याधाराऽसम्भवे सर्वगतत्वं च हिरण्मयरूपासम्भवे च हेतुः। व्यापकस्य हिरण्यविकारतया परिच्छिन्ने शरीरे स्थित्यसम्भवात्।

ननु **उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तमि**तीश्वरस्य विग्रहः श्रूयत इति चेन्न। तस्योपासनार्थकल्पिततत्वेन प्रकृतस्य हिरण्मयः पुरुषो दृश्यत इति वास्तवतया दृश्यमानत्वोक्त्या तद्विषयत्वाभावावसायात्। न च, ऐच्छिकमीश्वरस्यापि वपुरस्तीत्यभ्युपगम्यत इति शङ्क्यम्। तस्य कर्मजन्यत्वनियमेन अपहतपाप्मतया पाप्मशब्दस्य पुण्यस्याऽप्युपलक्षकत्वेन कर्मसंस्पर्शरहिते तस्मिन् शरीरस्याऽसम्भावितत्वात्। अथ स्वेच्छया ब्रह्मणः शरीरपरिग्रहेऽभ्युपगतेऽपि प्रकृते **अक्षिणी** इति लोचनद्वयमात्रवत्त्वाम्नानेन परमेश्वरस्य त्रिलोचनत्वप्रसिद्धेश्च प्रकृतरूपस्य तदविषयत्वाऽवगम्यात्। यथा कथमपि परमेश्वरविषयत्वाऽभ्युपगमे पावकस्य दाहकत्ववच्छरीरस्य दुःखजनकत्वनियमेन तस्याऽपि दुःखभाजनत्वमवार्यं स्यात्। तस्मादादित्यान्तर्वर्ती पुरुषः परमेश्वरो न भवति। किन्तु कश्चिद्देवताविशेष एवेति।

अथ सिद्धान्तः -

अत्र आदित्यान्तर्वर्ती पुरुषः पक्षतया निर्दिष्ट इति साध्यमध्याहृत्य दर्शयति - **परमेश्वर एवेति**। तद्धर्मोपदेशादिति बहुवचनान्तषष्ठीसमासेन धर्मबाहुल्यं विवक्षितमित्याह - **तद्धर्माणामिति - स एष** इति।

ननु, छान्दोग्यश्रुतिरिहोदाहृता। तत्र **स एष सर्वेषां लोकानामीष्टे सर्वेषां कामानामि**ति सर्वलोककामैश्वर्यं न श्रूयते। किन्तु **ये चैतस्मादर्वाञ्चो लोकस्तेषां चेष्टे देव कामानाञ्चे**ति कतिपयलोककामैश्वर्यं श्रूयते। तत्तु परिच्छिन्नैश्वर्यदेवताविशेषपरम्। न परमेश्वरलिङ्गम्। तत इदमसङ्गतमिति चेदुच्यते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सर्वलोककामेश्वरत्वसर्वपापराहित्यादयो धर्मा हि पारमेश्वराः, 'एको रुद्रो न द्वितीयाय तस्थु य इमान् लोकानीशत ईशनीभिः', 'एको बहूनां यो विदधाति कामान्' इत्यादि श्रवणात्।

सर्वाधारस्य सर्वगतस्यादित्यान्तर्वर्तित्वं न संभवतीति यदुक्तं तत्र न विरोधः। सर्वधारः सर्वगतः परमेश्वरः साधकानुग्रहाय हिरण्मयं किमपि रूपं समास्थाय सवितृमण्डलमधिवसति।

शरीरसंबन्धादस्मदादिवन्नेश्वरस्य संसारदोषापत्तिः। श्रुतिरेव भगवती ह्यस्य शरीरसंबन्धं सर्वपापराहित्यं च प्रतिपादयति। वयं हि श्रुति प्रामाण्यशरणा न युक्तिं बहुमन्महे। पावकोऽपि संबन्धान्न शक्तिमतां दाहकः।

अक्ष्यादित्यपुरुषयोरैक्यं सिद्धं कृत्वा ततः सिद्धस्य सर्वलोककामेश्वरत्वस्यानुवादपरमिदं भाष्यमतो न विरोधः। नच तयोरैक्यं न सिद्धमिति शङ्क्यम्। **तद्यत्तत्सत्यमसौ स आदित्यो य एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुष आदित्यश्चक्षुर्भूत्वा दक्षिणेक्षन्प्राविशत्। य आदित्ये तिष्ठन्नादित्यादन्तरो यश्चक्षुषि तिष्ठन् चक्षुषोऽन्तर** इत्यादिश्रुतिषु अक्ष्यादित्यान्तर्वर्तिपुरुषस्यैकत्वाम्नानात्।

नन्वेनयोर्द्वयोरैक्ये आदित्यमण्डलान्तर्वर्तिनमुद्दिश्य **ये चैतस्मात्पराञ्चो लोकास्तेषां चेष्टे देवकामानामिति** देवलोककामेश्वरत्वस्य अक्ष्यन्तर्वर्तिनं प्रति **ये चेतस्मादर्वाञ्चो लोकास्तेषां चेष्टे मनुष्यकामानामिति** मनुष्यलोककामेश्वरत्वस्य च विभज्य विधानमयुक्तमिति चेन्न।

आधिदैवताध्यात्मरूपोपासनार्थं तादृशविभागस्याम्नातत्वेन तेनोपास्यभेदासिद्धेः। तथा च देवताधिकरणमीश्वरोपासनमधिदैवतमित्यात्माधिकरणं तदध्यात्ममिति च निगद्यते। एवञ्चादित्यान्तर्वर्तिपरमेश्वरोपासनमधिदैवतमक्ष्यन्तर्वर्तीश्वरोपासनमध्यात्ममिति च सिद्धम्। एवमुपासनार्थमुभयोरैश्वर्यस्य विभज्य कथनेऽप्युपास्यैकत्वेनोभयत्र विहितं सर्वमैश्वर्यं पारमेश्वरमेव पर्यवस्यतीति न किंचिदवद्यम्।

स एष सर्वेभ्यः पाप्मभ्य उदित इति। ननु, कथं सर्वपापोदितत्त्वम्? पाप्मनः स्वच्छादकादुद्गमनात् प्राक्तदाच्छादितस्य घटते। यथा मेघमण्डलादुदितत्त्वमिव प्राक्तदाच्छादितस्य चन्द्रस्य। न हि कदाचिदपि परमेश्वरः पापाच्छादित इष्यत इति चेन्न। पाप्मभ्य उदित इत्यनेन पापसम्बन्धराहित्यस्यैव लक्षणयाऽवगम्यमानत्वेन निश्शङ्कत्वात्। साधारत्वं साधकानुग्रहार्थपरिगृहीतपरिच्छिन्नशरीरविशिष्टतयेत्युपपादयति सर्वाधारस्येत्यादिना। शरीरवत्त्वं तत्प्रतिक्षेपकतर्कस्य श्रुतिविरोधादप्रामाण्यसमर्थनेनोपपादयति - **शरीरसम्बन्धादिति**। यथा श्रुतिसिद्धं परमेश्वरस्य स्वरूपमपहतपाप्मत्वादिगुणजातमपि प्रतिक्षेप्तुं श्रुतिविरोधात्तर्को न शक्नोति, तथैव तस्य शरीरवत्त्वमपि प्रतिक्षेप्तुमपहतपाप्मत्वादिलिङ्गोपनीतस्य तस्य हिरण्यश्मश्रुत्वादिविशिष्टशरीरप्रतिपादकोदाहृतश्रुतिविरोधान्न शक्नोतीति भावः।

पारमेश्वरशरीरप्रतिक्षेपकतर्कस्य श्रुतिविरोधादाभासत्वमुक्तम्। स्वतोपि तस्याभासत्वमाह - **पावक** इति। यथा दाहकस्वभावोऽपि पावकः शक्तिविशेषयुक्तान् भूतवशिनो न दहति, तथा दुःखजनकमपि शरीरं

CC-0. In Public Domain. Chidambaram Collection, T.N.

Digitization by eGangotri-South Center

'कप्यासं पुण्डरीकमेवमक्षिणी' इति त्रिलोचनस्य परमेश्वरस्य लोचनद्वयग्रहणं पुण्डरीकसादृश्यवर्णनार्थं, न तृतीयलोचनाभावद्योतनपरम्। तथाऽहि, त्रिपुत्रं ब्राह्मणं प्रति, द्वौ पुत्रावस्याग्निकल्पावित्युक्ते द्विसंख्याग्रहणं न शेषपुत्रनिषेधपरम्। किन्तु पुत्रद्वयस्याग्निसादृश्यपरम्। तद्वदत्रापि कमुदकं रश्मिभिः पिबतीति कपिः आदित्यः, तेनासितं विकासितं पुण्डरीकं यथा स्फुरति तथा परमेश्वरस्य लोचनद्वयम्। तृतीयलोचनं तु मुकुलितस्वभावं विकसितपुण्डरीकसदृशं न भवति। मुकुलितपुण्डरीकसममित्यभिप्रायः।

सर्वशक्तियुक्तस्य परमेश्वरस्य न किमपि दुःखं जनयितुं शक्नुयात्। अथ शरीरं दुःखजनकमेवेति नियमोऽस्तीति चेद्वह्निर्दाहक एवेति नियमस्येव शक्तिरहितविषये चरितार्थत्वान्न कश्चिद्व्यक्तिविरोध इति भावः।

कप्यासमिति। ननु, किमर्थमिदमुच्यते? न च अक्षिणी इति श्रुतस्याक्षिद्वयस्य त्रिलोचने परब्रह्मण्य-सङ्गतत्वेन तस्याऽक्षियुगमेव रविकरविकसितपुण्डरीकसदृशमिति समर्थयितुमिति वाच्यम्। **गृहं सम्मार्ष्टीत्यत्र** गृहपदगतैकत्वस्येव **वृषलैर्न प्रवेष्टव्यमित्यत्र** वृषलशब्दगतबहुवचनस्येव च प्रकृते द्वित्वस्याऽप्यविवक्षिततत्वेन तत्समर्थनस्यानावश्यकत्वात्। तथाहि, गृहं सम्मार्ष्टीत्यत्र एकवचनं भवति जात्येकत्वावलम्बनम्। वृषलैरित्यत्र बहुवचनमपि **जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम्** इतिसूत्रेणाऽतिदेशसिद्धम्। ततश्च जात्यवलम्बनस्यैकत्वस्याऽऽतिदेशिकस्य बहुत्वस्य चाऽविवक्षावदेव जातिविवक्षायां श्रूयमाणयोरक्षणोरपि द्वित्वस्याऽविवक्षा युक्ता इति चेन्न।

हेलाराजीयटीकायाम्,

> **एकत्वं वा बहुत्वं वा केषाञ्चिदविवक्षितम्।**
> **तद्धि जात्यभिधानाय द्वित्वं तु स्याद्विवक्षितम्।।**

इत्युक्त्या द्वित्वस्याऽविवक्षोक्तिर्न युक्तेति चेदवधत्स्व।

शाब्दिकमर्यादावलम्बनेऽपि जातिविवक्षायां द्वित्वाऽविवक्षोक्तिर्युक्तव। द्वित्वं तु न विवक्षितमित्युक्तेः का गतिरिति चेत्। द्वित्वानाविष्टा व्रीह्यादिजातिर्गतिरस्ति भूयसी। स्तनलोचनादिजातिविवक्षायां तु द्विवचनमपि पक्षे भवति। **स्तनादीनां द्वित्वाविष्टा जातिः प्रायेणेति** वामनसूत्रे विधानात्। **स्नान्तीना बृहदमलोदबिन्दुचित्रौ रेजाते रुचिरदृशामुरोजकुम्भावित्यादिकाव्यप्रयोगदर्शनात्।**

> **तस्य कृद्धस्य नेत्राभ्यां प्रापतन्नश्रुबिन्दवः।**
> **दीपाभ्यामिव दीप्ताभ्यां सार्चिषस्तोयबिन्दवः।।**

इति रामायणे दशाननस्य विंशतिलोचनस्य क्रोधवर्णने नेत्राभ्यामिति द्विवचनदर्शनाच्च। एवं च स्तनलोचनादिजातिष्वेकत्वबहुत्ववत् द्वित्वस्याऽपि प्राप्तत्वात्तस्याऽप्यविवक्षा नायुक्तेति दिक्। एवमक्षिद्वित्वविवक्षया

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

'असौ योवसर्पति नीलग्रीवो विलोहितः। उतैनं गोपा अदृशन्नदृशन्नुदहार्यः। उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः' इति नीलग्रीवस्य परमेश्वरस्य सर्वभूतप्रत्यक्षावगमात्। 'स्वरुचाहितमण्डलस्त्रिनेत्रो रविः' इत्यादिना तस्य त्रिलोचनत्वावगतेरादित्य एव प्रत्यक्षः परमेश्वरः प्रभामण्डलमध्यवर्ती। अन्यथा कथमस्य नीलग्रहत्वं त्रिलोचनत्वं चोच्यते? असावादित्यो ब्रह्मेति ब्रह्मत्वव्यपदेशश्च।

तस्मादन्तरादित्य इति मण्डलवर्ति सूर्य एव हिरण्मयः पुरुष इत्यत आह -

भेदव्यपदेशाच्चान्यः **।।१-१-२२।।**

मण्डलाभिमानिनोऽस्माञ्चेतनरूपादादित्यादन्य एव हिरण्मयरूपः परमेश्वरः, भेदव्यपदेशात्। 'य आदित्ये तिष्ठन्नादित्यादन्तरो यमादित्यो न वेद यस्याऽदित्यः शरीरं य आदित्यमन्तरो यमयति

समर्थयितुं शक्येपि प्रकृतेऽर्थे यदि कश्चिन्न्यायानभिज्ञो मन्येत श्रूयमाणस्य द्विवचनस्याऽर्थाऽविवक्षाकल्पनमयुक्तमिति तद्विवक्षामङ्गीकृत्य परिहारो भाष्यकारेणोच्यते - **यथा कप्यासमित्यादिना।**

उत्तरसूत्रमवतारयति - **असौ य** इति। सिद्धान्तोपक्रमे परमेश्वर एवेति प्रतिज्ञावाक्येन **नेतरोऽनुपपत्तेरि**ति सूत्रान्नेतर इत्यनुवृत्य आदित्यान्तर्वर्ती परमेश्वर एव मण्डलाभिमानी पुरुषो न भवति। इति साध्यं दर्शितम्। तत्रेयं शङ्का प्रसजति। अस्तु परमेश्वरः। स हि मण्डलाभिमानिपुरुषादन्यो न भवति। **असौ योऽवसर्पती**तिमन्त्रे **य मति पामरा गोपाला उदकहारिण्यस्त्रियोऽन्यानि सर्वाणि च भूतानि व्योम्नि संचरन्तं पश्यन्ति** इति तस्यैव मण्डलाभिमानिनः पुरुषस्य नीलग्रीवत्वरूपपरमेश्वराऽसाधारणधर्मोपदेशात्।

न च मण्डलमेव पश्यन्ति न तु मण्डलाभिमानिनं नीलग्रीवमिति मन्त्रे यथाश्रुतस्याऽर्थस्य बाधा शङ्कनीया। मण्डलस्यापि तदभिमानिपुरुषशरीरत्वेन मण्डलदर्शनस्य तच्छरीरकपुरुषदर्शनत्वोपपत्तेः।

ननु तस्य त्रिलोचनत्वाभावादक्षिद्वित्वविवक्षाप्राप्तमुकुलितलोचनान्तरवत्वं न घटत इति चेन्न।

अरुणोऽरुणपङ्कजे निषण्णः कमलाऽभीतिवरान्करैर्दधानः
स्वरुचाऽऽहितमण्डलस्त्रिनेत्रो रविराकल्पशताकुलोऽवतान्नः।।

इति तद् ध्यानश्लोके तस्य त्रिनेत्रत्वप्रतिपादनात्। तस्मान्मण्डलाभिमानी पुरुष एव परमेश्वरः स एवास्मिन्विषयवाक्ये उपास्यतया प्रतिपाद्य इति शङ्कानिराकरणार्थमुत्तरसूत्रमित्यर्थः।

ननु य आदित्ये तिष्ठन्नित्यादिश्रुतावादित्यशब्दो मण्डलवाची। **य एष एतस्मिन्मण्डले पुरुष** इति बृहदारण्यके, **एष एतस्मिन्मण्डलेऽर्चिषि पुरुष** इति तैत्तिरीये च पुरुषस्य मण्डलस्थत्वोक्तेस्तदेकार्थत्वानुरोधात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एष त आत्मान्तर्याम्यमृत' इति। अत्राऽमृतशब्देन शिव उच्यते। 'एतानि ह वा अमृतस्य नामधेयानि' इति शतरुद्रीयप्रशंसारपरजाबालोपनिषदि श्रवणात्। आदित्याद्भेद एव परमेश्वरस्य तदविदितत्वादि-धर्मैर्व्यपदिश्यते। तस्मादादित्याच्चेतनादन्य ईश्वरो हिरण्मयः। 'नीलग्रीवो विलोहित' इति नीलग्रीवः परमेश्वर एवाऽदित्यान्तर्वर्ति प्रतिपाद्यते। तदात्मतया तच्छब्दवाच्यत्वम्।

ननु, नीलग्रीवः परमेश्वरो नादित्यान्तर्वर्ती, किन्तु नारायण एव। तथाहि सर्वत्र लौकिकाः पठन्ति 'ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायणः सरसिजासनसन्निविष्टः' इति। तस्यैव पुण्डरीकसदृशाक्षिद्वयसंबन्धो युक्तः, पुण्डरीकाक्ष इति प्रसिद्धेः। किमन्यथा प्रतिपादनप्रयासेनेति चेन्न।

परमेश्वरासाधारणलिङ्गानां हिरण्मयपुरुषे दृश्यमानानां तस्मिन्नारायणेऽनुपपत्तेः। तथाहि, सूत्रविषयस्य सन्दिग्धस्याऽस्य वाक्यस्याऽसंदिग्धैर्वाक्यान्तरैर्निर्णयो युक्तः। महोपनिषदि श्रूयते,

---

तस्मान्मण्डलाभिमानिपुरुषाद्भेदव्यपदेशो न सिद्ध्यतीत्याशङ्क्याह - **तदविदितत्वादिधर्मैरिति**। **यमादित्यो न वेदेति** वेदनप्रसक्तिमत्त्वाच्चेतन एवादित्यशब्दार्थ इत्यवगम्यते। **यमादित्यो न वेद यस्यादित्यः शरीरमिति** पुंलिङ्गाभ्यामपि तथाऽवगम्यते। श्रुत्यन्तरोक्तमण्डलपरत्वे हि क्लीबाभ्यां भवितव्यम्। परमेश्वरस्य मण्डलस्थत्वं क्वचिदस्तीतिचेत्पर्यङ्कस्थराज्ञः प्रासादस्थत्वमिव तन्न विरुध्यते। एवमुक्तन्यायैः प्रकृतविषयवाक्येऽप्यादित्यशब्दो मण्डलाभिमानिपुरुषपर इति भावः। तस्मादादित्यादिति।

यद्यपि हिरण्यगर्भाद्भेदः पूर्वाधिकरणे सिद्धः, तथाप्यदितिपुत्रत्वेन प्रसिद्धान्मण्डलाभिमानिनः पुरुषाद्भेदोऽनेन सूत्रेण प्रतिपाद्यत इत्याशयः। **असौ योऽवसर्पती**ति मन्त्रो न मण्डलाभिमानिपुरुषपरः। किन्तु तदन्तर्यामिपरमेश्वरपरः तच्छरीरकतया तद्वाचकशब्दविषयत्वं तस्योपपद्यत इत्याह नीलग्रीव इति।

अस्मिन्सूत्रे चकारेण नारायणादप्ययमन्य इति दर्शितम्।

तदुपपादयितुमाशङ्कते - **नन्विति**। लौकिकप्रसिद्ध्या पुण्डरीकाक्षत्वलिङ्गेन च आदित्यान्तर्वर्ती हिरण्मयः पुरुषो नारायणः। स एव सर्वकामेश्वरत्वादिपारमेश्वरधर्मशालीति प्राप्ते परिहरति - **नेति**। तैत्तिरीयोपनिषदि मण्डलाभिमान्यादित्यान्तरं तमेव हिरण्मयपुरुषं प्रस्तुत्य, तस्य भूतपतित्वलिङ्गेन **सर्वो वै रुद्रः।, पुरुषो वै रुद्रः।, सर्वो ह्येष रुद्रः** इति रुद्रशब्दाभ्यासेन अभ्यस्तेनोमापतित्वलिङ्गेन च परमेश्वरत्वमाविष्कृतम्।

एवमसन्दिग्धार्थवाक्यान्तरानुसारेण विवादविषयवाक्यार्थनिर्णयस्य युक्तत्वाद्भूतपतित्व नीलग्रीवत्वोमा-पतित्वादीनां परमेश्वरादन्यत्रासम्भावितत्वाद्विशेषलिङ्गैरेतै रुद्रादिश्रुतिभिश्च पुण्डरीकाक्षत्वरूपसामान्यलिङ्गस्य बाधितत्वाच्चान्तरादित्यविद्योपास्य उमापतिरेवेति निर्विशङ्कं सिद्ध्यतीत्यर्थः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

'आदित्यो वा एष एतन्मण्डलं तपति' इत्यादि। तत्र 'य एतस्मिन्मण्डलेऽर्चिर्दीप्यत' इति मण्डलप्रभामुक्त्वा, 'य एष एतस्मिन्मण्डलेर्चिषि पुरुष' इति मण्डलाभिमानिनं सूर्यमभिधाय, 'एषोऽन्तरादित्यो हिरण्मयः पुरुषः' इति हिरण्मयं पुरुषमादित्यान्तर्यामिणमुक्त्वा पुनः 'आदित्यो वै तेज ओजो बलं यश' इत्यादिना तस्याऽदित्यरूपस्य विभूतिमभिधाय, 'एष पुरुष एष भूतानामधिपतिः' इति भूतपतित्वेन तन्निर्दिश्य, पुनः कीदृशः पुरुष इत्याकाङ्क्षायां 'सर्वो वै रुद्र' इत्यारभ्य, 'नमो हिरण्यबाहवे हिरण्यपतयेऽम्बिकापतय उमापतय' इत्युपसंहृतम्। तत्र बाहुग्रहणस्योपलक्षणत्वात् हिरण्यरूप इति तात्पर्यम्। अतो हिरण्यसदृशरूप उमापतिरादित्यमण्डलवर्तीति सिध्यति। अत्र नीलग्रीवत्वमुमापतित्वमित्यादि विशेषलिङ्गम्। परमेश्वरादन्यत्र तस्याऽयोगात्। पुण्डरीकाक्षत्वं तु साधारणं लिङ्गम्। नारायणादन्यत्र तस्य दर्शनात्। कमललोचना नारी, कमललोचनः पुरुष इति। अतो विशेषलिङ्गेन सामान्यलिङ्गस्य बाधः। ध्येयः सदेत्यादि

पुण्डरीकाक्षत्वमिति - पुण्डरीकाक्ष इति नामैवासाधारणम्। न तु पुण्डरीकसदृशलोचनत्वम्। अतः समानार्थशाखान्तरगतेनाऽपि शिवासाधारणलिङ्गेन तस्य बाधो युक्तः।

लौकिकं वचनमिति - पौरुषेयं पौराणिकवचनं, भाक्तं तद्भक्तविषयम्, विष्णुपूजावसाने विष्णोरादित्यमण्डले ध्येयत्वमवगमयति, न तु विष्णोरादित्यान्तर्यामित्वं प्रतिपादयितुं शक्नोतीत्यर्थः।

सवित्रीप्रतिपाद्य इति -

आदित्यमण्डलासीनं रुक्माभं पुरुषं परम्।
ध्यायन् जपेत्तदित्येतन्निष्कामो मुच्यते द्विजः।। इति

आदित्यमण्डलान्तःस्थं परं ब्रह्माऽधिदैवतम्।।

इत्यादिस्मृतिवचनैरादित्यान्तर्वर्ति परं ब्रह्म गायत्रीप्रतिपाद्यमित्यवसीयते। तच्च शिव एवेति व्यवस्थापितम्।

ननु, **विश्वामित्रऋषिः, छन्दो गायत्री, देवता रविः** इत्यादिना सविता देवतेति स्मर्यते। कथं तदुपपद्यत इति चेन्न। तत्र रविवाचकपदस्य तदन्तर्यामिणि शिवे तात्पर्यवत्त्वात्। किञ्च सवितुवरेण्यमिति सावित्र्यां सवितुरुपास्यत्वं शिवस्य प्रतिपादितम्। तद्धि **येन सूर्यस्तपति तेजसेद्ध** इति मन्त्रेण सवितुस्तेजःप्रदतया समाश्रयणीये तदन्तर्यामिणि नाऽसङ्गतम्। सावित्रीमन्त्रार्थस्तु ब्रह्मपथीयवेदपथे वैष्णवपथप्रतिषेधे सप्रपञ्चमुपपादयति इति नेह।

卐 卐 卐

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

लौकिकवचनं भाक्तमेव। ततो हिरण्यसदृशरूपस्त्रिलोचनो नीलग्रीव उमापतिः सकललोककामेश्वरः सर्वपाप्मानाघ्रातो भगवान्परमेश्वर आदित्यान्तर्वर्ती सावित्रीप्रतिपाद्यः सर्वेषां मुमुक्षूणां ध्येय इति सिद्धम्।

।। इति अन्तरधिकरणम् ।।

***

अथ आकाशाधिकरणप्राणाधिकरणे

सर्वज्ञत्वादिधर्मकस्य परब्रह्मणः शिवस्य परममङ्गलास्पदमुपास्यरूपमभिधाय, तल्लक्षणस्य नामरूढिवशात् अन्यत्राऽतिव्याप्तिशङ्कायाम् अधिकरणमारभ्यते -

---

इदमधिकरणं शुद्धाद्वैतिनां पक्षे न सङ्गच्छते। अत्र हि परं ब्रह्म हिरण्यरूपमिति निर्धारितम्। तत्कथं निर्गुणे तत्त्वे समनुगच्छेत ? अथ कल्पितमिति वा, स्तुत्यर्थमिति वा रूपवत्त्वं ब्रह्मणः समर्थयितुमिष्येत, तत एव देवप्रामाण्येऽविश्वासादास्तिक्यमेव भज्येतेति दिक्।

अथेदं श्रीभाष्यकृतामपि पक्षे विरुद्धमेव। तथाहि, प्रकृते परमेश्वरो हिरण्यवर्णतया निर्णीत इति व्यक्तम्। स कथं कार्ष्ण्यायसवर्णो रमेश एवेति वक्तुं युज्यते? किञ्च अन्तरादित्याविद्योपास्यतत्त्वनिर्धारणार्थं प्रवृत्तायां महोपनिषदि समाम्नातानि भूतपतित्वोमापतित्वाम्बिकापतित्वादीनि शिवाऽसाधारणान्यपि लिङ्गानि रमापतौ न कथमपि सङ्गमयितुं युज्येरन्। अत एव श्रीभाष्यकारैः श्रुतप्रकाशिका-वेदान्तसार-वेदान्तदीपादिकारैः स्वानुगैः सह मौनमेवाऽवलम्ब्य पलायनमेव शरणीकृतमित्यलम्।

।। इति अन्तरधिकरणम् ।।

***

आकाशाधिकरणप्राणाधिकरणे

सङ्गतिं सूचयन्नुत्तराधिकरणमवतारयति **सर्वज्ञत्वादिति** - गतेऽधिकरणे परब्रह्मणः शिवस्य योग्यमुपास्यं रूपं यद्वाक्यमवलम्ब्य प्रदर्शितम्, तत्र तस्य तात्पर्ये व्यवस्थापिते तद्वाक्यानन्तरं पठितयोराकाशप्राणवाक्ययोः शिवे तात्पर्यनिरूपणं क्रियत इति प्रसङ्गरूपा सङ्गतिरिह विषयवाक्यक्रममूला विवक्षिता। तयोर्ब्रह्मणि तात्पर्ये निरूपिते मन्दानामाशङ्का - प्राणाकाशयोर्ब्रह्म लक्षणाऽतिव्याप्तिरूपाऽपि निराकृता भवतीत्याशयेनातिव्याप्ति-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

आकाशस्तल्लिङ्गात् ।।१-१-२३।।

अत एव प्राणः ।।१-१-२४।।

छान्दोग्ये श्रूयतेऽस्य विषयः – 'सर्वाणि ह वा इमानि भूतानि आकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्ति। सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति। प्राणमभ्युज्जिहते' इति।

अत्र सकलभूतोत्पत्तिप्रलयकारणप्रतिपादकौ प्राणाकाशशब्दौ परमेश्वरप्रतिपादनपरौ? किं वा भूताकाशप्राणवायुप्रतिपादनपरौ? इति सन्देहः।

'प्राणाद्ध्येव खल्विमानि भूतानि जायन्ते। प्राणेन जातानि जीवन्ति प्राणं प्रयन्त्यभिसंविशन्ति' इत्यादिश्रुतेः 'आकाशाद्वायुः' इत्यादिश्रुतेश्च प्राणाकाशयोरपि सकलभूतकारणत्वावगमात्तावेवात्र प्रतिपाद्याविति प्राप्ते ब्रूमः -

प्राणाकाशशब्दवाच्यः परमेश्वर एव, सर्वकारणत्वादितल्लिङ्गात्। न ह्यनयोः सर्व-

---

शङ्कायामित्युक्तम्। शिवस्य योग्यं रूपमिति सूचयितुं सर्वज्ञत्वादिधर्मकस्येति, परममङ्गलास्पदमिति च विशेषणे। सर्वोत्तरसौन्दर्यशालिरूपं योग्यम्। प्रायो विरूपेषु भवन्ति दोषाः। **यत्राकृतिस्तत्र गुणा वसन्तीति** सामुद्रिकशास्त्रवचनादित्याशयः।

इदं सूत्रद्वयमधिकरणद्वयार्थम्। तत्रोत्तराधिकरणं पूर्वाधिकरणन्यायातिदेशार्थम्। ततः पूर्वपक्षसिद्धान्तयोरेकरूपत्वाद्युगपदुपन्यासार्थं सूत्रद्वयं युगपल्लिखितम्। तथैव विषयवाक्यद्वयमप्युदाहरति - **छान्दोग्य** इति। संशयं दर्शयति - **अत्रे**ति। छान्दोग्ये **अस्य लोकस्य का गतिरित्याकाश इति होवाच। सर्वाणि भूतान्याकाशादेव समुत्पद्यन्ते। सर्वाणि भूतानि प्राणमेवाऽभिसंविशन्ती**त्यादिविषयवाक्ययोः श्रुतौ प्राणाकाशशब्दौ प्राणवायुभूताकाशपरावुत परमेश्वरप्रतिपादकाविति संशयः। प्राणाकाशश्रुती सर्वभूतोत्पत्त्यादिकारणत्वरूपब्रह्मलिङ्गं च संशयबीजे इत्यर्थः। **प्राणाद्ध्येव खल्विमानि भूतानि जायन्त** इत्यादिना, **आकाशाद्वायुरि**त्यादिना च प्राणाकाशयोरपि सर्वभूतोत्पत्त्यादिकारणत्वश्रवणत्वात् प्राणाकाशशब्दयोः प्राणवायौ भूताकाशे च रूढत्वाच्च तत्प्रतिपादकावेवेति पूर्वपक्षः।

सिद्धान्तमाह - **ब्रूम** इति। आकाशस्य भूतान्तर्वर्तितयेति शुद्धमिश्रमलिन्प्रपञ्चान्तर्गतस्य त्रिविधस्याऽप्याकाशस्य भूतान्तर्भूततया सर्वशब्देन ग्रहणात्तदन्तर्भावेन सर्वभूतोत्पत्तिः कुतश्चिदप्येकस्मादाकाशान्न

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कारणत्वादिकं संभवति। तत्राऽनन्दरूपस्य ब्रह्मणः कारणत्ववादे तात्पर्यम्। 'प्राणाद्ध्येव खलु' इत्यादिश्रुतेर्न प्राणस्य कारणत्ववादे। किंत्वनुवादमात्रम्। आकाशस्य भूतान्तर्वर्तितया सर्वशब्देन ग्रहणात्। सर्वभूतोत्पत्तिः 'आत्मन आकाशः संभूत' इति श्रुत्या परमेश्वरादेव। तस्मात्सर्वभूतकारणत्वं न भूताकाशप्राणयोरिति सिद्धान्तः।

ननु भूताकाश इत्युपपदग्रहणेन किमिति चेत्परमाकाशस्य परप्रकृतिरूपस्य सर्वभूत-कारणत्वसद्भावात्सप्रयोजनम्। तर्हि परमेश्वर इति कथम् ? तदभेदादिति सिध्दम्।

।। इति आकाशाधिकरणप्राणाधिकरणे ।।

***

सम्भवति। किन्तु **आत्मन आकाश** इत्यादिश्रुतेः परमेश्वरादेवेत्यङ्गीकरणीयमित्यर्थः। तल्लिङ्गात्तस्य ब्रह्मणः समस्तमहाभूतसृष्ट्यादिकस्य लिङ्गस्याऽस्मिन्वाक्ये दृष्टत्वात्परमेश्वर एव प्रकृतिविषयावाक्ययोः प्राणाकाशादिशब्दवाक्य इत्याशयः।

卐 卐 卐

इदमप्यधिकरणद्वयं निर्गुणब्रह्मवादिनां पक्षे न संगच्छते। प्राणाकाशशब्दवाच्यत्वं हि प्रकृते निर्धारितम्। आकाशब्रह्मणोः शरीरशरीरिभावे सिद्धे ह्याकाशशब्दवाच्यता ब्रह्मणः सिद्ध्येत्। निर्गुणवादे प्रपञ्चब्रह्मणोः शरीरात्मभावस्यानभ्युपगतत्वेन आकाशशब्दवाच्यता न सम्पद्येतेति व्यक्तम्।

एवमाकाशशरीरत्वस्याष्टमूर्त्यसाधरणाभिधानमहेशानैकधर्मत्वात् **प्राणानां ग्रन्थिरसि रुद्र** इति रुद्रस्यैव प्राणग्रन्थितया वेदप्रसिद्धत्वेन पाञ्चरात्रसिद्धान्तत्वे प्राणपदवाच्यत्वाऽसिद्ध्या च श्रीभाष्यकृतामपि पक्षे प्रकृताधिकरणद्वयं प्रतिकूलमेवेत्यलम्।

।। इत्याकाशाधिकरणप्राणाधिकरणे ।।

***

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ ज्योतिरधिकरणम्

पूर्वं निखिलभुवननायकस्य निरस्तसमस्तदोषवासनाकलङ्कस्य निरतिशयमाङ्गल्यरत्नाकरस्योमापतेः परब्रह्मण आदित्यमण्डलमास्पदमिति निरूपितम्। इह तस्य स्थानान्तरमुच्यते -

ज्योतिश्चरणाभिधानात् ।।१-१-२५।।

छान्दोग्ये श्रूयतेऽस्य विषयः - 'अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषु लोकेष्विदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे ज्योतिः' इत्यादि।

अत्र सकललोकव्यापितया दिवि श्रूयमाणं परं ज्योतिः परमेश्वरो वा? तदन्यो वा ? इति संशयः।

अथ ज्योतिरधिकरणम्

सङ्गतिं दर्शयन्नुत्तराधिकरणस्य विषयमाह **पूर्वमिति** - अन्तरधिकरणे सर्वलोककामेश्वरस्य साधकानुजिघृक्षया परिगृहीतदिव्यविग्रहस्य सर्वोत्तरमङ्गलगुणमणिगणमहासमुद्रस्य तैत्तिरीयोपनिषदि **उमापतये** इति विशेष्यपदेन निर्दिष्टस्य परब्रह्मणः आदित्यान्तर्वर्तिनः पर्यङ्कस्थस्य राज्ञः प्रासादवदादित्यमण्डलं स्थानमिति निरूपितम्। इहाऽधिकरणे स्थानोक्तेः प्रसङ्गात्स्थानान्तरमुच्यत इत्यर्थः। पूर्वाधिकरणस्य प्रसक्तानुप्रसक्तरूपत्वात् पूर्वाधिकरणेनैवाऽस्य प्रसङ्गसङ्गतिरिति सिद्धम्। तत्प्रदर्शनार्थमेव तदधिकरणनिर्णीततात्पर्यकवाक्यलब्धानि परमेश्वरस्य विशेषणानि निखिलभुवनेत्यादिना दर्शितानि।

विषयं दर्शयति - **अथ यदि**त्यादिना। अत्र द्युशब्दस्य पराऽपरान्तरिक्षलोकपराकाशसाधारण्यं संशयबीजमिति सकललोकव्यापितयेति धर्मविशेषणेन दर्शयन् संशयमाह - **अत्रे**ति।

दिवीति सामीप्ये सप्तमी। दिवः परं श्रूयमाणमित्यर्थः। **द्युशब्दस्ये**ति - आदित्यपूर्वपक्षे आकाशो भूमिसूर्यमध्यवर्त्यपरोऽन्तरिक्षलोकः। जाठराग्निपूर्वपक्षे देहबाह्यो भूताकाशः। सूर्य एवेत्येवकारेण परमेश्वरपक्षव्यवच्छेदः। तत्राऽयमाशयः। द्युशब्दोऽत्र स्वर्गवाची वा? उताकाशवाची ? तत्पर्यायतयान्तरिक्षलोकवाची वा? आद्येपि परमेश्वरनित्यस्थानभूतसर्वोत्तरपदस्वर्गवाची वा? उत शक्रादित्रिदशालयरूपापरस्वर्गवाची वा? प्रथमे दिवः पर इत्येतदनुपपन्नम्। तस्योपरि तद्बहिर्भूततया वर्तमाने हि ततः पर इत्युच्यते। न हि वृक्षस्योपरि भ्राम्यन्निव वृक्षकोटरे स्थितोऽपि पक्षी वृक्षात्पर इत्युच्यते। न च परमेश्वरः परस्वर्गस्योपरि ततो बहिर्भूतो वर्तते। किन्तु तन्मध्यगते दिव्यमन्दिरे। परस्वर्गवाचित्वे चात इति विशेषणमनुपपन्नम्।

अपरस्वर्गवाचीति पक्षोप्यसङ्गत एव। मायाकार्यस्य उन्मनान्तलोकनिवहस्य चोपरि परमाकाशमये परस्वर्गे वर्तमानस्य परमेश्वरस्यापरस्वर्गात्परत्वोक्त्या कस्यचिदप्यतिशयस्याऽलभात्। तस्मादिहापरान्तरिक्षात्परत्वमाश्रयणीयम्। तदादित्य एव संगच्छते न ब्रह्मणीति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्युशब्दस्याऽकाशवाचित्वात् परो दिव इत्याकाशवर्ती सूर्य एवाऽत्र प्रतिपाद्यते ज्योतिरिति। अथवा 'अन्तःपुरुषे ज्योतिः' इति पुरुषान्तर्वर्तितया जाठराग्निरिति पूर्वपक्षः।

सिद्धान्तस्तु, 'परो दिवो ज्योतिः' इति सर्वोत्तरं परं ज्योतिः परमेश्वर एव। पूर्वत्र 'पादोऽस्य विश्वा भूतानि' इति ज्योतिषोऽस्यैकांशतया विश्वभूतानामभिधानात्। नैतत्संभवति जाठराग्निसूर्ययोः, परिच्छिन्नत्वात्।

अथवेति। अत्रेदमाकूतम्। सत्यं ज्योतिरिह प्रकृतं ब्रह्म न भवतीति। किन्तु आदित्य इत्यपि न युक्तम्। अपि तु जाठराग्निरित्येव युक्तम्। **इदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे ज्योतिरिति** श्रुत्या तस्य ज्योतिःपदस्य जाठराग्निपरत्वेन व्याख्यातत्वात्। एवमादित्यो जाठरो वाग्निः परं ज्योतिः न परमेश्वर इति प्राप्ते सिद्धान्तयति सिद्धान्तस्त्विति।

सर्वोत्तरमिति हेतुगर्भं विशेषम्। सकलसंसारमण्डलातीतस्थानवृत्तित्त्वाद्दिवः पर इत्यनेन प्रतिपादितं ज्योतिः परमेश्वरः। आदित्यजाठरयोस्तदसम्भवादिति भावः। कथं दिवः पर इत्यस्य सर्वोत्तरत्वपरताऽवसीयत इति चेदुच्यते। इदं ज्योतिस्तावद् द्युसम्बन्धप्रत्यभिज्ञानात्प्राक्सर्वाणि भूतानि एकं पादं कृत्वा पादत्रयात्मना निरूपितः पुरुष इति श्रूयते। तस्य च पुरुषसूक्ते **त्रिपादूर्ध्व उदैत्पुरुषः। पादोऽस्येहाभावात्पुनरिति** सर्वप्राणिनिकायापेक्षया ऊर्ध्ववर्तित्वमवगतम्। अयं सर्वोत्तरत्वहेतुश्चरणाभिधानादिति सूत्रांशेन चरणत्रयरूपस्य प्रकृतस्य पुरुषस्य ज्योतिः पदेनाभिधानादित्यर्थस्य विवक्षिततत्वाल्लभ्यते।

परं ज्योतिरितिपदविशेषणं **परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत** इति श्रुतौ परमेश्वरेऽपि ज्योतिःपदप्रयोगोऽस्तीति ज्ञापनार्थम्। पराऽपरज्योतिषोः परज्योतिष एवात्र ग्रहणमुचितमिति ज्ञापनार्थं च।

ननु, ज्योतिःशब्दश्चक्षुर्वृत्तेरवभासके तेजस्येव वर्तते इति चेन्न। **वाचैवाऽयं ज्योतिषास्ते कर्म कुरुत** इति गाढान्धकारे लोकस्यासनादिव्यवहारसाधनभूतायां वाचि **मनो ज्योतिर्जुषतामाज्यमिति घृतं पिबतां** मनःप्रकाशकमित्यवभासकमात्रे ज्योतिःपदप्रयोगदर्शनात्। **तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति** सर्वावभासकतया समस्तसाक्षिणि परमेश्वरे ज्योतिःपदप्रयोगस्य समुचितत्वाच्च। एवं दिवःपरत्वं ज्योतिषश्चेति यदुभयं पूर्वपक्षसाधकतयाऽभिमतं तदेव सिद्धान्तसाधकमिति विशेषणमुखेन दर्शितम्।

अथ चरणाभिधानादिति सूत्रांशं हेत्वन्तरत्वेन व्याचष्टे - **पूर्वत्रेति**। **एकांशतयेति** - सौत्रचरणशब्दस्य भावप्रधानतया व्याख्यानम्। तथाऽत्र सर्वेषां भूतानां ज्योतिरेकांशत्वेन प्रतिपादनात् ज्योतिः परमेश्वर इत्यर्थः।

परिच्छिन्नत्वादिति - तयोः परिच्छिन्नत्वे तत्र व्यवस्थितस्य परमेश्वरस्याऽपि सार्वात्म्यं सम्भवेदिति भावः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पूर्वं 'गायत्री वा इदं सर्वं भूतम्' इति सर्वात्मतया गायत्री प्रतिपाद्यते। प्रकरणात्तदेकांशत्वमेव प्रपञ्चस्य। 'पादोऽस्य विश्वा भूतानि' इति श्रुतिराहेत्यत आह -

छन्दोऽभिधानान्नेति चेन्न, तथा चेतोऽर्पण निगदात्तथाहि दर्शनम्
।।१-१-२६।।

पूर्वं 'गायत्री वा इदं सर्वं भूतम्' इति छन्दसोऽभिधानात् तस्यैवात्राभिधानं न परमेश्वरस्येति चेत् नैतत् संभवति गायत्र्याख्यस्य छन्दोमात्रस्य सर्वभूतात्मकत्वम्। किन्तु गायत्रीसादृश्याऽनुसंधानोपदेशः परमेश्वरस्य क्रियते। यथा गायत्री षडक्षरैश्चतुर्भिः पादैश्चतुष्पादा, तथा ब्रह्माऽपि चतुष्पादिति। तथाहि, अन्यत्राऽपि छन्दोभिधायी शब्दः सादृश्यादर्थान्तरे प्रयुज्यमानो

उत्तरसूत्रं तद्भाव्यशङ्काप्रदर्शनपूर्वकमवतारयति **पूर्वमिति**। **प्रकरणादिति**। षड्विधा गायत्रीत्येतदनन्तरं **तदेतदृचाऽभ्यनूक्तमित्युक्तार्थविषयत्वेनावतारितायां एतावानस्य महिमा। अतो ज्यायांश्च पुरुषः** इत्यादिऋचस्तदेकविषयस्य **यद्वै तद्ब्रह्म** इत्याद्यनन्तरसन्दर्भस्य च गायत्रीविषयत्वमावश्यकमिति श्रुतिवाक्येनैव संघटितं प्रकरणमिदमनन्यथासिद्धम्। अतस्तदनुसारेण सर्वभूतपादत्वमपि स्तावकत्वेन नेतव्यम्।

तस्मात्प्रकृतस्य छन्दस एव **तावानस्ये**त्यादिसंदर्भेऽभिधानात्, द्युसंबन्धेन प्राक्प्रस्तुतः परमेश्वरः प्रत्यभिज्ञाप्यत इत्येतदयुक्तमिति शङ्कार्थः।

सूत्रगतेन नञा विवक्षितां छन्दोभिधानस्याऽनुपपत्तिमाह - **नैतदिति**। एतच्चरणाभिधानादिति पूर्वसूत्रे निगदितं **तावानस्ये**ति मन्त्रश्रुतं सर्वभूतात्मकत्वं छन्दोमात्रस्य गायत्र्यभिधानस्य न सम्भवतीत्यर्थः। किन्तु **गायत्रीति**। तथेति शब्दो गायत्रीसादृश्यपरः। चेतोर्पणमनुसंधानं निगद उपदेश इत्यर्थः। तस्माद्गायत्रीसादृश्यानुसंधानार्थं परमेश्वरे गौण्या वृत्त्या गायत्रीशब्द आम्नात इति यावत्।

गायत्रीसादृश्यमुपपादयति - **यथेति**। **लिङ्गेनेति**। ब्रह्मश्रुत्योरप्युपलक्षणम्। प्राथमिकत्वाल्लिङ्गस्य विशिष्य ग्रहणम्। गायत्रीप्रकरणबाध इति - गायत्रीपदस्य गौणवृत्त्या परमेश्वरपरत्वग्रहणात्। **गायत्री वा इदगं सर्वं भूतमि**त्यादिसन्दर्भस्य गायत्रीप्रकरणत्वं बाधितमित्यर्थः। एवं गायत्रीप्रस्तावनसन्दर्भैकवाक्यतया तदुपरितनसन्दर्भे स्थितैः श्रुतिलिङ्गैर्गायत्रीशब्द विवक्षितः परमेश्वर एव, न छन्द इति निरूपितम्।

अथ तत्सन्दर्भगतलिङ्गबलेनाप्ययमर्थः सिद्ध्यतीत्यर्थत्वेनोत्तरसूत्रमवतारयति।

ननु, सर्वात्मत्वानुरोधेन गायत्रीपदं गौणवृत्त्याश्रयणेनाऽस्वारस्यं नीतम्। तत्र युज्यते किन्तु उपक्रमस्थगायत्रीपदानुरोधेनैव सर्वात्मत्वमौपचारिकं नेयमित्याशङ्क्याह - **भूतादीति**। भूतपृथिवीशरीरहृदयानि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दृश्यते। यथा संवर्गविद्यायाम्, 'ते वा एते पञ्चाऽन्ये पञ्चाऽन्ये दश सन्तस्तत्कृतम्' इत्युपक्रम्य, 'सैषा विराट्' इत्युक्तम्। तथाच सर्वात्मकतया परमेश्वरस्य लिङ्गेन गायत्रीप्रकरणबाधः। अतः परमेश्वर एव ज्योतिरिति।

भूतादिपाददव्यपदेशोपपत्तेश्चैवम् ।।१-१-२७।।

भूतपृथिवीशरीरहृदयैश्चतुष्पादेति व्यपदेशो न गायत्र्याख्ये छन्दस्युपपद्यते। परमेश्वर एवोपपद्यते।

पुनराशङ्क्य परिहरति -

उपदेशभेदान्नेति चेन्न उभयस्मिन्नप्यविरोधात् ।।१-१-२८।।

ननु 'पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि' इत्यत्र द्युसंबन्धप्रत्यभिज्ञानात् ज्योतिर्वाक्ये परमेश्वरः प्रतिपाद्यत इति न सारम् उपदेशभेदेन विरोधात् प्रत्यभिज्ञानासिद्धेः। 'त्रिपादस्याऽमृतं दिवि' इति 'परो दिवो ज्योतिः' इति विभक्तिभेदेनोपदेशभेदः। अतो विरोध इति चेन्न। उभयत्रापि विरोधाभावात्। यथा वृक्षाग्रे श्येनः, वृक्षाग्रात्परतः श्येन इति व्यपदेशे उभयत्रापि वृक्षात्परत्वमेव विवक्षितमेवमत्रोभयत्रापि दिवः परत्वमेव विवक्षितम्।

निर्दिश्य - **सैषा चतुष्पदेत्याह**। एवं भूतादिपादचतुष्टयवत्त्वं वर्णात्मकगायत्रीछन्दसि नोपपद्यते। किन्तु परमेश्वर एव। ततश्च ज्योतिःशब्दाभिधेयः परमेश्वर एव, न गायत्रीत्यर्थः। चकारेण पुरुषसूक्तगतस्य एतावानस्येति मन्त्रस्य ब्रह्मपरत्वनिर्णयात्। **यद्वै तद्ब्रह्मेति इदं वावतदिति** प्रकृतस्य ब्रह्मत्वप्रतिपादकाद्वाक्यात् गायत्र्युपासनाङ्गद्वारपालोपासनाविधौ **ते वा एते पञ्च ब्रह्मपुरुषाः स्वर्गस्य लोकस्य द्वारपा** इति प्राणादीनां हृदयकमलान्तर्ध्यातव्यपरमाकाशाख्यस्वर्गलोकरूपभावलिङ्गात्मकपरमेश्वरराजधानीद्वारपालकत्वकीर्तने ब्रह्मपुरुषत्वोक्तिलिङ्गाच्चेत्यर्थः। एवञ्च औपक्रमिकैकप्रमाणापेक्षया तदुत्तरेषामपि बहुप्रमाणानां बलवत्वाद्भूतादि-पादत्वमुखानेकप्रमाणानुसारेण एकस्या गायत्रीश्रुतेरेव गायत्र्यनुगतब्रह्मलक्षकत्वं न्याय्यमिति सिद्धम्।

ननु परमेश्वरस्यैव प्रकृतत्वेऽपि **त्रिपादस्यामृतं दिवि** इति पूर्ववाक्ये दिवोधिकरणत्वेन निर्देशादिह दिवः पर इत्यवधित्वेन निर्देशाच्च उपदेशस्य भिन्नत्वेन पूर्ववाक्योक्तः परमेश्वर एवेह न प्रत्यभिज्ञायत इति शङ्कानिराकरणपरत्वेनोत्तरसूत्रमवतारयति - **पुनराशङ्क्येति**।

सूत्रविवक्षितस्य परिहारांशस्याशयं विवृणोति **उभयत्रेति** - लोके वृक्षाग्रनिलीने श्येने **वृक्षाग्रे श्येनः, वृक्षाग्रात्परतः श्येनः** इत्युभयथाऽपि व्यवहारदर्शनेन दिवि स्थित एव परमेश्वरे दिवि, दिवः पर इति च व्यपदेशो न विरुद्ध्यत इति भावः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अनेन लिङ्गेन परमेश्वर एव पुरुषसूक्तोदितः पुरुष इति सिद्धम्। पादोस्य विश्वा भूतानीत्यत्रापि श्रवणात्। ततो निजैकांशसमाप्तसकलप्रपञ्चं दिवि दीप्यमानं परं ज्योतिः परमेश्वर इति निर्णयः।

।। इति ज्योतिरधिकरणम् ।।

***

अथ इन्द्रप्राणाधिकरणम् १२

भगवत्सवितृमण्डले साक्षादुपास्यतया निर्दिष्टस्य परमेश्वरस्य तस्मिन्नधिकरणे विश्वात्मकत्वमुक्तम्। तदात्मतया तदन्येषामुपास्यत्वं नाऽन्यथेति प्रतिपादयितुमिदमधिकरणमारभ्यते -

प्राणस्तथानुगमात् ।।१-१-२९।।

अस्य कौषीतकोपनिषदि विषयः श्रूयते 'प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्व' इतीन्द्रवचनम्।

अनेन लिङ्गेनेति - सर्वभूतपादत्वलिङ्गेन यथा गायत्रीपरमेश्वर इति सिद्धं तथैव पुरुषसूक्तोक्तः पुरुषोऽपि परमेश्वर एवेति पर्यवसितमित्यर्थः।

卐 卐 卐

यद्यपि पुंसूक्तं विष्णुं परीकर्तुं श्रीभाष्यकृद्भिः, सानुगैर्ग्रन्थो विस्तरीकृतः तथाऽपि ब्रह्मपथीयवैष्णवपथप्रतिषेधे परावलम्बिताऽष्टहेतुदुष्टत्वनिरूपणपूर्वकमष्टादशहेतुभिः पुंसूक्तमस्माभिः शिवपरमेवेति निर्धारितमिति नेह पुनः।

।। इति ज्योतिरधिकरणम् ।।

***

अथ इन्द्रप्राणाधिकरणम्

प्रसङ्गसङ्गत्या मध्ये निबद्धान्यधिकरणानि विहाय **अन्तस्तद्धर्मोपदेशादि**त्यधिकरणेन सङ्गतिं दर्शयन्नुत्तराधिकरणमवतारयति **भगवदि**ति।

तस्मादुद्गीथ इत्यन्तरादित्यविद्यावाक्येनोद्गातृकर्तृकाणामिन्द्रादिविषयस्तोत्राणां परमेश्वरविषयत्वकथनेन परमेश्वरस्येन्द्राद्यात्मत्वमुपवर्णितम्। यथा स्तोत्रीयाणामिन्द्रादिमहिमप्रतिपादिनीनामृचां तदात्मभूतपरमेश्वरपर्यन्तत्वं तथैवेन्द्राद्युपासनाविषयश्रुतीनामप्युपपद्यत इति दृष्टान्तसङ्गतिरत्र विवक्षिता। प्रतर्दनाख्यायिकायाम् **प्रतर्दनो**

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अत्रोपासनाविषयत्वेन प्राणशब्दसमानाधिकरण्येन निर्दिष्ट इन्द्रो वा? परमेश्वरो वा? इति संशयः।

इह 'प्राणोऽस्मि प्रज्ञात्मा तं माम्' इति प्राणशब्दस्य साक्षादिन्द्रेण सामानाधिकरण्यमवगम्यते। मामुपास्वेति तद्विषय एवोपासनाविधिः श्रूयते। तस्य प्राणत्वं वृष्टिद्वारा सकलरक्षकत्वादुपपद्यते। सकलोपास्यत्वं च परमैश्वर्यवत्त्वादुपपन्नम्। तथाहि श्रुतिः, 'इन्द्रो राजा जगतो य ईश' इत्यादि। तस्मादिन्द्र एवोपास्यतया निर्दिश्यत इति पूर्वपक्षः।

सिद्धान्तस्तु परमेश्वर इति। कुतः ? आनन्दाऽजराऽमृतप्रज्ञादीनां तदसाधारणधर्माणामस्मिन्प्राणशब्दनिर्दिष्टेऽनुगमात्। 'एष प्राण एव प्रज्ञात्मानन्दो जरोऽमृत' इति। 'इन्द्रो राज' इति श्रुताविन्द्रशब्द ईश्वरविषयः प्रकरणादवगम्यते।

आशङ्क्य परिहरति -

न वक्तुरात्मोपदेशादितिचेदध्यात्मसम्बन्धभूमाह्यस्मिन्

।। १-१-३०।।

ह दैवोदासिरिन्द्रस्य प्रियं धामोपजगामेत्यारभ्य इन्द्रस्य वचनमिदं श्रूयते **प्राणोऽस्मि** इत्यादि। तत्र त्वाष्ट्रवधादीनामिन्द्रलिङ्गानामानन्दादीनां ब्रह्मलिङ्गानां च बलाबलाऽनवधारणात्संशय इत्याह - **अत्रेति**।

पूर्वपक्षमाह - **इहेत्यादिना**। **तद्विषय एवेति** - **मामेव विजानीही**त्यादिनाऽवधारणेन स्वान्तर्यामिविषयत्वव्यावर्तनपूर्वकं स्वस्यैवोपास्यत्वप्रतिपादनादिति भावः। ततस्तद्विरोधादानन्दाऽजराऽमृतत्वान्यपीन्द्र एवाऽपेक्षिकतया योजनीयानीत्याशयः। **तस्य प्राणत्वमिति** - प्राणयतीति व्युत्पत्त्या युज्यत इत्यर्थः।

सिद्धान्तमाह - **परमेश्वर** इति। प्राणोऽस्मीति निर्दिष्टः प्राणः परमेश्वर एवेत्यर्थः। **हिततमं मन्यस** इत्युपक्रम इवोपसंहारेऽप्यानन्दोऽजरोऽमृत इति परमेश्वरधर्माणामवगम्यमानत्वादित्यर्थः।

ननु **इन्द्रो राजा** इति श्रुत्या इन्द्रस्य सकलजगदीश्वरत्वावगमेन सकलोपास्यत्वं सिद्ध्यतीत्याशङ्क्य नेयं श्रुतिर्महेन्द्रविषया। किन्तु महेश्वरविषयैवेत्याह तदन्तर्यामिपरमेश्वरविषयेति **इन्द्रस्याऽत्मानं दशधा चरन्त**मित्यादिपूर्वापरमन्त्रैः प्रकरणस्य तदन्तर्यामिपरत्वावगमादिति भावः।

मामेव विजानीहित्यवधारणेन वक्तृविषयोऽयमुपदेश इति शङ्कानिराकरणार्थत्वेनोत्तरसूत्रमवतारयति - **आशङ्क्येति**।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

नायमुपास्यः परमेश्वरः। उपक्रमे 'मामेव विजानीहि। त्रिशीर्षाणं त्वाष्ट्रमहनम्' इत्यादिना प्रज्ञातजीवभावस्येन्द्रस्योपास्यत्वोपदेशात्। अत उपसंहारस्तदनुगुणो नेतव्य इति चेन्नैतदुचितम्।

उपक्रमादारभ्याऽस्मिन्प्रकरणेऽध्यात्मसंबन्धस्य परमेश्वरधर्मस्य बाहुल्यात्। तथाहि, उपक्रमे तावत् 'यं त्वं मनुष्याय हिततमं मन्यस' इति हिततमोपासनं प्रारब्धम्। तत्तावत् परमेश्वरधर्मः। तदुपासनस्यैव मोक्षसाधनस्य हिततमत्वात्। मध्ये च 'एष ह्येव साधुकर्म कारयति तं यमेभ्यो लोकेभ्यः उन्निनीषते एष एवाऽसाधु कर्म कारयति। तं यमधो निनीषते' इति सर्वकर्मकारयितृत्वं श्रूयते। तथा 'तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रा स्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिता' इति जडचेतनात्मकसकलप्रपञ्चाधारत्वं श्रूयते। तच्च परमेश्वर धर्मः। अतः परमेश्वरधर्मबाहुल्यात् इहोपास्य इन्द्रो न भवति।

कथमिन्द्रो जीवत्वादनुपास्योऽपि स्वविषयमुपासनमुपदिशतीत्याशङ्क्याह -

शास्त्रदृष्ट्या तूपदेशो वामदेववत् ।।१-१-३१।।

'अनेन जीवेनाऽत्मनानुप्रविश्य नामरूपे व्याकरवाणि' इत्यादि शास्त्रदृष्ट्या सर्वशब्दवाच्यत्वात् परमेश्वरस्य स्वशरीरकतया स्वशब्दवाच्यं परमेश्वरमेवोपास्यत्वेनोपदिष्टवानिन्द्रः। अत इन्द्रशब्देनोपदेशः

आत्मोपदेशादिति हेतोः मामेव विजानीहीति सावधारणवाक्येन **त्रिशीर्षाणं त्वाष्ट्रमित्यादिना** स्वचरितोपन्यासेन च स्वस्यैवोपास्यत्वेनोपदेशादित्यर्थः। उपक्रमोपसंहारापेक्षया अवधारणश्रुत्युपबृंहितं मध्यगतत्वाष्ट्रवधादिलिङ्गबाहुल्यं प्रबलमिति भावः।

उपक्रमादारभ्येति। एवञ्च, परमेश्वरधर्माणामेव बाहुल्यादिन्द्रलिङ्गानां प्राबल्यमसिद्धमित्यर्थः।

मामेव विजानीहीति वचनसार्थक्यनिर्वाहार्थत्वेनोत्तरसूत्रमवतारयति - **कथमिति**। **जीवत्वादनुपास्योपीति** - **सर्वमन्यत्परित्यज्येति** श्रुतेरिति भावः।

अनेनेति। **अनेन जीवेनात्मनानुप्रविश्येति** जीवशरीरकेण स्वात्मनाऽनुप्रवेशोक्तेस्तदीयनामरूप-व्याकरणस्य स्वात्मपर्यन्तत्वावगत्यर्थत्वान्नामरूपव्याकरणश्रुत्या परमेश्वरस्य सर्वशब्दवाच्यत्वं सिद्ध्यतीत्याशयः। आदिशब्देन **ऐतदात्म्यमिदगं सर्वमित्युपसंहारगतवाक्यं**, **य आत्मनि तिष्ठन्नित्यादिश्रुत्यन्तरं** च, सर्वशब्दवाच्यत्वसमर्पकसार्वात्म्यप्रतिपादकं गृह्यते।

शास्त्रदृष्ट्येति। शास्त्रमूला दृष्टिः शास्त्रदृष्टिः। सार्वात्म्यप्रतिपादकशास्त्रमूला स्वात्मभूतपरमेश्वरानुसंधानमूला चेत्यर्थः। **स्वशरीकतयेति**। इन्द्रः स्वेन प्रयुक्तस्य मामिति शब्दस्य स्वात्मभूतपरमेश्वरपर्यन्तत्वमुद्दिश्य **मामेव विजानीहीति** स्वशरीरकं परमेश्वरमेवोपास्यमुपदिदेशेत्यर्थः। **इन्द्रशब्देनेति**। इन्द्रविषयेण मामिति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

परमेश्वरस्य। दृष्टान्तमाह - वामदेववत्। वामदेवो हि स्वस्य परमेश्वरात्मत्वदृष्ट्या 'अहं मनुरभवं सूर्यश्च' इत्युपदिदेश। तद्वदिन्द्रोपदेशः।

अथवा वेदान्तविज्ञानोपलब्धया ब्रह्मात्मसामरस्यभावनया षट्स्थलोपासनया सर्वाङ्गलिङ्ग-साहित्येन च ब्रह्मभावमुपगतस्य विगलितमनुष्यादि देहविषयकल्पिताहंभावसंकोचस्य संपन्नविश्वाकार-पराहंभावस्य वामदेवस्य स्वात्मनः सर्वगतत्वावगमान्मनुसूर्यादिप्रपञ्चभावोक्तिः। एवमिन्द्रस्यापीति निश्चीयते।

'प्राणोस्मि प्रज्ञात्मा' इति प्राणशब्देन परं ब्रह्मोच्यते। तस्याऽनन्दरूपत्वेन सकलप्राणन-हेतुत्वात्। 'प्राण एव प्रज्ञात्माऽनन्दोऽजरोऽमृत' इति श्रवणात्। तथा च अहं 'ब्रह्माऽस्मि मामुपास्व' इति ब्रह्मदृष्ट्योपदेशः। तथाहि कृष्णादयोऽप्यर्जुनादीन्प्रत्युपदिष्टवन्तः।

शब्देनेत्यर्थः। **वामदेवो हीति**। यथा वामदेवः स्वस्यात्मा परमेश्वर इति दृष्ट्या स्वविषयस्याऽहमिति शब्दस्य परमेश्वरपर्यन्तत्वं मन्वादीनामपि स एवाऽत्मेति दृष्ट्या मन्वादिशब्दानां तत्पर्यन्तत्वमभिप्रयन्न**हं मनुरभवमि-त्यादिनोपदिदेशे**त्यर्थः। एवमिन्द्रस्य तद्दृष्टान्तस्य वामदेवस्य च परमेश्वरे मामहमिति शब्दयोः प्रयोगस्तयोः स्वान्तर्यामिपरमेश्वरपर्यन्तत्वज्ञानमूल इति निरूपितम्। अथ परमेश्वरैक्यभावनासिद्धिसिद्धः स इति विधान्तरेण सूत्रार्थं वर्णयति - **अथवेति**। अत्रेदं हृदयम् **अहं ब्रह्मास्मि, त्वं वा अहमस्मि, भगवो देवते अहं वै त्वमसि** इति वेदान्तवाक्यप्रमाण्यानुरोधेन दहराधिकरणभावलिङ्गोपासकैः मलमायाद्यखिलदोषाऽसंस्पृष्टेन सत्यसङ्कल्पत्वादिसकलमाङ्गल्यगुणरत्नाकरेण सर्वान्तरात्मना परब्रह्मणा शिवेन स्वात्मन ऐक्यभावना कार्येति **आत्मेति तूपगच्छन्ति ग्राहयन्ति च** इत्यधिकरणे समर्थयिष्यते।

तादृशभावनाया उपासनारूपत्वं भूमिकाक्रमाभ्यासेनैव साफल्यं च दर्शयति - **षट्स्थलोपासनयेति**। भक्तमाहेश्वरप्रसादप्राणलिङ्गशरण्यैकसंज्ञितानां षण्णामप्युपासनाभूमिकानामभ्यासादेवोपासनासिद्धेरिति भावः। **सर्वाङ्गलिङ्गसाहित्येन चेति**। सर्वेष्वपि करणेषु तत्तत्प्रेरकतया स्थितस्य ब्रह्मणोऽनुसन्धानेनैव सर्वाधिकभावनालाभात् सर्वेन्द्रियविषयसमर्पणसम्भवेन ब्रह्मार्पणसिद्धिद्वारा तदनुसन्धानदार्ढ्यसिद्धेश्चेत्येतत्सर्वं सहकार्यन्तरविध्यधिकरणे **अनाविष्कुर्वन्नन्वयात्** इति सूत्रभाष्य एव सविस्तरं प्रदर्शयिष्यते।

एवञ्च वामदेवस्य सर्वात्मभावनादार्ढ्याद्यथा स्वस्य मनुसूर्यादिरूपत्वव्यवहारस्तथैवेन्द्रस्याऽप्युपपद्यत इत्यर्थः। अत्र दृष्टान्तान्तरं दर्शयति - **तथाहीति**। भावनादार्ढ्यसिद्धिशिवाभेददृष्ट्यैव, **'मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु', 'सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज', 'अहं सर्वस्य प्रभवः मत्तः**

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पुनराशङ्क्याह -

जीवमुख्यप्राणलिङ्गान्नेति चेन्न, उपासा(उपासना)त्रैविध्यादाश्रितत्वादिह तद्योगात्

।।१-१-३२।।

ब्रह्मज्ञानोपासनया ब्रह्मभावमुपगतस्य विगलितजीवभावस्य तद्रूपदृष्ट्या स्वस्मिन्नुपास्यत्वसर्वात्मभावोपदेशो युक्तः। अत्र, 'त्रिशीर्षाणं त्वाष्ट्रमहनं यावदध्यस्मिन्छरीरे प्राणो वसति तावदायुः' इत्यादौ जीवलिङ्गमुख्यप्राणलिङ्गं च दृश्येते। ततोऽयमुपदेशो न युक्त इतिचेन्नैवं वाच्यम्।

यतो जीवप्राणशब्दवाच्यत्वं परमेश्वरस्य समुचितमुपासनात्रैविध्यहेतोः। अत्र परमेश्वरस्य स्वरूपेण भोक्तृशरीरेण भोग्यरूपेण चोपासनं त्रिविधमिह विवक्षितम्। आत्मतया भोक्तृभोग्याश्रितत्वेन

सर्वं प्रवर्तते' इत्यादिना श्रीकृष्णोऽर्जुनायोपदिदेशेत्यर्थः। एवं **मामेव विजानीही**ति वक्तुरात्मोपदेशः समर्थितः। त्वाष्ट्रवधादिलिङ्गानामसमर्थनेऽयमप्रतिष्ठितो भवेदिति तदाशङ्कामुद्भाव्य तत्समर्थनार्थत्वेनोत्तरसूत्रमवतारयति - **पुनरिति**।

युक्त इति। स्यादिति शेषः। अत्र यदि **त्रिशीर्षाणं त्वाष्ट्रमहनमिति** जीवलिङ्गं, **प्राणो वसतीति** मुख्यप्राणलिङ्गं च न स्यातां तर्हि वामदेवस्य सार्वात्म्योपदेशवदिन्द्रस्यो-पास्यत्वोपदेशो युक्तः स्यादित्यर्थः। एवं जीवप्राणलिङ्गयोः प्रकृते श्रूयमाणत्वेनायमुपदेशः परमेश्वरविषयो न भवतीति पूर्ववाद्यभिप्रायः।

एवं सौत्रं शङ्काखण्डं व्याख्याय परिहारांशं व्याचष्टे - **नैवं वाच्यमि**ति। अत्राऽयं भावः। ब्रह्मलिङ्गानां जीवमुख्यप्राणलिङ्गानां च परस्परं विरोधे सति खलु जीवमुख्यप्राणलिङ्गानां प्राबल्यानुरोधेन तद्विरुद्धानां ब्रह्मलिङ्गानामन्यथानयनस्य युक्तत्वाद् ब्रह्मलिङ्गज्ञापितं मामिति जीवशब्दस्य परमेश्वरपरत्वं हातव्यम्। न विद्यत एव तेषां विरोधः। यतो वेदान्तेषु ब्रह्मण उपासना क्वचित् **सत्यं ज्ञानमनन्तं ब्रह्मे**ति स्वधर्मविशिष्टत्वेन, क्वचित् **तान्येवानुविनश्यति न प्रेत्य संज्ञाऽस्ति** इति चेतनधर्मविशिष्टत्वेन, क्वचित् **पुरुषेऽन्तःप्रतिष्ठितं वेदे**त्यचेतनधर्मविशिष्टत्वेन च त्रिधा विधीयते। एवमुपासनात्रैविध्यसद्भावादित्येतदर्थकतया उपासात्रैविध्यादिति सौत्रपदं व्याचष्टे - **यतो जीवे**ति।

ननु, अन्यत्र श्रूयतां त्रिविधमुपासनं, तेन प्रकृते किं प्रयोजनमित्याशङ्क्य अत्रापि त्रिविधोपासनस्य विवक्षितत्वादित्येवमर्थकतया आश्रितत्वादिहेति सूत्रगतपदद्वयं व्याचष्टे - **अत्र परमेश्वरस्ये**ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

च तदुपपत्तेः। परमेश्वरस्य स्वरूपोपासनमविलम्बेन मुक्तिहेतुः अन्यदपि द्वयं कालेन। तस्मादिह परमेश्वरात्मतया इन्द्रस्योपासनसिद्धिरिति निर्णयः।

।। इति इन्द्रप्राणाधिकरणम् ।।

***

इति श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये

प्रथमाध्यायस्य प्रथमः पादः।

***

ननु, ब्रह्मजीवमुख्यप्राणधर्मविशिष्टविषयकमेकमुपासनमिह विवक्षितम्? उत तत्तद्विशिष्टविषयाणि त्रीण्युपासनानि वा? इत्याशङ्क्य तद्योगादिति सूत्रपदमुभयथाऽपि युज्यत इत्यर्थपरतया व्याचष्टे - **आत्मतयेति**।

उपासनाभेदपक्षे स्वधर्मविशिष्टब्रह्मोपासनस्य तदितरोपासनाभ्यां फलतो ज्यायस्त्वं चतुर्थाध्याये वक्ष्यमाणं दर्शयति - **परमेश्वरस्येति**।

।। इति इन्द्रप्राणाधिकरणम् ।।

***

इति श्री नागलिङ्गशिवाराध्यकृतिमुख्यायां लघुशिवार्कमणिदीपिकासख्यायां श्रीशिवचिन्तामणिप्रभाख्यायां श्री नीलकण्ठभगवत्पादीयब्रह्म-सूत्रभाष्यव्याख्यायां प्रथमाध्यायस्य प्रथमः पादः।।

***

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

श्रीनीलकण्ठभगवत्पादाराध्यकृतौ
शारीरकब्रह्ममीमांसासूत्रभाष्ये प्रथमाध्यायस्य
द्वितीयः पाद आरभ्यते

***

अथ सर्वत्रप्रसिद्धाधिकरणम् १३

ब्रह्मबोधकानां वेदान्तवाक्यानामानन्त्यात्प्रतिवाक्यं विचाराऽनुपपत्तेः सन्दिग्धानां केषांचिद्विचारेण तन्न्यायैस्तादृशानामपि निर्णयो भवतीति कतिचिदेव वाक्यानि तात्पर्यलिङ्गसमन्वयेन ब्रह्मबोधकानि सूत्रितानि। तेषु कतिचित् स्पष्टब्रह्मलिङ्गानि प्रथमपादे विचारितानि। कतिचिदनतिस्पष्टलिङ्गानि द्वितीयपादे विचार्यन्ते।

सर्वत्र प्रसिद्धोपदेशात् ।। १-२-१।।

छान्दोग्ये श्रूयतेऽस्य विषयः 'मनोमयः प्राणशरीरो भारूपः सत्यसंकल्प आकाशात्मा सर्वकर्मा सर्वकाम' इत्यादि।

अत्र मनोमयत्वादिधर्मकः श्रूयमाणः पुरुषः परमेश्वरो वा? जीवो वा? इति संशयः।

अथ सर्वत्रप्रसिद्धाधिकरणम् १३

पूर्वोत्तरपादयोर्विषयभेदप्रदर्शनपूर्वकं सङ्गतिं विशदयति - **ब्रह्मबोधकवाक्यानामिति।** एतेनाऽवसराख्या सङ्गतिरिति व्यक्तम्।

सर्वं खल्विदं ब्रह्म।, तज्जलानिति शान्त उपासीत।, अथ खलु क्रतुमयः पुरुषो यथा क्रतुरस्मिन् लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीतेति प्रकृत्य श्रूयते **मनोमयः प्राणशरीरः** इत्यादि। तत्र मनोमयादिशब्दानां ब्रह्मपरत्वेन वा जीवपरत्वेन वा निर्णयाभावात् संशयमाह - **अत्रेति।**

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

जीव इति पूर्वपक्षः। कुतः? तस्य प्रत्यासन्नत्वात्। 'अथ खलु क्रतुमयः पुरुषो यथा क्रतुरस्मिन् लोके पुरुषो भवति। तथेतः प्रेत्य भवति। स क्रतुं कुर्वीत' इति कर्मवशादिह परत्र च परभ्रमन् जीवः प्रस्तुतः पूर्वम्। तदनन्तरं मनोमय इति श्रूयते। अत एव मनोमयत्वादिधर्मको जीवः। मनोमयत्वप्राणशरीरत्वादिकं च संसारिलक्षणं, न परमेश्वरलिङ्गम्। सति यथार्थे असंकल्प इति सत्यसंकल्पत्वमपि संसारधर्मत्वेन योजनीयम्। अतः सर्वथा मनोमयत्वादिधर्मको जीव एव न परमेश्वर इति प्राप्ते ब्रूमः -

परमेश्वर एव मनोमयत्वादिधर्मकः। कुतः? परब्रह्मणः परमेश्वरस्यैवोपक्रमे 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत' इति सर्वकारणत्वेनोपास्यत्वेनोपदेशात्। श्रुतितात्पर्यं च तज्जलानिदं सर्वं ब्रह्माधीनजन्मस्थितिध्वंसकमेतत्सर्वं चिदचिद्रूपं ब्रह्म खलु इति शान्त उपासीत ब्रह्मेति; यथा

पूर्वपक्षं प्रदर्शयति - **जीव** इति। जीवे मनोमयत्वादीनामुपास्यगुणानामन्वयाऽसम्भवात्तेषामुपास्ये ब्रह्मण्येवाऽन्वयो युक्तः इत्याशङ्कानिराकरणार्थमाह - **मनोमयत्वे**ति। अत्रायं भावः। यद्यपि मयटो विकारप्राचुर्याद्यर्थसाधारण्यात्प्राणः शरीरमस्येति वचनस्य येन केनचित्सम्बन्धेन निर्वोढुं शक्यत्वाच्च नियन्तृत्वादिरूपमनःप्राणसम्बन्धावति ब्रह्मण्यपि मनोमयः प्राणशरीर इत्येतद्योजयितुं शक्यम्, तथापि मनःप्राणसम्बन्धप्रतिपादने तदभावप्रतिपादन इव तयोर्जीवेन सह उपकरणोपकरणिभावसम्बन्ध एव लोकवेदयोः प्रसिद्धतरो ग्राह्यः। न तु ब्रह्मणा सह तयोरप्रसिद्धसम्बन्धः। प्रसिद्धसम्बन्धे प्रथमं बुद्ध्यवतारात्। अथ एव खलु **अप्राणो ह्यमनाः शुभ्र** इति ब्रह्मणि मनःप्राणनिषेधो झटिति स्वारस्येनैव बुद्धिमारोहति, न तु घटवति भूतले घटाभाववद्भूतलमित्याप्तवाक्यमनुपपन्नतया शङ्कितं सत् समवायसम्बन्धेन घटाभाववत्त्वपरमित्युपादानमिव **अप्राणो ह्यमना** इति श्रुतिवाक्यं नियन्तृत्वादिसम्बन्धेन मनःप्राणवति ब्रह्मणि कथमप्राणत्वममनस्त्वं चेत्यनुपपन्नार्थतया शङ्कितं सत् भोगोपकरणोपकरणिभावेन मनःप्राणाभाववत्त्वपरमित्युपपादनमपेक्षते। तस्माज्जीव इत्येव युक्तमिति।

सिद्धान्तयति उपक्रमे - **सर्वमि**त्यादिना। ब्रह्मण एव कारणत्वेनोपास्यत्वेन चोपदेशादित्यर्थः। **तज्जलानि**ति – तस्माज्जायत इति तज्जम्। तस्मिन् लीयत इति तल्लम्। तस्मिन्ननिति चेष्टत इति तदनम्। **तज्जं च तल्लं च तदनं च तज्जलान्।** कर्मधारये शाकपार्थिवत्वान्मध्यमपदलोपः। इति शब्दो हेतौ। सर्वमिदं जगद्ब्रह्मैव तत्कार्यत्वादित्यर्थः। ब्रह्मणि मित्राऽमित्रभेदाभावाच्छान्तो रागद्वेषादिरहितो ब्रह्म उपासीतेत्यर्थः। **तज्जलानि**तिपदस्य श्रुतितात्पर्यसिद्ध्यर्थमाह - **ब्रह्माधीने**ति। खलुशब्देन ब्रह्मणो जगज्जन्मादिहेतुकं सार्वात्म्यं सकलवेदान्तप्रसिद्धमिति व्यञ्जयितुं भिन्नक्रमतया तस्य योजनम्।

ननु ब्रह्मणः सर्वप्रपञ्चकारणत्वेऽपि कथं सर्वप्रपञ्चात्मकत्वम्? ब्रह्मप्रपञ्चयोरान्तर्गणिकभेदाङ्गीकारादित्याशङ्क्य दृष्टान्तेन तदुपपादयति - **यथे**ति। ननु, तर्हि ब्रह्मणः सागरवत्परिणामित्वं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सागरे संपन्नजन्मस्थितिविलयं फेनबुद्बुदकदम्बकं तद्रूपमेव दृश्यते तथा शक्तिमति ब्रह्मणि संपन्नजन्मादिकं तन्मयमेव। तदतिरिक्तं किंचन नोपलभ्यते। तथाहि अथर्वशिरसि निरूपितमीश्वरेण 'अहमेकः प्रथममांस वर्तामि च भविष्यामि च नान्यः कश्चिन्मत्तो व्यतिरिक्त' इति। ततश्च तेन 'ब्रह्माऽहम्' इत्यादिना विश्वरूपत्वमात्मनः प्रपञ्चितम्। तत्र विश्वरूपत्वे 'सोऽन्तरादन्तरं प्राविशत्' इत्यनुप्रवेश एव हेतुरुक्तः। अतो ब्रह्मणोऽपृथक्सिद्धजन्मस्थितिप्रवृत्तिकत्वादस्य जगतस्तद्व्यतिरिक्तता नास्ति।

तथाऽभियुक्ता वदन्ति -

शक्तयोऽस्य जगत्कृत्स्नं शक्तिमांस्तु महेश्वरः।
शक्तिस्तु शक्तिमद्रूपाद्व्यतिरेकं न गच्छति।।
तादात्म्यमनयोर्नित्यं वह्नि दाहिकयोरिव।
शक्तिशक्तिमतोर्यस्मादभेदः सर्वदा स्थितः।।

स्यादित्याशङ्क्याह - **शक्तिमती**ति। यथा सागरे पवनासंक्षोभजनितोपरितनपरिणामः वीचीफेनबुद्बुदप्रपञ्चः एवं ब्रह्मणि तदिच्छासंक्षोभमाणतदातितशक्तिपरिणामः सर्वोऽयं प्रपञ्च इति भावः।

ननु, भेदे सत्येव कथं तदतिरिक्तानुपलम्भः? इत्याशङ्क्य तथोपनिषदि व्यवहारो दृश्यत इत्यत आह - **तथाही**ति। अथर्वशिरसि भूतवर्तमानभविष्यदात्मकसकलप्रपञ्चरूपत्वं तद्यतिरिक्ताभावं चोक्त्वा परमेश्वरस्य प्रपञ्चानुप्रवेशस्तत्र हेतुत्वेनोक्तः। अनुप्रवेशस्य कर्मकर्तृभावापेक्षत्वात्तेन भेदे सत्येव ताद्रूप्यतदव्यतिरेकव्यवहारः सिद्धः इत्यर्थः।

ननु, महते तदिन्द्रजालं सत्येव ताद्रूप्यं तदव्यतिरेकश्चेति, तत्राह - **अत** इति। **अपृथक्सिद्धे**ति-ब्रह्मापेक्षया पृथग्भूतेऽन्यत्र वस्तुनि सिद्धा ब्रह्मणः पृथक्सिद्धा। अतथा भूतस्थितिक्रियाव्यापारत्वादित्यर्थः। अनेन नाऽभेदस्ताद्रूप्यं, न वा भेदो व्यतिरेकः। किन्तु घटनैल्यन्यायेनाऽयुतसिद्धिस्ताद्रूप्यम्, युतसिद्धिर्व्यतिरेक इत्युक्तं भवति।

ननु तथापि चिच्छक्तिपरिणामस्य प्रपञ्चस्य चिच्छक्त्यैवाऽपृथक्सिद्धिः स्यान्न तु परमेश्वरेणेत्याशङ्क्य चिच्छक्तेः परमेश्वरापृथक्सिद्धत्वात्कार्यस्य तदात्मकस्य प्रपञ्चस्यापि तदपृथक्सिद्धिरित्यभिप्रेत्य चिच्छक्तेः परमेश्वरापृथक्सिद्धौ प्रमाणमाह - **तथाऽभियुक्ता** इति। **शक्तय** इति - कृत्स्नं जगत् अस्य परमेश्वरस्य शक्तयः तदीयशक्तिपरिणामभेदाः। महेश्वरः शक्तिमान्। नित्ययोगे मतुप्। नित्यानपायिशक्तिकः। अथ एष भगवती शक्तिः शक्तिमदीश्वरस्वरूपाद्व्यतिरेकं पृथक्स्थितिं न वाञ्छति नानुमन्यते। किन्तु चन्द्रचन्द्रिकान्यायेन ब्रह्मणा अपृथक्सिद्धैव भवति। एवमनयोर्वह्निदाहकशक्त्योरिव नित्यं तादात्म्यं,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अतस्तद्धर्मधर्मित्वात्परा शक्तिः परात्मनः।
न वह्नेर्दाहिका शक्तिर्व्यतिरिक्ता विभाव्यते।। इत्यादि,

वायुसंहितायां च -

शक्त्यादि च पृथिव्यन्तं शिवतत्त्वसमुद्भवम्।
तेनैकेन तु तद्व्याप्तं मृदा कुम्भादिकं यथा।।
पराऽस्य विविधा शक्तिः प्रबोधानन्दरूपिणी।
एकानेकस्वरूपेण भाति भानोरिव प्रभा।। इति

'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च', 'एको रुद्रो न द्वितीयाय तस्थुः य इमान् लोकानीशत ईशनीभिर्जननीभिः परमशक्तिभिः' इत्यादयश्च परब्रह्मणः स्वाभाविकानन्द-जगज्जननशासनपालनशक्तिमत्त्वं श्रुतयो वदन्ति। किं बहुना श्रुतिस्मृतीतिहासपुराणाभियुक्तसूक्तिप्रामाण्यात् सकलचिदचित्प्रपञ्चमहाविभूतिरूप महासच्चिदानन्दसत्ता देशकालादिरूपपरिच्छेदशून्या स्वाभाविकी

नित्य आश्रयाश्रयिभावः। यस्मादेवं शक्तिशक्तिमतोरभेदो घटपटयोरिव स्वतन्त्रपृथगवस्थानरूपभेदाऽभावः सर्वदा स्थितः। अतः परमेश्वरस्य तया शक्त्या धर्मिणो घटत्वादिधर्मवन्नित्यपरतन्त्रधर्मवत्वात्सा परा शक्तिः परमात्मन एव, कदाचिदपि नान्यस्य। नापि स्वतन्त्रा। न हि वह्नेर्दाहिका शक्तिः कदापि नान्याश्रितत्वेन वा ततः पृथक्सिद्धा वा न विभाव्यत इत्यर्थः।

शक्त्यादीति - शक्तिराद्याया नित्यसिद्धायाः शक्तेराद्य उन्मेषः। **प्रज्ञा च तस्मात्प्रसृता पुराणी** इति प्रसिद्धः। पृथिवी **अद्भ्यः पृथिवी**ति श्रवणात्तत्त्वेषु चरमकार्यभूता भूमिः। तत्र मृदा कुम्भादिकं यथेत्यनेन मृद्घटन्यायेन शक्तिकार्यस्य सर्वस्यापि प्रपञ्चस्य परमेश्वरापृथक्सिद्धिर्दर्शिता। एवं सकलप्रपञ्च-परिणामिनी परमाकाशपरमानन्दरूपा परा शक्तिरपृथग्भावेन परब्रह्माश्रितेति सिद्धम्।

कथमेवं भूता सा ब्रह्मेति व्यपदिश्यत इत्याकांक्षायां, परब्रह्मणः परब्रह्मत्वं सर्वज्ञत्वसर्व-कर्तृत्वाद्युपलक्षितं ज्ञानक्रियाशक्त्याद्यनन्ताकारविजृम्भणशालिन्यां तस्यामेवायत्तमिति प्रदर्शयितुं तस्या एव ज्ञानक्रियाशक्त्याद्यनन्तरूपत्वे वायुसंहितावचनमुदाहरति - **परेति**। **एकेति** - शक्तिर्वस्तुत एकैव सती ज्ञातव्येष्टव्यकर्तव्यस्रष्टव्यपालनीयसंहार्यबद्धव्याऽनुग्राह्यादि प्रतियोगिभेदात् ज्ञानेच्छाक्रियासृष्टिपालनसंहार-तिरोधानानुग्रहशक्त्याद्यनन्ताकारेण भाति। यथा एकैव भानोः प्रभा तदपृथक्सिद्धा मण्डलरूपेण त्रैलोक्यं व्याप्य स्थिता द्रावणीय-शोषणीय-दहनीय-जतु-जल-तूलादिप्रतियोगिभेदात् द्रावणशोषणदाहतापस्फोट-शक्त्याद्यनन्ताकारेण व्यपदिश्यते तद्वदित्यर्थः। अत्रार्थे मूलश्रुतिमुदाहरति - **पराऽस्येति**।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

परमशक्तिः परब्रह्मणः शिवस्य स्वरूपं च गुणश्च भवति। तद्व्यतिरेकेण ब्रह्मणः सर्वज्ञत्वसर्वशक्तित्व-सर्वकारणत्वसर्वनियन्तृत्वसर्वोपास्यत्वसर्वानुग्राहकत्वसर्वपुरुषार्थहेतुत्वादिकं सर्वगतत्वं च न सम्भवति। किञ्च, महेश्वरशिवमहादेवरुद्रादिपरमाख्यानामभिधेयत्वं च न सम्भवति।

तथा च सर्वचिदचित्प्रपञ्चशरीरविशिष्टं ब्रह्म सर्वशब्दवाच्यम्, यथा नीलशब्दो न केवलं स्वस्यैव वाचकः किंतु स्वविशिष्टस्योत्पलस्याऽपि, तथा प्रपञ्चशब्दोऽपि ब्रह्मणः। तस्मात् सर्वशब्दवाच्यत्वं ब्रह्मणः 'सर्वो वै रुद्र' इत्यादय उपपादयन्ति। तत् 'सर्वं खल्विदं ब्रह्म' इति सर्वचिदचित्प्रपञ्चशरीरविशिष्टं ब्रह्माऽभिधीयते। ततो ब्रह्मस्वरूपत्वात् प्रपञ्चस्य द्वेषाद्यविषयत्वाच्छान्त एव ब्रह्मोपासीतेति।

एतमर्थं पौराणिकी फणितिरभिव्यनक्ति -

विग्रहं देवदेवस्य जगदेतच्चराचरम्
एतमर्थं न जानन्ति पशवः पाशगौरवात्।।

ननु, स्वरूपं च गुणश्चेति कथमभिन्नत्वेन गुणैकरूपत्वादित्याशङ्क्याह - **तद्व्यतिरेकेणेति** - सर्वगतत्वं सर्वत्र गतिमत्त्वम्। भक्तानुजिघृक्षया तस्य गतिमत्त्वमपि शक्त्यधीनमेव समर्थनीयमिति भावः। **अभिधेयत्वं चेति** - नाम प्रवृत्तिनिमित्तगुणानां शक्त्यधीनत्वादिति भावः। न चैवं ब्रह्मणो गुणरूपयोः शक्त्यधीनत्वाऽभ्युपगमे तस्य स्वातन्त्र्यमप्रसिध्दमिति शङ्क्यम्। **विद्याऽविद्ये ईशते यस्तु सोऽन्य** इति श्रुत्या **भानोरिव प्रभा** इति पुराणोक्त्या च, शक्तेः शक्तिमदधीनत्वाऽव्याहतेः।

तथा चेति - ब्रह्मणः सर्वकारणत्वहेतुना सर्वानुप्रवेशः सिद्ध्यति। **तत्सृष्ट्वा तदेवाऽनुप्राविशदिति** श्रुतेः। ततः सर्वनियन्तृत्वं सिद्ध्यति। **अन्तः प्रविष्टः शास्ता जनानामिति** श्रुतेः। ततः सर्वशरीरत्वं सिद्ध्यति। **यः पृथिव्यां तिष्ठन्नित्यन्तर्यामिब्राह्मणे** नियम्यस्य सर्वस्यापि प्रपञ्चस्य नियन्तृशरीरत्वश्रवणात्। **ब्राह्मणो विद्वान् बृहस्पतिसवेन यजेतेत्यादि**लौकिकवैदिकव्यवहारेषु शरीरवाचिशब्दानां शरीरिपर्यन्तत्वदर्शनादिति भावः।

तस्मादिति - नीलादिशब्दाः गुणविशिष्टद्रव्यस्यापि वाचकाः। नीलमुत्पलमित्यादिसमानाधिकरणव्यवहारदर्शनादिति भावः। एवमुपपादितमर्थमुपसंहरति - **तत** इति। तद्वाक्यार्थस्य शान्तावुपयोगमाह - **ब्रह्मस्वरूपत्वादिति**। यतः प्रपञ्चो ब्रह्मणः शरीरमतस्तदीयदिव्यविग्रहवत्तस्य पूज्यत्वेन द्वेषतत्प्रयुक्तनिग्रहाद्यनर्हत्वात्ततो निवृत्तः सन् ब्रह्मोपासीतेति।

ननु,जगद्ब्रह्मणोः शरीरशरीरिभावः कथमिति चेत्तत्सोपपत्तिकं वेदान्तार्थपरिष्कारे सविस्तरं निर्णीतमिति नेह पुनः। उक्तवाक्यार्थोपपादकं वायुसंहितावचनमुदाहरति - **विग्रहमिति**। विग्रहमित्यार्षो

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विद्येति चेतनां प्राहुस्तथाऽविद्यामचेतनाम्
विद्याऽविद्यात्मकं सर्वं विश्वं विश्वगुरोर्विभोः।।

रूपमेव न सन्देहो विश्वं तस्य वशे यतः
सत्ये साधौ च सच्छब्दः सद्भिरेव प्रयुज्यते।।

विपरीते त्वसच्छब्दः कथ्यते वेदवादिभिः
सच्चाऽसच्च जगद्विश्वं शरीरं परमेष्ठिनः।।

वृक्षस्य मूलसेकेन शाखाः पुष्यन्ति वै यथा
शिवस्य पूजया तद्वत् पुष्यत्यस्य वपुर्जगत्।।

आत्मा तस्याऽष्टमी मूर्तिः शिवस्य परमात्मनः
व्यापिकेतरमूर्तीनां विश्वं तस्माच्छिवात्मकम्।।

देहिनो यस्य कस्याऽपि निग्रहः क्रियते यदि
अनिष्टमष्टमूर्तेस्तन्नाऽत्र कार्या विचारणा।।

लिङ्गव्यत्ययः। अनेन श्लोकेन सामान्येन सर्वप्रपञ्चस्य परमेश्वरशरीरत्वं दर्शितम्। द्वितीयश्लोकेन विशिष्य चेतनात्मकस्य तस्य तच्छरीरित्वमिति विवेकः। तस्य द्वितीयखण्डे **रूपमेव न सन्देहः** इत्युक्त्या जगतस्तच्छरीरत्वं मुख्यमेव न त्वौपचारिकमिति दर्शितम्। तदुपपादनार्थं शरीरलक्षणसूचनपूर्वकं प्रपञ्चे तल्लक्षणं **विश्वं तस्य वशे यत** इति वचनेन दर्शितम्। अनेन वश्यत्वरूपं नियम्यत्वं शरीरलक्षणमिति सूचितम्। अथ स्वामि-नियम्य-सेवकादिष्वतिव्याप्तिवारणार्थं **यो यद्व्यापनेन नियच्छति तत्तस्य शरीरमिति** तल्लक्षणं विशेषणेन परिष्कर्तुं द्वितीयार्थे विभोरिति विशेषणेन तस्य स्वनियम्यप्रपञ्चव्यापकत्वमुक्तम्। इदमेव शरीरलक्षणं सूचयितुं **यः पृथिव्यां तिष्ठन्नित्याद्यन्तर्यामिब्राह्मणे** परमेश्वरस्य पृथिव्यादिषु बहिरन्तश्च व्याप्तिदर्शनपूर्वकं पृथिव्यादेस्तच्छरीरत्वमुक्तम्।

एवं परमेश्वरस्य सर्वप्रपञ्चशरीरकत्वे लक्षणमुखेन सिद्धे साधुष्वपकारिष्वपि परमेश्वरशरीरत्वभावना द्वेषनिग्रहबुद्ध्यादित्यागोपयोगिनी कार्येति **सत्ये साधौ चेति** श्लोकेन दर्शितम्। एवं प्रपञ्चपरमेश्वरयोः शरीरशरीरिभावे सति यथा परमेश्वरः पूजया तुष्यति एवं प्रपञ्चानुग्रहेणापि तथैव तुष्यतीति सूचयितुं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सर्वोपकारकरणं सर्वानुग्रहणं तथा
सर्वाभयप्रदानं च शिवस्याऽराधनं विदुः।। इत्यादिका।

अतः सर्वकारणत्वात् ब्रह्मणः 'सर्वं ब्रह्मे'ति, 'शान्त उपासीते'ति समञ्जसमेव। तस्मादुपास्यत्वेनोपक्रमगतं ब्रह्मैव मनोमयत्वादिधर्मकम्। न च मनोमयत्वादिकं संसारिणो लक्षणम्, उपास्याकारपरिग्रहादस्य परिच्छेदसंभवात्।

यदुक्तं क्रतुमयस्य जीवस्य प्रस्तुतत्वान्मनोमयो जीव इति तदयुक्तम्। उत्पत्तिशिष्टब्रह्मावरुद्धायामुपासनायामवान्तरप्राप्तस्य जीवस्य प्रवेशयितुमशक्यत्वात्; यथा विश्वेदेवावरुद्धायामामिक्षायां वाजिनामप्रवेशः।

वृक्षस्य मूलसेकेनेति श्लोकेन दृष्टान्तांश उपन्यस्तः। एवं परमेश्वरस्य सकलप्रपञ्चशरीरकत्वसिद्धेः क्वचिदपि द्वेषेण निग्रहबुद्धिर्न कार्या। किन्तु शिवमूर्तिष्विव बहुमानेन शिवाराधनरूपानुग्रहबुद्धिरेव कार्येति **देहिनो यस्य कस्यापि** इति श्लोकद्वयेन दर्शितम्। उपपादितं सर्वं खल्विदमित्यादिवाक्यार्थवर्णनमुपसंहरति - **अत** इति। निर्णीतमर्थं प्रकृतसाध्ये सङ्गमयति - **तस्मादिति**।

ननु, मनोमयत्वादिकं जीवलिङ्गं ब्रह्मविशेषणत्वेन नान्वेति इत्युक्तमनूद्य दूषयति **न चेति**। **उपास्याकारेति** - **मनोमयः प्राणशरीर** इत्यारभ्य **एतमितः प्रेत्याऽभि संभविताऽस्मि** इत्यन्तेन सन्दर्भेणोपास्याकारः परिगृह्यत इत्युपगन्तव्यम्। अन्यथा तदनुक्रमणवैयर्थ्यात्। न च सांसारिकं मनःप्राणोपकरणकं हेयमुपास्याकारो भवितुमर्हति। अव्यवहितवाक्योक्ततत्क्रतुन्यायविरोधात्। अतः **प्राणारामं मन आनन्दमिति** श्रुतिसिद्धं ब्रह्मणो यन्निरतिशयानन्दानुभवसाधनमनःशालित्वं, प्राणन्तीति व्युत्पत्त्या प्राणशब्दोक्तानां संसारिणां नियमने सामर्थ्यं तदुभयं मनोमयत्वप्राणशरीरत्वं चेति। तत एव लिङ्गात्संसारिव्यावृत्तमनोमयत्वादिविशिष्टं ब्रह्मेति व्यवच्छेदः सम्भवतीत्यर्थः।

उत्पत्तिशिष्टेति - यथा **तप्ते पयसि दध्यानयति सा वैश्वदेव्याऽऽमिक्षा वाजिन्यो वाजिनमित्यत्र** आमिक्षावरुद्धे वैश्वदेवयागे वाजिनरूपद्रव्यान्तरप्रवेशो न सम्भवति। उत्पत्तिवाक्यसंसिद्धं कर्म सर्वमनूद्यते। **न चाश्रितगुणे शक्यं तद्विरोधिगुणान्तरमिति** गुणाधिकरणोक्त न्यायात्। एवमिहापि ब्रह्मरूपोपास्यावरुद्धायामुपासनायां जीवरूपोपास्यान्तरप्रवेशो न सम्भवतीत्यर्थः।

उत्तरसूत्रमवतारयितुं शङ्कते - **ब्रह्मैवेति**। अयमाशयः। **स क्रतुं कुर्वीत** इत्यत्र **'यथा क्रतुरस्मिँल्लोके पुरुष'** इति प्रकृतः पुरुषो निर्दिश्यते। तन्निर्देशो न तद्विशेषणत्वेन फलविशेषप्रतिपत्त्यर्थः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अतो ब्रह्मैव मनोमयत्वादिधर्मवत्त्वेनोपास्यमिति।

उपक्रमगतं ब्रह्मैव मनोमयत्वादिविशिष्टमित्युक्तेऽवान्तरसिद्धस्य जीवस्य प्रसङ्गोऽनर्थकः स्यादित्याशङ्कायामाह -

विवक्षतगुणोपपत्तेश्च **।।१-२-२।।**

सत्यसङ्कल्पत्वसर्वकामत्वादीनां विवक्षितानां गुणानां ब्रह्मण्येवोपपत्तेश्च तदेवोपास्यम् अवान्तरसिद्धस्तु जीव उपासकः तदाकांक्षायोगादिति।

।। इति सर्वत्रप्रसिद्धाधिकरणम् ।।

***

फलविशेषविशिष्टत्वेन पूर्वं तस्याऽप्रकृतत्वात्। तस्मान्मनोमयत्वादीनां ब्रह्मविशेषणत्वे तन्निर्देशोऽनर्थक एव स्यात्। ततो जीवनिर्देशानर्थक्यपरिहाराय मनोमयत्वादीनां तद्विशेषणत्वमेवोचितम्। एवं च जीवस्योपास्यत्वमभ्युपगन्तव्यमिति शङ्कानिवारणार्थमिदं सूत्रमिति।

सत्यसङ्कल्पत्वेति - सत्यसङ्कल्पमवितथसङ्कल्पत्वम्। न तु सद्विषये सङ्कल्पराहित्यं सर्वकर्मत्वं सर्वप्रपञ्चरूपकार्यत्वम्। सर्वकामत्वं सर्वं कामयत इति व्युत्पत्त्या सकलसृज्यविषयकामनावत्वं, सकलकल्पानुयायिसर्वभोग्यवस्तुशालित्वं वा। एतेन **सर्वगन्धः सर्वरस** इति व्याख्यातम्। सर्वमिदमभ्यात्त इत्युपासनाकालवृत्तिसकलप्रपञ्चव्यापित्वम्। अवाकित्वमुपासनाकाले वागिन्द्रियोपलक्षितसकलेन्द्रियराहित्यम्। वाकिशब्दो वाग्वाचिनो वाक्शब्दादिनिप्रत्ययस्य तदस्याऽस्तीति वर्तमानार्थे विहितत्वात्। तस्मात्सत्यसङ्कल्पत्वादिकं ब्रह्मण्येवोपपद्यते। न जीव इत्यर्थः।

सूत्रे विवक्षितविशेषणेन ब्रह्मण्युपपत्त्या जीवेऽनुपपत्तिर्विवक्षितेत्यर्थो लभ्यते। अत्र सत्यसङ्कल्पत्वादिशब्दप्रतीतानां नित्याविर्भूतसत्यसङ्कल्पत्वादीनां श्रुत्यन्तरप्रसिद्ध्या ब्रह्मलिङ्गत्वेन स्पष्टानामपि पूर्वपक्षदशायामुपास्यब्रह्मगुणत्वाऽसम्भवशङ्काकलुषितत्वादनतिस्पष्टतेति पादसङ्गतिः।

।। इति सर्वत्रप्रसिद्धाधिकरणम् ।।

***

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ अनुपपत्त्यधिकरणम् १४

इह सामान्येन जीवस्य उपास्यत्वं नास्ति, किंतु उपासकत्वमिति निरूपितम्। पुनरपि सकलजीवसमष्टिरूपहिरण्यगर्भोपादानस्य नारायणस्याऽपि विश्वाधिकब्रह्मविषयकमुपासकत्त्वं नोपास्यत्वमित्यभिधातुमधिकरणमिदमारभ्यते -

अनुपपत्तेस्तु न शारीरः ।।१-२-३।।

अस्य महोपनिषदि श्रूयते विषयः 'पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतम्। नारायणं महाज्ञेयम्' इत्यादि।

अत्र विश्वपतित्वादिलक्षणयुक्ततया नारायणशब्दवाच्यो मूर्त्यात्मा परमेश्वरो वा? अन्यो वा? इति सन्देहः।

'सहस्रशीर्षं देवम्' इत्यारभ्य सहस्रशीर्षत्वादिविधेयत्वेन नारायणस्य मूर्त्यात्मन एवोद्देश्यत्वेनाभ्यासात्, 'समुद्रेऽन्तं विश्वशंभुवम्' इति समुद्रशायित्वादितल्लिङ्गाच्च तत्पर्याय-वाचकाच्युतहरिशब्दादिप्रयोगाच्च, नारायण एव मूर्त्यात्मा विश्वपतित्वादिना लिङ्गेन प्रतिपाद्यत इति पूर्वपक्षः।

अथ अनुपपत्त्यधिकरणम्

शाण्डिल्यविद्यायां यथा जीवसामान्यस्य प्रसङ्ग उपासकत्वेनैव नोपास्यत्वेन, तथैव नारायणानुवाके चेतनमध्य उत्कृष्टस्य नारायणस्यापि प्रसङ्ग इति दृष्टान्तसङ्गतिं दर्शयन्नुत्तराधिकरणमवतारयति - **इहेति**।

तैत्तिरीयोपनिषदि **पतिं विश्वस्यात्मेश्वरमि**त्यादिना विश्वपतित्वादिधर्मैः प्रतिपाद्यो नारायणः परमेश्वरो वा? इति संशयमाह - **महोपनिषदी**त्यादिना - अत्र यद्यपि नारायणः प्रतिपाद्यते तथापि स स्वकीयैरेव विश्वपतित्वादिधर्मैः प्रतिपाद्यते? उत परमेश्वराऽभेदभावनामूलैस्तैरिति संशयाभिप्रायः।

अथ पूर्वपक्ष एवम् -

श्रुतिर्हि **पतिं विश्वस्ये**ति, **तत्त्वं नारायणः पर** इति, **अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित** इति च विश्वपतित्वादीन्धर्मान्नारायणस्य प्रतिपादयति। तस्मादिह नारायण एव विश्वपतित्वादिधर्मैः प्रतिपाद्यत इति प्राप्ते सिद्धान्तः -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सिद्धान्तस्तु, नारायणात्मा परमेश्वर इति। कुतः? विश्वपतित्वादीनां परमेश्वरधर्माणां तदर्थान्तरे नारयणेऽनुपपत्तेः। पशूनां पतये, वृक्षाणां पतये, जगतां पतय इत्यादिना परमेश्वर एव निखिलभुवनाधिपत्यमभ्यस्यते। 'एको हि रुद्रो न द्वितीयाय तस्थुर्य इमान् लोकानीशत ईशनीभिः' इति रुद्रव्यतिरिक्तस्य जगदीश्वरत्वं निषिध्यते। 'विश्वाधिको रुद्र' इति विश्वाधिकत्वं च तस्यैव श्रूयते। अतो विश्वपतित्वादिलक्षणे नारायणात्मा परमेश्वर इति समीचीनम्।

ननु, नारायणात्मेति नारायणान्तर्यामी परमेश्वर इति हृदयं, तदयुक्तम्। 'नारायणपरं ब्रह्म' इति नारायणस्य परब्रह्मभावमुक्त्वा, 'पद्मकोशप्रतीकाशम्' इत्यादिना पुरुषस्य

नारायणस्यान्तर्यामी परमेश्वर एव विश्वपतित्वादिधर्मयुक्तः। नारायणस्तु परमेश्वराऽभेदभावनादाढ्येन तदभेदापत्त्या परमेश्वरधर्मैर्व्यपदिश्यते। तस्मिन्विश्वपतित्वादिधर्माणामनुपपत्तेः। तथा च रुद्राध्याये परमेश्वरस्य प्रपञ्चान्तर्गतैकैकवस्त्वाधिपत्यप्रदर्शनमुखेन सर्वाधिपत्यं स्थिरीकृतम्।

न च तस्य स्तुतिलिङ्गेन नमस्कारयोगेन दौर्बल्यमिति शङ्क्यम्। **नमस्कृत्य हि वसीयाँसमुपचरन्ती**ति श्रुत्या नमस्कारयोगस्य तदीयमहिमसमर्पणद्वारा विवक्षितार्थं प्रत्युपोद्बलकत्वेन तद्विघातकत्वाभावात्। श्वेताश्वतरे **यो देवानां प्रभवश्चोद्भवश्च विश्वाधिको रुद्र** इति परमेश्वरस्य विश्वाधिकत्वं श्रूयते। तद्विश्वपतित्वलिङ्गम्। तदन्यस्य विश्वपतित्वे तस्य विश्वाधिकत्वं न सिद्ध्येत्। ततो विश्वपतित्वं पारमेश्वरमेव लिङ्गमिति निर्विवादम्।

ननु, **अग्निर्वै देवानामवमो विष्णुः परम्** इति श्रुत्या नारायणस्य पारम्यमाम्नायत इतिचेदुच्यते। तस्य वचनस्य **यज्ञोपवीतं परमं पवित्रम्।, तस्माद्दानं परमं वदन्ती**त्यादिवदर्थवादात्। ब्रह्मादिदेवतान्तरापेक्षया परमत्वबोधकत्वेन परमेश्वरादाधिक्यबोधकत्वाऽभावात्। **तत्परात्परतो ब्रह्मा तत्परात्परतो हरिः। तत्परात्परतो हीश** इति श्रुत्या हरेरापेक्षिकपरत्वस्यैव सिद्धत्वाच्च। विना पक्षिणा ष्णौति गच्छतीत्यर्थकस्यैवाऽस्य शब्दस्य नारायणपरत्वेन विष्लृ व्याप्ताविति धातोर्वेवेष्टीत्यर्थे **सर्वे देवाः संविशन्ती**ति विष्णुरिति। **तस्मात्सर्वगतः शिवः** इत्यादिश्रुतिभिः शिवाभिधानत्वाच्च। न तया श्रुत्या हरेः पारम्यं सिद्ध्यतीति दिक्। सूत्रे शारीरपदं मूर्त्यात्मपरतया प्रयुक्तम्। ब्रह्मविष्णुरुद्रेश्वरसदाशिवानां मूर्तयो हि पञ्चकृत्यकारिण्यः शिवस्य साधारण्यो मूर्तयः। ब्रह्मादयस्तु तास्वेकैकाभिमानिनो मूर्त्यात्मान इति शारीरपदमपि तत्र शरीरे भव इति व्युत्पत्त्या तत्समानार्थम्।

उत्तरसूत्रमवतारयितुं शङ्कते - **नन्विति।**

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

हृदयपुण्डरीकस्थानमुक्त्वा, 'तस्य मध्ये वह्निशिखा' इत्यादिना जीवस्वरूपमुक्त्वा, 'तस्याः शिखाया मध्ये परमात्मा व्यवस्थित' इति परमात्मत्वेन जीवान्तर्यामित्वेन तस्योपास्यत्वमवगम्यते। 'स ब्रह्मा स शिव' इत्यादिना तद्विभूतित्वं ब्रह्मशिवादीनामुच्यते। अतो नारायण एव विश्वपतिः परब्रह्मभूतो जीवान्तर्यामित्वेनोपास्य इति तदात्मकत्वेन तदधिकत्वं तदुपास्यत्वं च परमेश्वरस्य वक्तुमयुक्तमित्यत आह -

कर्मकर्तृव्यपदेशाच्च ।।१-२-४।।

कर्मत्वं कर्तृत्वं च व्यपदिश्येते तत्र ध्येयध्यात्रोः परमेश्वरनारायणयोः। कथं? पद्मकोशप्रतीकाशमिति प्रकृतस्य नारायणस्यैव हृदयमुच्यते। 'परमात्मा व्यवस्थित' इति परमेश्वर एव परमात्मा तदन्तर्वर्तितया ध्येयत्वेनोच्यते। ततो ध्यातृत्वेन नारायणस्य, ध्येयत्वेन परमेश्वरस्य

अवतारिकाभाष्यस्याऽयमाशयः - नारायणस्यान्तर्यामी परमेश्वर एव विश्वपतित्वादिनाऽङ्गीकर्तुं युक्तमिति। अत्र हि नारायणः परं ब्रह्मेत्याम्नातः। उपरिभागपर्यालोचनयापि नारायण एवोपास्य इत्यवगम्यते। तथा हि, तत्रोपासकस्य हृदयकमलं प्रस्तुत्य तदन्तरे महानित्यादिना **सन्तापयति स्वं देहमिति** देहाभिमानित्वलिङ्गनिवेदितं जीवात्मानमग्निपदलक्षितं तत्रस्थमुक्त्वा, **तस्य मध्ये वह्निशिखेत्यादिना** तत्प्रभारूपामन्तर्हृदयचिच्छक्तिं हृदयकमलमुकुलवैशिष्ट्यसिद्धदैर्घ्येन दीपशिखाकृतिं तन्मध्यवर्तिनीमुक्त्वा तस्या मध्ये तदन्तर्यामितया **परमात्मा व्यवस्थित** इति नारायणस्यैव परमात्मत्वेन निर्दिष्टत्वात्।

ननु, पूर्वानुवाके **यः परः स महेश्वर** इति प्रस्तुतत्वाच्छिव एव परमात्मतया निर्दिष्ट इतिचेन्न। पुरोवादे **परं ब्रह्म, परं ज्योति, परं तत्त्वमित्यादिना** प्रतिपादितस्य नारायणस्य उपासकत्वेनान्वयस्यानुचितत्वात्। उपास्यपरमात्मविभूतिषु **स ब्रह्मा स शिव** इत्यादिना शिवस्यापि परिगणितत्वेन तस्य परमात्मत्वासम्भवाच्चेति। एवमाशङ्कानिराकरणार्थमिदं सूत्रमिति।

कर्मकर्तृपदे भावप्रधान इत्याशयेनाह - **कर्मत्वमित्यादिना - परमेश्वर एवेति**। परमेश्वर एव परमात्मा व्यवस्थित इत्युक्तः। परमात्मा नारायणहृदयपुण्डरीकवर्तित्वेनोच्यते ध्येयत्वेन हेतुनेत्यर्थः। ध्येय एव हि ध्यानस्थानवर्तित्वेन वक्तुमुचितः। ध्येयत्वं हि पूर्वानुवाके परमेश्वरस्यैव सिद्धम्। परमात्मशब्दस्तत्रैव वर्तितुमर्हति। **अणोरणीयानिति** विद्योपक्रममन्त्रे परमेश्वरस्य महामहिमयुक्तात्मत्वेन प्रस्तुतत्वादिति भावः।

नन्वेतेन परमेश्वरस्य आदित्यपुरुषान्तर्वर्तित्वेनेव नारायणहृत्पुण्डरीकवह्निशिखामध्यवर्तित्वेनाऽस्मदुपास्यत्वमेव लभ्यते। न तु नारायणोपास्यत्वमपि।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

च कर्तृत्वं कर्मत्वं च व्यपदिश्यते। ततो नारायणादन्य एवोपास्यः परमात्मा। 'स ब्रह्मा स शिव' इत्यादिना ब्रह्मविष्णुरुद्रेन्द्रादिप्रपञ्चविभूतिविशिष्टत्वं परमेश्वरस्योपदिश्यते।

अत्र विष्णोरग्रहणेऽपि कैवल्योपनिषदि श्रूयते - 'हृत्पुण्डरीकं विरजम्' इत्यादिना हृदयपुण्डरीकं प्रस्तुत्य

उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम्।
ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात्।।
स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट्।
स एव विष्णुः स प्राणः स कालोऽग्निः।। इत्यादि।

तन्न्यायोऽत्राऽध्याहार्यः। 'यो वै रुद्रः स भगवान् भूर्भुवः सुवर्यश्च ब्रह्मा तस्मै वै नमो नमः'। 'यश्च विष्णुः यश्च महेश्वरः' इत्याद्याथर्वणश्रुतिरपि द्रष्टव्या। अत्र विभूतित्वेन ब्रह्मशिवयोर्मध्ये विष्णोरग्रहणं परमेश्वरोपासकतया तस्य प्रस्तुतत्वादित्यविरोधः।

'सहस्रशीर्षा पुरुष' इत्यारभ्य प्रस्तुतस्य पुरुषस्य 'पादोऽस्य विश्वा भूतानि' इति। निजैकांशजगद्विशिष्टत्वमुच्यते, 'सहस्रशीर्षं देवम्' इति स एवाऽत्र नारायण इति बोध्यते। स

अथ कथं **कर्मकर्तृव्यपदेशादि**ति सूत्रमुपपद्यत इत्याशङ्क्याह - **तत** इति। अत्र नारायणस्य प्रकृतत्वेन तस्यैव हृदयपुण्डरीकसम्बन्धित्वेन प्रकृतत्वाद् हृदयपुण्डरीकवर्तित्वेन पूर्वानुवाकोक्तस्य परमेश्वरस्य नारायणोपास्यत्वं प्रतीयत इत्यर्थः। महाज्ञेयमिति नारायणस्य विशेषणमुक्तार्थमेव निर्वहति। तथा च **धातुः प्रसादान्महिमानमीशमि**ति प्राङ्महत्वेन वर्णितो भवादिनामाष्टकान्तर्गतमहन्नामा च परमेश्वरो ज्ञेयः। उपास्योऽस्येत्येवमर्थकतया तेन विशेषेण परमेश्वरनारायणयोर्ध्यानक्रियायां कर्मकर्तृभावो व्यपदिश्यते इत्यर्थः। एवं महाज्ञेयमित्यस्य सिद्धान्तसाधकत्वं सूचयितुमेव भाष्ये तावत्पर्यन्तं विषयवाक्यं लिखितम्। ब्रह्मविष्णुरुद्राणां परमेश्वरविभूतित्वं श्रुत्यन्तरे सिद्धमित्युदाहरति - **यो वै रुद्र** इति। नारायणानुवाके विष्णोरुपास्यविभूतिविवक्षायामपि तदनभिधानमुपासकत्वनिर्देशेनैव तल्लाभादित्याह - **अत्रे**ति।

उत्तरसूत्रमवतारयितुं शङ्कते - **सहस्रशीर्षे**ति। पुरुषसूक्ते सहस्रशीर्षत्वादिविशिष्टं पुरुषमुपक्रम्य तस्य निजैकांशसमाप्तप्रपञ्चतया सकलजगदुपादानत्वमुक्तम्। तस्यैव नारायणानुवाकेऽपि सहस्रशीर्षमित्यारभ्य **व्याप्य नारायणः स्थितः** इति तदेवाभ्यासेन प्रतिपाद्यते। **उतामृतत्वस्येशान** इति मोक्षहेतुत्वादिलिङ्गैर्जगदुपादानतया च पुरुषसूक्तप्रतिपाद्यस्य परब्रह्मत्वमवगम्यते। परब्रह्म खलूपास्यमेव भवति, न तु तस्योपासकत्वमुचितमिति शङ्कानिराकरणार्थमिदं सूत्रम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चायं नारायणपरं ब्रह्मेति ब्रह्मत्वेनोच्यते। ब्रह्मैव हि सर्वोपास्यम्। कथमस्य तथाभूतस्यान्यं प्रत्युपासकत्वमित्यत आह -

शब्दविशेषात् **।।१-२-५।।**

नारायणात्परं ब्रह्मेति शब्दविशेषे एव नारायणात् परमिति ब्रह्म प्रतिपादयति। अतो नारायणादन्यदेव परंब्रह्मोपास्यम्। परब्रह्मणः सहस्रशीर्षत्वादिविशिष्टपुरुषरूपेण जगदुपादानत्वात्। परब्रह्मात्मकस्य तस्य जगदाकारत्वमिति वक्ष्यामः 'प्रकृतिश्च' इत्यधिकरणे।

नारायणस्योपासकत्वे प्रमाणान्तरमाह -

स्मृतेश्च **।।१-२-६।।**

नारायणपरमिति – पञ्चमीसमासयुक्तान्नारायणपरम् इति शब्दविशेषादेव नारायणादन्यः परमेश्वर एव ब्रह्मेति प्रतीयते। तर्हि नारायणस्य जगदुपादानत्वमुक्तं कथं सङ्गच्छेतेत्याशङ्क्य सहस्रशीर्षत्वादि-विशिष्टनारायणाख्यपुरुषावस्थारूपस्य परमेश्वरस्य जगदुपादानतायाः प्रकृत्यधिकरणे व्यवस्थापयिष्यमाण-त्वात्तदुपपद्यत इत्याह - **परब्रह्मण** इति।

तात्पर्यसङ्ग्रहे श्रीसुदर्शनाचार्यचरणैर्नारायणेति भिन्नं पदमिति प्रौढिवादेनाभ्युपगम्य नारायणस्य परब्रह्मत्वादिकं विश्वपतित्वादिकमिवोपास्यगतमेव तदभेदभावनादाढर्यसिद्धमित्युपपादितम्।

ब्रह्मोच्यते परमसौ परमं च तत्त्वं
ज्योतिः परं च परमेश्वर पद्मनाभः।
त्वद्भावनैकनिरतस्त्वदनन्यभावात्
मन्त्री यथा गरुडभावनया गरुत्मान्।। इति

तत्रायमाशयः - **ऋतं सत्यमित्युपास्यरूपसमर्पके** अग्रिमानुवाके शिवस्य परब्रह्मत्वं श्रूयते। न हि परब्रह्मत्वमुभयोरपीति वक्तुं युक्तम्। नाऽप्युपासकः परब्रह्म। तदन्य एवोपास्य इति वचनं सामञ्जस्यमश्नुते। न च नारायण एवोपास्य इति शङ्कितुमप्यस्त्यवकाशः। नारायणरूपस्य कुत्राप्यश्रुतत्वात्। तस्माद्यथोक्तमेव युक्तम्।

नारायणस्य **महाज्ञेयमिति** विशेषणेन सिद्धं परमेश्वरोपासकत्वमुपबृंहणेन स्पष्टीकर्तुमुत्तरसूत्रमित्याह - **नारायणस्येति**।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एवमुक्त्वा ततो राजन् महायोगीश्वरो हरिः।
दर्शयामास पार्थाय परमं रूपमैश्वरम्।।

इति स्मृतेश्च महायोगस्वामिनो नारायणस्य परमेश्वरविषयो योगः समाधिरभिव्यज्यते। अत्र -

अहं यथावदाराध्यः कृष्णेनाऽक्लिष्टकर्मणा।
तस्मादिष्टतमः कृष्णादन्यो मम न विद्यते।। इति,

अश्वत्थामानं प्रति परमेश्वरवचनं च। तस्मादन्यन्नारायणादुपास्यं परं ब्रह्म।

पुनरनुपपत्तिमाशङ्क्याह -

अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न, निचाय्यत्वादेवं व्योमवच्च
।।१-२-७।।

'नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा। तस्याः शिखाया मध्ये परमात्मा व्यवस्थित' इति स्वल्पवह्निशिखान्तर्वर्तितया स्वल्पाश्रयत्वादल्पत्वव्यपदेशाच्चायं व्यापी न परमेश्वर इति चेन्न।

अभिव्यज्यत इति। **महायोगीश्वर** इति। श्रीकृष्णस्य योगनिष्ठामुक्त्वा तत्सामर्थ्यात् **दर्शयामास पार्थाय परमं रूपमैश्वरमि**त्यैश्वररूपप्रदर्शनोक्त्या तद्योगः परमेश्वर विषय इति ज्ञाप्यते। गरुडभावनां विना गारुडरूपस्येव, परमेश्वरभावनां विना तदीयरूपस्याऽन्येन प्रदर्शयितुमशक्यत्वात्। परमेश्वरभावना-दार्ढ्यादेव दधीचेनापि विश्वरूपं प्रदर्शितमिति लिङ्गपुराणादिषु दक्षदधीचसंवादे प्रतिपादितत्वाच्चेति भावः।

तस्मादन्यन्नारायणादिति।

संहरस्व पुनर्देव रूपमक्षय्यमद्भुतम्।
पुनस्त्वां स्वेन रूपेण द्रष्टुमिच्छामि शाश्वतम्।।

इत्यर्जुनवाक्ये प्राचीनरूपस्यैव स्वकीयत्वोक्त्या प्रदर्शितं विश्वरूपं न स्वीयं, किन्तु पारमेश्वरमेवेति व्यक्तत्वाच्च, उपास्यं परं ब्रह्म शिव एवेति निष्पन्नमिति भावः।

उत्तरसूत्रमवतारयति - **पुनरिति।**

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उपास्यत्वात्तथा व्यपदेशः, न स्वरूपाल्पत्वात्। व्योमवत् स्वरूपमहत्वस्य सिद्धत्वात्। यथा घटादिषूपहितस्य व्योम्नस्तदुपाधिवशादल्पत्वं स्वरूपतो महत्त्वं च। ततो न विरोधः।

पुनराशङ्क्य परिहरति -

सम्भोगप्राप्तिरिति चेन्न वैशेष्यात् ।।१-२-८।।

यदुक्तं 'नारायणपरं ब्रह्मे'ति नारायणात् परं तदुपास्यं ब्रह्म तदेव हि, 'ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्। ऊर्ध्वरेतं विरूपाक्षम्' इत्युच्यते। तत्र परमशक्त्युमाशबलाकारतया कृष्णपिङ्गलं, कृशानुरेतस्कतया चोर्ध्वरेतस्कं, त्रिलोचनतया विरूपाक्षं, पुरि पूर्वोक्तदहरपुण्डरीके शेत इति पुरुषमृतं सत्यं, मनोवाग्विपर्यासरहितं, परं ब्रह्मेति हि लक्षणम्।

अतोऽस्य त्रिलोचनत्वादिलक्षणशरीरसंबन्धाच्छरीरगतसुखदुःखादिसंभोगप्राप्तिरिति चेन्न वैशेष्यात्। सुखदुःखभोगहेतुभ्यो जीवशरीरेभ्यो ब्रह्मरूपस्याऽस्ति हि वैशेष्यम्; इच्छागृहीतत्वादस्य; तेषां कर्ममूलत्वाच्च। अत एव श्रूयते परमेश्वरः, 'अपहतपाप्मा विजरो विमृत्युर्विशोको

अर्भकशब्देनाल्पत्वं लक्ष्यते। ओकः हृदयकमलमध्यवर्तिवह्निशिखारूपमुपासनास्थानमल्पमित्यवगम्यते। **नीवारशूकवत्तन्वी** इत्यल्पत्वव्यपदेशादप्यल्पतममिति विज्ञायते। एवमत्यल्पे स्थाने व्यापिनः परमेश्वरस्य निवासाऽसम्भवात्तत्रोपास्यः कश्चिज्जीवरूपो देवताविशेष एव स्यान्न परमेश्वर इतिचेन्न। परमात्मनो व्यापित्वेप्युपास्यत्वादुपासकहृदयस्थानमनुसृत्य सूचीरन्ध्रोपहिताकाशवदुपाधिप्रयुक्ताल्पत्वयुतोऽपि स्वरूपतो महत्वान्न विरोध इत्याशयः।

ननूत्तरसूत्रेण परमेश्वरस्य शरीरित्वप्रयुक्तदोषो निराक्रियते। पूर्वमन्तरादित्यविद्याधिकरणे स दोषो निराकृतः। अग्रे गुहाधिकरणे, भोक्त्रापत्त्यधिकरणे च निराकरिष्यते। अत्र कथं तच्छङ्कावकाश इत्याशङ्क्याह - **पुनरिति**। इहाधिकरणे परमेश्वरस्याऽसाधारणविग्रहविशेषेण शरीरित्वप्रयुक्तदोषशङ्का तदीयविग्रहस्येतरशरीरवैलक्षण्यसमर्थनेन निराक्रियते। गुहाधिकरणे तस्याऽस्मदादिशरीरप्रवेशेन शरीरित्वप्रयुक्तदोषशङ्का श्रुतिबलेन निराक्रियते। भोक्त्रापत्त्यधिकरणे सकलचिदचिच्छरीरित्वप्रयुक्ता दोषशङ्का निराक्रियते। अन्तरधिकरणे तु प्रसङ्गवशाद्भाष्य एव तन्निराकरणं कृतम्। न तु तत्सूत्रसिद्धम्। ततो नेदं सूत्रं निरर्थमित्याशयः।

अतोऽत्र **त्रिलोचनत्वादिति। न ह वै सशरीरस्य सतः प्रियाऽप्रिययोरपहतिरस्तीति** श्रुतेः सशरीरत्वे सुखदुःखादिकमवार्यम्। तस्मान्नाऽयमुपास्यः परमेश्वरः। किन्तु लोकपालरुद्रवत्कश्चन रुद्रविशेष एवोपास्य इत्यभ्युपगन्तव्यमिति शङ्कितुराशयः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्प' इति संसारशरीरधर्मरहितत्वेन। न चैवं संसारी जीवः। अत एवाप्राकृतानि पापजरामरणशोकादिरहितानि स्वेच्छासम्पादितानि लीलामङ्गलरूपाणि परमेश्वरस्य 'स्थिरेभिरङ्गैः पुरुरूप उग्र' इत्यादिषु स्थिराणि नित्यानि शरीराणि विज्ञायन्ते। ततः परब्रह्मणः परमेश्वरस्य जीवाद्वैशेष्यान्न तद्वच्छरीरादिगतदोषापत्तिः।

अत्र खलूपक्रमादिलिङ्गैर्विरूपाक्षं ब्रह्म सर्वोत्कृष्टमुपास्यमिति युक्तमेव। तथाहि, उपक्रमे, 'अणोरणीयान्' इत्यादिना, 'महिमानामीशम्' इत्यन्तेन सकलजन्तुहृदयगुहानिहितत्वेन स्वप्रसादातिशयवीतशोकपुरुषदर्शनविषयत्वेन च महिमातिशयवानीशः प्रस्तुतः।

पुनः 'सप्त प्राणाः प्रभवन्ति तस्मात्' इत्यादिना स एव परमशक्तिमान्प्राणादिजगदुपादानत्वेन निरूपितः। ततश्च 'यो देवानां प्रथमं पुरस्ताद्विश्वाधिको रुद्रो महर्षिः। हिरण्यगर्भं पश्यत जायमानम्' इति विश्वाधिकत्वेन, सर्वज्ञत्वेन, सकलकार्यप्रथमहिरण्यगर्भजनकत्वेन च

परमेश्वरविग्रहस्याऽप्राकृतत्वेनाऽस्मदादिशरीरेभ्यो विशेषान्न विग्रहवत्त्वेन सुखदुःखभोगप्रसङ्ग इत्यभिप्रायेण परिहरति - नेत्यादिना। वैशेष्यं विशेषः। **इच्छागृहीतत्वादिति** - जीवपरमेश्वरयोः शरीरित्वे समानेऽपि जीवस्य शरीरवत्वं कर्मपारवश्यलब्धम्। ईश्वरस्य तु जीवरक्षार्थमिच्छापरिगृहीतमित्येवं हेतुविशेषाज्जीवस्येव न परमेश्वरस्य सुखदुःखजनकमिति हृदयम्।

ननु, दहरविद्यायामुपास्यः परमेश्वर इति नोपपद्यते। नारायणस्यैव तत्रोपास्यत्वात्। नारायणानुवाके तस्यैव महिमा भूयान्वर्ण्यते। तस्मादत्र नोपास्यः परमेश्वरः इति शङ्कां मनसि निधाय उपक्रमादिभिरस्या दहरविद्यायाः परमेश्वरपरत्वमुपपादयति - **अत्र खलु** इति। **उपक्रमादिति** - ईशश्रुत्योपक्रमस्य परमेश्वरत्वं निर्धारयति - **उपक्रम** इति।

एवमीशशब्देनोपक्रान्तमेव सर्वनाम्ना परामृश्य प्रवृत्तत्वादनन्तरसन्दर्भोऽप्यन्यविषये भवतीति शङ्कितुं नावकाश इत्याह - **पुनरिति**। **यो देवानामिति** मन्त्रस्तु परमेश्वरपर इति स्पष्टमित्याह - **ततश्चेति**। यो देवानामिति मन्त्रस्याऽनन्तरः **यस्मात्परं परमस्ति किञ्चिदिति** मन्त्रः। अस्य -

यस्मात्परतरं नास्ति नाऽपरं परमात्मनः।
न ज्यायोऽस्ति न चाऽणीयो नमस्तस्मै स्वयम्भुवे।।

येनेदमखिलं व्याप्तं, यन्माया मूर्तयः स्मृताः
तस्मै शिवाय महते नमः सूक्ष्माक्षरात्मने।।

इत्याश्वलायनेन शिवपर इति स्पष्टीकृतः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

निमित्तभूतः परामृष्टः। स एव ततः 'परेण नाकम्' इति पाराकाशगुहावर्ती व्यक्तफलकर्मानुष्ठायिनां वेदान्ततात्पर्यवेदिनां यतीनां जितेन्द्रियाणां 'परामृतात्परिमुच्यन्ति' इति परामृतरूपया प्राप्यत्वेन वर्णितः। कस्तत्प्राप्त्युपाय इति प्राप्ते, 'दहर विपाप्मम्' इति दहरोपासनमारब्धम्। तत्र 'तस्मिन्यदन्तस्तदुपासितव्यम्' इति दहरपुण्डरीको यद्वस्तु तदुपास्यमिति सामान्येनोक्तम्। तत्किमित्याकांक्षायां 'यः परः स महेश्वर' इति महेश्वराख्यं तदुपवर्णितम्। तत्किंरूपमित्याकांक्षायामृतं सत्यमित्यादिना विरूपाक्षत्वादिलक्षणरूपमित्युपसंहृतम्। तत्रावान्तरवाक्यसिद्धो नारायणः पूर्वाधिकरणन्यायादुपासकत्वेनान्वेतीति युक्तम्।

अत्र सर्वेषामुपासने अधिकारस्य सद्भावेऽपि नारायणग्रहणमस्याऽधिक्यार्थम्। तदिहोपास्येन विरूपाक्षेण ब्रह्मणा तदुपासकस्य नारायणस्याऽभेदभावनया तद्धर्मैरस्य प्रतिपादनं तदुपादानस्य तदात्मन इति समीचिनम्।

।। इत्यनुपपत्त्यधिकरणम् ।।

***

महेश्वराख्यं तदुपवर्णितमिति। अत्रायं भावः। **यो वेदादावि**ति मन्त्रेण तावदुपक्रमानुरोधेन नारायणत्वं सिद्ध्यति। ईशरुद्रामृतश्रुतिभिस्तस्य शिवपरत्वेन व्यवस्थितत्वात्। नाप्युपसंहारानुरोधेन **ऋतं सत्यमि**त्युपसंहारस्यापि विरूपाक्षश्रुत्यादिस्तत्परत्वनिर्णयात्। नापि **सहस्रशीर्षं देवमि**त्याद्यग्रिमग्रन्थ-सन्दर्भानुरोधेन। तस्योपक्रमोपसंहारैकरूप्यावगतशिवपरत्वानुरोधेन महाज्ञेयमिति विशेषणसामर्थ्याच्च उपासकविषयत्वावगमादिति। **तत्रे**ति - मध्ये प्रसक्तस्य नारायणस्य **स क्रतुं कुर्वीते**ति प्रसक्तस्य जीवस्येवोपासकत्वेनाऽन्वय इत्यर्थः।

नन्वत्र नारयणस्योपासकत्ववर्णनं किमन्येषामस्मिन्नुपासनेऽधिकारव्यावर्तनार्थमित्याशङ्क्य नेत्याह - **अत्रे**ति। विशिष्टपुरुषानुष्ठितत्वेनाऽस्योपासनस्यौत्तम्यप्रदर्शनार्थमिति भावः। तस्मादस्मिन्नेव प्रकरणे परमेश्वरनारायणयोरुपास्योपासकभावप्रतिपादनात्परमेश्वराभेदभावनासिद्धैर्विश्वपतित्वादिभिस्तदीयैर्धर्मैर्नारायणस्य वर्णनमित्येतदुपपद्यत इत्यधिकरणार्थमुपसंहरति - **तदिहे**ति।

पारमेश्वरत्वेन प्रसिद्धानामपि विश्वपतित्वादिलिङ्गानामन्यदीयत्वप्रत्यायकश्रुतिप्राबल्यशङ्कया पूर्वपक्षदशायां नातिस्पष्टतेति पादसङ्गतिः।

।। इत्यनुपपत्त्यधिकरणम् ।।

***

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ अत्त्रधिकरणम् १५

अत्ता चराचरग्रहणात् ।।१-२-९।।

'यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः। मृत्युर्यस्योपसेचनम्। क इत्था वेद यत्र स' इति श्रूयतेऽस्य विषयः।

इह मृत्युपसेचनमिलितब्रह्मक्षत्रोपलक्षितनिखिलचिदचित्प्रपञ्चकबलभोक्तृतया श्रूयमाणः परमेश्वरो वा? अन्यो वा? इति संशयः।

अथ अत्त्रधिकरणम्

यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः। मृत्युर्यस्योपसेचनम्। क इत्था वेद यत्र स इति विषयः।

अस्मिन्मन्त्रे ब्रह्मक्षत्रे यस्योदनत्वेन रूपणे कृते, स तयोर्भोक्तेति तदोदनत्वरूपणबलादवगम्यते। अत्र ओदनशब्दस्य विनाश्यत्वरूपसामान्याकारः प्रवृत्तिनिमित्तम्। तस्मात्संहर्तैव भोक्तेति विशेषणेन सूचयन् संहर्ता किं परमेश्वरः? उत संहाररुद्रादिरूपो देवताविशेषो वा? इति परमेश्वरस्य संहारकर्तृत्व-सम्भवाऽसम्भवाभ्यां संशयं दर्शयति **मृत्यूपसेचनेति** - उपसेचनं नाम येन दधिपयःप्रभृतिना भोजनाय ओदन उपसिच्यते तदुच्यते। **दध्नोपसिच्य भुङ्क्ते** इत्यादिव्यवहारदर्शनात्। एवं मृत्योरुपसेचनतारूपण-बलादोदनतारूपितयोः ब्रह्मक्षत्रयोः मृत्युमेलनं प्रतीयते। एवं मृत्युमिलितयोः ब्रह्मक्षत्रयोरत्ता संहर्ता। अदनं संहारः। इत्थम्भूतमदनं न केवलं ब्रह्मक्षत्रयोरेवात्र विवक्षितम्। किन्तु तदुपलक्षितस्य सर्वस्यापि चराचरस्येत्यपि मृत्योरुपसेचनत्वरूपबलादवगम्यते। यथा खलूपसेचनमोदनादनोपयोगितया स्वयमप्यद्यमानं भवति तथैव मृत्यूपसेचनत्वरूपणबलात्प्रतीयमानस्य मृत्युना सह तत्संसृष्टसंहारस्य प्रलय एव संभवात्सर्वप्रपञ्चसंहर्तैवानेन मन्त्रेण प्रतिपाद्यते।

अत्र संशयप्रदर्शकवाक्येन पूर्वाधिकरणसङ्गतिरेवं सूचिता। त्रिमूर्त्युत्तीर्णं परमशिवाख्यं परं ब्रह्म सकलवेदान्तप्रतिपाद्यमिति निर्णेतुमिदं शास्त्रं प्रवृत्तम्। केचित् त्रयाणां ब्रह्मविष्णुरुद्राणामन्यतम एव परं ब्रह्म, न तदुत्तीर्णं तत्त्वान्तरमस्तीति मन्यते। तत्प्रबोधनाय परब्रह्मणो हिरण्यगर्भातिरिक्तत्वं तस्य हिरण्यगर्भस्य च शेषशेषिभावप्रदर्शनेन पूर्वपादे हिरण्यगर्भाधिकरणे समर्थितम्।

पूर्वाधिकरणे नारायणस्योपासकत्वप्रदर्शनेनैव परमेश्वरस्य तदतिरिक्तत्वं समर्थितम्। तत्प्रसङ्गात्संहार-रुद्रातिरिक्तत्वमनेनाधिकरणेन प्रदर्श्यत इति संहाररुद्रपरमेश्वरयोर्भेदं सिद्धं कृत्वा तदन्यो वेति तद्भिन्नत्व-पुरस्कारेण संहाररुद्रविषया पूर्वपक्षकोटिरुपन्यस्ता।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

परमकारुणिकस्य सर्वानुग्राहकस्य सकलभक्षकत्वमनुचितम्। हिंसारूपं हि परप्राणविमोचनम्। हिंसाप्रवृत्तेः क्रोधः एव मूलाङ्कुरः। क्रोधस्यामङ्गलगुणस्य मोह एव मूलकन्दः। तस्य सर्वसंहारनिदानस्य तम एव प्रकृतिः अतस्तामसः सर्वसंहर्ता। तामसत्वं नामाऽऽवृतज्ञानादिमत्त्वान्निष्प्रकाशत्वम्।

सर्वसंहर्तृ ब्रह्मेत्युक्ते तस्य नित्यशुद्धस्य निरूपाधिकमङ्गलाकारस्य निस्संसारकलङ्कस्याऽज्ञानतमोमोहक्रोधादिकाऽमङ्गलगुणसंकरप्रसङ्गः। अपि च, स्वरूपलक्षणतया निर्णीतं सर्वज्ञत्वनित्यतृप्तादिकमनर्थकमेव स्यात्।

तस्मात् ब्रह्मणोऽन्य एतादृशगुणः संहर्ता भवतीति पूर्वपक्षः।

सिद्धान्तस्तु, ब्रह्मैव सर्वसंहर्तृत्वेन श्रूयते। कुतः चराचरग्रहणात्। यदुक्तं निखिलचराचरप्रपञ्चभोक्तृत्वमयुक्तमिति, तदेव ब्रह्मत्वे लक्षणम्। परिच्छिन्नशक्तेर्जीवस्य सकलचराचरसंहरणसामर्थ्याभावात्। 'तस्मादुपसंहर्त्रे महाग्रासाय वै नमो नमः' इति परमेश्वरस्याऽथर्वशिरसि श्रूयते सर्वसंहर्तृभावः। न क्वचिज्जीवस्य।

परमेश्वरस्य संहर्तृत्वासम्भवमुपपादयन् पूर्वपक्षं दर्शयति - **परमकारुणिकस्येति**। न हि सर्वदा करुणया सर्वाननुगृह्णन् कश्चिदपि हिंस्यादिति भावः।

पूर्वपक्षमुपसंहरति **तस्मादिति**। सर्वसंहर्तृत्वं परमेश्वरस्यैव सम्भवति नान्यस्येत्युपपादयन् तेनैव लिङ्गेन परमेश्वर एव प्रकृतमन्त्रप्रतिपाद्य इति सिद्धान्तयति - **सिद्धान्तस्त्विति**।

महाग्रासायेत्यनेन गोबलीवर्दन्यायेन तदतिरिक्तसर्वप्रपञ्चग्रसितृत्वमुच्यते। अत्र सर्वसंहर्तृत्वं न स्पष्टं सिद्ध्यतीति तत्सिद्धये -

य इमा विश्वा भुवनानि जुह्वदृषिर्होता निषसादा पिता नः।
स आशिषा द्रविणमिच्छमानः परमच्छदो वर आविवेश।।

- इति मन्त्र उदाहृतः। अस्यायमर्थः - ऋषिः सकलवेदद्रष्टा, नः अस्माकं पिता जनयिता, इमानि सर्वाणि भुवनानि, जुह्वत्सन् होता निषसाद - होमकर्ता स्वयमेवावशिष्टः सन्निविष्टः। एवं प्रलयकाले सर्वं स्वात्मन्युपसंहृत्य स्वमात्रावशेषेण स्थितः परमेश्वरः। आशिषा आशीरिच्छा। **आशीरुरगदंष्ट्रायां शुभवाक्याभिलाषयोरिति** कोशस्मरणात्। तया स्वात्मन इच्छाशक्त्या द्रविणं स्वविभूतिरूपं प्रपञ्चमिच्छमानः स्वेच्छाशक्तिरूपेणोपादानेन, सुवर्णेन कुण्डलमिव, प्रपञ्चं सिसृक्षुः परमच्छदः सङ्कल्पमात्रसृष्टप्रपञ्चरूपोत्कृष्टनिजाऽऽच्छादनस्तद्विशेषो भूत्वा, वर उत्कृष्टे परमच्छदत्वेन प्रागुक्ते प्रपञ्चे आविवेश अन्तर्यामितया प्रविष्ट इति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

'य इमा विश्वा भुवनानि जुह्वदि'ति ब्रह्मणो निजप्रकाशवह्नौ निखिलभुवनहव्यहोतृत्वमवगम्यते। न चैवमस्ति जीवस्य सामर्थ्यं हव्यकोटिनिविष्टस्य। स्वेतरमखिलं चराचरं चिदचित्प्रपञ्चं स्वात्मनि संहृत्य यदा वर्तते परमेश्वरः तदा सर्वमिदं निरस्तचन्द्रसूर्यादिप्रकाशतया विध्वस्तरात्रिदिनादिकालविभागमपगतनामरूपविशेषतया स्थूलदेवमनुष्यादिव्यवहारशून्यं तमोमात्रं वर्तते, स एक एव परमेश्वरो निरङ्कुशप्रकाशः सर्वसाक्षी तदानीमपि परिशिष्यते। तथाहि श्रुतिः 'यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केवल' इति। अत्र न सन्न चासदिति सदसतोः पशुपाशयोर्न स्वरूपसत्ता निषिध्यते, किंतु नामरूपविभागार्हं स्थूलत्वम्।

ननु, नित्यप्रकाशे शिवे परब्रह्मणि सत्यपि कथं तमोमयं जगत् ? इतिचेन्न। स्वयंप्रकाशस्य सर्वसाक्षिणः शिवस्य का हानिः ? नामरूपशून्यतया ग्रहणाऽयोग्येषु विषयेषु विहतकरणशरीरशक्तीनां जीवानां प्रपञ्चग्रहणं नास्ति मलतिरोहितस्वज्ञानतया। शिवस्य स्वप्रकाशरूपस्याऽपि पूर्वमिव दर्शनं नास्ति। तस्मान्निरस्तसमस्तकार्यविशेषज्ञाना परमसुषुप्तिमयी महावस्था तम इत्युच्यते। तथाहि स्मृतिः, 'आसीदिदं तमोभूतमप्रज्ञातमलक्षणमि'ति। नामरूपविभागानर्हसूक्ष्मचिदचित्प्रपञ्चविशिष्टतया शिवः केवल इत्युच्यते। स पुनः सर्गकाले स्वसङ्कल्पमात्रेण समवायिकारणनिरपेक्षमेव स्वस्मात् प्रथमशक्तिपरिस्फुरणपूर्वकं पूर्वतत्तन्नामविशिष्टमेव सकलं चिदचिदर्थजातं सृजति प्रकाशयति। तथाऽभियुक्तसूक्तिः,

चिदात्मैव हि देवोऽन्तःस्थितमिच्छावशाद्बहिः
योगीव निरूपादानमर्थजातं प्रकाशयेत्।। इति

ननु 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्', 'तस्माद्विराडजायत' इत्यादिभिः श्रुतिभिः मायापुरुषयोरुपादानत्वं श्रूयते। कथं निरूपदानत्वम् ? इति चेत् सत्यम्। यथा घटनिष्पत्तौ कुलालस्य स्वशरीरपृथक्त्वेन मृत्पिण्ड उपादानं दृश्यते, तथा न परमेश्वरात् पृथक् सिद्धं मायाद्युपादानम्। मायादिरूपात्परमेश्वराज्जगदुत्पत्तेः। अतो न विरोधः। तत्स्वरूपापृथगवस्थानसूक्ष्ममायापुरुषः परमेश्वर एव स्वयमुपादानमपीत्युच्यते। तथाऽथर्वशिखायां 'ध्यायीतेशानं

अत्र यद्यपि विश्वपदस्य सामस्त्यवाचितया समस्तभुवनसंहर्तृत्वमेव प्रतीयते, न तु चेतनाचेतनात्मकसर्वप्रपञ्चसंहर्तृत्वं, तथापि तत् **होता निषसादे**ति होतृमात्राऽवशेषोक्तिसामर्थ्यात्समर्थनीयम्। तत्सिद्धये **होता निषसादे**त्यस्य परमेश्वरमात्रावशेषपरत्वं मन्त्रान्तरैकार्थ्येन स्पष्टीकर्तुं मन्त्रान्तरं तदर्थोपन्यासपूर्वकमुदाहरति - **स्वेतरमखिलमित्यादिना**।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रध्यायितव्यम्। सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रास्ते संप्रसूयन्ते। सर्वाणि चेन्द्रियाणि सहभूतैर्न कारणम्। कारणानां धाता ध्याता कारणं तु ध्येयः सर्वैश्वर्यसंपन्नः सर्वेश्वरः शम्भुराकाशमध्य' इति श्रूयते। ततः सर्वभूतानां यत्र संहारस्तत एवैतेषामुत्पत्तिरिति अनन्तानां तेषां यावत्संहृतिस्तावत् तत्रैवाऽनन्तशक्तौ शिवे स्थितिरिति सर्वसंहर्ता शिव एव ब्रह्मशब्दाभिधेयः।

यदुक्तं संहारस्य हिंसारूपत्वात् तन्मूलक्रोधाद्यनर्थगुणसंबन्धो ब्रह्मणो भवेदिति तदविचारवाग्विलासः। क्रोधादिमूलस्य तमोगुणस्य प्राकृतधर्मत्वात्। 'उमासहायं परमेश्वरं प्रभुमि'त्यारभ्य 'समस्तसाक्षिं तमसः परस्तादि'ति श्रुतिरेव भगवती प्रमाणं परमेश्वरस्य तमसः परत्वे। इह पौराणिकी फणितिरपि परमेश्वरस्य मोहादिनिवर्तकज्ञानादीनां नित्यसंबन्धमाह।

एवं समर्थितं तस्य संहर्तृत्वमुपसंहरति - **तत** इति। ब्रह्मशब्दाभिधेयः शिव एव सर्वसंहर्तेत्यन्वयः। परमेश्वरस्य सर्वसंहर्तृत्वे पूर्वपक्ष्यापादितं दोषं परिहर्तुमनुभाषते - **यदुक्त**मिति। अत्रेदमाकूतम्। द्विविधो निग्रहः। अनुग्रहोद्देश्यस्तदनुद्देश्यश्च। आद्यस्त्रिविधः - निग्राह्यानुग्रहार्थः, तदितरानुग्रहार्थः, उभयानुग्रहार्थश्च। सदाचारानुवर्तनाद्यर्थः पुत्रादिनिग्रह आद्यः। स तु सर्वथा न दोषः। द्वितीयस्तु उत्कृष्टानुग्रहार्थमपकृष्टनिग्रहः।

एकस्मिन्यत्र निधनं प्रापिते दुष्टचारिणि।
बहूनां भवति क्षेमं तत्र पुण्यप्रदो वधः।।

इत्यादिवचनप्रामाण्यान्न दोषः। यथा राज्ञां मृगयासु प्रजानुग्रहार्थं व्याघ्रादिवधः। चोरादिवध उभयानुग्रहार्थः। तेन हि प्रजानुग्रह इव

राजभिर्धृतदण्डास्तु कृत्वा पापानि मानवाः।
विमानैः स्वर्गमायन्ति सन्तः सुकृतिनो यथा।।

इति वचनप्रामाण्याच्चोरानुग्रहार्थश्च भवति। प्रत्युत त्रिविधोप्ययं निग्रहो गुण एव। उक्तत्रिविधनिग्रहान्तर्भूतः सर्वोऽपि परमेश्वरकृत्यभूतः संहारः। तत्र प्रपञ्चस्थितिकाले दैत्यादिनिग्रह उभयानुग्रहार्थः। हिंस्रतिर्यग्जाति-निग्रहस्तदन्यानुग्रहार्थः। नरकादिनिपातनरूपो निग्रहः पापक्षपणेन तत्तदनुग्रहार्थः। अयं त्रिविधो निग्रहस्तत्तदधिकृतदेवमनुष्यादिमूर्तिद्वारकः।

महाप्रलये सर्वसंहारः साक्षात्पारमेश्वर। स तु संसाराध्वचिरगतागतखिन्नानां महासुषुप्त्यापादनेन तत्तदनुग्रहार्थः। एवं परमेश्वरकर्तृकाणां निग्रहाणामनुग्रहार्थत्वेनाऽदोषत्वं गुणत्वं च वायुसंहितायां प्रपञ्चितम्।

ये पुत्रनिग्रहाः केचिद्ब्रह्मादिषु निदर्शिताः।
तेऽपि लोकहितायैव कृताः श्रीकण्ठमूर्तिना।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ज्ञानं वैराग्यमैश्वर्यं तपः सत्यं क्षमा धृतिः
स्रष्टृत्वमात्मसम्बोधो ह्यधिष्ठातृत्वमेव च।।

अव्ययानि दशैतानि नित्यं तिष्ठन्ति शङ्करे।। इति,

अशेषविषयामोघशुद्धिबुद्धिविजृम्भणः
आत्मशक्त्यमृतास्वादप्रमोदरसिको युवा।।

इत्यादि च। असङ्कुचितविभवः परमेश्वरो हि सिसृक्षुः 'सोऽकामयत बहुस्यामि'ति बहुप्रपञ्चभवनाय आत्मनो मायालक्षणामिच्छारूपां शक्तिमाश्रयति। 'स तपोऽतप्यत' इति तपः स्वरूपिकया ज्ञानात्मिकया शक्त्या सकलजीवकर्मानुगुणतत्तच्छरीरसामग्रीमालोचयति। आलोच्य सङ्कल्पितसकलकरणविदग्धया क्रियाशक्त्या 'इदं सर्वमसृजते'तीच्छाशक्तिभित्तौ निखिलजगच्चित्र-मुन्मीलयति। 'तत्सृष्ट्वा तदेवानुप्राविश'दिति सकलकार्यजातमनुप्रविश्य शक्तित्रयसंबन्धेन त्रिगुणभिन्नमूर्तित्रयादिप्रपञ्चरूपो भवति। तदिह सर्वशक्तेः सर्वज्ञस्य शिवस्य महिमा केन विज्ञायते?

अण्डस्याऽस्याधिपत्यं हि श्रीकण्ठस्य न संशयः।
श्रीकण्ठाख्यां शिवो मूर्तिं क्रीडन्तीमधितिष्ठति।।

सदोषा एव देवाद्या निगृहीता यथोचितम्।
ततस्तेऽपि विपाप्मानः प्रजाश्च विगतज्वराः।।

निग्रहोऽपि स्वरूपेण विदुषां न जुगुप्सितः।
अत एव हि दण्ड्येषु दण्डो राज्ञां प्रशस्यते।।

यत्सिद्धिरीश्वरत्वेन कार्यवर्गस्य कृत्स्नशः।
न स चेदीशतां कुर्याज्जगतः कथमीश्वरः।।

हिते सदा निषण्णानामीश्वर स्यान्निदर्शनम्।
स कथं दूष्यते सद्भिरसतामेव निग्रहात्।।

सर्वोऽपि निग्रहो लोके न च विद्वेषपूर्वकः।
नहि द्वेष्टि पिता पुत्रं यो निगृह्यापि शिक्षयेत्।। इति

ननु दैत्यादिसंहारे परमेश्वरस्य क्रोधः सम्भाव्यत इति चेन्न। **तमसः परस्तादिति** वचनानुरोधेन तस्य तमोमूलकत्वाऽभावसंप्रतिपत्तेः। न च, तमसा विना क्रोधो न सम्पद्यत इति शङ्क्यम्। **क्रोधमाहारयन् तीव्रमिति** रामायणोक्तरीत्या तस्य दुष्टनिग्रहार्थमाहार्यतया परमेश्वरनिघ्नत्वादिति। **ज्ञानमिति**। तपश्शब्दोऽत्र

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अतः सर्वसंहर्ता परमेश्वर इति।

प्रकरणाच्च ।।१-२-१०।।

'महान्तं विभुमात्मानं मत्वा धीरो न शोचति', 'नाऽयमात्मा प्रवचनेन लभ्य' इति परमेश्वरस्यैव प्रकरणम्। अतश्च परं ब्रह्म परमेश्वरः सर्वसंहर्ता, नाऽन्य इति सिद्धम्।

।। इति अत्त्रधिकरणम् ।।

***

अथ गुहाधिकरणम् १६

इहाऽधिकरणे सर्वसंहर्तृत्वलक्षणेन सिद्धस्य परमेश्वरस्य, 'द्वासुपर्णे'त्यादिप्रसिद्धं स्वविभूतिभूतजीव-साहचर्यमभिव्यञ्जयितुमधिकरणान्तरारम्भः -

गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ।।१-२-११।।

न कृच्छ्रचान्द्रायणादिपरः, किन्तु सृष्टिकाले स्रष्टव्यालोचनरूपज्ञानशक्तिपरः। शिवस्य महिमा केन विज्ञायत इति - **क इत्था वेद यत्र स** इति वाक्यार्थानुवादः।

सूत्रार्थमुपसंहरति - **अत** इति।

महान्तं विभुमात्मानं मत्वा धीरो न शोचति।, नायमात्मा प्रवचनेन लभ्य इतीदं परमेश्वरस्यैव प्रकरणम्। ततोऽपि सर्वसंहर्ता परमेश्वर एव, नान्य इति सिद्ध्यतीत्यर्थः।

।। इति अत्त्रधिकरणम् ।।

***

अथ गुहाधिकरणम्

सङ्गतिं सूचयन्नुत्तराधिकरणमवतारयति - **इहेति**। पूर्वाधिकरणे त्रिमूर्त्युत्तीर्णः परमेश्वरः इत्युपपाद्य स एव मुमुक्षुभिः सकलेतरदेवतापरित्यागपूर्वकोपासनया साक्षात्करणीय इति च सूचितम्। तदयुक्तम्। तथाविधस्य सर्वेश्वरस्य -

हरिश्चाहं च रुद्रश्च तथान्ये च सुराऽसुराः।
तपोभिरुग्रैरद्यापि यस्य दर्शनकाङ्क्षिणः।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

'ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे। छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः' इति श्रूयतेऽस्य विषयः।

इह सुकृतस्थाने परार्थे ब्रह्मणादिशरीरे हृदयगुहां प्रविष्टौ फलभोक्तारौ छायातपाविव विलक्षणौ कौचित् श्रूयेते। तावेतौ बुद्धिजीवौ वा? जीवपरमेश्वरौ वा? इति सन्देहः।

बुद्धिजीवावेतौ। कुतः? 'ऋतं पिबन्ताावि'ति भोक्तृत्वावगमात्। परमेश्वरस्य न भोक्तृत्वम्। 'अनश्नन्नन्यो अभिचाकशीती'ति दर्शनात्। बुद्धिजीवयोर्भोक्तृत्वं प्रसिद्धमेव। किंच जीवेश्वरयोश्चेतन-रूपयोश्छायातपयोरिव वैलक्षण्यं नास्ति। बुद्धेरचेतनत्वादस्ति जीवाद्वैषम्यम्। तदेवं बुद्धिजीवाविति प्राप्ते ब्रूमः -

---

इत्यादि चतुर्मुखादिवचनैर्ब्रह्मादीनामपि दुर्दर्शत्वेन प्रसिद्धस्याऽस्मदादिभिरुपासनया साक्षात्कर्तुमशक्यत्वादि-त्याशङ्कानिराकरणाय परमेश्वरस्य सर्वदोपासकसहचरितत्वेन नित्यसौलभ्यं व्यञ्जयितुमधिकरणमारभ्यत इत्याक्षेपिकी सङ्गतिरित्याशयः।

ननु, परमेश्वरः केन हेतुनाऽस्मदादीनां साक्षात्कारसौकर्याय साहचर्यमनुमोदेत? - इत्याकाङ्क्षायां निरतिशयवात्सल्यरूपेण सख्येनेति विभावनाय सख्यप्रतिपादको **द्वा सुपर्णे**ति मन्त्र उपन्यस्तः। तथाविधे वात्सल्ये हेतुप्रदर्शनाय स्वविभूतिभूतेति विशेषणम्। जनकस्य सुतेष्विव स्वीयेषु वात्सल्यं युक्तमिति भावः।

विषयवाक्यमुदाहृत्य तदर्थमुपन्यस्य च संशयबीजं सूचयन् संशयं दर्शयति - **ऋतमि**ति। **सुकृतस्थान** इति। लोक्यतेऽस्मिन्निति व्युत्पत्त्या सुकृतस्य कर्मणो लोके कार्ये ब्राह्मणादिशरीर इत्यर्थः। **परार्थे** इति। (परा उत्कृष्टा मा मतिः ब्रह्मविद्या यत्र जायते तत्परमम्) परार्थे उपासनारूपोत्कृष्टप्रयोजननिदान इत्यर्थः। एभिर्विशेषणैरुपासनाधिकारिणां ब्राह्मणादीनामनुग्रहाय, विशिष्य तेषां शरीरे हृदयगुहायामुपासना-साक्षात्कारयोग्येन, भावलिङ्गरूपेण प्रविष्टस्य परमेश्वरस्योपासकसौकर्यार्थं तत्साहचर्यमनेन मन्त्रेण प्रतिपाद्यते इत्यवगम्यते। इतरथा विशेषणानामेतेषां नैरर्थ्यात्। हृदयगुहामिति गुहापदार्थः। ऋतमवश्यंभावि कर्मफलं पिबन्तावित्यस्यार्थः फलभोक्ताराविति। छायातपाविव विलक्षणाविति छायातपावित्यस्यार्थः। इह जीवेन सह परमेश्वरस्य गुहाप्रवेशाभ्युपगमे तस्यापि दुःखभोक्तृत्वमापद्येतेति शङ्काप्रसक्तेः गुहाप्रवेशसम्भवाऽ-सम्भवाभ्यां संशयमाह - **बुद्धिजीवावित्यादि**।

पूर्वपक्षं दर्शयति **बुद्धिजीवावेवे**ति। **भोक्तृत्वं प्रसिद्धमेवे**ति। जीवस्य भोगोपकरणभूतत्वाद्बुद्धे-श्चक्षुषो रूपग्राहकत्वेनेव भोक्तृत्वव्यपदेशार्हत्वादिति भावः। **तदेवमि**ति। अत्रायं भावः। यदि ब्राह्मणादिशरीर-प्रविष्टो जीवद्वितीयश्चेतनो भवेत्तर्हि जीववदेव तस्यापि मनुष्यादिशरीरानुप्रवेशप्रयुक्तं सुखदुःखादिभोक्तृत्व-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

जीवपरमेश्वरावेव गुहागतौ। तयोरेव 'तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणमि'ति गुहाप्रवेशदर्शनात्।

यदुक्तमीश्वरस्य न भोक्तृत्वमिति तदपि न युज्यते। 'प्राणारामम् आनन्दमि'ति ब्रह्मणोऽप्यात्मारामस्य मनोमात्रविषयस्वरूपानन्दभोगदर्शनात्। तथा पुराणं च,

आत्मशक्त्यमृतास्वादप्रमोदरसिको युवा।
अनन्तपरमानन्दमकरन्दमधुव्रतः।। इत्यादि,

जीवस्य स्वकर्मफलभोक्तृत्वं प्रसिद्धम्। एवं च तयोर्भोगस्य साधारणत्वेन श्रवणेऽपि तत्र विशेषः समाश्रीयते। भोक्तृत्वमविशेषात्। यथा 'राजभृत्यावन्नं भुञ्जाते' इत्यत्र तत्तदुचितान्नविशेषः।

यदुक्तं तयोर्न वैषम्यमिति तन्न। यतो 'नित्यो नित्यानां चेतनश्चेतनानामि'ति श्रुत्या नित्यत्वचेतनत्वादिना जीवेश्वरयोः साम्येऽपि वैषम्यमनादिमलसंबन्धभावाऽभावाभ्यां संभवति। 'ज्ञाज्ञौ द्वावजावीशानीशानावि'त्यादिश्रुत्या ज्ञत्वाऽज्ञत्वस्वातन्त्र्याऽस्वातन्त्र्यादिधर्मवैषम्यं चावगम्यते।

ननु, कथमेतयोः शरीरसंबन्धे समानेऽपि कस्याचिदज्ञत्वादिकानर्थसंबन्धः, कस्यचिदनर्थाभाव इति चेन्न। सुखदुःखयोर्नैकाश्रयतः प्रयोजनम्। किन्तु स्वातन्त्र्यास्वातन्त्र्ये। तथाहि श्रुतिः 'समाने

मज्ञत्वादिना तत्साधर्म्यञ्चावार्यं स्यात्। ततो ब्राह्मणादिशरीर एकस्मिनमुख्यभोक्तृत्वादियुक्तचेतनद्वयासम्भवेन जीवद्वितीयस्याऽचेतनत्वाऽवश्यम्भावाद्बुद्धिरेव तद्द्वितीयेत्यवश्यमभ्युपगन्तव्यमिति।

सिद्धान्तमाह - **जीवपरमेश्वरावेवे**ति। सौत्रमात्मनाविति पदं साध्यनिर्देशार्थमिति, हिरवधारणार्थमिति च भावः।

तद्दर्शनादिति हेतूपपादको हेतुः। परमेश्वरस्य गुहाप्रवेशदर्शनादित्यर्थः। परमेश्वरस्य गुहाप्रवेशदर्शने **तं दुर्दर्शमि**ति मन्त्र उदाहृतः। जीवस्य गुहाप्रवेशे पूर्वपक्षिणो विवादाभावाद्विद्यमानोपि न प्रदर्शितः। **ऋतं पिबन्तावि**ति विशेषणं छत्रिन्यायेन।

ननु, गुहाप्रवेशः परमेश्वरस्य न सङ्गच्छते तस्य मनुष्यादिशरीरप्रवेशे मनुष्यादेरिति तत्प्रयुक्तदुःखभोक्तृत्वप्रसङ्गात्। परशरीरानुप्रविष्टस्यापि पिशाचादेस्तत्ताडनादीना दुःखदर्शनात्। अतः **तं दुर्दर्शमि**ति मन्त्रे, **अन्तः प्रविष्ट** इत्यादिश्रुत्यन्तरेषु च परमेश्वरस्य शरीरप्रवेशश्रवणं गौणतया नेतव्यम्। यथा राजकीयानां देशव्याप्तिरेव राज्ञो देशव्याप्तिरिति व्यपदिश्यते तथा परमेश्वरनियम्यानां जीवानां शरीरानुप्रवेशः परमेश्वरस्य तत्प्रवेश इति व्यपदिश्यते। एवं परमेश्वरस्य शरीरे प्रवेशासम्भवाद्गुहां प्रविष्टौ बुद्धिजीवावित्येवाऽभ्युपगन्तव्यमित्यभिप्रेत्य शङ्कते - **नन्वि**ति। परिहारमाह - **सुखे**ति। गुहाप्रवेशः परमेश्वरस्य गौणतया

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः। जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः' इति।

अस्याः साम्प्रदायिकोऽर्थः -

जीवोऽयमनादिना कर्मनिगलेन बद्धस्तत्तत्फलभोगानुगुणमायामय बहुकलेबरप्रविष्टो-दुर्वारतापसंघातमनुभवन्ननीशया पापवश्येन तद्व्यपोहितुमकुशल एव मुह्यमानः शोचति महामोहनिबन्धनशोकजलधिमग्नो वर्तते, स्वप्रेरकतया जुष्टं सर्वानुग्राहकमीशमुमासहितं यदाऽसौ पुनरस्य प्रसादेन पश्यति अपरोक्षेण जानाति, तदाऽस्य महिमानं निरतिशयमपहतशोकः प्राप्नोतीति।

अतः स्वतन्त्रस्य शिवस्यानादिमुक्तस्य शरीरसंबन्धेऽपि जीववत् न तद्गतदोषापत्तिः। तस्माज्जीवपरमेश्वरावेव गुहागतौ।

पुनरुपपत्तिमाह -

विशेषणाच्च ।।१-२-१२।।

योजयितुं न शक्यः। राजकीयव्याप्तेरेव राजव्याप्तित्वोपचारस्थले राजतदीया देशं व्याप्नुवन्तीति व्यपदेशदर्शनादिति भावः।

भोक्त्रापत्त्यधिकरणेपि परमेश्वरस्य चिदचिदात्मकसकलप्रपञ्चशरीरत्वे मनुषादिवच्छरीरत्वप्रयुक्तं सुखदुःखभोक्तृत्वं स्यादिति पूर्वपक्षनिराकरणार्थमेव वक्ष्यते **न खलु शरीरत्वप्रयुक्तमनिष्टभोक्तृत्वं किन्तु पराधीनप्रयुक्तमेवे**ति। तथापि न पौनरुक्त्यम्। यतस्तत्राऽस्वातन्त्र्यस्य प्रयोजकत्वं लौकिकयुक्त्या स्थापयिष्यते। अत एव तत्र **लोकवदि**ति सूत्रम्। इह तु तत् श्रुत्या स्थाप्यते। श्रुतिमुदाहरति - **तथाही**ति। समाने एकस्मिन्वृक्षे शरीररूप इत्यर्थः। निमग्न इत्यनेन जीवस्य शरीरप्रवेशेन अगाधजलमज्जनेनेव तत्कृतक्लेशभाक्त्वं दर्शितम्। शोककारणमाह - **अनीशये**ति। ईश ऐश्वर्य इति धातोर्भावे **गुरोश्चहल** इत्यकारप्रत्यये सति, ईशशब्द ऐश्वर्यवाची। अनीशया पारतन्त्र्येणेत्यर्थः। **मुह्यमान** इति - **ताच्छील्ये चानश्प्रत्ययः**। अनादिसिद्धाज्ञानावृत्त इत्यर्थः। जुष्टमुपासनया प्रीतम्, अन्यं स्वस्मादितरम्। ईशमिशा स्वातन्त्र्यशक्तिः, साऽस्याऽस्तीति मत्वर्थीयोऽच्प्रत्ययः। उमासहितमित्यर्थः। अस्य महिमानं सार्वज्ञ्यादिकं रूपम्, इति प्राप्नोति। एतेर्लेटि गुणाभावश्छान्दसः। मन्त्रवाक्यतात्पर्यं दर्शयति - **अस्या** इति। एवं शरीराश्रयणप्रयुक्तदुःखभोगस्य पारतन्त्र्यप्रयुक्तत्वात्स्वतन्त्रस्य परमेश्वरस्य मनुष्यादिशरीरानुप्रवेशेऽपि न तत्प्रयुक्तदोषप्रसङ्ग इत्युपसंहरति - **अत** इति।

उत्तरसूत्रमवतारयति - **पुनरि**ति। युक्त्यन्तरमुच्यत इति भावः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

जीवपरमेश्वरावस्मिन्प्रकरणे विशेष्येते 'न जायते म्रियते वा विपश्चित्' इत्यादिना जीवः, 'अणोरणीयान्महतो महीयान्' इत्यादिना परमेश्वरश्च। एतद्विशेषणं जीवबुद्धिपक्षे कथं संभवति? अतो जीवपरमेश्वरावेव गुहां प्रविश्य प्रेर्यप्रेरकभावेन शरीरशरीरिभावेन च स्थिताविति निर्णयः।

।। इति गुहाधिकरणम् ।।

***

अथाऽन्तरधिकरणम् १७

हृदयगुहान्तरर्वर्तितयोपास्यस्य परमेश्वरस्य इहोपासनास्थानान्तरमुच्यते -

अन्तर उपपत्तेः ।।१-२-१३।।

जीवपरमेश्वराविति। अत्राऽयं भावः। पूर्वोत्तरसन्दर्भपर्यालोचनायामपि गुहाप्रविष्टौ जीवपरमेश्वरावेवेति लभ्यते। बहुषु मन्त्रेषु मन्तृमन्तव्यत्वेन, द्रष्टृद्रष्टव्यत्वेन, प्राप्तृप्राप्तव्यत्वेन च तयोरेव बहुधा विशेषितत्वेन बुद्धिजीवपक्षोऽयुक्त इति। अधिकरणार्थमुपसंहरति - **अत** इति।

अत्र गुहाप्रवेशस्य श्रुत्यन्तरप्रसिद्ध्या ब्रह्मधर्मत्वेन स्पष्टस्यापि पूर्वपक्षदशायां ब्रह्मधर्मत्वाऽसम्भवशङ्काकलुषितत्वान्नातिस्पष्टतेति पादसङ्गतिः।

卐 卐 卐

इदमधिकरणं शुद्धाद्वैतिनां प्रतिकूलमेव। जीवेश्वरयोर्गुहाप्रवेशवर्णनेन भेदस्य कण्ठरवेणोक्तत्वात्। यद्यपि अविद्याकृतत्वात्संसारित्वस्य पारमार्थिकत्वादसंसारित्वस्येत्यविद्यामाश्रित्य परैस्तितीर्षितः शास्त्राम्भोधिः। अत एव तेषां शास्त्रं प्रतिकूलमित्यलं बहुना।

।। इति गुहाधिकरणम् ।।

***

अथ अन्तरधिकरणम्

सङ्गतिं दर्शयन्नुत्तराधिकरणमवतारयति - **हृदयगुहेति**। उपासने नेदिष्ठोपासनास्थानप्रदर्शनप्रसङ्गात्तथाभूतस्यैवोपासनास्थानान्तरस्य प्रदर्शनार्थमधिकरणान्तरमारभ्यत इत्यर्थः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

छान्दोग्ये श्रूयतेऽस्य विषयः। 'य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाच। एतदमृतमभयमेतद्ब्रह्म' इत्यादि।

इहाऽमृतत्वादिलक्षणोऽक्ष्यन्तः श्रूयमाणः पुरुष ईश्वरो वा ? अन्यो वा इति संशये परमेश्वरादन्य इति वदामः।

परमेश्वरस्य 'दहरं विपाप्मम्', 'पद्मकोशप्रतीकाश'मित्यादिषु च हृदयपुण्डरीक एव सन्निधानश्रवणात्। जीवस्य रूपादिग्रहणे चक्षुरिन्द्रियादिप्रवेशोऽस्ति मनस्संबन्धात्। स एवाऽक्षिपुरुषः। अथवा छायापुरुष इति प्राप्ते निरूपयामः –

विषयवाक्यमुदाहृत्य संशयं दर्शयति - **छान्दोग्य** इत्यादिना। एवं छन्दोगानामुपनिषद्याम्नायते -

उपकोसलः कामलायनः सत्यकाममाचार्यमुपसन्नः तस्य द्वादशवर्षाण्यग्नीन्परिचरन्नास। तस्मै ब्रह्मोपदेशमकृत्वैवाचार्ये प्रोषिते सत्याधिव्याधिपरवशमनश्नन्तं तदाद्याचार्याग्निपरिचर्यायामवहितं तमवेक्ष्य गार्ह्यपत्यदक्षिणाग्राहवहनीयास्त्रयोप्यग्नयः सम्भूय करुणया तस्मै **प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म** इत्यादिना ब्रह्मविद्यामुपदिश्य प्रत्येकं च स्वस्वविषयां विद्यां **य एष आदित्ये पुरुषो दृश्यते सोऽहमस्मि स एवाहमस्मी**त्यादिना, **य एष चन्द्रमसि पुरुषो दृश्यते** इत्यादिना, **य एष विद्युति पुरुषो दृश्यते** इत्यादिना चोपदिदिशुः। तदनन्तरं सर्वेऽप्यग्नयः सम्भूय **एषा सोम्य तेऽस्मद्विद्या चे**त्यभिधाय **आचार्यात्त्वेव विद्या विदिता साधिष्ठं प्रापदि**ति श्रुत्यनुसारेण स्वोपदिष्टविद्या तदाचार्यकर्तृकगत्युपदेशेन साधिष्ठत्वं प्राप्नोत्वित्यालोच्य **आचार्यस्तु ते गतिं वक्ते**त्यवोचन्। ततः प्रत्यागत आचार्यः प्रसन्नमुखमुपकोसलं वीक्ष्य **ब्रह्मविद इव ते सोम्य मुखं भाति को नु त्वामनुशशासे**ति पृष्ट्वा सहाग्निभिर्भीते तस्मिन्नग्नयोऽस्मा उपदिदिशुरिति निश्चित्य **किं नु सोम्य किल तेऽवोचन्नि**ति पृष्ट्वा एतावदुपदिषन्निति तेनोक्ते तत्र वक्तव्यशेषोऽस्तीत्यवधार्य **अहं तु ते तद्वक्ष्यामि - यथा पुष्करपलाश आपो न श्लिष्यन्ते एवमेवंविधि पापं कर्म न श्लिष्यते** इति स्ववक्तव्यं प्रतिज्ञाय, **ब्रवीतु मे भगवानि**ति तेन प्रार्थितः संयद्वामत्वादि गुणकमक्षिपुरुषमुपदिश्य तदुपासकस्य **अर्चिषमेवाऽभिसम्भवन्ती**त्यादिना **एष देवपथो ब्रह्मपथः। एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्त** इत्यन्तेनाऽर्चिरादिमार्गप्राप्त्यन्तं पुनरावृत्तिरहितं प्राप्तिफलमुपदिदेशेति।

अत्र **य एषोऽक्षिणी पुरुषो दृश्यत** इति वाक्ये अक्षिणी दृश्यमानः पुरुषः परमेश्वरो वा, अन्यो वेत्यनेन जीवो वा छायापुरुषो वेत्यर्थः। एवं संशयं प्रदर्श्य पूर्वपक्षं दर्शयति - **परमेश्वरस्ये**त्यादिना। एष इति प्रसिद्धवन्निर्देशा दृश्यते इत्यपरोक्षतयाऽभिधानाच्चेत्यर्थः। एवं जीवो छायापुरुषो वाऽक्षिपुरुषः। न

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

परमेश्वर एवाऽक्ष्यन्तः पुरुषः इति। निरूपाधिकामृतत्वाभयत्वादीनामस्मिन्नेवोपपत्तेः।

यदुक्तमक्ष्यन्तःस्थितिरीश्वरस्य न श्रुतेति तत्राऽऽह -

स्थानादिव्यपदेशाच्च ।।१-२-१४।।

'यश्चक्षुषि तिष्ठन् चक्षुषोन्तरः। यं चक्षुर्न वेद यस्य चक्षुः शरीरं, यश्चक्षुरन्तरो यमयति एष त आत्माऽन्तर्याम्यमृतः' इति श्रुत्या चक्षुः स्थितिनियमनादिकमीश्वरस्य व्यपदिश्यते। तत एव दृगङ्गे शिवलिङ्गं स्यादिति दिव्यागमे प्रसिद्धम्। अतः पर एवाऽयमीश्वरः।

छायापुरुषपक्षे पुनरनुपपत्तिमाह -

सुखविशिष्टाभिधानादेव च ।।१-२-१५।।

'कं ब्रह्म खं ब्रह्म' इति पूर्वमस्य सुखविशिष्टतयाऽभिदानादेवाऽयमीश्वरः। नहि छायापुरुषे सुखसंभवः।

परमेश्वर इति प्राप्ते पूर्वपक्षद्वयव्यावर्तकं सिद्धान्तमाह - **परमेश्वर एव** इति। **निरुपाधिकेति**। अत्राऽयमाशयः। स्वाभाविकममृतत्वादिकं जीवस्य न सम्भवति। किमुत, प्रतिबिम्बस्य। अतोऽमृतत्वादिकं परमेश्वर एवोपपद्यते। तस्माद् ब्रह्म श्रुत्यमृतत्वाऽभयत्वसंयद्वामत्ववामनीत्वभामनीत्वलिङ्गैर्बहुभिरेतद्ब्राह्मेत्यादिवाक्येन चाऽक्षिपुरुषः परमेश्वर एवेति सिद्धमिति भावः।

अक्ष्याधारत्वं परमेश्वरे न प्रसिद्धमस्तीति शङ्कासमाधानत्वेनोत्तरसूत्रमवतारयति - **यदुक्तमिति**।

अन्तर्यामिब्राह्मणे तिष्ठन्नित्यवस्थानवाचकशब्दस्य श्रूयमाणत्वात्परमेश्वरस्य स्वमहिमप्रतिष्ठस्याप्युपासनार्थं शिवलिङ्गरूपेणाऽक्ष्याधारत्वं विवक्षितमिति भावः। इह पुरुषो दृश्यत इत्युपासनाकाले वर्तमानत्वव्यपदेशादपि तस्य तद्विवक्षितमिति गम्यते। दृगङ्ग इति सर्वाङ्गलिङ्गसाहित्यप्रकरणे वातूलोत्तरे निगदितमित्यर्थः। सूत्रे स्थानादीत्यादिग्रहणेन विवक्षितं विशेषमाह - **नियमनादिकमिति**।

प्रतिबिम्बपरपूर्वपक्षानुपपत्तिप्रदर्शनार्थत्वेनोत्तरसूत्रमवतारयति - **छायेति**।

कं ब्रह्मेति - प्रकरणादप्यक्षिस्थः परमेश्वर एव। **'प्राणो ब्रह्म, कं ब्रह्म, खं ब्रह्म'** इति वाक्ये श्रुतस्य सुखविशिष्टस्य ब्रह्मण एवाऽभिधानादित्यर्थः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यदुक्तमक्षिपुरुषस्य जीवरूपत्वं, तत्राह -

अत एव स ब्रह्म **।।१-२-१६।।**

यत एव भवभयभीताय उपकोसलाय ब्रह्मजिज्ञासवे 'कं ब्रह्म, खं ब्रह्म' इत्युपक्रम्योपदिष्टं, 'यदेव कं तदेव खम्, यदेव खं तदेव कमि'ति। अत एव खशब्दाभिधेय आकाशः परमेव ब्रह्म। किमीदृशोपपत्तिरस्ति जीवस्य? नहि जीवे निरतिशयसुखसंभवः। अतो यदेव पूर्वमपरिच्छिन्न-

---

अथ अक्षिणि दृश्यतया निर्दिष्टो जीव इति शङ्कानिराकरणार्थेनोत्तरसूत्रमवतारयति - **यदुक्तमिति**।

भवभयभीतायेति - ननु उपकोसलः भवभयभीत्या ब्रह्मजिज्ञासुरिति कुतो विज्ञायत इति चेदुच्यते। एवं हि तत्र पूर्वप्रसङ्गः - उपकोसले द्वादशवर्षाण्यग्निपरिचरणपूर्वकं गुरुकुलवासं कृतवत्याचार्ये च तत्सहगतानन्यानन्तेवासिनः समावर्त्याऽपि तमसमावर्त्यैव प्रवासोद्युक्ते तं दृष्ट्वा तज्जायया **सम्यगयमग्नीनुपकोसलः पर्यचारीदस्मा अनुपदिश्य प्रवासे अग्नय एव त्वां शपेयुरतोऽवश्यमयमुपदिश्य समावर्तनीय इति प्रार्थितोऽपि तदविगणय्य प्रोषिते सत्युपकोसलश्चिन्तापरितस्तत्प्रयुक्तव्याध्यभिभूतोऽनश्नन्नेव कञ्चित्कालमग्नीन्परिचचार। तमाचार्यजायोवाच, ब्रह्मचारिन्नशान किं नु नाश्नासीति**। तत्र खल्विदं प्रतिवचनम् - **व्याधिभिः परिपूर्णोऽस्मि नाशिष्यामीति**। अतः प्रकरणानुसारेणात्र व्याधिशब्दस्य उपदेशालाभप्रयुक्तचिन्तैवेत्यवगम्यते। उपक्रमे तावत् **उपकोसलो ह वै कामलायनः सत्यकामे जाबाले ब्रह्मचर्यमुवासेति** वाक्ये ब्रह्मचर्यशब्दः ब्रह्मोपदेशलाभार्थव्रतग्रहणपूर्वकगुरुकुलवासपरः, न तु वेदग्रहणार्थं प्रसिद्धोपकुर्वाणब्रह्मचर्यवासपरः। अग्रे वेदोपदेशस्याऽकीर्तनात्। उपासनाफलयोरेव कीर्तनाच्च। एवं ब्रह्मोपदेशार्थगुरुकुलवासलिङ्गादयं भवभयभीत्या ब्रह्मजिज्ञासुरित्यवसीयते। अत एवाऽतिचिरं गुरुकुलवासक्लिष्टायैव ब्रह्मविद्योपदेष्टव्येति मत्वा वेदोपदेशार्थिषु समावर्तिष्वप्ययं न समावर्तित इत्यपि सङ्गच्छत इति भावः।

किमीदृशेति - भवभयभीतायोपदेशत्वं जीवस्य नोपपद्यते इत्यर्थः। उपासनाफलप्रतिपादकवाक्येभ्योऽपि ब्रह्मैवेति विज्ञायते। तथाहि **सर्वाण्येवैनं वामान्यभिसंयन्ति य एवं वेद सर्वाणि वामानि नयति, य एवं वेद सर्वेषु लोकेषु भाति य एवं वेद** इति वाक्यान्यपि फलवर्णनात्मकानि। इहाऽऽद्येन वाक्येन हि सङ्कल्पमात्रसाध्यनिखिलाभिमतवस्तुप्राप्तिमत्त्वं दहरविद्यायां ब्रह्मविद्याफलत्वेन प्रसिद्धं वर्ण्यते।

द्वितीयवाक्येन स्वभक्तेष्टसकलवस्तुप्रापकत्वं **यं यं लोकं मनसा संविभातीत्यत्र** श्रुतौ तत्फलत्वेन प्रसिद्धं वर्ण्यते। तृतीयवाक्येन **स स्वराड् भवति तेषां सर्वेषु लोकेषु कामचारो भवतीत्यादि**श्रुतिप्रसिद्धं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सुखरूपतया प्रकृतं ब्रह्म तदेवाक्ष्याधारतया प्रतिपाद्यत इति अक्ष्यन्तः पुरुषः परमेश्वरः।

पूर्वपक्षे पुनरियमप्यनुपपत्तिरित्याह -

श्रुतोपनिषत्कगत्यभिधानाच्च ।।१-२-१७।।

श्रुतब्रह्मस्वरूपाणामधिगन्तव्याय अर्चिरादिगतेरक्षिपुरुषं श्रुतवतः 'अर्चिषमेवाभिसम्भवत्यर्चिषोह रह्न' इत्यादिना, 'तत्पुरुषोऽमानवः स एतान् ब्रह्म गमयति स एव देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्त' इत्यन्तेनाभिधानात् नासौ जीवः छायापुरुषो वा किन्त्वीश्वर एव।

।। इति अन्तरधिकरणम् ।।

***

तत्फलं वर्ण्यते। तत्फलोपपादकत्वेन च तद्वाक्येभ्यः प्राग्ब्रह्मणः संयद्वामत्व-वामनीत्व-भामनीत्वगुणा विधीयन्ते। अग्रे **इमं मानवमावर्तं नावर्तन्ते** इति ब्रह्मप्राप्त्यनन्तरमनावृत्तिलक्षणं फलं वर्ण्यते। तच्चामृतत्वाभयत्वविशिष्टतया **अथ मृतोऽमृतो भवति अथ सोऽभयं गतो भवतीत्यादि**श्रुतिषु प्रसिद्धमिति तदुपपादकत्वेनामृतत्वाभयत्वगुणौ विधीयेते। विद्यान्तरेष्वनुपदिष्टः फलविशेषोऽप्यत्रास्ति।

अथ खलु चैवास्मिन् शव्यं कुर्वन्ति यदुच नार्चिषमेवाभिसंयन्तीति। अत्र ह्ययमर्थः -

अस्मिन्नक्षिस्थशिवलिङ्गोपासके मृते पुत्रादयः शवकर्म पैतृमेधिकं संस्कारादिकं यदि कुर्वन्ति, यदि वा न कुर्वन्ति, उभयथाऽपि तस्यार्चिरादिगतिप्राप्तिरवश्यम्भाविनीति। अनेन विद्यान्तरोपासकानां शवकर्माऽकरणे अर्चिरादिगतिप्राप्तौ कञ्चित्कालं प्रतिबन्धः प्रतीयते इत्यस्मिन्नक्षिनिष्ठशिवलिङ्गोपासनायाममसाधारणो विशेषः। तस्मादक्षिण्युपास्यः परमेश्वर एव नान्य इति सिद्धमित्याशयः।

उत्तरसूत्रमवतारयति - **पूर्वपक्ष** इति। **पूर्वपक्षद्वय** इत्यर्थः।

श्रुतमनुष्ठितमुपनिषद्विहितमक्षिपुरुषोपासनं यैस्तेषां ब्रह्मप्राप्तिसाधनभूताया अर्चिरादिगतेरभिधानाच्चायमक्षिपुरुषो जीवो वा छायापुरुषो वा न भवति। किन्तु परमेश्वर एवेत्यर्थः।

अत्र ब्रह्मश्रुत्यादीनामितिशब्दशिरस्कत्वेऽनाविवक्षितार्थत्वशङ्काकलुषितत्वाद् ब्रह्मप्रकरणानुबन्धस्य मार्गाभिधानमात्रविषयत्वशङ्काक्रान्तत्वान्नातिस्पष्टतेति पादसङ्गतिः।

।। इति अन्तरधिकरणम् ।।

***

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ अनवस्थित्यधिकरणम् १८

अनवस्थितेन सम्भवाच्च नेतरः ।। १-२-१८ ।।

अस्य महोपनिषदि श्रूयते विषयः - 'अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं च समाश्रितः। ईशः सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुगि'त्यादि।

इहाङ्गुष्ठमात्रत्वादिविशिष्टः परमेश्वरो वा? अन्यो वा? इति संशयः।

प्राणाग्निहोत्रप्रकरणादङ्गुष्ठमात्र इत्यल्पत्वव्यपदेशाच्चायं प्राणवायुरेव पञ्चानामाहुतीनां भोक्तावगम्यते। न च भोक्तृत्वानुपपत्तिः। 'आपश्च पृथिवी चान्नमत्तारौ वह्निमारुतावि'त्यादिषु वायोरपि भोक्तृत्वप्रसिद्धेः सर्वथाऽयं प्राणवायुरिति पूर्वपक्षः।

परमेश्वर एवेति सिद्धान्तः। सकलजगदीश्वरत्वविश्वभुक्त्वादीनां धर्माणामन्यत्रा-

---

अथ अनवस्थित्यधिकरणम्

अत्राऽपि पूर्वाधिकरण इव उपासके नेदिष्ठस्थानान्तरं प्रदर्श्यते। अतः प्रसङ्गसङ्गतिः। दृष्टान्तप्रत्युदाहरणरूपाऽन्यापि सङ्गतिः पूर्वपक्षेण व्यक्तीभविष्यति। विषयवाक्यमुदाहरति - **अङ्गुष्ठमात्र** इति।

प्राणलिङ्गप्रकरणयोः ब्रह्मलिङ्गयोश्च प्राबल्यदौर्बल्यानिर्णयात्संशयं दर्शयति - **अन्यो** वेति। ब्रह्मप्रकरणादक्षिपुरुषो यथा ब्रह्म, तथा प्राणाग्निहोत्रप्रकरणादङ्गुष्ठमात्रपुरुषः प्राण इति पूर्वपक्षं दर्शयति - **प्राणे**ति।

ईशः सर्वस्य जगतः इत्यस्य धारणेन पतनाभावं सम्पाद्य, स्थानासनगमनादिषु सर्वेषामपि देहान्नियम इति प्राणेप्युपपद्यते इत्यर्थः। **ईशानमस्य जगतः सुवर्दृशमि**त्यत्र जङ्गममात्रपरतया जगच्छब्दस्य प्रयुक्ततया, तथेहापि कार्यसामान्यपरत्वं विहाय जङ्गममात्रपरत्वाभ्युपगमेनोपपद्यते इति भावः। **सर्वथे**ति। यदि जगच्छब्दो जङ्गममात्रपरः कार्यसामान्यपरो वा सर्वथाप्यङ्गुष्ठमात्रः प्राणवायुरेव प्राणलिङ्गस्य प्रकरणस्य च बाधकाभावादिति भावः।

सिद्धान्तमाह - **परमेश्वर एवे**ति। जगच्छब्दोऽत्र रूढ्या भूतादिषु लोकादिषु वा वर्तते। रूढिसम्भवे योगग्रहणमयुक्तम्। विश्वशब्दश्च भुजिविषयभोग्यसामस्त्यपरः। न तु प्राणाहुतिसामस्त्यमात्रपरः सङ्कोचे कारणाभावात्। न च सर्वलोकेश्वरत्वं विश्वभोक्तृत्वं च ब्रह्मणीव प्राणेऽभ्युपगन्तुं युज्यते प्राणे

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भिधानेऽनवस्थानादसम्भवाच्च तत्र तेषाम्। अत ईश्वर एवैतादृशः। तस्य प्राणरूपत्वेनाप्युपास्यत्वमुच्यते। 'प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तक' इति प्राणाधारत्त्वेन तस्य श्रवणात्। अङ्गुष्ठमात्रपरिमाणस्योपास्यत्वादविरोधः। प्राणवायोर्भोक्तृत्वसिद्धावपि विश्वभोक्तेत्येतन्न सम्भवति।

तयोरसम्भवात्। **एतस्माज्जायते प्राण** इति ब्रह्मसृज्यत्वेन

न प्राणेन नाऽपानेन मर्त्यो जीवति कश्चन।
इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ।।

इति ब्रह्माश्रयाधीनस्वकार्यकरणशक्तिकत्वेन प्राणः श्रूयते। कथमयमसङ्कुचितसर्वजगदीशिता वा सर्वभोक्ता वा स्यात्? तस्मादुदाहृतब्रह्मलिङ्गद्वयानुसारादङ्गुष्ठमात्रः परब्रह्मरूपः शिव एवेति भावः।

ननु प्राणाग्निहोत्रप्रकरणाम्नानादुपक्रमगतप्राणवायुलिङ्गवशाच्च प्राणाहुत्याराधितप्राणविषय एवायं मन्त्रः स्यादित्याशङ्क्य, प्रकरणमविरोधेन सङ्गमयति - **तस्ये**ति। **प्राणरूपत्वेने**ति। प्राणादिशब्दानामन्तर्यामिपर्यन्तत्वे प्रमाणमाह - **प्राणानामि**ति। **तेनान्नेनाप्यायस्वे**ति मन्त्रशेषः। अङ्गुष्ठमात्र इति मन्त्रात्प्राक् **प्राणानां ग्रन्थीरसी**त्यादिमन्त्र आम्नायते। तेन परमेश्वरं प्रति प्रार्थना क्रियते। **त्वं खलु प्राणानां ग्रन्थिः ग्रथयिता व्यवस्थापकोऽसि। अतस्त्वमन्तकः संहारकर्ता रुद्रो भूत्वा मां प्रविश। तेन कालाग्निरुद्रात्मना अशितमन्नं पक्त्वा अन्नवीर्येण मामाप्यायितं कुर्वि**ति मन्त्रार्थः। **रुद्रो वा एष यदग्निस्तस्यैते तनुवौ घोरान्या च शिवान्ये**ति परमेश्वरस्य द्विविधं रूपं प्रसिद्धम्। तस्य भोजनकाले जाठराग्निज्वालाशान्त्यर्थं शिवरूपेणान्तर्भोक्तृतया सन्निधानं **प्राणे निविष्टोऽमृतं जुहोमी**ति **शिवो मा विशाऽप्रदाहाये**त्यादिभिः प्राणाहुतिमन्त्रैः प्रार्थितम्। भोजनानन्तरं जठराभिमर्शनमन्त्रेणानेन भुक्तान्नपरिणामकृतदेहाप्यायनेन प्राणानां निश्चलतया देहेऽवस्थानसिद्धये रुद्ररूपेणान्तःपक्तृतया सन्निधानं प्रार्थ्यते। अतोऽत्र मन्त्राणामन्तर्यामिप्रधानत्वात्प्राणे निविष्ट इत्यादिमन्त्राणां प्राणात्मनि त्वय्यभिनिविष्टो भक्तः सन्नमृतं जुहोमीत्यादिरर्थो ग्राह्य इति भावः।

ब्रह्मलिङ्गमुपपादयति - **अङ्गुष्ठमात्रे**ति। सर्वव्यापिनोऽपि परमेश्वरस्य उपास्यतया अङ्गुष्ठपरिमाणत्वमङ्गुष्ठसमाश्रयणं चोपपद्यते इति भावः। जठराभिमर्शनानन्तरं दक्षिणपादाङ्गुष्ठे पाणिजलस्रावणार्थोऽयं मन्त्रः। ततश्च ब्रह्माण्डमूलभूताधारलोकस्थितकालाग्निरुद्रात्मना पिण्डधारभूते पादाङ्गुष्ठे परमेश्वरं ध्यात्वा तत्प्रीत्यर्थं पाणिजलस्रावणमनेन मन्त्रेण कर्तव्यमिति पर्यवस्यति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अतोयमीश्वर एव प्राणाग्निहोत्राराध्यत्वेन प्राणरूपः प्रतिपाद्यत इति सिद्धम्।

।। इति अनवस्थित्यधिकरणम् ।।

***

अथाऽन्तर्याम्यधिकरणम् १९

सर्वज्ञस्य सर्वशक्तेः सर्वानुग्राहकस्य विभोरपि शिवस्य परब्रह्मणः सवितृमण्डलपुरुषहृदय पुण्डरीकादिषूपासनाय स्थितिरुपपादिता। सर्वत्र तां प्रतिपादयितुमिदमधिकरणमारभ्यते।

***अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात्* ।। १-२-१९ ।।**

अन्तर्यामिब्राह्मणेऽस्य विषयः श्रूयते। 'यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति एष त आत्मान्तर्याम्यमृत' इति।

प्राणवायोरिति - इह विश्वभुगित्यस्य असङ्कुचितसकलहव्यकव्यभोक्तृत्वरूपपरमेश्वर-लिङ्गसमर्पकतया जगदीशत्वविश्वभुक्त्वादिधर्माणां पारमेश्वराणामन्यत्र समन्वयेऽनवस्थानादसम्भवाच्च, अस्मिन्मन्त्रे अङ्गुष्ठमात्रशब्दितः परमेश्वरः एव; न प्राणवायुरित्यर्थः।

नन्वत्र परमेश्वरस्याङ्गुष्ठमात्रत्वेनोपास्यत्वमुक्तं तन्नोपपद्यते। प्राणाग्निहोत्रकर्मान्वयिदेवतारूपपरमेश्वर-प्रकाशकानां मन्त्राणामुपास्यबोधकत्वाभावादित्याशङ्कां निराकुर्वन्नधिकरणार्थमुपसंहरति - **अत** इति। कर्माराध्यत्वेन प्रतिपाद्यस्याऽपि परमेश्वरस्य कर्मकाले ध्यातव्यत्वादुपास्यत्वमविरुद्धमित्यर्थः। कर्मान्वयिदेवता-विचारपरस्याधिकरणस्य मुमुक्षूपास्यविचारपरेऽस्मिन् शास्त्रे प्रवर्तनस्य प्रयोजनं वैश्वानराधिकरणे प्रदर्श्यते।

।। इत्यनवस्थित्यधिकरणम् ।।

***

अथ अन्तर्याम्यधिकरणम्

सङ्गतिं दर्शयन्नुत्तराधिकरणमवतारयति - **सर्वज्ञस्येति**। सर्वज्ञत्वं सकलप्रपञ्चापरोक्षीकर्तृत्वम्। सर्वशक्तिमत्वं सर्वोपादानत्वम्। सर्वानुग्राहकत्वं सर्वस्यापि सत्तास्फूर्तिप्रदत्वम्। विशेषणत्रयमिदं विभुत्वोपपादकमेव।

उपासनाय स्थितिरुपपादिता। सर्वत्र तामित्यनेन प्रसङ्गसङ्गतिरिहेति व्यक्तम्। विषयवाक्यमुदाहरति - **अन्तर्यामिब्राह्मण** इति। बृहदारण्योपनिषदन्तर्गत इत्यर्थः। सत आत्मेति माध्यन्दिनपाठः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एवं पृथिवीमारभ्य प्रतिपर्यायमव्यक्तात्मतत्त्वपर्यन्तमखिलवस्त्वन्तर्यामितया श्रूयमाणः परमेश्वरो जीवो विराट्पुरुषो वा प्रधानं वेति संशयः।

स्वोपार्जितविचित्रफलभोगाय सकलभूतेन्द्रियानुप्रवेशो जीवस्य युज्यते सकलचेतनोपादानतया सर्वभूतानुप्रवेशो विराट्पुरुषस्य युक्तः।

अथवा महदादिरूपेण परिणतत्वात्प्रधानस्य सर्वव्यापकत्वमुचितम्। 'विश्वाधिको रुद्र' इति विश्वाधिकत्वेन निखिलविकारोत्तीर्णस्य परमेश्वरस्य विकाररूपप्रपञ्चानुप्रवेशो न घटते। ततः परमेश्वरमन्तरेण जीवादिष्वेकतमः स्यादन्तर्यामीति पूर्वपक्षे प्राप्ते ब्रूमः।

पृथिव्याद्यन्तर्यामितया श्रूयमाणः परमेश्वर एव सर्वान्तरत्वादितद्धर्मव्यपदेशात्। अथर्वशिरसि 'सोन्तरादन्तरं प्राविशदि'ति परमेश्वरस्यैव सर्वात्मतयानुप्रवेशदर्शनात्। 'स त आत्मान्तर्याम्यमृत'

पृथिवीमारभ्येति। पृथिवीजलाग्न्यन्तरिक्षवाय्वादित्यदिक्चन्द्रतारकातमःप्रभृतिष्वात्मपर्यन्तेष्वखिलवस्तुष्वन्तर्यामितया श्रूयमाणः परमेश्वरस्तदन्यो वेति परमेश्वरे हेयप्रपञ्चानुप्रवेशसम्भवासम्भवाभ्यां प्रथमं संशयः। ततस्तदन्यकोटौ जीवो विराट्पुरुषः प्रधानं वेति। पृथिव्याद्यनुप्रवेशस्य जीवादित्रयसाधारण्यात्संशयः।

जीवपक्षे तावत्सर्वानुप्रवेशमुपपादयति - **स्वोपार्जितेति**। **'योन्तरो यमयती'**त्येकवचनं जीवसमुदायाभिप्रायम्। द्वितीयपूर्वपक्षमुपपादयति - **सकलेति**। सुबालोपनिषदि - **'यस्य पृथिवी शरीरं, यः पृथिवीमन्तरे संचरन्यं पृथिवी न वेद, यस्यापः शरीरमि'**त्याद्युपक्रम्य **'एष सर्वभूतान्तरात्मा अपहतपाप्मा दिव्यो देव एको नारायण'** इत्यन्तर्यामिणि नारायणपदप्रयोगः सङ्गच्छते। **अथवे**त्यनेन तृतीयपूर्वपक्षे स्वारस्याभावो व्यञ्जितः। अचेतनस्य प्रधानस्य व्यापकत्वेपि तस्मिन् **अदृष्टो द्रष्टा, अश्रुतः श्रोता, अमन्तो मन्ता, अविज्ञातो विज्ञातेति** वाक्यशेषे श्रुतानामदृष्टत्वादीनां सम्भवेऽपि द्रष्टृत्वादीनामात्मश्रुतेर्नियन्तृत्वस्य च मुख्यतया तस्मिन्नसम्भवात्।

सूत्रं व्याकुर्वन् सिद्धान्तयति - **पृथिव्यादीति**। आधिदैवाधिलोकादिष्वन्तर्यामीत्यस्य विवरणं **पृथिव्याद्यन्तर्यामीति**। अन्तर्यामिब्राह्मणे पृथिव्यादिस्तनयित्न्वन्तमधिदैवम्। यः सर्वेषु लोकेष्वित्यधिलोकम्। यः सर्वेषु वेदेष्वित्यधिवेदम्। यः सर्वेषु यज्ञेष्वित्यधियज्ञम्। यः सर्वेषु भूतेष्वित्यधिभूतम्। प्राणवाक्चक्षुःश्रोत्राद्यात्मान्तमध्यात्मम्।

सर्वान्तरत्वस्य परमेश्वरधर्मत्वं क्व प्रसिद्धमित्याकांक्षायामाह - **अथर्वशिरसीति**। अमृतशब्दोक्तमनादिमुक्तत्वं सर्वान्तरत्वादीत्यादिशब्दग्राह्यमिति दर्शयति - **स त आत्मेति**। विश्वाधिकस्य हेयप्रपञ्चानुप्रवेशो

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इति शिव एवानादिमुक्तोमृत इत्युच्यते। 'एतानि ह वा अमृतस्य नामधेयानी'ति श्रवणात्। यथा 'विश्वाधिको रुद्र' इति विश्वाधिकत्वं परमेश्वरस्य श्रूयते तथा विश्वरूपत्वमपि। 'सर्वो वै रुद्र' इत्यादिषु सर्वविकारानुप्रवेशेऽपि तद्विकारस्पर्शलेशो नास्तीति खलु प्रतिपर्यायममृतशब्दप्रयोगः।

अथर्वशिरसि च 'यो वै रुद्रः स भगवान् यश्च ब्रह्मा भूर्भुवस्सुवस्तस्मै वै नमो नम' इत्यादिना ब्रह्मविष्णुरुद्रमहालक्ष्मीसरस्वतीगणेशस्कन्देन्द्रादिलोकपालभूरादिसप्तलोकपृथिव्यादिपञ्च-भूतसूर्यसोमग्रहनक्षत्रकालादिस्वरूपेण प्रत्येकमभ्यासतो निरूप्यते परमेश्वरः। तत्रापि

विरुद्ध इत्याशङ्क्य विश्वाधिकत्ववदेव विश्वरूपत्वमपि श्रुतिप्राप्तमङ्गीकरणीयमित्याह - **यथा विश्वाधिक** इति। विरोधपरिहारस्त्वमृतशब्देनैव विकारदोषास्पर्शपरेण सूचित इत्याह - **तद्विकारेति**।

अथर्वशिरस्यपि **सोऽन्तरादन्तरं प्राविशदिति** सर्वप्रवेशमभिधाय **यो वै रुद्रः स भगवानित्यादि**-विबुधकृतपरमेश्वरस्तुतिमुखेन सर्वप्रवेशप्रयुक्तसार्वात्म्यप्रपञ्चने ब्रह्मविष्ण्वादि पर्यायेषु सर्वेष्वपि तत्तत्प्रवेशप्रयुक्त-तत्तदीयदोषसंस्पर्शशङ्कापरिहारार्थमेव प्रतिपर्यायमैश्वर्यादि षाड्गुण्यसामग्र्यप्रतिपादको भगवच्छब्द इत्याह - **अथर्वशिरसि चेति**। अन्तर्यामिब्राह्मणे अमृतशब्देन प्रपञ्चप्रवेशप्रयुक्ततत्तद्दोषासंस्पर्शमात्रमुक्तम्। तदुपपादकमैश्वर्यमथर्वशिरसि भगवच्छब्देनोक्तम्।

ननु परमेश्वरस्य शरीराभावान्नियन्तृत्वं नोपपद्यत इति चेन्न। तस्य शरीराभावेपि स्वतस्सिद्धैश्वर्यवशात् सर्वनियन्तृत्वोपपत्तेः। नियमनशक्तिरूपैश्वर्याभिव्यक्तये हि शरीरविशेषापेक्षा। स्वतः सिद्धे तस्मिन् किं शरीरेण? तत्र तत्र तत्तन्नियमनोपयोगिशरीरसद्भावेपि शक्तिविशेषात्तस्य प्रपञ्चप्रवेशप्रयुक्तसुखदुःखानाश्रयणम्। स्वशरीरादिसम्बन्धितया दुःखजनकत्वेन हि प्रपञ्चस्य हेयत्वम्। शक्तिविशेषवन्तं प्रति तज्जननाशक्तस्य तस्य हेयत्वमेवासिद्धम्। तस्मात्तत्तन्नियमनशक्तिविशेषोपधानेन शरीरविशेषोपधानेन वा तत्र तत्र परमेश्वरस्य स्थितौ न काप्यनुपपत्तिः।

ननु वाक्यशेषे **अदृष्टो द्रष्टा, अमन्तो मन्ता, नाऽन्यतोऽस्ति द्रष्टा** इत्यादिवाक्यानि श्रूयन्ते। तानि जीव एवाञ्जस्येन समन्वितत्वात्परमेश्वरे कथमुपपद्येरन्निति चेदुच्यते -

श्रवणायापि बहुभिर्यो न लभ्यः
शृण्वन्तोऽपि बहवो यं न विद्युः।
आश्चर्यो वक्ता कुशलोऽस्य लब्धा
आश्चर्यो ज्ञाता कुशलोऽनुशिष्टः।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सकलचिदचित्तत्त्वानुप्रवेशदृष्ट्या पुरुषार्थसंबन्धो भवेदिति शङ्कायां प्रतिपर्यायमैश्वर्यादि मङ्गलगुणसंबन्धाभिधायिभगवच्छब्दप्रयोगः कृतः।

ततः सर्वात्मा शिवः परमेश्वर इति युक्तमेव।

यदुक्तं प्रधानादीनामन्तर्यामित्वमुचितमिति तत्परिहरति -

न च स्मार्तमतद्धर्माभिलापात् शारीरश्च ।। १-२-२० ।।

न च स्मार्तं प्रधानमन्तर्यामीति श्रुतम्। तस्य विकारजडत्वादिधर्माभिलापान्न शारीरो विराट्पुरुषश्च तस्य सकलनियामकत्वाद्यनुपपत्तेः।

इति श्रुत्यन्तरदर्शनान्मन्दानां श्रवणमननविज्ञानसाक्षात्कारविषयो न भवति। ये धीराः श्रोतृमन्तृविज्ञातृद्रष्टारसच्छरीरकस्तन्नियन्तापि भवति। अतोन्यः कश्चन श्रवणादिकर्तृशरीरकस्वतन्त्रस्तन्नियन्ता नास्तीति तत्सङ्कल्पोपज्ञैव तद्विषयश्रवणादिसिद्धिरिति।

यथा तस्मिन्ग्रामे अयमेक एव सर्वनियामक इति वाक्यान्तरं नान्यः पुरुषोस्तीति वाक्यस्य प्राग्वर्णितसर्वनियामकत्वविशिष्टपुरुषान्तरनिषेधपरत्ववत्प्रस्तुतसर्वनियन्तृत्वादिविशिष्टद्रष्टान्तरनिषेधपरत्वमभ्युपेयम्। तेन परमेश्वरस्य समानाभ्यधिकराहित्यमपि लभ्यते। अन्येतरादिशब्दानां प्रतियोगिसदृशे तद्भिन्ने व्युत्पत्तिः। न तु तद्भिन्नमात्रे। ततश्च नान्योऽतोऽस्ति द्रष्टा इत्यादिवाक्यानामयमेवार्थो युक्तः। एवं वाक्यशेषस्यापि परमेश्वर एवाञ्जस्यसिद्धे रसं कुचितसर्वनियन्तृत्वस्य अमृतशब्दोक्तानादिमुक्तत्वस्य अमृतश्रुतेश्चान्यत्रासम्भवादपि परमेश्वर एवान्तर्यामीति भावः।

अथ प्रधानादिपूर्वपक्षत्रयनिराकरणार्थत्वेनोत्तरसूत्रमवतारयति - **यदुक्तमिति**।

तस्य विकारजडत्वादिधर्मानभिलापादिति - अत्रायं भावः। **सर्वाणि भूतानि योन्तरो यमयतीत्यादिना** अन्तर्यामिणि श्रुतानां सर्वभूतनियन्तृत्वादीनां धर्माणां प्रधाने असम्भवादन्तर्यामिण्यसम्भावितानां प्रधानधर्माणां विकारजडत्वादीनां प्रतिषेद्धुमशक्यत्वाच्च स्मार्तं साङ्ख्यस्मृतिसिद्धं प्रधानं नान्तर्यामी भवितुमर्हतीति।

तस्य सकलनियामकत्वाद्यनुपपत्तेरिति - सर्वाणि भूतानि योन्तरो यमयतीत्यादिषु सर्वकल्पानुयायिसकलप्रपञ्चनियन्तृत्वमसङ्कुचितं प्रतीयते। **नान्योऽतोऽस्ति द्रष्टा** इत्यादौ प्राग्वर्णितरूपनियन्तृत्वविशिष्टद्रष्ट्रन्तरादिनिषेधेन तत् स्थिरीक्रियते। तद्धि प्रतिकल्पं भिन्नस्य मूर्त्यात्मनो हिरण्यगर्भस्य नारायणस्य च न सम्भवति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

जीवश्च न भवतीत्याह -

उभयेऽपि हि भेदेनैनमधीयते ।। १-२-२१ ।।

ननु, सुबालोपनिषदि पृथिव्याद्यन्तर्यामिणि नारायणपदप्रयोगान्नारायणस्यासङ्कुचितसकलनियन्तृत्वमुपपद्यत इति चेदुच्यते। सुबालोपनिषदुपक्रमे **तदाहुः किं तदासीदि**ति प्रश्नपूर्वकं परमात्मस्वरूपं प्रथममासीत्। **ततस्तमस्तमसो भूतादिस्तत आकाशादिक्रमेण भूतपञ्चकं तेन ब्रह्माण्डमुत्पादितं तन्मध्ये दिव्यसहस्रशीर्षा सहस्राक्षः सहस्रपात् सहस्रबाहुः पुरुषोऽजायत** इत्युक्त्वा **ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृत** इत्यादिना पुरुषसूक्तप्रक्रियया तस्य मुखादिभ्यो ब्राह्मणादीनां हृदयाद्यवयवान्तरेभ्योन्येषां च केषाञ्चिच्चेतनाचेतनानामुत्पत्तिं, ललाटातक्रोधजस्य रुद्रस्य, निश्वासेभ्यो वेदादिशब्दजालप्रादुर्भावं चाभिधाय तस्मादेवार्थेन स्त्रीभावमर्थेन पुम्भावं च प्राप्ता देवर्षियक्षराक्षसादिनां तिरश्चां च तत्तज्जननोचितस्त्रीपुंसविग्रहग्रहेण मिथुनीभावमापन्नादुत्पत्तिं वर्णयित्वा उपसंहारकाले तेन क्रियमाणत्रैलोक्यभस्मीभावमुपक्रम्य, **पृथिव्यप्सु लीयत** इत्यादिना **तमः परस्मिन्नेकी भवती**त्यन्तेन पृथिव्यादेः प्रथमकार्यतमःपर्यन्तस्य प्रपञ्चस्य परमात्मनि लयो दर्शितः।

एवं तावत्सुबालोपनिषदि प्रथमानुशासने जगदादिकारणभूतः परमात्मा, तेन ब्रह्माण्डमध्ये सृष्टः तन्मध्यगतदेवमनुष्याद्यवान्तरसृष्टिसंहारकारी सहस्रशीर्षत्वादिविशिष्टपुरुषश्चेति द्वौ वर्णितौ। **तत्र तदण्डं हिरण्मयं समभवदि**ति प्रक्रम्य, मध्ये **दिव्यः सहस्रशीर्षा सहस्राक्षः सहस्रबाहुः पुरुषोऽजायत** इति ब्रह्माण्डमध्ये परमात्मना सृष्टो यः पुरुषो वर्णितस्तमेव ब्राह्मणादिसकलप्रजास्रष्टारं दिव्यपुरुषं **नैवेह किञ्चनाग्र आसीदमूलमनाधारमिमाः प्रजाः प्रजायन्त** इति प्रवृत्ते तृतीयानुशासने, **दिव्यो देव एको नारायण** इति प्रस्तूय **चक्षुश्च द्रष्टव्यं च नारायण** इत्यादिना तस्य सर्वोपादानत्वप्रयुक्तसार्वात्म्यमुक्त्वा तस्यैव चतुर्थानुशासने **यस्य पृथिवी शरीरमि**त्यादिना **स एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायण** इत्यन्तेन सर्वान्तर्यामित्वमुक्तम्।

न हि तत्परमात्मा सृज्यत्वेन दिव्यविशेषणावृत्त्या दिवि परमाकाशरूपायां चिच्छक्तौ भवत्वेन च प्रकृतस्य श्रुत्यन्तरप्रसिद्धमध्यसृष्टब्रह्माण्डरूपगर्भगोलकमध्यनिवासलब्धनारायणसंज्ञस्य स्वरूपेणोपपद्यते।

अतः शारीराधिकरणन्यायेन परमेश्वरभेददृष्ट्यैव तदुपपादनीयम्। तथोपपादनं सूचयितुम् **अनुपपत्तेस्तु न शारीरः** इति शारीराधिकरणे नारायणविषयतया प्रयुक्तं शरीरपदमिहापि तद्विषयतया प्रयुक्तम्।

जीवपरपूर्वपक्षनिराकरणार्थत्वेनोत्तरसूत्रमवतारयति - **जीवश्चेति**।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उभये काण्वा माध्यन्दिनशाखिनश्च 'यो विज्ञाने तिष्ठन्' 'य आत्मनि तिष्ठन्नि'त्यादिना जीवादन्तर्यामिणं भेदेनाधीयते। परमेश्वरस्यैव सकलान्तर्यामित्वं न प्रधानविराट्पुरुषजीवानामिति सिद्धम्।

।। इत्यन्तर्याम्यधिकरणम् ।।

***

यो विज्ञान इति स्थाने **य आत्मनी**ति माध्यन्दिनपाठदर्शनात् स्थानप्रमाणेन विज्ञानशब्दस्य जीवपरत्वमवसीयते।

ननु आत्मशब्दस्यैव स्थानप्रमाणेन ज्ञप्तिपरत्वं कल्पनीयमिति शङ्क्यम्। आत्मशब्दस्य ज्ञप्तौ प्रयोगदर्शनात्। एवमन्तर्यामिणो जीवादर्थान्तरत्वेनैव शाखाद्वयेप्याम्नानात्परमेश्वर एव सर्वान्तर्यामी न जीव इति सिद्धमित्याशयः।

卐 卐 卐

इदमधिकरणं शुद्धाद्वैतिनां विरुद्धमेव। अत्र जीवब्रह्मणोर्भेदस्य कण्ठरवेण श्रुतिसिद्धत्वानुशासनात्।

अत्र यद्यपि परैः **अविद्याप्रत्युपस्थापितकार्यकरणोपाधिनिमित्तोऽयं शारीरान्तर्यामिणो-र्भेदव्यपदेशो न पारमार्थिकः। एको हि प्रत्यगात्मा भवति। न द्वौ प्रत्यगात्मानौ सम्भवतः** इत्यादिनाऽविद्यामाश्रित्य स्वपक्षं प्रतिष्ठापयितुमुद्युक्तं, तथापि श्रुतिसूत्रविरोधस्य दुरुद्धरत्वात्तन्मुधायस-करमेवासीत्।

अथ सुबालोपनिषदालम्बनेन यत्पाञ्चरात्रिणां विवरणं तदपि सुबालोपनिषदोऽवान्तरसृष्टिविषयता-व्यवस्थापनेन निराकृतमित्यलं बहुना।

।। इति अन्तर्याम्यधिकरणम् ।।

***

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ अदृश्यत्वाधिकरणम् २०

इह प्रत्यक्षपृथिव्यादिरूपत्वेन प्रतिपादितस्य परमेश्वरस्य तद्वद्दृश्यत्वादिकं नास्तीति प्रतिपादयितुमधिकरणमवतार्यते -

अदृश्यत्वादिगुणको धर्मोक्तेः ।। १-२-२२ ।।

'अथ परा यया तदक्षरमधिगम्यते। यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीरा' इत्यादि श्रूयतेऽस्य विषयः।

अत्राक्षरं प्रधानं जीवः परमेश्वरो वेति संदेहः।

प्रधानमत्राक्षरं तस्य महदादिपरिणामिनो भूतयोनित्वसंभवात्। अथवा जीवः। तस्य हि

अथ अदृश्यत्वाधिकरणम्

सङ्गतिं दर्शयन्नुत्तराधिकरणमवतारयति - **इहेति**।

प्रत्यक्षतो दृश्यमानं यत्पृथिव्यादिकं तत्परमेश्वरस्य नियम्यत्वेन शरीरमिति प्रागुक्तम्। तदनुप्रविश्य तत्र स्थितस्य गृहस्थितस्य चैत्रस्येव दृश्यता स्यादिति शङ्कानिराकरणार्थं सर्वत्र तन्नियम्यानुरूपशरीरविशिष्टतया स्थितस्यापि दृश्यत्वाभावप्रतिपादकमिदमधिकरणमित्यर्थः। **न चक्षुषा पश्यति कश्चनैनम्**इत्यादिश्रुतिप्रसिद्धब्रह्मलिङ्गस्याऽप्यदृश्यत्वस्य प्रदर्शिततया दृश्यत्वप्रसक्त्याऽनतिस्पष्टब्रह्मलिङ्गसद्भावादिह पूर्वाधिकरणसङ्गत्या पादसङ्गतिरपि प्रदर्शिता।

अक्षरतत्वे सर्वज्ञत्वादेरनन्वयेन पूर्वपक्षकोटिद्वयं तदन्वयेन सिद्धान्तं चाभिप्रेत्य संशयं दर्शयति - **अत्राक्षरमिति**।

ननु इह अक्षरशब्दितं प्रधानं जीवो वेति पूर्वपक्षो न युज्यते। इह **तपसा चीयते ब्रह्म** इत्यादिमन्त्रेषु ब्रह्मश्रुतिः **यः सर्वज्ञः सर्वविद्**इत्यादौ सर्वज्ञत्वं चाम्नायते। उपक्रमे **कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातम्**इति सर्वविज्ञानप्रतिज्ञा, परमोपक्रमे **स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह** इति ब्रह्मविद्यासमाख्यापि श्रूयत इत्याशङ्क्य प्रधानपूर्वपक्षमुपपादयति - **प्रधानमत्रेति**।

ननु **यद् भूतयोनिम्**इति श्रुतं भूतयोनित्वं योनिशब्दस्य स्थानवाचितया भूताधारत्वं वा? अथ तस्योपादानवाचितया भूतोपादानत्वं वा ? उभयथापि सर्वाधारे सर्वोपादाने च ब्रह्मण्युपपद्यते कथं तत्प्रधानविषयं भवितुमर्हतीत्याशङ्क्य विशेषयति **महदादिपरिणामिन** इति – भूतयोनिशब्देन परिणामितया

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

'क्षरं प्रधानममृताक्षरमि'ति श्रुतेरक्षरशब्दवाच्यत्वमुचितम्। स्वकर्मवशेन महाभूतयोनित्वं च। अतस्तयोरन्यतरत्तदक्षरमिति प्राप्ते ब्रूमः।

परमेश्वर एवाक्षरम्। 'यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तप' इत्यादिना तद्धर्मोक्तेः। नहि परमेश्वरादन्यस्मिन् सर्वज्ञत्वादिकं संभवति यदुक्तं भूतयोनित्वं प्रधानजीवयोर्युक्तमिति तदयुक्तम्, तयोरचेतनासर्वज्ञयोस्तत्सामर्थ्याभावात्।

भूतोपादानत्वमुच्यते। न तु भूताधारत्वं भूतोपादानत्वसामान्यं वा। भूतयोनित्वविवरणार्थं प्रवृत्ते **यथोर्णनाभिः सृजते गृह्णते च।, यथा पृथिव्या ओषधयः सम्भवन्ति।, यथा सतः पुरुषात्केशलोमानि तथाऽक्षरात्सम्भवतीह विश्वमिति** समनन्तरमन्त्रे परिणाम्युपादानरूपोर्णनाभ्यादिदृष्टान्तोपादानेन तादृशार्थावगमात्। परिणाम्युपादानत्वस्य निर्विकारे ब्रह्मण्यसम्भवात्प्रधानमेवात्र अक्षरशब्दितमिति भावः।

अथ जीवपूर्वपक्षमुपपादयति - **अथवेति**। ननु अक्षरशब्दो हि स्वकार्याण्यश्नुते व्याप्नोतीति व्युत्पत्त्या प्रधाने न क्षरतीति व्युत्पत्त्या ब्रह्मणि चोपपद्यते। स कथं जीव उपपद्यते इत्याशङ्क्याह - **तस्य हीति। क्षरं प्रधानममृताक्षरं हरः। क्षरात्मानावीशते देव एकः** इति श्वेताश्वतरोपनिषदि परब्रह्मणः पशुपाशपतित्वमाम्नायते। तत्र **क्षरं प्रधानमिति** प्रधाने क्षरशब्दवदमृताक्षरमित्यमृतशब्दनिर्दिष्टजीवेऽक्षरशब्दः प्रयुक्तः। अमृतमिति **सुपां सुलुगित्यादिना** छान्दसो विभक्तिलोपः। अमृतमक्षरमित्ययं जीवनिर्देश इत्येतत्। **हर एको देवः क्षरात्मानावीष्ट** इत्युत्तरवाक्ये आत्मशब्दप्रतिनिर्देशादवगम्यते।

यच्चेदं क्षरमव्यक्तं यदप्यमृतमक्षरम्
तावुभौ यः क्षरात्मानावेको देवः स्वयं हरः
ईशते तदभिध्यानाद्योजनात्तत्वभावतः।।

इत्यादिशिवपुराणवचनैश्चायमर्थ उपबृंहितः। तस्मादक्षरशब्दो जीव उपपद्यत इति भावः। जीवस्य जननमरणत्वेऽपि न क्षरति स्वरूपेण न परिणमत इति स्वरूपान्यथाभावाभावपरतया जीवे क्षरशब्दस्य व्युत्पत्तिरपि सम्भवतीति भावः।

ननु तथापि परिणाम्युपादानत्वं जीवस्य न सम्भवत्यत आह - **स्वकर्मवशेनेति**।

सिद्धान्तं प्रदर्शयति - **परमेश्वर एवाक्षरमिति**। हेतुमुपपादयति - **यः सर्वज्ञ** इति। **अचेतनासर्वज्ञयोरिति**। अत्रायमाशयः। ऊर्णनाभ्यादिदृष्टान्तैः प्रधाने सम्भवात्परिणामित्वं न लभ्यते। किन्तु प्रधानादिव्यावृत्तं सकलप्रपञ्चसृष्टिपालनसंहारकर्तृत्वमभिन्ननिमित्तोपादानत्वं, तथात्वेपि प्रपञ्चदोषैरस्पृष्टत्वञ्चेत्येतत्सर्वं लभ्यते। तथाहि प्रथमदृष्टान्तेन तावदूर्णनाभिः स्वशरीरैकदेशभूतया लालया

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पुनरुपपत्तिमाह -

विशेषणभेदव्यपदेशाभ्यां च नेतरौ ।। १-२-२३ ।।

अत्र एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञायते। 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवती'ति। तच्चान्यच्चैवं रूपं विशेषणम्। तद्व्यपदेशाच्च न प्रधानमक्षरम्। 'अक्षरात्परतः पर' इति जीवात् भेदव्यपदेशाच्च न जीवः।

तन्तुमिव परमेश्वरः स्वशक्तिशकलेन प्रपञ्चं सृजति संहरति चेति लभ्यते। तथा सत्यूर्णनाभिवियोगेन तल्लालसृष्टतन्तोरिव परमेश्वरपृथग्भावेनापि प्रपञ्चस्य कदाचिदवस्थितिः स्यादिति शङ्कायां द्वितीयदृष्टान्तः। तेनौषधीनां पृथिव्यपृथक्त्वसिद्ध्या पृथिव्येकदेशत्ववत्प्रपञ्चस्य परमेश्वरापृथग्भावसिद्ध्या तदेकदेशत्वमिति तस्य सर्वोपादानत्वं लभ्यते।

तर्हि यथा पुरुषस्य स्वशरीरैकदेशो हस्तपादादिर्यत्नेन परिपालनीयः तस्मिन्कदाचिदुपहन्यमाने तदुपादानस्य जीवतः पुरुषस्य दुःखित्वं च तथा परमेश्वरस्य स्वशरीरभूतशक्त्यैकदेशः प्रपञ्चोवश्यं परिपालनीयः। तस्मिन्कदाचिदुपहन्यमाने तस्य दुःखित्वं च स्यादिति शङ्कायां तृतीयदृष्टान्तः।

तेन यथा जीवतः पुरुषादुद्भूते तच्छरीरैकदेशे केशनखादौ तेन परिपाल्यमाने कदाचिदुपहन्यमानेऽपि पुरुषस्य दुःखाऽस्पर्शस्तथा प्रपञ्चे परमेश्वरादुद्भूते तेन परिपाल्यमाने कदाचिदुपहन्यमानेऽपि न तस्य दुःखस्पर्श इति परमेश्वरस्य प्रपञ्चपालयितृत्वं प्रपञ्चप्रयुक्तदोषास्पृष्टत्वं च लभ्यते। एतत्सिद्धमभिन्ननिमित्तोपादानत्वादिकं प्रपञ्चयितुमेव **तपसा चीयते ब्रह्मे**त्यादि मन्त्रैः स्रष्टव्यालोचनादिकमुच्यते। न ह्येवंभूतमभिन्ननिमित्तोपादानत्वरूपं भूतयोनित्वमचेतनस्य प्रधानस्याऽसर्वज्ञस्य जीवस्य च नोपपद्यते। एवं **चागोत्रमवर्णमि**त्यादिकममूर्तत्वाप्राणत्वादिवत् ब्रह्मण्येव चेतनत्वसामान्यप्रसक्तजीवधर्मव्यावर्तकतया योजनीयमिति।

तस्माददृश्यत्वादिगुणकः अद्रेश्यमग्राह्यमित्यादिना विशेषतो भूतयोनिः परमेश्वर एव। कुतः - **धर्मोक्तेः**। **यः सर्वज्ञः** इत्यादिना सर्वज्ञत्वादिधर्माणां तत्रोक्तानां प्रधाने वा जीवे वाऽसम्भवादित्यर्थः। पृथिव्यादिनियामकेन शरीरेण पृथिव्यादिषु परमेश्वरस्य दृश्यत्वं

स्पृश्यत्वं च प्रसज्येतेति शङ्कानिवारणार्थमदृश्यमग्राह्यमित्युक्तम्।

सूत्रान्तरमवतारयति - **पुनरिति**।

विशेषणव्यपदेशं विवृणोति - **अत्रेति**। सर्वविज्ञानप्रतिज्ञा **बुद्धेरात्मा महान्परः**। **महतः परमव्यक्तमव्यक्तात्पुरुषः परः** इति श्रुतं सर्वतोऽपि पारम्यमित्यादिकं विशेषणजातम्। भेदव्यपदेशो यथा - **यदा पश्यः पश्यते रुक्मवर्णम्........कर्तारमीशमिति** कर्तृकर्मभावेन, जन्यजनकभावेन,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

रूपोपन्यासाच्च ।।१-२-२४।।

'अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः वायु प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मा' इत्यक्षरस्य त्रैलोक्यरूपत्वमुपन्यस्यते।

अतश्च सकलात्मा परमेश्वर एवाऽत्राक्षरपदाभिधेयः।

।। इति अदृश्यत्वाधिकरणम् ।।

***

अथ वैश्वानराधिकरणम् २१

प्राणाधारत्वेन पूर्वमुपास्यतयोक्तस्य पुनर्जाठराग्निरूपेणोपास्यत्वमाह -

***वैश्वानरः साधारणशब्दविशेषात्* ।।१-२-२५।।**

'यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति' इत्यादिकं छान्दोग्येऽस्य विषयः श्रूयते।

नियम्यनियामकभावेन च बहुविधः सूत्रे विवक्षितः। एवं विशेषणजातेन, भेदव्यपदेशेन च अक्षरशब्दवाच्यः परमेश्वरः एव न प्रधानजीवाविति भावः।

अथ प्रधानजीवव्यावृत्तत्रैलोक्यरूपत्वश्रवणादपि प्रधानं जीवो वा नाऽक्षरमिति सूत्रेण निर्धारयति।

卐 卐 卐

जीवेश्वरयोः कण्ठरवेण भेदनिर्देशात् भेदनिर्देशाय **कर्तारमीशमिति** परमेश्वराऽसाधारणाभिधानघटितमन्त्रसूचनादपीदमधिकरणं परेषामपरेषां च वाग्बन्धननिबन्धनतया प्रतिकूलमेवेति दिक्।

।। इति अदृश्यत्वाधिकरणम् ।।

***

अथ वैश्वानराधिकरणम्

सङ्गतिं दर्शयन्नुत्तराधिकरणमवतारयति - **प्राणाधारत्वेनेति**। नन्वेवमस्याधिकरणस्याऽङ्गुष्ठाधिकरणेन सङ्गतिर्यदि स्यात्तर्हि तदनन्तरमेवेदं ग्रथनीयम्। अनेनाऽप्युपासकनेदिष्ठस्थाननिरूपणं परिसमाप्य सर्वत्राऽवस्थानमन्तर्याम्यधिकरणे निरूपणमुचितमिति चेदुच्यते। सङ्गत्यन्तरवशादन्तर्याम्यधिकरणं पूर्वं प्रवर्तनीयमासीत्। तथाहि अङ्गुष्ठाधिकरणे परमेश्वरस्याऽङ्गुष्ठसमाश्रयेण उपासकनेदिष्ठत्वमुक्तम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अत्रोपास्यतयोक्तो वैश्वानरः परमेश्वरोऽन्यो वा इति सन्देहः।

पूर्वपक्षन्यायस्तु वैश्वानरशब्देन जाठराग्निरुच्यते। 'अयमग्निर्वैश्वानरो येनेदं पच्यते यदिदमद्यते। तस्यैष घोषो भवति, यमेतत्कर्णावपिधाय श्रुणोति स यदोत्क्रमिष्यन् भवति नैनं घोषं श्रुणोति' इति जाठराग्नौ प्रयोगदर्शनात्। महाभूततृतीयोऽग्निर्वा स्यात्। 'एष एवाग्निर्वैश्वानर' इत्यादौ वैश्वानरशब्दस्य तत्र प्रसिद्धत्वात्। अग्निदेवता वा स्यात्। 'वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जात' इत्यादिष्विष्टिदेवतात्वेन फलदातृत्वदर्शनात्। नतु परमेश्वरः प्रादेशमात्रमिति परिच्छेदाऽवगमादिति।

अत्रोच्यते। परमेश्वर एव वैश्वानरः। कथं? वैश्वानरशब्दस्य साधारण्येऽप्यस्मिन् प्रकरणे 'को न आत्मा? किं ब्रह्म? आत्मानमेवेमं वैश्वानरं सम्प्रत्यध्येषि तमेव नो ब्रूहि' इत्यादिषु

तत्रेयं शङ्का प्रसजति - नमस्कुर्वाणस्येवाऽपकर्षकरं पराङ्गुष्ठाश्रयणं परमेश्वरस्य नोपपद्यते इति। इमां शङ्कां निवर्तयितुमन्तर्याम्यधिकरणं प्रवर्तितम्। तेनेयं शङ्का कथं निवर्तितेति चेन्नियन्तृतया रेतोमूत्रादिहेयवस्तुसाधारण्येन सकलप्रपञ्चसमाश्रयणेऽपि तत्प्रयुक्तदोषो न परमेश्वरं स्पृशतीति हि तत्र निरूपितम्। तदनन्तरमेवं पृथिव्यादिषु रूपविशेषमास्थाय पृथिव्यादिषु स्थितवतस्तस्य पुरःस्थितचैत्रवद्दृश्यता स्पृश्यता च स्यादिति शङ्कां परिहर्तुमदृश्यत्वाऽग्राह्यत्वप्रतिपादकमदृश्यत्वाधिकरणं प्रवर्तितम्। एवमङ्गुष्ठाधिकरणमुखागतशङ्काद्वयपरिहारानन्तरं पूर्ववदुपासकनेदिष्ठस्थानान्तरमिहोच्यते। तस्मात्सङ्गतिः समुचितैव।

विषयवाक्यमुदाहृत्य ब्रह्मवैश्वानरश्रुतिभ्यां संशयं दर्शयति - **यस्त्वेतमिति**। **तदन्यो** वेति जाठराग्निमहाभूततृतीयाग्निवह्निदेवतारूपपूर्वपक्षत्रयं क्रोडीकृतम्। तत्र वैश्वानरशब्दस्य जाठरादिषु त्रिष्वपि प्रयोगदर्शनेन क्रमेण पूर्वपक्षत्रयं दर्शयति **वैश्वानरशब्देने**ति - छान्दोग्ये **को न आत्मा किं तद्** ब्रह्मेति ब्रह्मात्मश्रुतिभ्यामुपक्रमेऽपि, बृहदारण्यके **अयमग्निर्वैश्वानरो येनेदमन्नं पच्यत** इत्यादौ वैश्वानरशब्दस्य जाठराग्नौ प्रयोगदर्शनाज्जाठराग्निर्वा **एष वा अग्निर्वैश्वानर** इत्यादौ तृतीयमहाभूते प्रसिद्धत्वात् महाभूततृतीये वा स्यात्। **अथ वैश्वानरं द्वादशकपालं निर्वपे**दित्यादावग्निदेवतायां प्रसिद्धत्वादग्निदेवता वा स्यात्। न तु परमेश्वर इति पूर्वपक्षसङ्ग्रहः।

अत्रेयमाख्यायिका -

औपमन्यवादयः पञ्चेमे महर्षयः समेत्य **को न आत्मा किं ब्रह्मे**ति विचार्य, **उद्दालको ह वै भगवन्तो यमारुणिः सम्प्रतीमात्मानं वैश्वानरमध्येति तं हन्ताऽभ्यागच्छेमे**त्युद्दालकस्य वैश्वानरात्म-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

परमेश्वरोऽसाधारणब्रह्मशब्दादिभिर्विशेष्यमाणत्वात्। न जाठराग्न्यादिषु तद्विशेषणं सम्भवति। अत परमेश्वर एव वैश्वानरः।

परमेश्वरपक्षे प्रमाणान्तरमाह -

स्मर्यमाणमनुमानं स्यादिति ।।१-२-२६।।

'अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यावि'त्यादिषु परमेश्वरस्य द्युलोकादि पृथिव्यन्तरूपमुक्तम्। तदित्थं भूतं रूपमिह 'तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्माऽत्मा सदेहो बहुलो वस्तिरेवरैः पृथिव्येव पादा'वित्यत्र प्रत्यभिज्ञायमानं तस्य परमेश्वरत्वे लिङ्गम्।

शब्दादिभ्योन्तः प्रतिष्ठानाच्च नेतिचेन्न, तथा दृष्ट्युपदेशादसम्भवात् पुरुषमपि चैनमधीयते ।।१-२-२७।।

विज्ञानमवगम्य तमभ्याजग्मुः। स चोद्दालक एतान्वैश्वानरात्मजिज्ञासूनभिलक्ष्यात्मनश्च तत्राऽकृत्स्नवेदित्वं मत्वा तान्होवाच **अश्वपतिर्वै भगवन्तोऽयं केकयः सम्प्रतीमात्मानं वैश्वनरमध्येति तं हन्ताऽभ्यागच्छेमेति**। ते चोद्दालकषष्ठाः तमश्वपतिमभ्याजग्मुरिति।

सिद्धान्तयति - **परमेश्वर एव वैश्वानर** इति। अत्र वैश्वानरशब्दस्य जाठरादिसाधारण्येप्यस्मिन्प्रकरणे **को न आत्मा किं तद्ब्रह्म**ेत्यत्र परमेश्वरासाधारणब्रह्मश्रुत्या वैश्वानरशब्दः परमेश्वरमेवाऽभिदधातीत्यभिप्रेत्याह **- साधारण्येऽपी**ति। वैश्वानराग्निशब्दयोः साधारण्येऽपि नात्मब्रह्मादिश्रुतीनां कथञ्चिदपि जाठराग्न्यादिसाधारण्यं सम्भवतीति साधारणयोरग्निवैश्वानरशब्दयोः परमेश्वरासाधारणैरात्मब्रह्मपुरुषशब्दैर्विशेषणात्तत्समभिव्याहृतयोस्तयोरौत्सर्गिकमर्थमनादृत्य परम्परया प्रवृत्तिनिमित्ताश्रये परमेश्वरे पर्यवसानमुचितमिति भावः। सूत्रे विशेषशब्दो विशेषणपरः। साधारणशब्दयोरसाधारणशब्दैः समभिव्याहृतैर्विशेष्यमाणत्वादिति सूत्रार्थः। परमेश्वरपक्षे ब्रह्मादिश्रुतयः प्रमाणत्वेन दर्शिताः।

अथ लिङ्गदर्शनार्थतयोत्तरसूत्रमवतारयति - **परमेश्वरपक्ष** इति।

द्युलोकादीति। अग्निशब्दो मन्त्रे द्युलोकपरः। **असौ वाव लोको गौतमाग्नि**रिति श्रुतौ तत्राग्निशब्दस्य प्रयोगदर्शनादिति भावः। संदेहः सम्यगुपचितो देहः नाभिकण्ठमध्य देशः। एवं द्युमूर्धतादिकल्पनस्य परमेश्वर इव जाठरादावपि सम्भवेपि श्रुत्यन्तरे परमेश्वर एव प्रसिद्धत्वात्तदिह प्रत्यभिज्ञया परमेश्वरमेव बोधयेदिति भावः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

'स एषोऽग्निर्वैश्वानरो हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीयं तद्यद्भुक्तं प्रथममागच्छेत्तद्धोमीयं सायं प्रथमामाहुतिं जुहुयात्' इत्यादिषु प्रतिपन्नेभ्यः अग्निशब्दाग्नित्रय-कल्पनाप्राणाहुत्याधारत्वेभ्यः 'स यो हैनमेवमग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तः प्रतिष्ठितं वेद' इति श्रुतात् पुरुषेऽन्तःप्रतिष्ठितत्वलिङ्गाच्च जाठराग्निरेव। नासौ परमेश्वर इतिचेन्न।

जाठराग्निरूपतयोपास्यत्वेनोपदेशात्। केवलस्य जाठराग्नेस्त्रैलोक्यशरीरत्वाद्यसंभवात्। किञ्च 'स एषोग्निर्वैश्वानरो यत्पुरुष' इत्येनं वैश्वानरं पुरुषमप्यधीयते वाजसनेयिनः। निरुपाधिकपुरुष-शब्दवाच्यस्तु परमेश्वर एव, 'तेनेदं पूर्णं पुरुषेण सर्वमिति श्रवणात्'।

अतः परमेश्वर इति युक्तम्।

अत एव न देवता, भूतं च ।।१-२-२८।।

यतोऽयं वैश्वानरस्त्रैलोक्यशरीरकः पुरुषशब्दवाच्यश्च अत एव न देवताऽग्निर्न तृतीयं भूतं च।

अत्रायं शङ्कासङ्ग्रहः। वैश्वानरः परमेश्वरो न भवति। तस्यार्थान्तरे रूढत्वात् **स एषोऽग्निर्वैश्वानर** इति श्रवणात्। **तद्यद्भुक्तं प्रथममागच्छे**दित्यादिना प्राणाहुत्याधारत्वेनाम्नानात्। पुरुषेऽन्तःप्रतिष्ठितं वेदेति श्रुतस्याऽन्तःप्रतिष्ठानस्य जाठरे सम्भवेन तल्लिङ्गा जाठराग्निरेव भवितुमर्हतीति।

परिहारमाह - **नेति**। दृष्ट्युपदेशात् परमेश्वरदृष्ट्या जाठरस्योपास्यत्वोपदेशात् वैश्वानरशब्दवाच्यस्य परमेश्वरस्य जाठराग्निशरीरतया तद्विशिष्टत्वेनोपास्यत्वात्। असम्भवात् द्युमूर्धत्वादिनाम्नातस्य त्रैलोक्यशरीरस्य जाठरेऽसम्भवाच्च।

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्।।

इति जाठरस्य वैश्वानरस्य पारमेश्वरत्वस्मरणात् **स एषोऽग्निर्वैश्वानरो यत्पुरुष** इति श्रुतस्य निरुपाधिक-पुरुषशब्दवाच्यत्वस्य जाठरेऽयोगा वैश्वानरः परमेश्वर एवेति सिद्धमित्यर्थः।

वैश्वानरो जाठराग्निरिति शङ्का पूर्वसूत्रेण परिहृता। सम्प्रत्यग्निदेवतादिकं न भवतीत्यभिप्रायेण विवृणोति - **यत** इति। **त्रैलोक्यशरीरक** इति। अग्निदेवतायास्तृतीयमहाभूतस्य च जाठरवत्परिच्छिन्नत्वाभावात् अग्निदेवताया अधिष्ठातृत्वात्तृतीयमहाभूतस्य त्रिवृत्कृतस्य त्रैलोक्यरूपेण परिणतत्वादुभयोरपि त्रैलोक्यशरीरत्व-सम्भवाद्वैश्वानरत्वमुपपद्यत इति शङ्काभिप्रायः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इह जाठराऽग्निरूपतयोपास्यत्वेन सिद्धे परमेश्वरस्याग्निशब्दवाच्यत्वे तद्योजनाभेदमाचार्यान्तराणां दर्शयति।

साक्षादप्यविरोधं जैमिनिः ।।१-२-२९।।

नावश्यमग्निरूपतयोपास्यत्वादेवेदमग्निशब्दसामानाधिकरण्यम्, अग्रनयनादियोगेन परमेश्वर एवाऽग्निशब्दस्य साक्षाद्वृत्तिसम्भवादिति सामानाधिकरण्याऽविरोधं जैमिनिरुवाच।

अभिव्यक्तेरित्याश्मरथ्यः ।।१-२-३०।।

'यस्त्वेतमेवं प्रादेशमात्रमि'त्यपरिच्छिन्नस्य द्युप्रभृतिपृथिव्यन्तप्रदेशसंबन्धिन्या मात्रया

देवताया महाभूतस्य वा आत्मब्रह्मपुरुषशब्दनिर्देशासम्भवात् त्रैलोक्यनियमनशक्तेरभावाच्च तौ वैश्वानरशब्दविवक्षितौ न भवत इति परिहाराभिप्रायः।

सूत्रान्तरमवतारयति - **इहेति**।

पूर्वमग्निवैश्वानरशब्दयोरौत्सर्गिकमर्थमनादृत्य तच्छरीरतया परम्परया प्रवृत्तिनिमित्ताश्रये परमेश्वरे वृत्त्यङ्गीकारेण परमेश्वरपरत्वमभिहितम्। इदानीं परमेश्वरस्य साक्षात्प्रवृत्तिनिमित्ताश्रयतयाऽपि तयोः शब्दयोः परमेश्वरपरत्वमुच्यते। यथा **अग्रनयनादियोगेने**ति। अग्रमुत्कृष्टफलं नयत्याराधकानिति नैरुक्तप्रसिद्धमग्निशब्दस्य निर्वचनम् **अग्निः कस्मादग्रं नयती**ति। तदेव महाभारतेऽपि,

यस्माच्चायं नयत्यग्रां गतिं विप्रान्सुपूजितः
तस्माच्चायं नयनाद्राजन्वेदेष्वग्निरितीर्यते।। इति।

तन्निर्वचनमग्न्यपेक्षयाऽपि परमेश्वरे समञ्जसतरम्।

वैश्वानरशब्दस्य ऋषेरपत्यमित्यपत्यार्थतद्धितान्ततयाऽग्नौ निरुक्तस्य तस्य, विश्वेषु नरेष्वन्तर्यामितया स्थिते परमेश्वरे, तत्र भव इति तद्धितान्ततया वृत्तिरुपपद्यते। वैश्वानरः कस्माद्विश्वानर एव वैश्वानरः राक्षसो वायस इतिवत्। रक्ष एव हि राक्षसः। वय एव वायसः। इति नैरुक्तमपि तन्निर्वचनं सर्वजीवात्मभूते परमेश्वर एवोपपद्यत इति भाष्येऽग्निशब्दस्य साक्षाद्वृत्तिसम्भवोक्तिर्वैश्वानरशब्दस्याऽप्युपलक्षणं, न्यायतौल्यात्। **यस्त्वेतमेवं प्रादेशमात्रमभिविमानमि**त्यपरिच्छिन्नस्य ब्रह्मणो द्युप्रभृतिपृथिव्यन्तप्रदेशसम्बन्धिन्या मात्रया परिच्छिन्नत्वं न सम्भवतीति शङ्कानिराकरणार्थं सूत्रम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

परिच्छिन्नत्वमुपासकाभिव्यक्तेरित्याश्मरथ्यमुनिः।

अनुस्मृतय इति बादरिः ।।१-२-३१।।

द्युप्रभृतिपृथिव्यन्तस्य मूर्धादिपादान्तावयवत्वकल्पनमनुस्मृतये ब्रह्म प्राप्त्यर्थमिति बादरिः।

संपत्तेरिति जैमिनिस्तथाहि दर्शयति ।।१-२-३२।।

'उर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोऽन्वाहार्यपचनमास्यमाहवनीय' इत्युपासकस्योरःप्रभृतीनां वेद्यादित्वकल्पनं विद्याङ्गभूतायाः प्राणाहुतेरग्निहोत्रत्वकल्पनार्थमिति जैमिनिः। तथाहि दर्शयति च श्रुतिः 'अथ य एवं विद्वानग्निहोत्रं जुहोती'ति।

उपासकाभिव्यक्तय इति। उपासकबुद्ध्यारोहार्थमित्यर्थः। प्रादेशमात्रमित्येतदनन्तरमभिविमानमिति कृत्स्नमभिव्याप्तवतो विगतमानत्ववचनात्प्रादेशविशेषपरिच्छिन्नत्वमुपासकबुद्ध्यारोहार्थमित्यवगम्यत इति भावः।

नन्वपरिच्छिन्नस्य ब्रह्मणः उपासकबुद्ध्यारोहार्थं द्युप्रभृतिप्रादेशपरिच्छिन्नत्वोक्तावपि द्युमूर्धत्वादिकल्पनं तस्य किमर्थमित्याशङ्कानिराकरणार्थं सूत्रम्।

न हि परमेश्वरस्य बुद्ध्यारोहमात्रमपेक्षितं किं त्वहरहरनुवर्तनीया ध्यानरूपा स्मृतिः ब्रह्मप्राप्त्यर्थमपेक्षिता। तादृशस्मृतिसन्तानानुवृत्तिर्बुद्ध्यारोहे स्थिरीकृत एव सम्पद्यत इति तत् स्थैर्यार्थं द्युमूर्धत्वादिकल्पनमिति सूत्राशयमाह - **द्युमूर्धप्रभृतीति**। नन्वेवमपि तदनन्तरम् **उर एव वेदि**रित्यादिना प्रकृताऽनुपयोगिकर्माङ्गत्रेताग्निकल्पनमिति शङ्कानिराकरणार्थं सूत्रम्।

विद्याङ्गभूताया इति। अहरहः क्रियमाणपरमेश्वरोपासनाङ्गभूताया इत्यर्थः। **अग्निहोत्रत्वकल्पनार्थमिति** - अग्निहोत्रत्वसम्पादनार्थमित्यर्थः। सम्पत्तिबोधकश्रुतिमुदाहरति - **अथ य** इति। **स य इदमविद्वानग्निहोत्रं जुहोति। यथाऽङ्गारानपोह्य भस्मनि जुहुयात्तादृक्तत्स्यात्। अथ य एतदेवं विद्वानग्निहोत्रं जुहोति तस्य सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मसु हुतं भवति। तद्यथेषीकतूलमग्नौ प्रोतं प्रदूयेतैवं हाऽस्य सर्वे पाप्मानः प्रदूयन्तः** इति।

ननु, प्राणाहुतेः प्राणवायुदैवत्यस्याग्निहोत्रत्वकल्पनायां प्राणवायुं प्रत्येव वेद्यादिकल्पनं कार्यम्। न हि वैश्वानरं प्रति तत्किमर्थमिति शङ्कानिराकरणार्थमिदं सूत्रम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

आमनन्ति चैनमस्मिन् ।।१-२-३३।।

तैत्तरीया एनं परमेश्वरमस्मिन्नुपासकशरीरे प्राणाहुतिवेलायां भोक्तृतया 'शिवो मा विशा प्रदाहायेति,' 'प्रभुः प्रीणाति विश्वभुगि'ति चामनन्ति। सकलाचार्यमतेन न्यायेन जाठराग्निरूपेण परमेश्वर एवाराध्यः प्राणाग्निहोत्रेणेति समीचीनम्।

।। इति वैश्वनराधिकरणम् ।।

इति श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये

प्रथमाध्यायस्य द्वितीयः पादः

***

तैत्तरीयशाखायां पुरुषार्थं प्राणाग्निहोत्रं परमेश्वरदैवत्यमिति प्रागङ्गुष्ठाधिकरणे निरूपितम्। तत्सामान्यादिदमपि तथेति सूत्राशयं विशदयति - **तैत्तिरीया** इति। एतदुपयोगितयैव कर्मदेवताविचारात्मकमपि तदधिकरणमिह शास्त्रे प्रवर्तितम्।

।। इति वैश्वानराधिकरणम् ।।

इति श्री नागलिङ्गशिवाराध्यकृतिमुख्यायां लघुशिवार्कमणिदीपिकासख्यायां

श्रीशिवचिन्तामणिप्रभाख्यायां श्री नीलकण्ठभगवत्पादीयब्रह्म-

सूत्रभाष्यव्याख्यायां प्रथमाध्यायस्य

द्वितीयः पादः

***

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

श्रीनीलकण्ठभगवत्पादाराध्यकृतौ
शारीरकब्रह्ममीमांसासूत्रभाष्ये प्रथमाध्यायस्य
तृतीयः पाद आरभ्यते

***

अथ द्युभ्वाद्यधिकरणम् २२

इह पादे स्पष्टास्पष्टब्रह्मलिङ्गानां वेदान्तवाक्यानां विचारः, प्रसङ्गादधिकारिनिरूपणं च क्रियते -

द्युभ्वाद्यायतनं स्वशब्दात् ।। १-३-१।।

'यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः। तमेवैकं विजानथ आत्मानमन्या वाचो विमुञ्चथ। अमृतस्यैष सेतुरि'ति अस्य विषयः श्रूयते मुण्डकोपनिषदि।

अत्र द्युभ्वाद्याधारतया श्रूयमाणः परमेश्वरोऽन्यो वेति संशयः।

अथ द्युभ्वाद्यधिकरणम्

येषु विषयवाक्येषु श्रुतानां ब्रह्मलिङ्गानां पूर्वपक्षे न ब्रह्मलिङ्गत्वाक्षेपः, नाप्यन्यत्राऽन्वयसमर्थनम्; किन्तु विचारणीय एव धर्मिण्यन्वयः; तद्विरुद्धाऽब्रह्मलिङ्गानां प्राबल्योपपादनेन तत्समर्पकशब्दानां यथाकथञ्चिद् ब्रह्मणि योजनामात्रं तानि स्पष्टब्रह्मलिङ्गानि प्रथमपादे विचारितानि।

येषु श्रुतानां तेषां तल्लिङ्गत्वाक्षेपः, विचारणीय एव धर्मिण्यन्वयश्च, तान्यनतिस्पष्टब्रह्मलिङ्गानि ब्रह्मापलापान्यन्वयरहितपूर्वपक्षविषयत्वसाम्यात्तदनन्तरं द्वितीयपादे विचारितानि।

येषु श्रुतानां तेषां पूर्वपक्षे ब्रह्मलिङ्गत्वानाक्षेपेण ब्रह्मानपलापेन चाऽन्यान्वयसमर्थनं तानि ब्रह्मापलापरहितपूर्वपक्षविषयत्वसाम्यादिदानीं विचार्यन्त इति पादार्थविशेषः सङ्गतिश्च।

विषयवाक्यमुदाहरति - **यस्मिन् द्यौरिति**। अस्मिन्वाक्ये द्युपृथिव्याद्याधारत्वेन श्रूयमाणः परमेश्वरो वा वायुर्वेति संशयं दर्शयति - **अत्रेति**। परमेश्वरपक्षस्य आत्मश्रुतिर्मूलमिति विज्ञायते। पूर्वपक्षस्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

परमेश्वरादन्यो वायुरेव द्युभ्वाद्याधार इति गम्यते, 'वायुना वै गौतम सूत्रेणाऽयं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवन्ती'ति श्रुतौ तस्य सर्वाधारत्वप्रसिद्धेरिति प्राप्ते ब्रूमः।

परमेश्वर एव द्युभ्वाद्यायतनं, 'तमेवैकं विजानथ आत्मानमि'त्यात्मशब्दात्।

सूत्रात्मनो वायोरप्यात्मशब्दवाच्यत्वे को दोष इत्यत आह -

मुक्तोपसृप्यव्यपदेशाच्च **।।१-३-२।।**

यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम्।
तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति।।

अमृतस्यैष सेतुरित्यनेन परमेश्वरान्यत्वप्रतीतिर्मूलमिति विशदम्। पूर्वपक्षं प्रदर्शयति - **एवं सतीति।** अत्रायमाशयः। **अमृतस्य सेतुरित्यनेन** द्युभ्वाद्याधारः परमेश्वरादन्यः प्रतीयते। अमृतशब्दोऽनादिमुक्तस्य परमेश्वरस्य वाचक इति निर्णीतमन्तर्याम्यधिकरणे। सोऽत्र **यस्मिन्द्यौरिति** मन्त्रात्पूर्वं **तदेतत्सत्यममृतमिति आनन्दरूपमजरं यद्विभातीति** परमेश्वरे प्रयुक्तश्च। तस्य सेतुरिव सेतुः परतीरस्य सेतुरिव प्रापयितेति तस्याऽर्थः। एवं परमेश्वरादन्यत्वेन सिद्धोऽयं द्युभ्वाद्याधारो वायुरिति युक्तम्। स किलाऽर्चिरादिमार्गपर्वविशेषतया परमेश्वरप्राप्तिहेतुः। न च देवतान्तराणामपि तत्प्राप्तिहेतुत्वमस्तीति शङ्क्यम्। **वायुना वै गौतम सूत्रेणाऽयं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवन्तीति** श्रुत्यन्तरे वायोर्द्युभ्वाद्याधारत्वप्रसिद्धेर्वायुरेवाऽयमित्यवगम्यमानत्वादिति।

सिद्धान्तमाह - **परमेश्वर एवेति। आत्मशब्दादिति** - सूत्रे तु योगरूढिभ्यामात्मशब्दस्य परमेश्वरासाधारण्यद्योतनार्थं तत्र स्वशब्दादिति स्वशब्दः प्रयुक्तः। स्वस्य परमेश्वरस्याऽसाधारणशब्दादित्यर्थः।

ननु, आत्मशब्दस्य सूत्रात्मनि वायौ वृत्तिपरिग्रहे को दोष इति शङ्कानिराकरणार्थत्वेनोत्तरसूत्रमवतारयति - **सूत्रात्मन** इति।

प्राप्यतया **व्यपदेशाच्चेति।** एतन्मन्त्रप्रतिपाद्यप्राप्योपास्ययोरैक्यावगमे सत्यत्रत्यान्मुक्तप्राप्यत्वव्यपदेशात्। **तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः।, शिव एको ध्येयः शिवङ्करः** सर्वमन्यत्परित्यज्येति श्रुत्यन्तरप्रसिद्धसर्वेतरज्ञेयान्तरपरित्यागपूर्वकज्ञेयत्वव्यपदेशात्। **नानुध्यायाद्बहून् शब्दान् वाचो विग्लापनं हि तदिति** श्रुत्यन्तरप्रसिद्धवागन्तरविमोकपूर्वकज्ञेयत्वव्यपदेशाच्च। अयं द्युभ्वाद्याधारः परमेश्वर एवेति पर्यवस्यतीति हेतुत्रयमस्यैव सूत्रस्याऽर्थान्तरभूतं चकारेण समुच्चीयते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यथा नद्यः स्यन्दमानाः समुद्रे अस्तं गच्छन्ति नामरूपे विहाय।
तथा विद्वान् नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्।।

इति पुण्यापुण्यप्राकृतनामरूपविनिर्मुक्तानां मुक्तानां प्राप्यतया व्यपदेशाच्चायं परमेश्वर एव। कथमेतद्वायौ संभवति? परमेश्वरात्मक एव वायुः सूत्रात्मा, पारमेश्वरीष्वष्टासु मूर्तिष्वेकत्वात्। ततो न वायुरिति निर्णयः।

नानुमानमतच्छब्दात्,

***प्राणभृच्च* ।।१-३-३।।**

द्युभ्याद्याधारत्वमपि वायोर्न सम्भवतीत्याह - **कथमि**ति। एतत् द्युभ्याद्याधारत्वम्।

ननु **वायुर्वै गौतम तत्सूत्रमि**त्यादिश्रुत्यन्तरे वायौ प्रसिद्धं तदित्याशङ्क्याह - **परमेश्वरात्मक** इति। तस्मात्पारमेश्वरमेव द्युभ्वाद्याधारत्वं तच्छरीरभूते वायौ व्यपदिष्टं तस्यां श्रुताविति भावः। अत एव केनोपनिषदि परमेश्वरप्रसादलब्धेन दैत्यविजयेन गर्वितानमरांस्तद्गर्वापनयनेनाऽनुग्रहीतुं तेषां पुरतो यक्षरूपेणाविर्भूतेऽपरमेश्वर **क एष** इति जिज्ञासया तत्सकाशं प्रेषितो वायुः **कस्त्वम्? तव किं बलम्?** इति पृष्टो **महाबलोऽहं त्रैलोक्यमपि कम्पयितुं शक्नुयामि**त्युक्त्वा **तेनेदं चालये**ति पुरस्तात् स्थितं तृणं स्वीयेन कृत्स्नेनापि बलेन चालयितुं न शशाकेत्याम्नायते **ब्रह्म हि देवेभ्यो विजिग्य** इत्यादिना। तस्माद्वायुः द्युभ्वादीनामाधारो न भवतीत्युपसंहरति - **तत** इति।

ननु मा भूदयं वायुः। प्रधानं स्यादेव। **तमेवैकं विजानथ आत्मानमन्या वाचो विमुञ्चथ** इति श्रुतावात्मशब्दो देहपरः। तस्मात् द्युभ्वाद्यायतनं प्रधानमेकमेव। युष्माकं देहं जानीध्वं स्थूलशरीररूपदेहान्तरविषया देहत्वविषया वाचो विमुञ्चथेति। अस्यायं भावः। देहविविक्तात्मज्ञानार्थं मुमुक्षुभिर्देहो ज्ञातव्यः। देहस्तु न स्थूलो विवक्षितः। आगमापायिनस्तस्माद्विवेकस्य सुलभत्वात्। किंतु सूक्ष्मो विवक्षितः। यत्सम्बन्धादयमनादिः संसारः प्रवर्तत इति युक्तम्।

अथ जीवो वा स्यात्। मनःप्राणसम्बन्धश्रवणात्। तथाहि, **एषोणुरात्मा मनसा वेदितव्यो यस्मिन् प्राणः पञ्चधा संविवेश। प्राणैश्चित्तं सर्वमोतं प्रजानां यस्मिन्विशुद्धे विभवत्येष आत्मे**ति श्रूयते। अत एव जीवः **प्राणभृ**दिति व्यवह्रियते। तस्माज्जीवे द्युपृथिव्याद्यायतनत्वव्यपदेशोऽपि युज्यते। दिवादीनां तदद्दष्टायत्तत्वात्। इति शङ्काद्वयनिराकरणार्थं सूत्रम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अनुमानगम्यं प्रधानमेव द्युभ्वाद्यायतनं तस्य सर्वोपादानत्वादिति न वाच्यम्। अतच्छब्दादात्मशब्दात्। न प्राणभृज्जीवश्च, अनुपपत्तेरिति।

भेदव्यपदेशात् **।।१-३-४।।**

अत्र जीवात् भेदो व्यपदिश्यते,

समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः।
जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः।। इति।

अतः स्वतः परमेश्वर एव द्युभ्वाद्याधारः।

आनुमानं साङ्ख्यानुमानकल्पितं प्रधानमत्र न ग्राह्यम्। अतच्छब्दात्तत्प्रतिपादकशब्दाभावादित्यर्थः। आत्मशब्दो न स्वरूपेण प्रधानमाख्याति। नापि शरीरत्वेन प्रमाणाभावात् एवं तमेवैकं **विजानथ आत्मानमिति** श्रुतिः प्रधानविषया न भवतीत्यर्थः। **तमेवैकमि**त्यादिश्रुतिः परमेश्वरविषयैव, तदुपासनस्यात्यन्तचित्तैकाग्र्यसाध्यतया विषयान्तरस्य त्याज्यत्वात्। तदुपासने तदितरदेवतात्यागस्याथर्वशिखायां विहितत्वात्। तस्मादियं श्रुतिः प्रधानपरा न भवतीत्यर्थः।

जीवपक्षं दूषयति - **न प्राणभृदि**ति। **अनुपपत्तेरि**ति। अणुमात्रे जीवे द्युभ्वाद्याधारत्वस्येतर-परित्यागेनोपासनादमृतत्वप्राप्तेः द्युभ्वाद्याधारत्वोपयोगिव्याप्त्यर्थकात्मशब्दस्य च तत्रानुपपन्नत्वादित्यर्थः।

जीवपक्षनिराकरणे हेत्वन्तरमाह -

समाने वृक्ष इति - अस्य मन्त्रस्यायमर्थः। समान एकस्मिन् वृक्षे वृक्षवत् छेदनयोग्ये शरीरे निमग्नः पांसुपुञ्जनिमग्नो जलकण इव तदविवेकमापन्नोत एव तद्गतदोषानात्मीयत्वेनाभिमन्यमानः पुरुषो जीवः अनीशया अनैश्वर्येण तद्दोषनिराकरणाशक्त्या शोचति यदा जुष्टं भक्त्या प्रीणितं स्वस्मादन्यं परमेश्वरं पश्यति तदा वीतशोकः सन्नस्य परमेश्वरस्य महिमानं सत्यसङ्कल्पत्वाद्यैश्वर्यरूपं इति एति। इण् गताविति धातोर्लटि गुणाभावश्छान्दसः।

ननु अत्र यथा जीवाद्भेदेन परमेश्वरो निर्दिष्टस्तथा ततो भिन्नतया जीवोऽपि निर्दिष्टः। एवमुभयोर्निर्दिष्टत्वाऽविशेषाज्जीवोऽपि दिवाद्याधारो भवितुमर्हतीत्याशङ्क्याह - **स्वतः परमेश्वर** इति।

अत्राऽयं भावः। **समाने वृक्ष** इति मन्त्रे ईशशब्देन प्रकरणोपपदादिसङ्कोचकरहितेन स्वतस्सिद्धनिरतिशयैश्वर्यशाली परमेश्वरो निर्दिष्टः। जीवस्तु तत्प्रसादाधेयसत्यसङ्कल्पत्वादितदैश्वर्यशाली।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रकरणात् ।। १-३-५ ।।

अथ परा यया तदक्षरमधिगम्यत इति परस्य खल्विदं प्रकरणम्।
अतश्च परमेश्वरः।

स्थित्यदनाभ्यां च ।। १-३-६ ।।

एवंरूपाद्भेदव्यपदेशात्परमेश्वर एव द्युभ्वाद्याधार इति युक्तम्। अनादिसिद्धपरमैश्वर्यस्यैवाऽनादिसिद्धद्युभ्वाद्याधारत्वोपाधिकत्वादिति।

ननूदाहृतमन्त्रोक्तहेतुभिः जीवस्य द्युभ्वाद्याधारत्वासिद्धावपि उपरितनमन्त्राम्नातहेतुभिः स एव दिवाद्याधार इति सिद्ध्यति। तथा हि - उपरितनमन्त्रे **अरा इव रथनाभौ संहता यत्र नाड्यः। स एषोऽन्तश्चरते बहुधा जायमान** इति नाडीसम्बन्धनाड्यन्तः सञ्चारजायमानत्वानि श्रूयन्ते। तानि तु जीवलिङ्गान्येव। नाडीसम्बन्धस्य तदन्तस्सञ्चारस्य च **आसु तदा नाडीषु सृप्तो भवति। ताभिः प्रत्यवसृप्य पुरीतति शेते** इत्यादिश्रुतिषु प्रसिद्धतरत्वाज्जायमानत्वं जीवाऽसाधारणमिति स्पष्टम्। एवं च बहूनां साधकानामन्यथानयनस्याऽयुक्तत्वादित्याशङ्कानिराकरणार्थं सूत्रम्।

प्रकरणमिदं मुण्डकोपनिषदि **कस्मिन्नु भगवो विज्ञात** इत्यारभ्यासमाप्ति बहुतरश्रुतिलिङ्गादिभिः भूतयोनेरक्षरस्य परमेश्वरस्येति अदृश्यत्वाधिकरणे प्रतिपादितम्। एवं प्राकरणिकबहुश्रुतिलिङ्गबाधितमुत्तरमन्त्रगतं जीवलिङ्गद्वयमन्यथा नेयमेव। तथाहि, नाडीसम्बन्धस्य हृदयद्वारैव जीवस्याऽपि सिद्धतया हृदये भावलिङ्गरूपेणोपास्ये परमेश्वरे उपपन्नत्वाज्जायमानत्वस्यापि **अजायमानो बहुधा विजायत** इति श्रुत्यन्तरसिद्धैच्छिकविग्रहपरिग्रहरूपबहुविधाविर्भावयुक्ते तस्मिन्नविप्रतिपन्नत्वाच्च प्रकरणानुसार्येवाऽस्य मन्त्रस्याऽर्थो ग्राह्य इत्याशयेन व्याचष्टे - **अथ परा यये**ति।

ननु ब्रह्मप्रकरणात् द्युभ्वाद्याधारः परमेश्वर एव, न जीव इत्ययुक्तम्। ब्रह्मण एव जीवरूपत्वात्। मुण्डकस्यापि **कस्मिन्नु भगवो विज्ञात** इत्युपक्रमेण **ब्रह्म वेद ब्रह्मैव भवती**त्युपसंहारेण च जीवब्रह्माभेदे तात्पर्यावसायात्। **समाने वृक्ष** इति मन्त्रे तयोर्भेदव्यपदेशस्त्वसिद्धः। अन्यदीयस्य महिम्नोऽन्येन कथमपि प्राप्तुमशक्यतया अस्य महिमानमित्यस्याऽज्ञानतिरोहितब्रह्मभावाविर्भावपरत्व एव साङ्गत्यात्। तत्र **जुष्टं यदा पश्यत्यन्यमीशमि**त्यस्य पूर्वार्थे देहात्मभ्रमेण शोकवत्तयोक्तं स्वात्मानं यदा देहादन्यमीशं ब्रह्मभिन्नं च पश्यत्येवमर्थपरत्वोपपत्तेरित्याशङ्कानिराकरणार्थमुत्तरसूत्रम्।

भेदव्यपदेशादिति व्यवहितमिहानुवर्तते। ततो ह्ययं सूत्रार्थः। **द्वा सुपर्णे**तिमन्त्रे तयोरन्य इति अनश्नन्नन्य इति च जीवब्रह्मणोरेव परस्परभेदो व्यपदिश्यते। स चात्त्यनश्नन्नभिचाकशीतीति अत्तृत्वानशन-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति।।

इति जीवस्य कर्मफलादनमुक्त्वा अनश्नत एव दीप्यमानस्याऽभिधानाच्च। तस्मादर्थान्तरभूतः परमेश्वर एव द्युभ्वाद्यायतनमिति निर्णयः।

।। इति द्युभ्वाद्यधिकरणम् ।।

***

स्थितिरूपपरस्परविरुद्धधर्माभ्यामुपपादनपूर्वकमेव व्यपदिश्यते। एवमुपपत्तिरूपतात्पर्यलिङ्गोपबृंहितभेदव्यपदेशात्संसारिणोर्थान्तरभूत एव परमेश्वरः प्रकरणप्रतिपाद्य इति तत्प्रकरणात्परमेश्वर एव द्युभ्वाद्याधार इति युक्तमित्येवं सूत्रार्थमभिप्रेत्य व्याचष्टे - **द्वा सुपर्णे**त्यादिना।

सर्वविज्ञानप्रतिज्ञानं विशिष्टशिवाद्वैतरूपे सविशेषाद्वैत एवोपपन्नम्। **ब्रह्म वेद ब्रह्मैव भवती**त्येतद्ब्रह्मसदृशो भवतीत्येतदर्थकमिति भाष्य एव तत्र तत्रोपपादितम्। **अस्य महिमानमि**तीत्येतदपि सोपपत्तिभेदव्यपदेशानुसारेण सदृशमहिमावाप्तिपरं द्रष्टव्यम्। **यदा पश्यः पश्यत** इत्यनन्तरमन्त्रे तत्परमसाम्यापत्तेः कथ्यमानत्वात्तदनुसारेण **एषोणुरात्मा** इत्युत्तरमन्त्रे **तस्मिन्विशुद्धे विभवत्येष** आत्मेत्यस्य विभुवदाचाररूपतत्साम्यापत्तेर्विवक्षितत्वाच्च। अधिकरणार्थमुपसंहरति इति निर्णय इति।

यद्यपि द्वा सुपर्णेतिमन्त्रः पैङ्गिरहस्यब्राह्मणानुसारेण अन्तःकरणजीवपरतया परैर्व्याख्यातः, न्यायरक्षामणौ श्रीमदप्पयदीक्षितेन्द्रैस्तथैव प्रसाधितस्तथापि **स्थित्यदनाभ्यामि**ति सूत्रकारेणैव निराकृत इत्येतत्सविस्तरं ब्रह्मपथे केवलाद्वैतप्रतिषेधे अस्माभिः प्रतिपादित इति नेह पुनः।

अत्र यद्यपि पूर्वं ब्रह्मपरतया निर्णीते मुण्डके स्पष्टान्येव ब्रह्मलिङ्गानि तथापि द्युभ्वाद्याधारो वायुः प्रधानं जीवो वा तेन तज्ज्ञानेन वा प्राप्ये ब्रह्मण्यमृतशब्दोदिते प्राकरणिकसर्वधर्मान्वय इति पूर्वपक्षकरणादस्पष्टब्रह्मलिङ्गता।

।। इति द्युभ्वाद्यधिकरणम् ।।

***

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ भूमाधिकरणम् २३

मुक्तप्राप्यतयेह प्रतिपादितस्य परमेश्वरस्य प्राप्तिप्रयोजनं निरतिशयसुखं दर्शयति -

भूमां संप्रसादादध्युपदेशात् **।। १-३-७।।**

छान्दोग्ये श्रूयतेऽस्य विषयः। छान्दोग्ये भूमैव सुखमित्युक्त्वा, भूम्नः स्वरूपमाह 'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा' इति।

तत्र संदेहः - भूमशब्दनिर्दिष्टः परमेश्वरस्तदन्यो वा? इति।

परमेश्वरादन्यः प्राण एव भूमा, पूर्वेषु नामादिषु तत्त्वेषु, 'अस्ति भगवो नाम्नो भूय इत्यादिना नारदप्रश्ने सनत्कुमारो वाग्वाव नाम्नो भूयसी' इत्यादिना वागादीनि निर्दिश्य, प्राणस्योपरि

अथ भूमाधिकरणम्

सङ्गतिं दर्शयन्नुत्तराधिकरणमवतारयति - **मुक्तेति**। द्युभ्वाद्याधारस्य परमेश्वरत्वे मुक्तोपसृप्यत्वं हेतुत्वेनोपन्यस्तम्। तदयुक्तम्। सकलविषयभोगविरक्तानामेव मुक्तावधिकाराभ्युपगमेन विषयभोगलिप्सया प्रजानां राजोपसर्पणस्येव मुक्तानां परमेश्वरोपसर्पणस्याऽसम्भवादित्याशङ्क्य स्वतस्तस्य निरतिशयानन्दरूपत्वेनैव मुक्तप्राप्यत्वं युज्यत इत्युपपादयितुमुत्तराधिकरणमारभ्यत इत्यर्थः। अनेनाऽक्षेपिकीपूर्वाधिकरणेन संङ्गतिर्दर्शिता।

छान्दोग्योपनिषदि **यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमे**ति श्रुतं भूमलक्षणं विषयत्वेनोदाहृत्य तस्य मुक्तोपसृप्यत्वनिर्वहणोपयोगित्वेन निरतिशयानन्दस्य तत्स्वरूपमिति भूमशब्दो धर्मिपर इति च बोधयितुमाह **भूमैव सुखमि**त्यादिभूमशब्दस्तु **पृथ्वादिभ्य.,** इतीमनिचि, **बहोर्लोपो भूच बहोरि**रिति निष्पन्नो बहुत्ववाची। बहुत्वं चात्र वैपुल्यं, न सङ्ख्याविशेषः। बहुशब्दस्य **बह्वन्नं पच्यत** इति वैपुल्येऽपि प्रयोगदर्शनात्। वैपुल्यं चात्र गुणोत्कर्षरूपं न परिमाणविशेषरूपम्। पूर्वत्र वाङ्मनस्सङ्कल्पादिषूत्तरोत्तरगुणोत्कर्षाभिप्रायेणैव भूयश्शब्दप्रयोगदर्शनात्। सुखशब्दसामानाधिकरण्याच्च। उत्कर्षापकर्षरूपस्यैव सुखतारतम्यस्य प्रसिद्धत्वाच्च। भूमशब्दश्चायं न केवलवैपुल्यपरः, किन्तु वैपुल्याश्रयधर्मिपरः। **भूमैव सुखं यो वै भूमा तदमृतमि**ति धर्मिपरशब्दैः सामानाधिकरण्यात्।

एवञ्च भूमशब्दार्थो निरतिशयानन्द इति सिद्धम्। स जीवः परो वेति संशयं दर्शयति - **तत्रे**ति। पूर्वपक्षं दर्शयति - **परमेश्वरादन्यः प्राण एवे**ति। तत्र नामादिषु तत्त्वेषु वागादीनि निर्दिश्य प्राणस्योपरि प्रश्नोत्तराभ्यां विनैव भूम्नोऽवतारणात् भूमा प्राणशब्दनिर्दिष्टो जीव इति पूर्वपक्षसङ्ग्रहः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रश्नप्रत्युक्तिभ्यां विनैव यतो भूमानमवतारयति न परमेश्वरस्तत्र प्रसक्तः। अतो भूमा प्राण इति प्राप्ते ब्रूमः -

परमेश्वर एव भूमशब्दनिर्दिष्टः संप्रसादादध्युपदेशात्। संप्रसादो जीव उच्यते 'अथ य एष संप्रसाद' इति श्रुतेः। स चात्र प्राणशब्देन निर्दिश्यते। तस्मादूर्ध्वमात्मान्तरत्वेन भूमोपदिश्यते 'एष तु वा अतिवदति यः सत्ये नातिवदति' इत्यादिना।

अत्र हि पूर्वं 'स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी भवति' इति प्राणवादिनोऽतिवादित्वमुक्त्वा, तदनन्तरं 'एष तु वा' इति तु शब्देन पूर्वस्मात्प्राणातिवादिनः सत्यादिवादिन आधिक्यप्रदर्शनात् पूर्वातिवादिनिमित्तात्प्राणादेतदतिवादनिमित्तस्य सत्यशब्दाभिधेयस्याधिक्यमवसीयते। स एवाग्रे भूमगुणविशिष्टः प्रतिपाद्यते। 'अथाऽत आत्मादेश' इत्यात्मत्वेनाऽप्यग्रे वर्ण्यते।

अतः प्राणशब्दनिर्दिष्टाज्जीवादधिक आत्मा भूमा परमेश्वर एव।

धर्मोपपत्तेश्च **।।१-३-८।।**

'स भगवः कस्मिन् प्रतिष्ठित' इति, 'स्वे महिम्नि' इति, 'आत्मैवेदं सर्वमात्मनः प्राण आत्मन आकाश' इत्यादिना स्वमहिमप्रतिष्ठितत्वसर्वात्मत्वसर्वकारणत्वादयो धर्मा उपदिश्यन्ते। तेषां परमेश्वर एवोपपत्तिर्न प्राणशब्दोदिते जीवे। ततः परमेश्वर एव भूमा नापर इति सिद्धम्।

सिद्धान्तमाह - **परमेश्वर एवेति**। सौत्रं सम्प्रसादशब्दं व्याकुर्वन् पूर्वपक्षे प्राणशब्दो जीवपर इति स्पष्टीकरोति - **सम्प्रसाद** इति। सम्प्रसीदत्यस्यामवस्थायां जीव इति सम्प्रसादः सुषुप्तिः। तद्वत्त्वाद्वा, मुक्तौ विशुद्धिभाक्त्वाद्वा सम्प्रसादो जीवः। **य एष सम्प्रसाद** इति श्रुतिप्रयोगसिद्धः। ऊर्ध्वमित्यनेन सूत्रगतोऽधिशब्दोऽधिकपरतया व्याख्यातः। जीवादधिकत्वेन भूमा केन वाक्येनोपदिश्यत इत्याशङ्क्याह - **एष** इति। प्राणशब्दनिर्दिष्टाज्जीवादूर्ध्व**मेषु तु वे**त्यादिना आत्मान्तरत्वेन भूम्न उपदेशादाधिक्यप्रतिपादनात्। अथात आत्मादेश इत्यात्मत्वेनाऽप्यग्रे तस्य वर्ण्यमानत्वाच्च प्राणशब्दनिर्दिष्टाज्जीवादधिक आत्मा भूमा परमेश्वर एवेति सिद्धान्तसङ्ग्रहः।

स भगवः कस्मिन्प्रतिष्ठितः स्वे महिम्नीत्यादिनोपदिश्यमानानां स्वमहिमप्रतिष्ठितत्वसर्वात्मत्वसर्वकारणत्वादीनां धर्माणां परमेश्वरे एवोपपत्तेः प्राणशब्दनिर्दिष्टे जीवे अनुपपत्तेश्च भूमशब्दनिर्दिष्टः परमेश्वर एवेत्यर्थः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ननु पूर्वत्राधिकरणे 'निरञ्जनः परमं साम्यमुपैति' इति मुक्तात्मनां ब्रह्मसादृश्यमभिहितम्। ततो ब्रह्मणः सायुज्यमुपगता मुक्तात्मानस्तत्पृथग्भूता वर्तन्त इति सिद्धम्।

यत्र 'नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा' इति भूमशब्दवाच्ये ब्रह्मणि दृष्टे तन्निष्ठभेदप्रपञ्चदर्शनादिनिषेधः क्रियते।

कथमिह साङ्गत्यमितिचेत्, भूम्नि प्रत्यक्षे नान्यत्पश्यतीत्यादेरयमभिप्रायः। निरतिशयसुखस्वभावे यस्मिन् साक्षात्कृते सुखान्तराभिलाषेण रूपादिविषयदर्शनादौ न प्रवर्तते यन्मग्नः पुरुषः स भूमा ब्रह्मेति। ब्रह्मानन्दलवपरमाणवो हि विषयसुखविशेषाः। तथा हि श्रुतिः 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति। तस्मादिह न ब्रह्मणि द्वैतनिषेधप्रसक्तिः। प्रपञ्चे सत्येव कथं मुक्तात्मनामपुरुषार्थस्य तस्य दर्शनं परिह्रियते इति न विचार्यम्।

नहि मुक्तात्मनां प्रकृतप्रपञ्चो दर्शनविषयः। किंतु निरतिशयानन्दस्वरूपं ब्रह्मैव प्रपञ्चाकारेण दर्शनगोचरो भवति। तथाहि श्रुतिः 'एतत्ततो भवति आकाशशरीरं ब्रह्म सत्यात्म प्राणारामम्' इति 'आप्नोति स्वाराज्यम् आप्नोति मनसस्पतिम्' इत्यादिना मुक्तात्मा प्रस्तुतः। तस्य वाक्पतिरित्यादिना

इति न विचार्यमिति - अत्राऽयं भावः। भूमशब्दोयं ब्रह्मशब्दसमानार्थकत्वात्तद्वदेव त्रिविधपरिच्छेदान्तर्भूतवस्तुपरिच्छेदराहित्यसिद्धये स्थूलसूक्ष्मसकलचेतनाचेतनप्रपञ्चविशिष्टस्य परमेश्वरस्य वाचकः, वृक्षशब्द इव पत्रपुष्पादिविशिष्टस्य स्थावरस्य। तथा च यथा वृक्षं पश्यतः पत्रपुष्पाद्याकारेणापि वृक्ष एव दर्शनगोचरो भवति। तत एव वृक्षं पश्यन्नामूलमाशिखरं सर्वावयवसहितं वृक्ष इत्येव पश्यति, एवं ब्रह्मानुभवतः प्रपञ्चाकारेणापि ब्रह्मैवानुभवगोचरो भवति। अतो युज्यत एव **यत्र नान्यत्पश्यतीत्यादि**। भूम्न्यनुभूयमाने तदनन्तर्गतस्य कस्याऽपि दर्शनाभावात्। उक्तेर्थे तैत्तिरीयश्रुतिं प्रमाणयति - **तथाहीति**। एतत्परिदृश्यमानं प्राकृतप्रपञ्चजातं ततो मुक्त्यवस्थाप्राप्त्यनन्तरमाकाशशरीरत्वादिविशिष्टं ब्रह्मैव भवति। मुक्तं प्रत्युक्तरूपब्रह्मात्मना प्रकाशत इत्यर्थः।

उदाहृतश्रुतेर्मुक्तविषयत्वं दर्शयितुं पूर्ववाक्यान्युदाहरति - **आप्नोतीति**। व्याहृति विद्यायां ब्रह्मोपासकमधिकृत्येदमुच्यते -

स्वः स्वर्गसुखरूपे पदे राजत इति स्वाराट्। तस्य भावं स्वाराज्यमाप्नोति सुखैकरसं परब्रह्मणः शिवस्य पदमाप्नोतीति यावत्। मनसस्पतिं ज्ञानशक्त्यधिष्ठानभूतं शिवं चाप्नोति। अयं प्रस्तुतो मुक्तात्मा तदा किंविशिष्टो भवतीत्याकांक्षायामुच्यते - **वाक्पतिरित्यादि**। विज्ञानं मनः। एवं प्रस्तुतं मुक्तात्मानं **प्रत्येतत्ततो भवतीत्ये**तत्ततो भवतीत्यादिकमुच्यत इति युक्तम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्वाधीनाप्राकृतविशुद्धवागिन्द्रियादिसम्बन्ध उक्तः। तस्य पुनस्तादृशावस्थाप्राप्त्यनन्तरं एतद्दृश्यमानं प्राकृतप्रपञ्चजालमाकाशशरीरं चिदम्बरप्रकाशशरीरं ब्रह्मैव भवतीति तात्पर्यरहस्यार्थः।

ततो मुक्तानां ब्रह्मणा सादृश्यं तत्समरसीभूतप्रपञ्चदर्शनमिति सर्वं समीचीनम्।

इति भूमाधिकरणम्

अथ अक्षराधिकरणम् २४

अक्षरमम्बरान्तधृतेः ।।१-३-९।।

बृहदारण्यके श्रूयतेऽस्य विषयः। 'एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति अस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छाद्यम्' इत्यादि।

अत्राक्षरशब्दवाच्यस्त्रेधा संदिह्यते प्रणवो जीवः परमेश्वरो वेति।

प्रणवजीवयोरन्यतर एवाक्षरशब्दवाच्यः। कुतः? अक्षरशब्दस्य वर्णपर्यायत्वात्प्रणववाचकत्वमुचितम्। 'पुरुषोऽक्षरमुच्यते ' इति पुरुषस्याऽपि तदभिधेयत्वमुक्तम्। अतस्तावेवाक्षरशब्दवाच्याविति प्राप्ते ब्रूमः।

इहापि भूमविद्यायां मुक्तः सर्वप्रपञ्चं पश्यन्नपि तत्र किञ्चिदपि दुःखरूपतां न पश्यति। किन्तु निरस्तसमस्तदुःखसंसर्गब्रह्मरूपतामेव पश्यतीत्युक्तम्। **न पश्यो मृत्युं पश्यति न रोगं नोत दुःखतां सर्वं हि पश्यः पश्यति सर्वमाप्नोति सर्वश** इति। तस्माद्यत्र नाऽन्यत्पश्यतीत्यादेर्विरोधाभावान्मुक्तानां ब्रह्मसादृश्यं तदपृथग्भूतप्रपञ्चदर्शित्वं चोपपद्यत इत्युपसंहरति - **तत** इति।

।। *इति भूमाधिकरणम्* ।।

अथ अक्षराधिकरणम्

अक्षरब्राह्मणगतं विषयवाक्यमुदाहरति - **बृहदारण्यक** इति। बहुधाऽभ्यस्तस्याऽक्षरशब्दस्य रूढ्या वर्णवाचकत्वाज्जीवपरत्वाच्च वर्णो वा जीवो वाऽक्षरशब्दवाच्य इत्यवगम्यते। अम्बरान्तधृत्यादेः पारमेश्वरासाधारणत्वात्तदर्थः परमेश्वर इति विज्ञायत इति संशयमाह - **अत्रे**ति।

अक्षरशब्दरूढिमवलम्ब्य पूर्वपक्षमाह **अक्षरशब्दस्ये**ति। **अतस्तावेवे**ति। प्रणवो जीवो वा अक्षरं, नतु परमेश्वर इत्यर्थः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अत्राक्षरशब्दवाच्यं परं ब्रह्मैव, कुतः? अम्बरान्तधृतेः। 'यदूर्ध्वं गार्गि दिवो यदर्वाक्

सिद्धान्तं प्रतिजानीते - **अक्षरशब्दवाच्यं परब्रह्मे**ति। अत्रेयमाख्यायिका।

जनकस्य यज्ञे कुरुपाञ्चालदेशागतेषु ब्राह्मणेष्वभिसमेतेषु **क स्विदेतेषां ब्रह्मिष्ठ** इति जिज्ञासुना जनकेन शृङ्गिद्वयाबद्धफलपरिमितसुवर्णालङ्काराः सहस्रं गाः समानीय **ब्राह्मणा भगवन्तो यो वो ब्रह्मिष्ठः स एता गा उदजतामि**त्युक्ते तेषु ब्राह्मणेष्वधृष्टतयास्ति तेषु याज्ञवल्क्यः स्वशिष्यमुवाच। **एता सोम्य उदज सामश्रव** इति। ततस्तेषु ब्राह्मणेषु क्रुद्धेषु तमाश्वलः पप्रच्छ। **त्वं नु खलु नो याज्ञवल्क्य ब्रह्मिष्ठोसी**ति। **नमो वयं ब्रह्मिष्ठाय कुर्मो गोकामा एव वयं स्म** इति याज्ञवल्क्यस्योक्तिभङ्ग्या तस्य ब्रह्मिष्ठत्वाभिमानमधिकं सन्तमवधार्य तद्विजिगीषया आश्वलादिषु केषुचित्तं पृष्टवत्सु तेन च सदुत्तरोक्त्या जितेषु, **अथ हैनं गार्गि वाचक्नवी पप्रच्छे**त्यादि गार्गिब्राह्मणं प्रवृत्तम्। तत्र गार्ग्या **यदिदं सर्वमप्स्वोतं च प्रोतं चे**त्यादिना तत्तदुत्तरानन्तरं पुनः पुनः पृष्टस्य याज्ञवल्क्यस्य क्रमेण **ब्रह्मलोकेषु गार्गी**त्युत्तरे सति **कस्मिन्नु खलु ब्रह्मलोका ओताश्च प्रोताश्चे**ति पुनः पृष्टेन याज्ञवल्क्येन **गार्गि! माऽतिप्राक्षीर्मा ते मूर्धा व्यधिज्ञपत्। अनतिप्रश्न्यां वै देवतामतिपृच्छसि मातिप्राक्षी**रिति सक्रोधमुक्ते गार्गी उपरराम। ततः उद्दालके प्रसिद्धे ब्रह्मविदि सूत्रमन्तर्यामिणं च पृष्टवति याज्ञवल्क्येन जिते पुनर्गार्गी सर्वेषां ब्राह्मणानां पराजयो जायत इति शङ्कया याज्ञवल्क्यस्य क्रोधं ब्राह्मणानामनुज्ञयैवाऽकिञ्चित्करतामापाद्य प्राक् **माऽतिप्राक्षी**रिति निवारितं प्रश्नं पुनः करिष्यामीत्याशयवती **ब्राह्मणा भगवन्तो हन्ताऽहमिमं द्वौ प्रश्नौ प्रक्ष्यामि तौ चेन्मे तक्ष्यति न वै जातु युष्माकमिमं कश्चिद्ब्रह्मोद्यं जेते**ति तेषामनुज्ञां याचित्वा **पृच्छ गार्गी**ति तैरनुज्ञाता **अहं वै त्वा याज्ञवल्क्य! यथा काश्यो वा वैदेहो वोग्रपुत्र उद्यद्धनुरधिज्यं कृत्वा द्वौ बाणवन्तौ शरौ सपत्नानि व्याधिनौ हस्ते कृत्वोपोत्तिष्ठेदेवमेवाऽहं त्वा द्वाभ्यां प्रश्नाभ्यामुपोदस्तां तौ मे ब्रूही**ति द्वितीयप्रश्ननिवारणपरिजिहीर्षया प्रश्नद्वयानुज्ञां पृष्ट्वा पृच्छेति तदनुज्ञाता **यदूर्ध्वं याज्ञवल्क्य! दिवः** इत्यादिना सर्वदेशकालानुवृत्तसकलप्रपञ्चाधारं पृष्ट्वा **आकाशे यदोतं च प्रोतं** चेत्युत्तरिते **नमस्तेऽस्तु याज्ञवल्क्य योम एतं व्यवोच** इति तं प्रशस्य इतः परं द्वितीयप्रश्नस्योत्तरमशक्यमित्याशयेन **अपरस्मै धारयस्वे**त्युक्त्वा पृच्छेति तेनोक्ते प्रथमप्रश्नोत्तरस्वीकरणार्थं पुनरपि **यदूर्ध्वं याज्ञवल्क्य! दिव** इत्यादिना प्राक्पृष्टमेव पृष्ट्वा याज्ञवल्क्येन **यदूर्ध्वं गार्गी**त्यादिना सर्वमनूद्य **आकाश एव तदोतं च प्रोतं चे**ति प्राचीनोत्तर एवाऽवधारणेन दृढीकृते तदनन्तरं कृतस्य **कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चे**ति द्वितीयप्रश्नस्योत्तरतया **एतद्वै तदक्षरमि**त्यारभ्य **एतस्मिन् खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चे**त्यन्तं कृत्स्नमक्षरब्राह्मणं प्रवृत्तमिति।

अत्र अक्षरे आकाशमात्रधृतिः श्रूयते। न त्वाकाशान्तसकलधृतिरिति सूत्रोक्तहेतोरसिद्धिशङ्कां परिहर्तुं पूर्ववाक्यप्रदर्शनपूर्वकं सौत्रं हेतुं व्याचष्टे - **यदूर्ध्वं गार्गी**त्यादिना। अक्षरे आकाशमात्रधृतिर्नोच्यते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षत आकाश एव तदोतं च प्रोतं च' इति सर्वविकाराधारतया निर्दिष्ट आकाशः। 'कस्मिन्नोतश्च प्रोतश्च' इति गार्ग्या पृष्टे, 'एतद्वै तदक्षरं गार्गि! ब्राह्मणा अभिवदन्ति' इत्यादिना, 'एतस्मिन् खल्वक्षरे गार्गि! आकाश ओतश्च प्रोतश्च' इत्यन्तेन याज्ञ्यवल्क्यवचनेन निर्दिष्टस्याऽक्षरस्याम्बरान्तप्रपञ्चधृतिरवगम्यते। कथमेतदन्यत्र परमेश्वरात् संभवति।

ततः परमेश्वर एवाऽक्षरपदाभिधेयः।

सा च प्रशासनात् ।।१-३-१०।।

सा च धृतिः 'एतस्यैवाक्षरस्य प्रशासने गार्गि! सूर्याचन्द्रमसौ विधृतौ तिष्ठतः' इत्यादिना प्रकृष्टाऽऽज्ञाधीनाऽवगम्यते। तज्जगच्छासनं च जीवस्य न संभवति। 'एक एव रुद्रो न द्वितीयाय तस्थुः' इति जगच्छासने परमेश्वरस्य द्वितीयाऽभावश्रवणात्।

अतः परमेश्वर एवाऽक्षरनामधेयः।

किन्तु प्रागुपक्रान्तस्य भूगोलकादेराकाशान्तस्य सर्वस्य धृतिरुच्यते। कथमेतदिति। आकाशान्तसकलधृतिस्तु आकाशान्तगतसकलकार्याधारत्वोक्तिपूर्वकत्वसामर्थ्यात्सिद्ध्यन्ती परमेश्वरादन्यत्र योजयितुं न शक्यत इत्यर्थः। तस्मात्प्रणवो जीवो वा अक्षर शब्दवाच्यो न भवति किन्तु परमेश्वर एवेत्यर्थः।

ननु अक्षरं जीव इत्यपि वक्तुं युक्तम्। **यथा वा अरा नाभौ समर्पिता एवमस्मिन्प्राणे सर्वं समर्पितमिति** भूमविद्यागतवचनबलाज्जीवस्याऽपि देशकालवत्सर्वाधारत्वोपपत्तेरित्याशङ्कावारणार्थं सूत्रम्।

सा च धृतिरिति। नन्वम्बरान्तधृतिः प्रशासनाधीना न श्रूयते। किन्तु सूर्यादिकतिपयधृतिरेवेतिचेन्न। तच्छ्रवणस्यैव स्थालीपुलाकन्यायेन सकलजगद्धृतेरपि तदधीनबोधकत्वात्। यथा लोके स्थाल्यां तुल्यपाकानां पुलाकानामेकस्याम्रदिम्नाऽन्येषामपि सिद्धता ज्ञाप्यते, एवमिहाऽपि सूर्यादिधृतेरक्षरप्रशासनाधीनत्वोक्त्या सर्वेषां तदन्येषामपि धृतेस्तदधीनत्वं ज्ञाप्यते। **न द्वितीयाय तस्थुरिति** तैत्तिरीयश्रुतिपाठः। तत्र केवलस्य परमेश्वरस्य द्वितीयाऽभावश्रवणेऽपि **य इमान्लोकानीशत ईशनीभिरिति** श्वेताश्वतरे, **य इमान्लोकानीशत ईशनीयुरित्यथर्वशिरसि** च तद्वाक्यशेषश्रवणात्तदनुसारेण जगच्छासनविषयमेव द्वितीयाऽभाववचनम्। तस्माज्जगतो यथाकथञ्चित्कालाद्यनेकाधारत्वकल्पनसम्भवेप्यनेकशासितृत्वकल्पनं व्यवस्थाऽसिद्ध्यादिदोषदूषितत्वान्न सम्भवतीति भावः। ननु **अदृष्टं द्रष्टृ** इत्यादिनोक्तं द्रष्टृत्वादिकं जीव एव सम्भवति। तस्माज्जीव एवाऽक्षरमिति शङ्कानिराकरणार्थं सूत्रम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अन्यभावव्यावृत्तेश्च ।।१-३-११।।

अन्यभावोऽर्थान्तरत्वम्। 'तद्वा एतदक्षरं गार्गि! अदृष्टं द्रष्टृ अश्रुतं श्रोतृ अमतं मन्तृ अविज्ञातं विज्ञातृ' इति वाक्यशेषः परमेश्वरादक्षरस्यान्यभावं व्यावर्तयति। प्रणवजीवपक्षयोरदृष्टत्वादिविशेषितदृष्टत्वाद्यसंभवात्।

अतः परमेश्वरोऽक्षरमिति निर्णयः।

।। *इत्यक्षराधिकरणम्* ।।

अदृष्टत्वादिविशेषितद्रष्टृत्वाद्यसम्भवादिति - अत्राऽयं भावः। **अविज्ञातं विज्ञातृ** इत्येतदनन्तरं **नान्यदतोऽस्ति द्रष्टृ नान्यदतोऽस्ति श्रोतृ नान्यदतोऽस्ति मन्तृ नान्यदतोऽस्ति विज्ञातृ** इति श्रूयते। तस्य सर्वथा द्रष्ट्रन्तरनिषेधपरत्वं वक्तुमयुक्तं द्रष्टृबहुत्वस्य बहुतरप्रमाणसिद्धत्वात्। किन्तु पूर्वोक्तं द्रष्टृ यावद्गुणविशिष्टतया प्रकृतं तावद्गुणैस्तत्सदृशं द्रष्ट्रन्तरं नास्तीत्येवं परं वाच्यम्। यथा बहुविद्वद्युते ग्रामे चैत्रस्य बहुशास्त्रवेदितृत्वादिगुणानभिधाय **अस्मिन्ग्रामे चैत्र एव विद्वानिति** वचनस्य प्रागुक्तैर्गुणैश्चैत्रसमो विद्वान्नास्तीत्येवं परत्वम्। तथा **नान्यदतोऽस्ति द्रष्टृ** इत्यादेः प्रागुक्तैः सर्वाधारत्वसर्वप्रशासितृत्वादिगुणैः प्रकृतस्य द्रष्टुः सदृशं द्रष्टृ नास्तीत्येवमर्थपरत्वे स्थिते तस्य परमेश्वरविषयत्वमवार्यमिति तत्र स्थिता द्रष्ट्रादिशब्दाः परमेश्वरे चाक्षुषश्रावणमन्तव्याध्यवसेयविषयसाक्षात्कर्तृपरत्वेन योजनीयाः। तस्मात्पूर्ववाक्यगतानामपि द्रष्ट्रादिशब्दानां स एवाऽर्थः सिद्ध्यतीति पूर्ववाक्यसन्दर्भस्याऽयमर्थ इति विज्ञायते।

अदृष्टं जीववर्गस्य रूपदर्शनदशायां तदात्मवत् तं प्रत्यभासमानमेव सत् दृष्टृ तद्दर्शनविषयरूपसाक्षात्कर्तृ। अश्रुतं शब्दश्रवणदशायां तं प्रत्यभासमानमेव सत् श्रवणविषयशब्द साक्षात्कर्तृ। अमतं तस्य स्थाणुपुरुषादिविचारदशायां तं प्रत्यभासमानमेव सत् तद्विचारविषयवस्तुसाक्षात्कर्तृ अविज्ञातं तस्य स्थाण्वादिनिर्णयदशायां तं प्रत्यभासमानमेव सत् विज्ञातृ तन्निर्णीतविषयसाक्षात्कर्तृ इति।

एवं जीववर्गव्यावर्तकार्थग्रहण एव प्रकृताक्षरसदृशद्रष्ट्रन्तरादिनिषेधपूर्वोत्तरवाक्यसन्दर्भोनुगुणो भवति। तस्माददृष्टत्वादिविशेषितद्रष्टृत्वादिकं जीववर्गे न सम्भवतीत्यधिकरणार्थमुपसंहरति- **अत** इति।

अत्र सर्वप्रशासितृत्वादीनां ब्रह्मलिङ्गानां पूर्वपक्षदशायामक्षरधर्मत्वे बाधकोपन्यासात्तत्सान्निध्याम्नाताकाशधर्माणामेव सतामौपचारिकाक्षरान्वय इति स्पष्टास्पष्टब्रह्मलिङ्गतापूर्वाधिकरणे स्वमहिमप्रतिष्ठितत्वमुक्तम्। तत्परमेश्वरादन्यस्य श्रूयते इत्याक्षेपिकी तेन सङ्गतिः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ ईक्षतिकर्माधिकरणम् २५

प्रत्यक्षादिप्रमाणातीतस्याऽपि परमेश्वरस्य परमकरुणावशादुपासकप्रत्यक्षत्वमुपपादयितुम् एतदधिकरणमारभ्यते -

ईक्षतिकर्मव्यपदेशात्सः ।।१-३-१२।।

अस्य विषयः प्रश्नोपनिषदि श्रूयते 'यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाऽक्षरेण परं पुरुषमभिध्यायीत स तेजसि सूर्ये संपन्नो यथा पादोदरस्त्वचा विनिर्मुच्यत एवं हैव स पाप्मना विनिर्मुक्तः स सामभिरुन्नीयते ब्रह्मलोकं स एतस्माज्ञीवघनात्परात्परं पुरिशयं पुरुषमीक्षते' इति।

卐 卐 卐

अत्र परैः **नान्यदतोऽस्ति द्रष्टृ** इत्यादिना आत्मभेदो निषिध्यत इति यदुक्तं तदयुक्तम्। बहुप्रमाणसिद्धस्य तस्य प्रतिषेद्धुमयुक्तत्वात्। तस्मान्नान्यदतो**ऽस्ति द्रष्टृ** इति वाक्यस्य ब्रह्मव्यतिरिक्तस्य द्रष्टृत्वमात्रनिषेधपरत्वं वक्तुमयुक्तम्। तथा ब्रह्मैव द्रष्टृ नान्यदित्युक्तं स्यात्। तत्परेषां विरुद्धमेव ब्रह्मणो द्रष्टृत्वाऽनभ्युपगमात्। तस्माद्यथोक्तमेव युक्तम्।

।। *इत्यक्षराधिकरणम्* ।।

अथ ईक्षतिकर्माधिकरणम्

पूर्वाधिकरणेन सङ्गतिं दर्शयन्नुत्तराधिकरणमवतारयति - **प्रत्यक्षादी**ति। पूर्वाधिकरणविषयवाक्ये अदृष्टमश्रुतमित्यादिना जीववर्गस्य चक्षुश्शोत्रान्तःकरणव्यापारदशासु परमेश्वरस्याऽनवभासमानत्वोक्त्या तस्य प्रत्यक्षादिप्रमाणातीतत्वं सिद्धम्। तथाविधस्य साक्षात्कारः कथं फलत्वेनोच्यत इत्याशङ्कानिराकरणार्थं बाह्यान्तरिन्द्रियजन्यप्रत्यक्षाऽविषयोऽपि परमेश्वरः कृपावशादुपासकानां साक्षात्कारविषयो भवतीति प्रदर्शयितुमुत्तराधिकरणमारभ्यत इत्यर्थः।

अत्र स्वरूपावरणमपनीयस्वरूपज्ञानात्मकसाक्षात्कारविषयो भवतीति प्रदर्शयितुमित्यनेन श्री दीक्षितेन्द्रैः शिवार्कमणिदीपिकायां परमेश्वरसाक्षात्कारस्य स्वरूपावरणापनयनपूर्वकस्वस्वरूपज्ञानरूपत्वं निगदितम्। तच्चिन्त्यम्।

प्रकृताधिकरणविषयवाक्ये **परात्परं पुरुषमीक्षत** इति परमेश्वरस्यैव ईक्षतिकर्मत्वव्यपदेशात्। ततस्तु **तं पश्यते निष्कलं ध्यायमान** इत्यादिश्रुत्यन्तरेष्वपि परमेश्वरस्यैवेक्षति कर्मत्वनिर्देशाच्च न च सर्वास्वपि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अत्रेक्षति कर्मत्वेन श्रूयमाणः परमेश्वरोऽन्यो वा इति संशयः।

नाऽसौ परमेश्वरः हिरण्यगर्भ एव 'स सामभिरुन्नीयते ब्रह्मलोकम्' इति तल्लोकप्राप्तिश्रवणात्। परशब्दस्य जीवोत्कृष्टे तस्मिन्संभवाच्च।

अथवा, नारायणः तस्य पुरुषशब्दवाच्यत्वात्, जीवघनात् पराद्धिरण्यगर्भात् परत्वोपपत्तेश्च तस्मिन्नेव प्रणववाच्यत्वप्रसिद्धेश्च 'तद्विष्णोः परमं पदं, सदा पश्यन्ति सूरयः' इति तत्पदस्यैव विद्वदनुभवविषयत्वश्रवणात्।

श्रुतिषु श्रुतः परमसाक्षात्कारः स्वरूपाऽऽवरणापनयनपूर्वकस्वस्वरूपावबोध इत्येव विवक्षित इति शङ्क्यम्। सम्पद्याविर्भावाधिकरणे **परं ज्योतिरुप सम्पद्य स्वेन रूपेणाविर्भवती**ति श्रुतेः ब्रह्मप्राप्तजीवस्य मलतिरोहितं ब्रह्मसदृशगुणं स्वरूपं पूर्वं सदेव मलावरणापगमादाविर्भवतीति ब्रह्मप्राप्त्यनन्तरमेव मलावरणापगमपूर्वक-स्वस्वरूपाविर्भावस्य निर्धारितत्वात्तद्विवरणे दीक्षितेन्द्रैरपि तदानुगुण्येनैव विवृतत्वेन तद्विरुद्धत्वेन प्रकृते परमेश्वरसाक्षात्कारस्य स्वरूपावरणापनयपूर्वकस्वस्वरूपावबोधपरत्वायोगादिति दिक्।

प्रश्नोपनिषदि - **स यो ह वैक्षतद्भगवन्नि**त्यादिना पिप्पलादं प्रति सत्यकामप्रश्ने इदमाम्नायते। **यः पुनरेतमि**त्यादि। अत्र **परं पुरुषमभिध्यायीत। परात्परं पुरुषमीक्षत।** इत्युक्त्या **ध्यातव्यः परमपुरुष एव ईक्षणीय** इति फलफलिनोरीक्षणध्यानयोरेकविषयत्वनियमादवगम्यते।

ध्यातुरीक्षणविषये पुरुषे त्रिधा संशयं दर्शयति - **अत्रे**ति। अन्यो वेत्यनेन हिरण्यगर्भो नारायणो वेति कोटिद्वयं सङ्गृहीतम्। अत्रेत्यनेन परमेश्वर इति कोटेर्बीजं सूचितम्। उपक्रमे **एतद्वै** इत्यादिना पारमेश्वरोपासनाविधित्सावगमात्। ईक्षतिकर्मत्वेन श्रूयमाण इत्यनेन तदन्यो वेति कोटेर्बीजं सूचितम्। पूर्वत्र अदृष्टं द्रष्ट्रित्यादिना परमेश्वरस्य प्रत्यक्षाऽविषयत्वश्रवणात्। अत ईक्षतिकर्मत्वश्रवणं परमेश्वरादन्यत्रैव सम्भवतीति भावः।

पूर्वपक्षमाह - **नाऽसौ परमेश्वर** इति। **ईक्षतिकर्मत्वश्रवणादेवे**ति भावः। प्रथमपूर्वपक्षमुपपादयति - **हिरण्यगर्भ** इति। **तल्लोक प्राप्तिश्रवणा**दिति - भूलोकादिप्राकृतलोकप्रायपाठादत्र ब्रह्मलोकशब्दः कार्यब्रह्मलोकपर इति भावः।

द्वितीयपूर्वपक्षमुपपादयति - **अथवा नारायण** इति। **पुरुषशब्दवाच्यत्वा**दिति।

यथा शङ्करशब्दोऽयं महादेवेऽवतिष्ठते।
तथा पुरुषशब्दोऽपि वासुदेवेऽवतिष्ठते।।

इत्यादिषु पुरुषशब्दस्याऽसाधारण्येनाऽपि नारायणे शक्तिस्मरणादिति भावः। **प्रणववाच्यत्वप्रसिद्धे**रिति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

'ऋग्भिरेतं यजुर्भिरंतरिक्षं सामभिर्यत्तत्कवयो वेदयन्त' इत्यग्रिमश्लोके तत्प्रत्यभिज्ञानाच्चेति प्राप्ते ब्रूमः।

ईक्षतिविषयस्स परमेश्वरः। उत्तरत्र तमोंकारेणैवायतनेनाऽन्वेति 'विद्वान् यत्तच्छान्तमजरममृतमभयं परं च' इति तदसाधारणशान्तत्वादि धर्मव्यपदेशात्। नहि हिरण्यगर्भे तत्कार्ये शान्तत्वाऽदिकमस्ति।

ब्रह्मलोकमिति परब्रह्मणः शिवस्य लोकः प्राप्यतयाऽवगम्यते जीव घन इति जीवसमिष्टिरूपो हिरण्यगर्भः तस्मात् परात्परं हि ध्येयं श्रूयते, ततो हिरण्यगर्भपक्षो न युक्तः।

प्रपञ्चसारादिष्विति भावः। **प्रत्यभिज्ञानाच्चेति**। अत्राऽयं भावः। **यत्तत्कवयो वेदयन्त** इत्यत्र तद्विष्णोरिति मन्त्रश्रुतविष्णुपदसाधारण्यप्रत्यभिज्ञानादिह ब्रह्मलोको विष्णुपदमेवेति तत्रेक्षतिकर्मा तदर्थं ध्यातव्यश्च विष्णुरेव।

नन्वेवं परब्रह्मोपासनाविधित्सापर उपक्रमो विरुध्यत इति चेन्न। अस्मिन्नेव श्लोके तमोङ्कारेणाऽन्वेतीत्योङ्कारेण विष्णूपासनया तत्पदप्राप्तिमभिधाय **यत्तच्छान्तमित्यादिना** त्रिमात्रेणोङ्कारेणैव शान्तत्वादिविशिष्टं शिवमपि प्राप्नोतीति वचनादोङ्कारेण शिवोपासनस्यापि विधिसिद्धेः। तस्माच्छान्तत्वादिपरब्रह्मलिङ्गैरुपसंहारस्यापि न विरोधः।

एवं च शान्तत्वादिविशिष्टः प्राप्यः परमेश्वर एव। ईक्षतिविषयस्तु तदन्यश्चतुर्मुखो नारायणो वेति। सूत्रे **स** इति निर्देशेन **यस्य परमेश्वरस्योपासनमेतद्वै सत्यकाम परं चापरं** चेत्युपक्रमे विधित्सिततयोक्तं स एव ध्यानेक्षणवाक्ययोः परशब्देन प्रत्यभिज्ञाप्यत इति सूच्यत इत्यभिप्रेत्याऽह ईक्षतिविषयस्स परमेश्वर इति। यथाक्रतुन्यायेन ध्यानविषयस्यैव प्राप्यतया ध्यानफलत्वादीक्षणस्य ध्यानेक्षणयोरेकविषयत्वादिति भावः। व्यपदेशादिति सौत्रं हेतुं व्याचष्टे - **उत्तरत्रेति**। शान्तत्वादिकं प्रकृतध्यानेक्षणकर्मणोऽन्यत्रेतरोपासनविषयेनान्वेति। वाक्यभेदप्रसङ्गेन प्रकृते उपासनान्तरविध्यनङ्गीकारात्। **अमृतमभयं परं चेति** चकारेस्येक्षतिकर्मण्येव शान्तत्वादिगुणसमुच्चयार्थत्वस्योपपन्नत्वादिति भावः। **नहि हिरण्यगर्भ** इति - शान्तत्वनिरस्तसमस्तसांसारिकदोषकलङ्कत्वम्। अमृतत्वमनादिमुक्तत्वम्। अभयत्वमभयहेतुत्वम्। स्वयं भयराहित्यस्य शान्तत्वविशेषेणैव सिद्धेः। अभयशब्दात्तत्करोतीति ण्यन्तात्पचाद्यचि अभयशब्दस्याऽभयहेतुपरत्वमुपपद्यते। परत्वं सर्वोत्कृष्टत्वम्। एतत्सर्वं हिरण्यगर्भे न सम्भवतीत्यर्थः।

प्राकृतलोकप्रायपाठाद्ब्रह्मलोकशब्दः कार्यब्रह्मलोकपर इति पूर्ववाद्युक्तं निराकरोति - **ब्रह्मलोकमिति**। परश्रुतिप्रत्यभिज्ञालिङ्गप्रकरणैः प्रायपाठो बाध्यत इति भावः। इतोपि न हिरण्यगर्भ इत्याह - **जीवघन** इति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

नारायण इति यदुक्तं तद्विचार्यम्। 'अमृतमभयं परं च' इति नित्यमुक्तत्वमभयहेतुत्वं विश्वाधिकतया परत्वं च कथमस्मिन्नुपपद्यते? विश्वरूपो ह्यसौ कथं चैतदुपपद्यते? यज्जीवघनाद्धिरण्यगर्भादपिं परादुत्कृष्टान्नारायणात् परमुत्कृष्टं पुरि शयानमन्तर्यामितया अत एव पुरुषं परं ब्रह्म तदुपासकस्साक्षात्पश्यतीति वर्णित 'नारायणपरं ब्रह्म, ऋतगं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलं ऊर्ध्वरेतं विरूपाक्षम्' इति हि श्रूयते। तस्मात् पुरि दहरपुण्डरीके वर्तमानतया पुरुषशब्दवाच्यं 'तस्य प्रकृतिलीनस्य यः परः स महेश्वर' इति श्रुत्या प्रणवाभिधेयं, 'नारायणपरं ब्रह्म' इति श्रुत्या नारायणाद्विश्वरूपादधिकं, वाङ्मनसविपर्यासरहिततया ऋतगं सत्यं, त्रिलोचनतया विरूपाक्षं, परशक्त्या प्रणववर्णव्यत्यासरूपोमाशब्दवाच्यया शबलाकारत्वेन कृष्णपिङ्गलं परं सर्वातिशायि, ब्रह्म परात्परं पुरिशयं पुरुषमीक्षत इति ईक्षतिकर्मत्वेन व्यपदिश्यत इति युक्तम्।

नारायणपक्षे शान्तत्वाऽजरत्वसम्भवेप्यमृताभयपरशब्दोक्तानि नित्यमुक्तत्वसंसारमोचकत्व-विश्वाधिकत्वानि नोपपद्यन्त इत्याह - **अमृतमभयमि**ति। नित्यमुक्तत्वमिह न नित्यमेव सांसारिकदोष-निर्मुक्तत्वम्। शान्तविशेषणेन तल्लाभात्। किन्तु सर्वकालं निरतिशयानन्दभोक्तृत्वम्। तत्परमेश्वरधर्मस्य परमाकाशशब्दितस्य निरतिशयाऽनन्दस्याऽवस्थाविशेषरूपे नारायणे न सम्भवतीति भावः। इतोपि नारायणो नेक्षतिविषय इत्याह - **कथञ्चैतदि**ति। जीवघनात्परादिति। पञ्चम्योर्वैयधिकरण्यमेव युक्तमधिकार्थलाभादिति भावः। ननु तयोर्वैयधिकरण्येपि हिरण्यगर्भात्परः ईक्षतिकर्मगतपरत्वावधिभूतो नारायण इति। कुतोऽवसीयते। येनेक्षतिकर्म नारायणो न स्यादित्याशङ्क्याह - **नारायणपरमि**ति। तैत्तिरीये दहरविद्यायामणोरणीयानित्यनुवाके, **यो देवानामि**ति मन्त्रेण शिवस्य हिरण्यगर्भादधिकत्वे सिद्धेऽपि तदनन्तराऽनुवाके **नारायणपरब्रह्मे**ति नारायणाद्ब्रह्मणः परत्वमुक्तम्। तत्किं नारायणात्परमित्या-कांक्षायाम्। **ऋतँ सत्यं परं ब्रह्मे**ति तदनन्तरानुवाके शिव एव नारायणात्परं ब्रह्मेति प्रदर्शितम्। तेन हिरण्यगर्भात्परो नारायणस्ततः परश्शिव इति सिद्धम्। स्पष्टञ्चैतच्छिवसङ्कल्पोपनिषदि **परात्परतरो ब्रह्मा तत्परात्परतो हरिः। तत्परात्परतो हीश** इतिमन्त्रे। अतस्तदर्थप्रत्यभिज्ञानादिह हिरण्यगर्भात्परो नारायण एव। तस्मादिहेक्षति विषयो न हिरण्यगर्भो नापि नारायणः। किन्तु उदाहृतदहरविद्याया-मनन्तमाङ्गल्यगुणविशिष्टं दिव्याद्भुतरूपञ्च ब्रह्मवर्णितं तदेवेति तत्रत्यगुणरूपविवरणपूर्वकमुपसंहरति - **तस्मादि**ति। प्रणववर्ण व्यत्यासरूपेति। अयमर्थो लिङ्गपुराणे शिवेनाऽम्बिकायै वर्णितः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यदुक्तं 'तद्विष्णोः परमं पदम्' इति तत्र प्रपंचाकारत्वमन्तरेण यन्निरतिशयानन्दस्वभावं विष्णोः परमं पदं रूपं तदेव शिवाभिधं परं ब्रह्मेत्यविरोधः। यतो विष्णुशिवयोरुपादाननिमित्तयोरवस्थाभेदमन्तरणस्वरूपभेदो नास्ति, तदिह हरिविरंचाऽदिप्रपञ्चोत्तीर्णस्याऽपि साधकाऽनुग्रहाय पुरिशयानतया पुरुषस्य परमशक्तिरूपोमाशबलितस्य विरूपाक्षस्य परब्रह्मणस्साक्षात्कारस्सकलसंसारनिवृत्तिपूर्वकं तत्प्राप्तये तदुपासकानां तद्वाचकप्रणवपराणां भवतीति निरूपितम्।

।। इति ईक्षतिकर्माधिकरणम् ।।

***

त्वदीयः प्रणवः कश्चिन्मदीयः प्रणवस्तथा।
त्वदीयो देवि मन्त्राणां शक्तिभूतो न संशयः।।

अकारोकारमकारा मदीये प्रणवे स्थिताः।
उकारञ्च मकारञ्च अकारञ्च क्रमेण तु।।

त्वदीयप्रणवं विद्धि त्रिमात्रं प्लुतमुत्तममिति।

अथ ब्रह्मलोकशब्दोक्ते शिवपदे तद्विष्णोरितिमन्त्रार्थप्रत्यभिज्ञाया अविरोधमुपपादयति - यदुक्तमित्यादिना।

इदमधिकरणं केवलाद्वैतिनां पक्षे नोपपद्यते। तैरविषयतयाऽभ्युपगते ब्रह्मणीक्षति विषयत्वनिर्णयस्य विरुद्धत्वात्। आत्मानात्मविचारपूर्वकस्वस्वरूपावबोधस्यैव फलत्वेनाऽभ्युपगच्छतां परं पुरुषमभिध्यायीतेति परमेश्वरध्यानरूपोपासनाविधिः पुरिशयं पुरुषमीक्षत इति तत्फलरूपपरमेश्वरसाक्षात्कारस्यापि निष्प्रयोजनत्वाच्च।

तथा श्रीभाष्यकृतामपि पक्षे इदमधिकरणं न समञ्जसं भवति। नारायणस्य चतुर्मुखात्परत्वसिद्धावपि परमेश्वरादपरत्वस्यैव श्रुतिसिद्धत्वेन परात्परमिति प्रकृतविषयवाक्योक्तपरात्परत्वाऽसिद्धेः दहरविद्याद्युक्तपरत्वस्य तत्राऽनन्वयाच्चेति दिक्।

।। इति ईक्षतिकर्माधिकरणम् ।।

***

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ दहराधिकरणम् २६

तस्य पुरिशयनमुपासनं च प्रकटयितुमिदमधिकरणं प्रस्तूयते -

दहर उत्तरेभ्यः ।।१-३-१३।।

छान्दोग्येऽस्य विषयः श्रूयते, 'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यम्' इत्यादि।

दहरशब्देन इह भूताकाश उच्यते, उत जीवः परमेश्वरो वा इति संशयः।

आकाशशब्दस्य वियति रूढतया भूताकाशो दहरः अथवा जीवो दहरः स्वल्पपरिमाणत्वात्। तस्याणुभूतेऽस्मिन् सम्भवात्। न व्यापी परमेश्वरो दहरः इति प्राप्ते ब्रूमः -

परमेश्वर एव दहराकाशः, उत्तरेभ्योऽपहतपाप्मत्वादिभ्यो धर्मेभ्यः। एष 'आत्मा अपहतपाप्मा

अथ दहराधिकरणम्

पूर्वाधिकरणसङ्गतिप्रदर्शनपूर्वकमुत्तराधिकरणमवतारयति - **तस्येति**। अध्वातीत परमाकाशवर्त्यपि परमेश्वरः उपासकानां प्रत्यक्षविषयो भूत्वा **तदेकोग्रज्वलनमित्यधिकरणोक्तरीत्या**ताननुग्रहीतुं तेषां हृदयकमलेऽपि सूक्ष्मेण रूपेणाऽवस्थितः प्रणवेन स्वोपासकानां सकलसंसारनिवृत्तिपूर्वकस्वप्राप्तये तदीक्षणविषयो भवतीति पूर्वस्मिन्नधिकरणे निरूपितम्। तस्य यत्र स्थितस्य यादृशरूपगुणविशिष्टस्य प्रणवेनोपास्यत्वं तत्सर्वं प्रकटीकर्तुं दहरविद्याविचारार्थमधिकरणमारभ्यत इत्यर्थः। एषा प्रासङ्गिकी सङ्गतिः। बुद्धिस्थस्य निरूपणार्हत्वं प्रसङ्गः।

त्रेधा संशयं दर्शयन् संशयकोटीनां बीजानि सूचयति - **दहराकाश इहेति**। आकाश श्रुतिर्भूताकाशकोटेर्बीजम्। दहरत्वलिङ्गमणोर्जीवकोटेर्बीजम्। अत्र प्रकरणे अपहतपाप्मत्वादीनां ब्रह्मलिङ्गानां श्रूयमाणत्वादिहेति सिद्धान्तकोटेर्बीजं सूचितम् - **वियति रूढतयेति**। आकाशशब्दस्य लोके वियति प्रसिद्धतरत्वादिति भावः। अतो रूढ्या भूताकाश एवाऽयमितिभावः। **दहरेति**। तस्य व्यापकस्यापि हृदयपुण्डरीकावच्छेदेनाऽल्पत्वं सम्भवतीति भावः। यदि प्रकृतेऽल्पस्वरूपमेव विवक्षितं तर्हि जीवोऽस्त्वित्याह - **अथवेति**। पूर्वपक्षमुपसंहरति - **न व्यापी परमेश्वरो दहर** इति। सिद्धान्तयति - **इति प्राप्ते ब्रूम** इति। उत्तरेभ्य इति सौत्रहेतुं व्याचष्टे - **अपहतपाप्मत्वादिभ्य** इति। अत्राऽयम्भावः। यावान्वा अयमाकाश-स्तावानेषोऽन्तर्हृदय आकाश इति दहराकाशस्योपमानोपमेयभावो न भूताकाशस्योपपद्यत इति - ननु

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासस्सत्यकामस्सत्यसंकल्पः' इति वाक्यशेषसिद्धेभ्यः। एते कथं संसारिणि जीवे संभवन्ति? तस्मादीश्वर एव दहराकाशोऽपहतपाप्मत्वाऽदिगुणक इति।

गतिशब्दाभ्यां तथाहि दृष्टं लिङ्गं च ।।१-३-१४।।

तद्यथा 'हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि संचरन्तो न विन्देयुरेवमेवेमास्सर्वाः प्रजा अहरहर्गच्छन्त्येतं ब्रह्मलोकं न विन्दन्ति अनृतेन हि प्रत्यूढाः' इति वाक्यशेषे प्रजानामहरहरस्मिन् दहराकाशे या गतिः श्रूयते यश्चात्र ब्रह्मलोकशब्दस्ताभ्यामपि दहराकाशः परमेश्वरः। तथाहि, श्रुत्यन्तरे परमेश्वर एव एवं रूपं गमनं दृष्टम्। 'एवमेव खलु सोम्येमास्सर्वाः प्रजास्सति संपद्य न विदुस्सति संपत्स्यामहे' इति ब्रह्म लोकशब्दश्च तस्मिन्दृष्टः। 'एष ब्रह्मलोकस्संराडिति होवाच'

द्यावापृथिव्यादिसर्वसमाधानोक्त्यनन्तरं प्राग्ब्रह्मपुरशब्दोक्तदेह एव तस्य सर्वस्य समाधानमुक्तमापाद्य देहे जीर्णे नष्टे वा, जीर्णे कुसूलादौ धारणाक्षमे तदन्तर्निहितं व्रीह्यादिकमिव, नष्टे घटे तदन्तर्निहितं दध्यादिकमिव च, तत्किमपि नावतिष्ठेतेत्यन्तेवासिभिराक्षिप्तम्। तञ्चेद् ब्रूयुः **अस्मिंश्चेदिदं ब्रह्मपुरे सर्वं समाहितं सर्वाणि च भूतानि सर्वे च कामा यदैनज्जराऽवाप्नोति। प्रध्वंसते वा किन्तत्कोऽवशिष्यत** इति। तत्रेदमाचार्यस्योत्तरमुक्तम्। नास्य जरयैतज्जीर्यते। न वधेनास्य हन्यते। **एतत्सत्यं ब्रह्मपुरमस्मिन्कामास्समाहिता** इति दहराकाशे वर्णितम्। सर्वसमाधानमत्र सत्यशब्देन दहराकाशः परंब्रह्मेत्येव निर्धारितः। एवमुपसंहारगतेभ्यश्श्रुतिलिङ्गेभ्योऽपि दहराकाशः परमेश्वर एवेति युक्तमित्याशयः। **कथं संसारिणी**ति। अत्राऽयं भावः। दहराकाशशब्दस्य जीवपरत्वमिष्यते चेत् **अथ यदिदमस्मिन्ब्रह्मपुर** इत्यादिना दहराकाशस्येदानीन्तनोपासकदेहावच्छिन्नतया श्रूयमाणत्वेन संसारिजीवपरत्वमेवाङ्गीकार्यं नहि मुक्तजीवपरत्वम्। एवमुक्तानामपहतपाप्मत्वादीनां संसारिजीवेऽसम्भवात्तत्परत्वं वक्तुमयुक्तमिति।

दहराकाशस्य ब्रह्मत्वे हेत्वन्तरमाह - **गतिशब्दाभ्यामि**ति। तथाहि - **तद्यथा हिरण्यनिधिमि**त्यारभ्य **ब्रह्मलोकं न विन्दन्त्यनृतेन हि प्रत्यूढा** इति वाक्यशेषे प्रत्यहं तत्र श्रूयमाणा प्रजानां गतिः ब्रह्मलोकशब्दश्च दहराकाशो ब्रह्मेति बोधयत इत्यर्थः। कथमनयोः प्रकृतसाधकत्वमित्याशङ्कायामाह - **तथाही**ति। **सर्वेषाञ्चेतनानां परब्रह्मणि सुषुप्तिकालेऽहरहर्गमनमेव खलु सोम्येमाः प्रजास्सति सम्पद्य न विदुरि**ति श्रुत्यन्तरे दृष्टम्। एष ब्रह्मलोक इति ब्रह्मलोकशब्दश्च तस्मिन्दृष्टः। तत्प्रत्यभिज्ञया दहराकाशो ब्रह्मेति विज्ञायत इत्यर्थः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इति। किंच, मा भूद् गतिशब्दयोरन्यत्र दर्शनम्। अस्मिन् प्रकरणे, सर्वासां प्रजानामहरहश्श्रूयमाणं गमनं ब्रह्मलोकशब्दश्च परमेश्वरस्य दहराकाशत्वे पर्याप्तं गमकम्।

धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः ।।१-३-१५।।

'अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसम्भेदाय' इति जगद्विधृतिश्च। परमेश्वरस्य महिमास्मिन् दहराकाश उपलभ्यते। धृतिश्च परमेश्वरमहिमा। 'एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधारण एषां लोकानामसम्भेदाय' इति श्रुतेः। अतोऽपि दहराकाशः परमेश्वरः।

प्रसिद्धेश्च ।।१-३-१६।।

'दहं विपाप्मं परवेश्मभूतं यत्पुण्डरीकं पुरमध्यसंस्थम्। तत्रापि दहं गगनं विशोकस्तस्मिन्यदन्त-स्तदुपासितव्यम्' इति महोपनिषदि, 'हृत्पुण्डरीकं विरजम्' इत्यारभ्य 'उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तं ध्यात्वा' इत्यादि कैवल्योपनिषदि च, परमेश्वरस्योमासहायस्य दहरपुण्डरीकमध्यवर्तित्वेन उपास्यत्वं प्रसिद्धम्। ततोऽपि परमेश्वरो दहराकाशः।

लिङ्गञ्चेति सूत्रखण्डं व्याचष्टे - **किञ्चेति**। माभूदन्यत्र गतिदर्शनम्। अस्मिन्प्रकरणे सर्वासां प्रजानामहरहर्गमनं ब्रह्मलोकशब्दश्च दहराकाशस्य ब्रह्मत्वे पर्याप्तमित्यर्थः। चशब्दोऽवधारणार्थः एतदेव पर्याप्तमित्यर्थः। **अनृतेन हि प्रत्यूढा** इत्यवेदनस्य मलावरणहेतुत्वेनोपपादनं पुरुषार्थरूपहिरण्यनिधि-दृष्टान्तोपादानञ्च परमेश्वरविषयत्व एव सम्भवति। न भूताकाशविषयत्वे तस्माद्दहराकाशः परमेश्वर एवेति भावः।

ससेतुर्विधृतिरित्यादिना श्रूयमाणं जगद्विधरणं परमेश्वरस्य महिमा श्रुत्यन्तरे ससेतुर्विधरण इत्याम्नातत्वात्ततो दहराकाशः परमेश्वर एव। ननु जगद्विधृतेः पारमेश्वरत्वेपि **अथ य आत्मे**त्यथशब्देन दहराकाशप्रकरणस्य विच्छिन्नत्वात्सा दहराकाशे न श्रूयत इत्याशङ्क्य **अस्याऽस्मिन्नुपलब्धेरि**ति सूत्रखण्डमस्य जगद्विधरणस्यास्मिन्दहराकाश एवोपलब्धेरित्यर्थकतया व्याचष्टे - **अस्मिन्दहराकाश इति**। **अथ य आत्मे**ति प्रकृतपरामर्शिनो यत्पदस्यात्मशब्दस्य च प्राग्दहराकाशे प्रयुक्तस्य विद्यमानतया सेतुत्वादिवर्णनस्य तदन्यविषयत्वं न सम्भवति। तस्मादथशब्दः पूर्वप्रकृतापेक्ष इत्यर्थः। तस्य प्राङ्निर्दिष्टा अनन्तरं निर्देक्ष्यमाणाश्च गुणाः परस्परापेक्षया समुच्चित्योपासनीया इति सूचनं फलमिति ज्ञेयम्।

छान्दोग्यश्रुतावपहतपाप्मत्वादिगुणान्वयाद्दहराकाशः परमेश्वर इति प्रतीयते - **दहरं विपाप्ममित्यादि** तैत्तिरीयश्रुतावपि **गगनं विशोकमि**त्यपहतपाप्मत्वाद्यनन्तरं तद्विशोकत्वान्वयप्रत्यभिज्ञानाद् गगनशब्दनिर्दिष्टो दहराकाशः परमेश्वर इत्येव प्रतीयते। कैवल्योपनिषदि तु हृत्पुण्डरीकान्तर्वर्तित्वेनैव परमेश्वरोपासना

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ननु दहरपुण्डरीकमध्ये दहराकाशाऽन्तर्वर्तित्वेनोपास्यत्वं, 'य एषोन्तरहृदय आकाशः। तस्मिन् शेते सर्वस्य वशी सर्वस्येशान' इत्याद्युपनिषदन्तरे प्रसिद्धम्। परमेश्वरस्य इह दहराकाशत्वेनेति विरोध इति चेदत्राऽपि दहराकाशमध्यवर्ती परमेश्वर उपास्यः। किंतु, दहराकाशे परमेश्वरधर्माणामपहतपाप्मत्वादीनां संबन्धप्रतीतेर्दहराकाशत्वमप्यस्य चिदंबररूपतया इति न विरोधः।

अत एव हंसोपनिषदि 'लिङ्गे सुषुप्तिः' इति चेतनसुषुप्तिसमयाधारस्य दहराकाशस्य लिङ्गरूपत्वं प्रसिद्धम्। युक्तं चैतच्चिदम्बरशक्तिविशिष्टस्य परमेश्वरस्य सत्यं रूपम्।

विधीयत इति न तत्र तदन्तर्गताकाशवर्तित्वेनोपासनाविधानमिति शङ्काऽवकाश अस्ति तस्माद्दहरपुण्डरीकवर्ती परमेश्वर इत्यत्राऽपि श्रुत्यन्तराऽनुरोधादिहाऽपहतपाप्मत्वाद्यन्वयस्वारस्येन दहराकाशः परमेश्वर इत्यत्र नानुपपत्तिरिति भावः।

पूर्वपक्षहेतुं दर्शयति - **नन्विति**। इत्यादीत्यनेन दिव्ये ब्रह्मपुरे ह्येष व्योमन्नात्मा प्रतिष्ठितः। **तस्यान्ते सुषिरग् सूक्ष्मं तस्मिन् सर्वं प्रतिष्ठितम्। तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थिता। तस्याश्शिखाया मध्ये परमात्मा व्यवस्थितः**। इति वाक्यान्तरं गृह्यते। **विरोध** इति। क्वचिद्दहराकाशः परमेश्वरः प्रतीयते। क्वचित्तदन्तर्वर्तीति विरोधान्निर्णयोऽप्राप्त इति भावः। विरोधो नास्तीत्याह - **तत्राऽपीति**। **दहरोऽस्मिन्नन्तराकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यमिति**। दहराकाशमध्यवर्तिनः परमेश्वरस्य उपास्यत्वविधानादित्यर्थः। यद्येवं तर्हि अपहतपाप्मत्वादि धर्मान्वयाद्दहराकाशः परमेश्वर इति पूर्वोक्तं विरुध्येतेत्याशङ्क्य परिहरति - **किन्त्वित्यादिना**।

ननु दहराकाशस्तदन्तर्वर्ती च परमेश्वर इति कथं सङ्गच्छते। स्वस्यैव स्वान्तर्वर्तित्वस्य विरुद्धत्वात्। **'अन्यो ह्यन्यस्मिन्प्रतिष्ठित'** इति श्रुतेः इत्याशङ्क्य हृत्पुण्डरीके दहराकाशशब्दोक्तचिदम्बरशक्तिविशिष्टमहालिङ्गरूपेण वर्तमानतया शक्तिमत एकत्वादविरोध इत्यभिप्रेत्याह - **अत एवेति। हंसोपनिषदीति**। तत्र **'एषोऽसौ परमहंसो भानुकोटिप्रकाशो येनेदं व्याप्तं तस्याऽष्टधा वृत्तिर्भवतीत्यारभ्य मध्ये वैराग्यं केसरे जाग्रदवस्था कर्णिकायां स्वप्नः। लिङ्गे सुषुप्तिः। पद्मत्यागे तुरीयम्'** इति श्रूयते। अत्र परमेश्वरस्वलिङ्गरूपत्वाऽनभ्युपगमे पद्ममध्ये मध्यकेसरकर्णिकातिरेकेण चतुर्थस्य कस्यचिदभावाल्लिङ्गे सुषुप्तिरितिवचनं निर्विषयं स्यादिति भावः। चेतन सुषुप्ति समयाधारस्येति। **'इमास्सर्वाः प्रजा अहरहर्गच्छन्त्य'** इति **'इमास्सर्वाः प्रजास्सति सम्पद्य न विदुरि'**त्यादिश्रुत्यन्तरेषु परब्रह्मण एव सकलजीवसुषुप्तिकालनिवासत्वेनाम्नातत्वादत्र सुषुप्तिस्थानतया श्रुतं लिङ्गं परम्ब्रह्मेति स्पष्टमिति भावः। **लिङ्गरूपत्वमिति**। अनेन परमेश्वरः केन रूपेण दहराकाशे वर्तत इत्याकाङ्क्षा निवारितेत्याशयः।

ननु - अपहतपाप्मत्वादिकं गुणजातं दहराकाशेऽन्वेति, तदन्तर्वर्ती परमेश्वर उपास्य इति कथमिदमुपपद्यत इत्याशङ्क्याह - **युक्तञ्चैतदिति। चिदम्बरशक्तिविशिष्टस्येति**। महालिङ्गरूपस्य शिवस्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तत एव चाऽन्यत्राऽपि 'आधारे कनकप्रख्यं हृदये विद्रुमप्रभम्। भ्रूमध्ये स्फाटिकच्छायं लिङ्गं योगी विभावयेत्' इति साकारनिराकाररूपद्वयमहितस्याऽपि महेशितुरिदमेवाऽभ्यर्हितं च ध्यानपूजनादौ साधकानामिति सर्वाऽनुग्रहरसिकस्य परब्रह्मणः सर्वेषां चेतनानां हृदि निजरूपेण सन्निधानमिति न किमपीहाऽनवद्यम्।

चिच्छक्तिविशिष्टतया दहराकाशस्य अत्र वर्तमानस्याऽपि परमेश्वरस्य चैकत्वात्प्रकृते न किमपि वैयधिकरण्यमिति भावः। एवं महालिङ्गस्य चिच्छक्तिविशिष्टस्यैवोपास्यत्वाऽवगमेन दहरविद्यायामुपास्या दहराकाशशब्दोक्ता शक्तिरुत तदन्तर्वर्ती परमेश्वर इति विचारो निरर्थ इति सिद्धम्।

ननु हृदयपुण्डरीके महालिङ्गरूपश्शिव उपास्य इति न युक्तम्, **उमासहायं परमेश्वरमिति** कैवल्ये, **ऋतँ सत्यं परंब्रह्म पुरुषं कृष्णपिङ्गलम्।** इत्यन्यत्राऽपि साकारस्यैवोपास्यत्वाम्नानादित्याशङ्क्याह - **साकारेति**। **रूपद्वयेति**। परमेश्वरस्य हि साकारमिव निराकारमपि रूपमाम्नायते तथाहि - **तमादिमध्यान्तविहीनमेकं विभुं चिदानन्दमरूपमद्भुतम्। उमा सहायमिति**। तथा **ऋतं सत्यमिति**पुरस्तान्निराकारं निरूप्य पुरुषं कृष्णपिङ्गलमित्यन्यत्राऽपि साकारं रूपमाम्नायते। ततश्च भवति रूपद्वयमप्युपास्यमितिभावः। ननु निराकारं रूपमुपास्यं चेच्चिदाकाशे भवति ध्येयम्। अथ यदि साकारं तर्हि भवत्यर्चायां किमनेन महालिङ्गरूपेणेत्याशङ्क्याह - **इदमेवाऽभ्यर्हितमिति**।

अत्राऽयं भावः। साकारस्याऽथ निराकारस्य वा परमेश्वरस्य ध्याने पूजने वा महालिङ्गरूपमेव मुख्यमित्यर्थः। निराकारस्य ध्याने भवति लक्ष्यमिदमेव तथा साकारस्याऽपि रूपस्य ध्यानपूजनादाविदमेव मुख्यमित्यर्थः। अत एव महाभारते - द्रोणपर्वणि अश्वत्थामानं प्रति **जन्मकर्मतपोयोगास्तयोस्तव च निर्मलाः। ताभ्यां लिङ्गेऽर्चितो देवस्त्वयाऽर्चायां युगे युगे।** इति तत एव सर्वजनध्यानपूजनोपयोगितया **धिग्ग्राममशिवालयमिति** सर्वग्रामेषु पुण्यक्षेत्रेषु च देवर्षिमानवैः प्रतिष्ठितेषु शिवालयेषु महालिङ्गमेव सन्दृश्यते इति प्रसिद्धम्। किञ्च मुख्यमिति। पारमेश्वरीणां पञ्चविंशतेर्मूर्तीनां लैङ्ग्या मूर्तेरेव प्राथम्यादित्यर्थः। **निजरूपेणेति**। ब्रह्मविष्ण्वोः कलहसमये तयोर्मध्ये महालिङ्गरूपेणैव परमेश्वरस्याविर्भावादित्यर्थः। किञ्च - **लीयते गम्यते यस्मिन्यतस्सर्वं चराचरमिति** सकलप्रपञ्चसृष्टिलयकारणमित्यर्थः। अत्र **निजरूपेणेति**। महालिङ्गस्यैव पारमेश्वरसहजरूपत्वकथनेनोपासकानां गोचरीभूयवरप्रदानादिसमय एव परमेश्वरस्य साकारत्वमथ सर्वदा महालिङ्गरूपत्वमेवेति सिद्धम्। सर्वानुग्रहरसिकस्येति। वात्सल्यजलनिधेः परमेश्वरस्य सर्वजनाऽनुजिघृक्षोः सर्वभूतहृद्देशे निजरूपेण सन्निधानमुचितमेवेति भावः।

ननु हृदयपुण्डरीके निहितं महालिङ्गमिष्टप्राणभावाख्येषु त्रिष्वपि नान्तर्भवति। तथाहि - अस्य स्थूलतनुसम्बन्धित्वेऽपि पूजायामनुपयोगान्नेष्टसंज्ञा भवति। अथ प्राणायतने हृदि निविष्टत्वेप्यस्य मन्त्ररूपत्वाभावान्न प्राणसंज्ञा। तथा कारणशरीरासम्बन्धित्वान्न भावसंज्ञापि। एवं त्रिष्वपि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इतरपरामर्शात्स इति चेन्न, असम्भवात् ।।१-३-१७।।

'अथ य एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परंज्योतिरूपसम्पद्य स्वेन रूपेणाऽभिनिष्पद्यते। एष आत्मेति होवाच' इति इतरो जीवः परामृश्यते। अतः प्रकृताऽकाशस्स एव भवतीति चेन्न। उक्तानामपहतपाप्मत्वादीनां तस्मिन्नसम्भवात्। अतः परमेश्वर एव तदाश्रय इति युक्तम्।

साधकानामुपासनीयेष्वनन्तर्भावा हृदि महालिङ्गरूपेण वसताऽपि निरुपयोगान्न तेनाऽस्माकम्प्रयोजनमिति चेदुच्यते। दहराकाशाऽन्तर्वर्त्युपासनाविधानानन्तरं दहराकाशे किं वर्तत इति प्रश्नः कृतः। अत्र पुण्डरीकदहरत्वे नैतदन्तर्गताकाशस्य सूक्ष्मत्वसिद्धावप्यतिसूक्ष्मत्वसिद्ध्यर्थमेव खल्वाकाशेऽपि दहरत्वविशेषणं कृतम्। तत्र किं वर्तितुमर्हतीति शङ्कां मनसि निधायोक्तसर्वानुवादः तदुत्तरे दहराऽन्तर्वर्त्युपास्यमतिसूक्ष्मेऽपि वर्तितुमर्हतीत्युपपादयितुमेव **यावान्वा** इत्यादिना तस्य हृदयसुषिरविशेषाऽवच्छेदोपाधिकमतिसौक्ष्म्यं दृढीकृतम्। तेनाऽतिसूक्ष्मे किं वर्तितुमर्हतीति चोद्यं निरवकाशीकृतम्। तत्र किं वर्तत इति प्रश्नस्योत्तरमुच्यते - **उभे अस्मिन्नि**त्यादिना। तत्रोपासकस्य भोगस्थानभोगोपकरणभोग्यजातम्। दहराकाशे समाहितमिति नोच्यते। किन्तु सर्वविधमपि भोगस्थानभोगोपकरणभोग्यजातमविरक्तावस्थायामुपासकेन युगपल्लब्धं चेद्यावत्प्रेमास्पदं भवेत्तावत्प्रेमास्पदत्वयोग्यम्। **एतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मादि**तिश्रुत्यन्तरे प्रसिद्धम्। निरतिशयानन्दरूपं ब्रह्म गौण्या वृत्त्या द्यावापृथिव्यादिसर्वशब्दसन्दर्भे प्रतिपाद्यमिति तदेव दहराकाशे समाहितमित्युच्यते। तस्मिन्सर्वं प्रतिष्ठितमिति श्रुत्यन्तरेऽपि तदेवोच्यते। एवञ्च दहरे निविष्टं परमानन्दरूपमिति सिद्धम्। आनन्दरूपमजरं यद्विभातीत्यादिश्रुत्याऽपीदमानन्दरूपमित्यवगम्यते। भावलिङ्गस्यानन्दरूपत्वप्रसिद्ध्या हृदयकमलकुहरविराजमानं भावलिङ्गमेवेति सिद्ध्यति। अस्य चेतनसुषुप्तिसमयस्थानत्वमपि कारणतनुसम्बन्धादपि दहराऽन्तर्वर्तिभावलिङ्गमेवेत्यवगम्यते। अत एव क्रियासारे - श्रीनीलकण्ठभगवत्पादैर्दहराऽधिकरणं भावलिङ्गोपासनाविधिपरमिति निर्णीतमिति तत्कर्तृभिरभिहितमित्यलम्। एवंभूताकाशजीवसाधारणः पूर्वपक्षो निराकृतः।

अथ जीवपक्षोपपादकहेत्वन्तरोद्भावनपूर्वकं तन्निराकरणपराणि सूत्राणि -

इतरो जीवः परामृश्यत इति तस्मात्। सम्प्रसादशब्दस्य सुषुप्तिवाचकतया तद्विशिष्टे जीवे वृत्तिर्युक्ता न ब्रह्मणि। **शरीरात्समुत्थाये**ति। शरीरात्समुत्थानमपि तस्यैव धर्म इति प्रसिद्धम्। तस्माद्दहराकाशः जीव इत्यवगम्यत इति चेन्न। उत्तरेभ्यो वाक्येभ्य उक्तानामपहतपाप्मत्वादीनां तस्मिन्नसम्भवादित्यर्थः। यद्यपि जीवेऽपहतपाप्मत्वादयो न सम्भवन्तीति प्रसिद्धमेव। तथाऽपि तत्सम्भवशङ्कामुद्भाव्य निराकर्तुं शङ्कावकाशसूचकमिदं सूत्रम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उत्तराच्छेदाविर्भूतस्वरूपस्तु ।।१-३-१८।।

उत्तरत्र प्रजापतिवाक्ये 'य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासस्सत्यकामस्सत्यसङ्कल्पस्सोऽन्वेष्टव्यस्स विजिज्ञासितव्यस्स सर्वान् लोकानाप्नोति सर्वांश्च कामान् यस्तमात्मानमनुविद्य विजानाति' इति जीवस्याऽपहतपाप्मत्वादिकं श्रूयते। जीवत्वलक्षणमवस्थात्रयवर्तित्वं च श्रूयते 'य एषोऽक्षिणि पुरुषो दृश्यते एष आत्मेति होवाच य एष स्वप्ने महीयमानश्चरति एष आत्मेति होवाच तद्यत्रैतत्, सुप्तस्समस्तस्संप्रसन्नस्स्वप्नं न विजानात्येव आत्मेति होवाच' इति ततस्स एवाऽयं भवितुमर्हतीति चेन्न सारमेतत्। निजाऽनादिकर्मकलङ्कसंबन्धघटितकलेबर तिरोहिताऽपहतपाप्मत्वादिको जीवः परंज्योतिरुपसम्पद्य पश्चादाविर्भूतस्वरूप आविर्भूताऽपहतपाप्मत्वादिकोऽत्र प्रतिपाद्यते न संसारी दहराकाशस्तु स्वाभाविकातिरोहिततत्तत्कल्याणगुण इति न बद्धो मुक्तो वा अत्र दहराकाशः।

अन्यार्थश्च परामर्शः ।।१-३-१९।।

'अस्माच्छरीरात्समुत्थाय परंज्योतिरूपसम्पद्य स्वेन रूपेणाऽभिनिष्पद्यत' इति जीवस्य दहराकाशशब्दनिर्दिष्टेन परवस्तुना सम्पद्य स्वरूपाविर्भावोऽभिधीयते। तत्र तादृक्तन्माहात्म्यप्रतिपादनार्थो जीवपरामर्शः, अतो न विरोधः।

प्रजापतिवाक्ये **य आत्माऽपहतपाप्मे**त्यादिना जीवेप्यपहतपाप्मत्वादिकं धर्मजातं श्रूयते तस्माज्जीव एव दहराकाशशब्दित इति शङ्का। ननु प्रजापतिवाक्येप्यपहतपाप्मत्वादिकं श्रुतं परमेश्वरस्यैवेत्याशङ्क्याह - **जीवलक्षणमवस्थात्रयवर्तित्वञ्चे**ति। परिहरति - **निजानादी**ति। प्रजापतिवाक्ये जीवस्संसारिदशायां तिरोहिताऽपहतपाप्मत्वादिकस्सन् मुक्त्यवस्थायां साधनाधीनतदाविर्भावः प्रतिपाद्यते। दहराकाशे श्रूयमाणन्तु अपहतपाप्मत्वादिकं नित्याविर्भूतमेव ग्राह्यम्। तद्ग्रहसम्भवे तिरोहितत्वेनाऽसत्प्रायस्य साधनाधीनाविर्भावस्य च ग्रहणाऽयोगादित्यभिप्रायमाविर्भूतस्वरूपस्त्विति परिहारसूत्रखण्डं व्याचष्टे - **निजाऽनादी**ति। यदि दहराकाशो न जीवः किमर्थस्तर्हि **य एष सम्प्रसाद** इत्यादौ जीवपरामर्शः इत्याशङ्क्याह।

अहरहर्वा एवंवित् स्वर्गं लोकमेतीति विद्वान् परामृश्यते। तन्माहात्म्यप्रतिपादनाऽर्थ इति दहराकाशस्य जगद्विधारणादिवज्जीवस्वरूपाविर्भावापादनरूपसम्पद्विशेषप्रतिपादनार्थ इत्यर्थः। ततो न ब्रह्मप्रकरणे जीवपरामर्शो निरर्थ इति भावः। अनेनोपसंहारगतहेतुर्निराकृतः अथोपक्रमगतहेतुं निराकरोति -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अल्पश्रुतेरितिचेत्तदुक्तम् ।।१-३-२०।।

अल्पस्थानाश्रयत्वादल्पस्वरूपत्वप्रतीतेर्न परोऽयमिति शङ्कायाः पूर्वमुक्तमेवोत्तरं व्योमवच्चेति।

अनुकृतेस्तस्य च ।।१-३-२१।।

तस्य जीवस्य दहराकाशशब्दनिर्दिष्टपरंज्योतिरनुकृतिरवगम्यते 'नैनं सेतुमहोरात्रे तरतो न जरा न मृत्युर्न शोको न सुकृतं न दुष्कृतं सर्वे पाप्मानोऽतो निवर्तन्ते अपहतपाप्मा ह्येष ब्रह्मलोकः। तस्माद्वा एतं सेतुं तीर्त्वा अन्धस्सन्ननन्धो भवति विद्धस्सन्नविद्धो भवति उपतापी सन्ननुपतापी भवति तस्माद्वा एतं सेतुन्तीर्त्वा अपिनक्तमहरे वाऽभिनिष्पद्यते सकृद्विभातो ह्येष ब्रह्मलोकः' इति वाक्यशेषे। अत्रहि दहराकाशं प्राप्तस्य पाप्मकार्यान्धत्वाद्यभावे सततोदितप्रकाशत्वे च प्राप्यस्य दहराकाशस्यऽपहतापाप्मत्वं सततोऽदितप्रकाशत्वं च हेतुत्वेनोच्यते। तेन दहराकाशं प्राप्तस्य उक्तफलाऽवाप्तिस्तत्साम्याप्तिरूपा तदनुकृतिरिति लभ्यते। सा च ततो भेद एव उपपद्यते। अतश्चाऽयं न जीव इति तात्पर्यम्।

प्रमाणाऽन्तरमाह -

अपि च स्मर्यते ।।१-३-२२।।

दहरपुण्डरीकान्तर्वर्तित्वमहालिङ्गरूपत्वमुपास्यत्वं च ब्रह्मणस्स्मर्यते - 'ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।, तमेव चाद्यं पुरुषं प्रपद्ये।, ततोऽव्ययात्मा स हरिः स्वहृत्पङ्कजशायिनम्। दर्शयामास देवानां मुरारिर्लिङ्गमैश्वरम्।, अथवा परमात्मानं परमानन्दविग्रहम्। गुरूपदेशाद्विज्ञेयं

दहरोऽस्मिन्नित्यल्पपरिमाणवत्त्वश्रवणान्नायं परमेश्वरः किन्तु जीव एवेति चेत्तस्याश्शङ्कायाः व्योमवच्चेति परिहार उक्त इत्यर्थः। जीवपूर्वपक्षनिराकरणे हेत्वन्तरमाह -

तस्य जीवस्य परंज्योतिरूपपरमेश्वरं प्राप्तस्य तत्साम्यापत्तिरूपं तदनुकरणं लभ्यते। तदनुकरणं च ततो भेद एवोपपद्यते। एवमनुकर्त्रनुकार्ययोर्जीवेश्वरयोर्भिन्नत्वनियमाज्जीवो न दहराकाश इत्यर्थः। दहर उत्तरेभ्य इति सूत्राद्दहर इति। इतरपरामर्शादिति सूत्रात् स इति नेति च अनुवृत्य सजीवो दहरो न भवतीत्यर्थो लब्धः।

ईश्वर इत्यादिकं गीतावचनं। ततोऽव्ययात्मेत्यादिकं वामनपुराणोक्तिः। अथवेत्यादिकं योगयाज्ञवल्क्यस्मृतिवचनम्। **परमात्मानमिति - तस्याश्शिखाया मध्ये परमात्मा व्यवस्थित** इति मंत्रार्थस्योपसंहारः। **परमानन्दविग्रहमिति - यच्चाऽस्येहाऽस्तीति** वाक्यार्थस्य। **गुरूपदेशाद्विज्ञेयमिति**

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पुरुषं कृष्णपिङ्गलम्। ब्रह्म ब्रह्मपुरे गार्गि! दहराऽब्जखमध्यमे अभ्यासात् संप्रपश्यन्ति सन्तस्त्वं च तथा कुरु' इति, ततः परंज्योतिस्स्वरूपं मुक्तप्राप्यं परमशक्त्युमासनाथं परंब्रह्म दहरपुण्डरीकाकाशमध्यवर्ति स्वाभाविकाऽपहतपाप्मत्वादिगुणकमुपासनीयमिति सिद्धम्।

।। *इति दहराधिकरणम्* ।। २६

***

अथ प्रमिताऽधिकरणम् २७

पूर्वाऽधिकरणे छान्दोग्यविद्यायामुपास्यतयाऽऽम्नातस्य दहराकाशस्य महालिङ्गरूपत्वं निर्धारितम्। तस्य कठवल्लीविद्याऽनुवादेनाऽपि स्थिरीकरणाऽर्थमिदमधिकरणमारभ्यते -

शब्दादेव प्रमितः ।।१-३-२३।।

- तं चेद्ब्रूयुरित्यादिशिष्याचार्यनिबन्धनज्ञापितस्य। **अभ्यासात्संप्रपश्यन्तीति** - अन्वेष्टव्यं विजिज्ञासितव्यमित्यस्य अत्राऽपहतपाप्मत्वादीनां ब्रह्मलिङ्गानां स्पष्टानामपि पूर्वपक्षे दहराकाशादन्यत्र तदन्तर्वर्तिन्वेवाऽन्वयात् स्पष्टास्पष्टब्रह्मलिङ्गतेति पादसङ्गतिः।

इदमधिकरणं शुद्धाऽद्वैतवादिनां विरुद्धमेव। तथाहि - **इतरपरामर्शात्स इति चेन्नाऽसम्भवादनुकृतेस्तस्य** इत्यादिसूत्रैः दहराकाशो जीवो न भवति किन्तु परमेश्वर एवेति जीवपरत्वनिराकरणपूर्वकमीश्वरपरत्वनिर्णयेन तयोर्वास्तवभेदस्य सिद्धत्वेन तेन शुद्धाऽद्वैतस्य प्रतिषिद्धत्वात्।

तथा श्रीभाष्यकृतामपि पक्षेऽपीदं विरुद्धमिति ब्रह्मपथे वैष्णवपथप्रतिषेधे दहरोपास्यत्वनिर्णये सविस्तरमुपपादितमिति नेह पुनः।

।। *इति दहराधिकरणम्* ।। २६

***

अथ प्रमिताऽधिकरणम् २७

उत्तराधिकरणस्य प्रासङ्गिकीं सङ्गतिमाह - **अत** इति। पूर्वाऽधिकरणे छान्दोग्यश्रुतस्य दहराकाशस्य निषदन्तरेषु हृत्पुण्डरीकाऽन्तर्वर्तिनः परमेश्वरस्य महालिङ्गरूपतया श्रुतत्वेन तत्प्रसिद्ध्या तादृशलिङ्गरूपेणोपास्यत्वं निर्णीतम्। तत्पुनरिह प्रात्यक्षिकश्रुत्यनुवादेन द्रढयितुमधिकरणाऽन्तरमारभ्यत इत्यर्थः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कठवल्ल्यामस्य विषयश्श्रूयते -

'अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति।
ईशानो भूतभव्यस्य न ततो विजुगुप्सते।।' इत्यादि

इहाऽङ्गुष्ठमात्रतया श्रूयमाणः पुरुषः परमेश्वरो जीवो वा इति संदेहः।

जीव इति वक्तुं युक्तं 'स विश्वरूपस्त्रिगुणस्त्रिवर्त्मा प्राणाऽधिपस्संचरति स्वकर्मभिः। अङ्गुष्ठमात्रो रवितुल्यरूपस्संकल्पाऽहंकारसमन्वितो य' इति तस्याऽङ्गुष्ठमात्रत्वप्रसिद्धेः मध्य आत्मनि तिष्ठतीति देहाऽन्तर्वर्तित्वाऽवगमाच्च। न तु परमेश्वरो व्यापकः इति प्राप्ते वदामः।

ईशानो भूतभव्यस्येत्यत्र विदित्वेत्यध्याहारः। अङ्गुष्ठमात्रः पुरुष उक्तः। **तं भूतभव्यस्येशानं विदित्वा ततस्तदन्तरं न विजुगुप्सते** - आत्मानं गोपयितुं नेच्छति। अभयप्राप्तेरित्यर्थः। अङ्गुष्ठमात्रतया श्रूयमाण इति सन्दिग्धार्थस्य पुरुषपदस्य विशेषणेन जीव इति पूर्वपक्षकोटेर्बीजं सूचितम्। **परमेश्वर** इत्यनेन भूतभव्येशितृत्वलिङ्गम् सिद्धान्तकोटेर्बीजमिति च सूचितं। **स विश्वरूप** इति। पर्यायेण देवतिर्यङ्नरादिसकलरूपभाक्। **त्रिगुणः** - सत्वादिगुणत्रयाऽधीनः। **त्रिवर्त्मा** - जाग्रदाद्यवस्थारूपमार्गत्रय-सञ्चारी। **प्राणाऽधिपः** - प्राणेन्द्रियप्रवर्तकः। स जीवः स्वकर्मभिरेव त्रिषु वर्त्मसु सञ्चरति। इदम्पूर्वमन्त्रस्योत्तरार्धम्। अङ्गुष्ठमात्र इत्युत्तरमन्त्रस्य जीवविषयत्वस्फुटीकरणायोक्तम्।

रवितुल्यरूपः यथा रविस्त्रैलोक्यप्रकाशकस्तथाऽयं स्थूलसूक्ष्मदेहद्वयप्रकाशकः। संकल्पाऽहङ्कार-समन्वितः। ममेदं फलं भूयात्तदर्थमिदं साधनमनुष्ठेयमित्येवं रूपस्सङ्कल्पः। अहमेतेषां कर्मणां कर्ता तत्फलानां भोक्ता। इत्येवं रूपोऽहङ्कारस्ताभ्यां समन्वितः। नन्वङ्गुष्ठमात्रत्वं परमेश्वरेऽपि **अङ्गुष्ठमात्रः प्रमितोऽङ्गुष्ठञ्च समाश्रित** इति श्रुतं, तत्कथं जीवलिङ्गमितिचेन्न। तत्र श्रुतस्याऽपि जीवलिङ्गत्वाऽभ्युपगमात्।

अथ सत्यवतः कायात्पाशबन्धवशं गतम्।
अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलात्।।

इति सावित्र्युपाख्यानगतवचनादप्यङ्गुष्ठमात्रत्वं जीवलिङ्गमिति निश्चीयते। ननु मध्य आत्मनीति जीवादङ्गुष्ठमात्रपुरुषस्य भेदनिर्देशादङ्गुष्ठमात्रः पुरुषः परमेश्वर इत्यवगम्यत इत्याशङ्क्याह - **मध्य आत्मनीति**। नन्वीशानो भूतभव्यस्येति श्रूयते ततोऽयमङ्गुष्ठमात्रः पुरुषः परमेश्वरस्स्यादित्याशङ्क्याह - **नत्विति**।

नाऽत्रेशानशब्दो ब्रह्मणोऽभिधानश्रुतिः भूतभव्यस्येत्यैश्वर्यप्रतिसम्बन्ध्युपादानेन तस्य भूतभव्येशितृत्वरूपकेवलयौगिकार्थपरत्वात् तस्माद्भूतभविष्यदनेकशरीरनियन्तृत्वपरतया जीव एव योजनीयम्। तस्मादङ्गुष्ठमात्रपुरुषो जीव एव न तु सर्वव्यापकः परमेश्वर इति पूर्वपक्षः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

परमेश्वर[१] एवाऽङ्गुष्ठमात्र इति युक्तम्, 'ईशानो भूतभव्यस्य' इत्यादि परमेश्वरलिङ्गशब्दात्[२], 'सर्वैश्वर्यसंपन्नः सर्वेश्वरश्च शंभुराकाशमध्य' इति तस्यैव सर्वेश्वरत्वश्रवणात्।

सिद्धान्तयति - **परमेश्वर एवे**ति। परमेश्वर लिङ्गशब्दादिति भूतभव्येशितृत्वरूप परमेश्वरलिङ्गात् परमेश्वराऽभिधानश्रुतिरूपेशानशब्दाच्चेत्यर्थः। भूतभव्यशब्दयोः प्रकरणोपपदादिसङ्कोचकाऽभावाद-सङ्कुचितभूतभविष्यद्वस्तुजातपरत्वात्तन्नियन्तृत्वं परमेश्वरलिङ्गमेव। ईशानशब्दस्त्वभिधानश्रुतिरूपः। एवमुभा-भ्यामपि प्रमाणाभ्यामङ्गुष्ठमात्रः पुरुषः परमेश्वर इति सिद्ध्यतीत्यर्थः। ननु प्रकृते यौगिकाऽर्थप्रतिसम्बन्धिनो भूतभव्यस्योपादानेन रूढ्यर्थस्याऽनुन्मेषादीशानशब्दस्याऽभिधानश्रुतित्वं भग्नमितिचेन्न प्रतिसम्बन्ध्युपादानेऽपि रूढशब्दश्रवणप्रयुक्तस्य रूढ्यर्थोन्मेषस्याऽनिवार्यत्वात्। अत्र भूतभव्येशितृत्वलिङ्गेनैव अङ्गुष्ठप्रमितः परमेश्वर इति सिद्ध्यतीत्याशङ्क्य वाक्याऽर्थबोधाऽनन्तरोपस्थाप्यतया लिङ्गस्य विलम्बितोपस्थितिकेन तेनाऽलम् शब्दश्रवणमात्रेणैव परमेश्वरप्रमापकादीशानशब्दादेवेष्टाऽर्थस्सिद्ध्यतीत्येवकारेण सूचितम्।

अत्र श्रीभाष्यकृद्भिरशब्दादेव ईशानो भूतभव्यस्येति शब्दादेवेति व्याख्यातम्। ततस्तद्विवृतौ श्रुतप्रकाशिकायां, ननु भूतभव्यस्येशान इति वाक्यम् तच्च प्रमितत्वलिङ्गाद्दुर्बलं नैवम् ईशानशब्दस्यैव शब्दशब्देन विवक्षितत्वात्। ईशानशब्दस्य देहेन्द्रियाद्यपेक्षया अनुपपत्तिस्फोरणाऽर्थं भूतभव्यशब्दोपादानम्। किमीश्वरः किं जीव इति विचारे नेश्वरसम्बन्धिलिङ्गान्निर्णयः किन्त्वीश्वरवाचिशब्दादित्येवकाराऽभिप्रायः इति परिष्कृतं। अत्र तावत् शब्दादित्यनेनेशान इत्यभिधानश्रुतिपरिग्रहे नारायणपरत्वस्य जलाऽञ्जलिर्दत्त-स्स्यादिति भिया तस्य वेदपरत्वपरिग्रहेण **ईशानो भूतभव्यस्येति**शब्दादिति पुरस्तात् श्रीभाष्यकारैर्व्याख्यातम्।

ततश्च कथमिदं युज्येत, सूत्रकारो हि भूतभव्येशितृत्वलिङ्गमेव श्रुतितो दुर्बलं मत्वा तद्व्यवच्छेदकेन शब्दादेवेत्येवकारेऽणाऽभिधानश्रुतिमेव परिजग्राह - एवं स्थिते, अहो! भाष्यकारस्तु लिङ्गादपि दुर्बलं वाक्यं परिगृह्य सूत्रमथासीदित्याशङ्क्य भाष्यकारस्याऽपि शब्दशब्देनेशानशब्द एव विवक्षितः तर्हि भूतभव्यस्येति किमर्थमुक्तमित्याशङ्क्य, तत्पूर्वपक्षोक्तस्य देहेन्द्रियाद्यपेक्ष्या सङ्कोचस्याऽनुपपत्तिस्फोरणार्थमिति यद्यपि समाहितम्, तथाऽपि तदयुक्तमेव। भाष्याऽर्थं परिपुष्णता श्रुतप्रकाशिकाकृताऽपि विवक्षिताऽर्थस्य परिमुषितत्वात्। तथाहि - ननु प्रकृते शब्दशब्देनेशानशब्दे विवक्षिते मीमांसाया नारायणपरत्वं भज्येतेत्याशङ्क्य ईशत्ववाचिशब्दादितीशानशब्दं यौगिकं परिगृह्य नारायणपरत्वमस्याऽधिकरणस्य समर्थ्यत इति सूचितवान्।

एवमीशानशब्दं यौगिकं परिगृह्य ईशत्वस्य विवक्षितत्वे तस्येशितृत्वलिङ्गविशिष्टतया घट्टकुट्यामेव प्रभातत्वात्। तस्मादिदमधिकरणं परपक्षस्य प्राणहरणक्षममेव। सूत्राऽन्तरे कुत्राऽपि ब्रह्मणो विशेषनामाऽग्रहणेन

१. परमेश्वरस्येति सम्बन्धषष्ठीरूपान्तरमित्यनेनान्वयः।

२. परमेश्वरलिङ्गशब्दादिति, परमेश्वरलिङ्गात् परमेश्वराऽसाधारणशब्दाच्चेत्यर्थः, समासस्तु लिङ्गसहितशब्दो लिङ्गशब्दस्तस्मादिति तत्र लिङ्गं सर्वेश्वरत्वं शब्दस्तु ईशा इन इति ईश्वरश्शर्व ईशान इति कोशेन तस्य रूढ्यनुशासनात्, अधिकमन्यत्र।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कथं परमेश्वरे परिच्छिन्नत्वमभ्यस्यमानमुपपद्यत इत्यत आह -

हृद्यपेक्षया तु मनुष्याधिकारत्वात् **।।१-३-२४।।**

अपरिच्छिन्नस्याऽपि परमेश्वरस्याऽङ्गुष्ठमात्रत्वमुपासकहृदयाऽपेक्षया मनुष्याऽधिकारत्वादुपासनाशास्त्रविधेः। मनुष्याणां हृदयं यावत्प्रमाणं तदवच्छिन्नं रूपं परमेश्वरः, परमकारुणिकः परिगृह्णाति तदुपासनासिद्धये। ततः परमेश्वरो ज्योतिर्मयो लिङ्गरूपतयोपासकानां हृदयमध्ये तिष्ठतीति निर्णयः।

।। इति प्रमिताऽधिकरणम् ।। **२७**

***

कृत्स्नायामपि मीमांसायां निबद्धास्सदात्मब्रह्मादिशब्दाः प्रकृताऽधिकरणे ग्रथितेन ईशानेति विशेषाऽभिधानेन भागपशुन्यायेन परमेश्वरपरास्सम्पद्यमानाः ब्रह्ममीमांसां शैवीं निर्धारयन्तीत्यलम्।

पूर्वपक्षबीजमुद्भाव्य तत्परिहारत्वेनोत्तरसूत्रमवतारयति - **कथमिति**। **अभ्यस्यमानमिति**। अङ्गुष्ठमात्रः पुरुषो ज्योतिः वाऽधूमक इति। **अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः, तं स्वाच्छरीरात्प्रवृहेन्मुञ्जादिवेषीकामिति**। मन्त्रे च श्रूयमाणमङ्गुष्ठमात्रशब्दोक्तमङ्गुष्ठमात्रपरिमाणत्वस्याऽभ्यस्यमानत्वात्। तत्र तं स्वाच्छरीरात्प्रवृहेदित्येतच्छरीराद्विविक्ततया ज्ञातव्यत्वपरमिति तस्याऽपि जीवलिङ्गतया परमेश्वरे नोपपद्यत इति भावः।

अङ्गुष्ठमात्र इत्यनेन अङ्गुष्ठपरिमाणत्वमुच्यते। न तु तदधिकपरिमाणाऽभावः। व्यापकस्याऽपि परमेश्वरस्य उपासकहृदयाऽपेक्षया अङ्गुष्ठपरिमाणत्वं सम्भवतीत्यभिप्रेत्याह - **अपरिच्छिन्नस्याऽपीति**। ननु गजतुरगशकादीनां हृदयपरिमाणस्याऽव्यवस्थितत्वादित्याशङ्क्याह - **मनुष्याऽधिकारत्वादिति**। उपासनाविधेर्मनुष्याऽधिकारिकत्वान्मनुष्यहृदयस्याऽङ्गुष्ठपरिमाणत्वाच्च तदनुसारेणोक्तमित्यर्थः। **लिङ्गरूपतयेति**। अङ्गुष्ठसमानाकारत्वस्य लिङ्गरूपत्व एव सम्भवात्पूर्वाऽधिकरणप्रतिपादितनिगमाऽन्तप्रसिद्धेश्च उपास्यतयाऽङ्गुष्ठपरिमिताकारेण हृदि सन्निहतश्शिवो महालिङ्गरूप इत्येवमित्यर्थः।

इदमधिकरणं श्रीभाष्यकृतामीशानशब्दाऽभिधेयब्रह्मनिर्धारणपरतया दुरधिगममित्युक्तं पुरस्तात् पुनरिह ब्रह्मणो महालिङ्गरूपत्वनिर्णयादुर्दर्शमपीति दिक्।

तथा शुद्धाऽद्वैतिनां नामरूपरहितब्रह्माऽभ्युपगच्छतां, ब्रह्मण ईशानाऽभिधानश्रुतिपरिग्रहाल्लिङ्गरूपत्वनिर्धारणाच्चेत्यलं परेषां शास्त्रप्रातिकूल्यप्रदर्शनेन।

।। इति प्रमिताधिकरणम् ।। **२६**

***

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ देवताधिकरणम् २८

मनुष्याधिकारत्वादित्यस्मिन्नधिकरणे मनुष्याणामेव परमेश्वरोपासनेऽधिकारस्सूचितः। कथं देवानामपि परमेश्वरविषयमुपासनं श्रूयते। अथर्वशिरसि 'ततो देवा रुद्रं नापश्यन् ते देवा रुद्रं ध्यायन्ती'त्यत्रेत्याशङ्कायां तदुपपादनायाधिकरणमिदमारभ्यते -

तदुपर्यपि बादरायणस्संभवात् **।।१-३-२५।।**

इह परमेश्वरोपासने देवानामधिकारस्सम्भवति न वा? इति संशयः। न सम्भवतीति पूर्वपक्षः; अर्थी समर्थो विद्वान् शास्त्रेणाऽपर्युदस्तो हि वैदिके कर्मण्यधिकारी। न च तेषां सामर्थ्यमस्ति विग्रहाभावात्। विग्रहवन्तो हि स्तुतिध्यानादिषु कस्यचित्समर्थाः। 'इन्द्रो वृत्राय

अथ देवताधिकरणम् २८

उत्तराऽधिकरणस्य प्रासङ्गिकीं सङ्गतिमाह- **मनुष्याऽधिकारत्वा**दिति। पूर्वाऽधिकरणे उपासनशास्त्रस्य मनुष्याऽधिकारत्वोक्त्या तदन्येषामधिकारो नास्तीति ज्ञापनाद्देवानां परमेश्वरोपासनेऽधिकारो नास्तीत्यवगम्यते। तस्मा**द्देवा रुद्रं ध्यायन्ती**त्यर्थवादः केवलमसदर्थावलम्बनमिति प्राप्ते, तेषामधिकारोपपादनार्थमिदम-धिकरणमारभ्यत इत्यर्थः। एषा प्रासङ्गिकी सङ्गतिः।

देवानामर्थित्वसामर्थ्ययोस्सम्भवाऽसम्भवाभ्यां तेषामधिकारसम्भवाऽसम्भवरूपं संशयं दर्शयति - पूर्वपक्षमाह - **न सम्भवती**ति। **विग्रहाऽभावा**दिति। देवतानां विग्रहसत्त्वे प्रत्यक्षादिप्रमाणं नास्ति। ननु देवतावाचिशब्दानां लौकिकवैदिकप्रयोगेषु स्त्रीप्रत्ययतद्धितप्रकृतितया प्रातिपदिकत्वेनाऽर्थवत्वाऽवश्य-म्भावाद्विग्रहसिद्धिरितिचेन्न। तेष्वादित्यादिग्रहवा चिनामश्विन्यादिनक्षत्रवाचिनामन्येषाञ्च केषाञ्चिदचेतनैर्गगन-परिदृश्यमानज्योतिर्मण्डलरूपैरर्थवत्वसम्भवात्ततस्तेषां चेतनविग्रहाऽसिद्धेः। न च यागविधीनां यजतेर्देवपूजार्थ-कतया देवताराधनरूपत्वात् देवताराधनानाञ्च राजाराधनवदाराधनप्रसन्नाराधनीयदेवसकलाऽर्थत्वनियमाद्देवतानां विग्रहस्सिद्ध्यति। तन्नियमाऽभावात् राज्ञः पादुका अपि पूज्यन्ते। शिवपूजायां पूजोपकरणादयो गन्धपुष्पादिभिः पूज्यन्ते। अश्वमेधे मेध्यस्याऽश्वस्य गुणक्रियाङ्गान्युद्दिश्य। **कृष्णाय स्वाहा - श्वेताय स्वाहा। यन्मेहति तस्मै स्वाहा - दद्भ्य स्वाहा हनुभ्यां स्वाहा** इत्यादि मन्त्रैः होमाः क्रियन्ते न तावता तेषां विग्रहवत्वं सिद्ध्यति। तस्मान्न यागविधिसामर्थ्याद्विग्रहवद्देवता सिद्ध्यति। न च **यदाग्नेयोऽष्टाकपाल** इत्यादिष्वग्न्यादीनां भोज्येन पुरोडाशादिना सम्बन्धो योग्यतया भोक्तृत्वं, भोक्तृत्वे च तदुपपादको विग्रहः स्वीकर्तव्य इत्येवं द्रव्यदेवतादिसम्बन्धसामर्थ्याद्विग्रहवद्देवता सिद्ध्यतीति शङ्क्यम्। यथाविधि तत्तद्देवतावाचिशब्दोच्चारण-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वज्रमुदयच्छत्' इत्यादीनां प्रामाण्यात् तेषां विग्रहवत्त्वमिति चेन्न। विध्येकवाक्यतापन्नानामन्यत्र तात्पर्याऽभावात्। तत्सद्भावेऽपि तेषामर्थित्वं नाऽस्ति परमेश्वरं प्रति तेषां परमेश्वरस्य च पदस्यैकत्वात्। 'देवा ह वै स्वर्गं लोकमगमन् ते देवा रुद्रमपृच्छन्न' इति श्रुत्या स्वर्ग एव लोको रुद्रस्य परब्रह्मणः पदमवगम्यते। स एव देवानाम्। मुक्तस्याऽपि स्वाराज्यमेव प्राप्यतयाऽवगम्यते, 'आप्नोति स्वाराज्यम्' इत्यादिषु। तथा वैदुष्यमपि तेषां नास्ति। उपनयनसंस्कारपूर्वकस्य वेदाऽध्ययनस्याऽभावेन तेषां वेदान्तविचाराऽसंभवात्ब्रह्मबोधाऽनुपपत्तेः। अत एव तेषां शास्त्रपर्युदासश्च। तस्माद्देवतानां नाऽस्ति ब्रह्मोपासनेऽधिकार इति।

सिद्धान्तस्तु - ब्रह्मोपासने देवानामप्यधिकारोऽस्ति, कुतः? तेषामर्थित्वसंभवात्। न च परमेश्वरस्य देवानां च पदं समानं, यतः सामान्येन सुखवाचकोऽपि स्वर्गशब्दः प्रकरणादिना विशेषमभिधत्ते, यथेश्वरशब्दः स्वामिमात्रवाचकः, प्रकरणवशात् - 'उपेयादीश्वरं चैव योगक्षेमार्थसिद्धय' इत्यादिषु जनपदाऽधिपत्यमात्रवाची राजविषयः ब्रह्मणः प्रकरणे पुनरयं निरतिशयैश्वर्यवाची तद्विषयो भवति, तथा सुखमात्रवाचकः स्वर्गशब्दः प्रकरणेन, प्रमाणान्तरोपपत्त्या

पूर्वकत्यागविषयत्वरूपस्यैव द्रव्यदेवतयोः परम्परासम्बन्धस्य विधेयत्वेन पुरुषेणाऽनुष्ठातुमशक्यस्य भोज्यभोक्तृभावरूपसम्बन्धस्य विध्यगोचरत्वात्। अत एवाऽग्न्यादियागकालेष्वग्न्यादिशब्दपर्याया नोच्चार्यन्ते अन्यथा - उद्देश्यदेवतास्मृतिमात्रार्थत्वे कदाचिदिच्छया पर्याया अपि प्रयुज्येरन्। तस्माद्विग्रहवद्देवता न सिद्ध्यति। अतः प्रमाणाभावेन देवतानां विग्रहाऽभावात् पटुदेहेन्द्रियादिमत्त्वरूपमुपासनासामर्थ्यं नास्तीति भावः। **इन्द्रो वृत्रायेत्यर्थवादैः** वज्रहस्तः पुरन्धरेत्यादिमन्त्रैश्च तेषां चेतनत्वस्य विग्रहवत्त्वस्य च सिद्धेरिति शङ्कते। इन्द्रो वृत्रायेति। विधेयस्तुतिपरत्वादर्थवादानामनुष्ठेयार्थप्रकाशकतया मन्त्राणाञ्च देवताविग्रहसद्भावप्रदर्शने तात्पर्याऽभावान्न तैर्विग्रहस्सिद्ध्यतीति परिहरति - **विध्येकवाक्यतेति**। मन्त्रार्थवादानां देवताविग्रहे तात्पर्यं सम्भवतीत्याशङ्क्याह - **तत्सद्भावेऽपीति**। अत एव तेषामिति। उपनयनाऽध्ययनरहितानां व्रात्यादीनां वैदिकेषु कर्मस्वनधिकारस्मरणादिति भावः।

सिद्धान्तयति - ब्रह्मोपासने देवानामप्यधिकारोऽस्तीति। इह स्वर्गशब्दो देवपदविषये क्षयिष्णुसातिशयसुखवचन इत्यत्र प्रमाणाऽभावात् **यन्न दुःखेन सम्भिन्नमिति** स्वर्गशब्दाऽर्थवर्णनस्य सुखविषयत्वात् परमशिवपद इवेन्द्रादिपदेऽपि निरतिशयसुखपर एव स्यादित्याशङ्क्याह - **प्रकरणेनेति**। **ज्योतिष्टोमेन स्वर्गकामो यजेत - अग्निहोत्रं जुहुयात्स्वर्गकामः** इति स्वर्गफलत्वेनोच्यमानानां सोमेष्ट्यादीनां तत्तत्प्रकरणपर्यालोचनया तत्तद्यागानां फलस्य तेषां **लोकवत्परिमाणतः फलविशेषस्स्यादिति** सूत्रोक्तन्यायेन

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

च देवानां पदं क्षयिष्णुत्वसातिशयत्वादिदोषकलुषितं स्वल्पसुखमभिधत्ते। परब्रह्मणः शिवस्य पदं तु निरतिशयसुखरूपमनावृत्तिलक्षणमेव ब्रूते। अतस्सातिशयत्वादिदुष्टसुखपदवर्तिना निरतिशयसुखं ब्रह्मपदं प्रत्यर्थित्वं सम्भवत्येव शक्त्यतिशयतः। स्वयम्भात वेदार्थत्वात्, पूर्वाऽधीतवेदाऽर्थविस्मरणाऽभावाद्वा तेषां वैदुष्यं च संभवति। शास्त्रस्य साधारण्येनोपासनाविधायकत्वादधिकारस्य दुर्निवारत्वेन दूरतस्तत्पर्युदासः। तेषामर्थवादप्रामाण्यात्। विग्रहवत्त्वेन सामर्थ्यं चाऽस्ति। 'आदित्यो यूपः अग्निर्हिमस्य भेषजम्' इत्यादीनां गुणवादाऽनुवादानां स्वार्थे तात्पर्याऽभावेऽपि, 'इन्द्रो वृत्राय वज्रमुदयच्छत्' इत्यादीनामर्थवादानां विरोधस्य मानान्तरप्राप्तेश्चाभावेन स्वार्थे तात्पर्यसम्भवात्। तस्मात्, ब्रह्मविद्यायामधिकारिणो देवाः।

फलतारतम्यमावश्यकमिति कर्मभिः प्राप्यस्येन्द्रादिपदरूपस्य स्वर्गस्य सातिशयत्वं दुर्वारम्। **तद्यथेह कर्मचितो लोकः क्षीयते, एवमेवाऽमुत्र पुण्यचितो लोकः क्षीयत** इत्यौपनिषदवाक्यरूपप्रमाणदर्शितयोपपत्त्या क्षयिष्णुत्वमप्यवर्ज्यम्। आदिशब्देनाऽर्थवादादिसिद्धमसुरभयवैशिष्ट्यमप्यङ्गीकार्यम्। अतो **यन्न दुःखेने**तिश्लोकस्तदर्थकस्स्वर्गशब्दश्च मुख्यवृत्त्या परमेश्वरपदपर एव कथञ्चिदिन्द्रादिपदेष्वपि वर्तते ग्रामाऽधिपेष्वीश्वरशब्दवदिति भावः। **शक्त्यतिशये**ति। ज्ञानशक्त्यतिशयादनधीतोऽपि वेदस्तदर्थश्च देवानां भातीति वा पूर्वाऽधीतस्यैव सुप्तप्रबुद्धन्यायेन स्फुरतीति वा तेषां वैदुष्यमपि सम्भवतीत्यर्थः। **शास्त्रस्ये**ति। उपासनाविधेस्सर्वसाधरणत्वात्तस्माच्छूद्रो यज्ञेऽनवक्लृप्तश्रुतिवन्निषेधाश्रवणाद्देवानामधिकारसिद्धेस्तन्निषेधशङ्कायाऽनावकाश इत्यर्थः।

ननु देवानां यदि शरीरं सम्भवेत्तर्हीदं सर्वं युज्येत। शरीराऽभावात्सामर्थ्यादिकं न सम्भवतीत्याशङ्क्याह - **तेषामि**ति। **आदित्यो यूप** इत्याद्यर्थवादानां मानान्तरविरोधाद् गुणवादत्वेऽपि, **इन्द्रो वृत्राय वज्र**मित्याद्यर्थवादानां तादृशविरोधाऽभावात्स्वार्थे तात्पर्यमवार्यमित्यर्थः। तदुपर्यपीति सूत्रे तत्पदं - सुपां सुलुगिति लुप्तषष्ठीकम् - ततस्तेषां मनुष्याणामुपरि ऊर्ध्वलोकप्राप्तिदशास्वपि देवत्वयुक्तजन्मस्वपीत्यनेन तेषामप्यधिकारोऽस्तीत्यर्थः। अयमात्मेदं शरीरं निहत्याऽन्यं नवतरं कल्याणतरं रूपं कुरुते, पित्र्यं वा गान्धर्वं वा दैवं वा प्राजापत्यं वा ब्राह्मं वेति श्रुतिदर्शितासूर्ध्वदशास्वित्यस्यार्थः। ज्योतिष्टोमादिविधिसार्थक्याय देशान्तरे देहाऽन्तरेण भोग्यस्यैहिकविलक्षणस्य सुखस्य भोक्तृत्वेन यथा कर्मदेवास्सिद्ध्यन्ति; तथैव तत्तत्कल्पादिष्विन्द्राद्याजानदेवपदस्याऽपि। पूर्वकल्पाऽनुष्ठितकर्मफलविशेषत्वेनाऽऽजानदेवा अपि सिद्ध्यन्ति। सामगानां पञ्चविंशब्राह्मणे - **अतिरात्रः पृष्ठ्यः षडहो महाव्रत**मित्यादिना देवत्वं गच्छन्ति य एतामुपयान्तीति। एवं विधदेवत्वप्राप्त्यर्थव्रतविधिसार्थक्याय देवानां चेतनत्वं विग्रहवत्त्वञ्च सिद्ध्यति। तस्मात्ततोऽपि परमेश्वरोपासनं उपर्यपि देवानामपि अर्थित्वादीनां सम्भवाद्बादरायणो मन्यत इति सूत्राऽर्थः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

देवानां विग्रहादिमत्त्वे विरोधमाशङ्क्य परिहरति -

विरोधः कर्मणीतिचेन्न, अनेकप्रतिपत्तेर्दर्शनात् ।।१-३-२६।।

नानादेशप्रवृत्तेषु यज्ञेषु तत्र तत्राऽऽहूतानां देवानां विग्रहादिमत्वे सर्वत्र युगपत्सान्निध्यं वाच्यं तन्न युज्यते। ततः कर्मणि विरोध इतिचेन्न शङ्क्यमेतत्। विग्रहवत्त्वेऽपि सौभरिप्रभृतिषु युगपदनेकदेहप्रतिपत्तिर्दृष्टा। ततो न कश्चिद्विरोधः।

मा भूत्कर्मणि विरोधः वैदिकशब्दे भवतीत्यत आह -

शब्द इतिचेन्नाऽतः प्रभवात् प्रत्यक्षाऽनुमानाभ्याम्

।।१-३-२७।।

कर्मणि विरोधाऽभावेऽपि वैदिकशब्दे विरोधः प्रसज्यते, कथम्? देवानां सावयवत्वादनित्यत्वं सहजमेव। तत इन्द्रादिदेवानामप्युत्पत्तिरनिवार्या तथात्वे तदुत्पत्तेः प्राक्तद्विनाशात् परतश्च वैदिकेन्द्रादिशब्दानामर्थशून्यत्वमनित्यत्वं वा स्यात्। अनित्यत्वेऽपि पौरुषेयत्वेन विधिनिषेध-

---

वेदमूलेषु पुराणेतिहासेषु ब्रह्मादीनां देवानां देहेन्द्रियादयस्थानविशेषा भोगभेदाश्च स्पष्टीकृताः। अतस्तेषामुपासनाऽधिकारोऽविरुद्ध इत्यर्थः। विरोधपरिहारार्थतयोत्तरसूत्रमवतारयति - **देवानामिति**। देवानां शरीरवत्त्वेऽभ्युपगम्यमाने नानादेशप्रवृत्तेषु यज्ञेष्वेकस्याऽनेकदेशसान्निध्यं न सम्भवति तस्मात्कर्मणि विरोध इत्याशङ्कया निराकरणार्थमुत्तरसूत्रमित्यर्थः।

देवानां शरीरवत्त्वेऽपि योगशक्त्या सौभरिप्रभृतीनामिव महिम्ना अनेकशरीरसम्पत्त्या तत्तद्देशप्राप्तिर्न विरुध्यत इत्यर्थः। '**आत्मनो वै शरीराणि बहूनि मनुजेश्वर। योगे कुर्याद्बलं प्राप्य तैश्च सर्वां महीं चरेदि**'ति भारतवचनं योगिनोऽनेकशरीरवत्त्वं बोधयति। एवं शक्तिविशेषेण देवानामप्यनेकशरीर-वत्त्वान्नानादेशकर्मसिद्धेर्न विरोध इत्यर्थः। एवं कर्मणि विरोधाऽभावेऽपि वैदिकशब्दानां विग्रहविशिष्टवाचित्वेऽङ्गीक्रियमाणे वेदाऽनित्यत्वतन्मूलकं तदप्रामाण्यञ्च सम्भवेदिति विरोधान्तरनिराकरणार्थतयोत्तरसूत्रमवतारयति - **मा भूत्कर्मणीति**।

शब्द इति सप्तम्यन्तम्। शब्दे विरोध इति पूर्वसूत्रादपकृष्टस्य विरोध इत्यस्य शब्द इत्यत्राऽन्वय इत्यर्थः। वैदिकानामिन्द्रादिशब्दानां विग्रहविशिष्टवाचित्वे विग्रहनाशे तेषामर्थशून्यत्वं प्रसज्येतेत्यर्थः।

ननु इन्द्रादिशरीराणां नित्यत्वमभ्युपगम्यते। अथाऽनित्यत्वेऽपि कदाचिदर्थवत्वेनैव पाण्डवादिशब्दानामिवार्थवत्त्वमुपपद्यते। ततो नायं दोष इति चेन्न, प्राकृतानां सावयवानामनित्यत्वस्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वाक्यानामप्रामाण्यम्। अतस्तत्प्रयुक्तकर्मणां चाऽसिद्धिरित्यनेकानर्थापत्तिः। ततो वैदिकशब्दविरोधस्य परिहाराय विग्रहवत्त्वं देवानामनङ्गीकार्यमिति चेन्न।

अतो वैदिकादेवेन्द्रादिशब्दादिन्द्राद्यर्थसृष्टेः। यदीन्द्रादिशब्दा व्यक्तिवाचकास्स्युः, तदा खल्विन्द्रादिनाशे तेषामर्थशून्यत्वमनित्यत्वं वा स्यात्। गवादिशब्दवदाकृतिवाचकत्वमेवेन्द्रादिशब्दानामुच्यते। तथा च यथा कुलालो घटादिशब्दान्मनसि विपरिवर्तमानात्तत्तदाकारं स्मृत्वा घटादिकं सृजति, तथा पूर्वस्मिन्निन्द्रादौ नष्टे वैदिकादिन्द्रादिशब्दात् ब्रह्मा पूर्वेन्द्राद्याकृतिविशेषं स्मृत्वा तदाकारमपरमिन्द्रादिकं सृजति। तत इन्द्रादिव्यक्तिविनाशेऽपि तत्तदाकृतेरविनाशेन शब्दानां नित्यत्वादविरोधः। किं प्रमाणमिति चेत् श्रुतिस्स्मृतिश्च। तथाहि -

'वेदेन रूपे व्याकरोत्, सतासती प्रजापतिः स भूरिति व्याहरत्स भूमिमसृजत।'

इत्यादिः श्रुतिः।

नियतत्वान्नित्यत्वं न सम्भवति। इन्द्रादिशरीराणां नित्यत्वाऽभ्युपगमे प्राकृतशरीरोत्थानपूर्वकपरमेश्वरोपसम्पत्तिलभ्यायामुक्तेरसम्भवेन तेषामर्थित्वाऽभावादुपासनायामनधिकार एवापद्येतेत्याशयेनाह - **देवानामिति**। देवविग्रहस्य नित्यत्वमनङ्गीकार्यमुपासनाऽनधिकारतादवस्थ्यात्। अथ अनित्यत्वपक्षे तेषां शरीराणामुत्पत्तिरवार्या। उत्पत्तिमत्वे च तेषामुत्पत्तेः प्राक् विनाशात्परतश्च वैदिकानामिन्द्रादिशब्दानामनर्थकत्वमनित्यत्वं वा प्रसज्येत। अथाऽनित्यत्वमेव वेदस्याऽस्त्वितिचेत्तर्हि तस्य पौरुषेयत्वेनाऽप्रामाण्यं स्यात्। एवं शब्दविरोधपरिहाराय देवानां विग्रहवत्त्वमनङ्गीकार्यमित्युपसंहरति - **तत** इति। सौत्रमत इति पदं विवृणोति। **वैदिकादेवेति**। ननु वैदिकादिन्द्रादिशब्दादिन्द्राद्यर्थसृष्टिः कथं विरोधपरिहारे हेतुः स्यादित्याशङ्क्य जातिवाचित्वमेव तत्र हेतुत्वेन विवक्षितमिति सूचयति - **यदीन्द्रादिशब्दा** इति। ननु जातिवाचित्वस्य शब्दविरोधपरिहारे हेतुत्वं युज्यते। इन्द्रादीनां शब्दानां जातिशब्दत्वे कथमिन्द्रादिशब्दप्रभवत्वस्य हेतुत्वमित्याशङ्क्य तत्र तस्य हेतुत्वं दृष्टान्तमुखेनोपपादयति - **यथा कुलाल** इति। शब्दस्मरणपूर्विकाया अर्थसृष्टेः स्मर्यमाणाऽर्थसमानाकारत्व एव लोकदृष्टतया तथैव ब्रह्मा इन्द्राद्याकृतिविशेषप्रतिपादकाद्वैदिकादिन्द्रादिशब्दात्पूर्वकालिकेन्द्राद्याकृतिविशेषमनुसन्धाय कल्पादाविन्द्रादीन् सृजतीति तेषामिन्द्रादीनां प्राक्तनेन्द्रादिसमानाकारत्वसिद्ध्या तदभिव्यज्यमाना जातिस्सिद्ध्यतीति जातिशब्दत्वस्य शब्दप्रभवत्वं भवति हेतुरित्यर्थः। ननु वेदशब्देभ्यस्तदर्थाऽनुसन्धानपूर्वकमिन्द्रादींश्चतुर्मुखस्ससर्जेत्यत्र किं प्रमाणमित्याशङ्कते - **किम्प्रमाणमिति**। प्रत्यक्षाऽनुमानाभ्यामिति सुत्रखण्डं व्याचक्षाणश्शङ्कां परिहरति - **श्रुतिस्स्मृतिश्चेति**। **वेदेनेति**। सतासती सदसती चेतनाचेतनरूपे। व्याकरोत् - देवमनुष्यादिरूपेण

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

'सर्वेषां च स नामानि कर्माणि च पृथक्पृथक्।
वेदशब्देभ्य एवाऽदौ पृथक्संस्थाश्च निर्ममे।।'

इत्यादिः स्मृतिः।

***अत एव च नित्यत्वम्* ।।१-३-२८।।**

अत एव मन्त्रकृतो वृणीयते विश्वामित्रसूक्तं भवतीति विश्वामित्रादीनां मन्त्रकृत्त्वेऽपि विश्वामित्रादिशब्दानामाकृतिनिमित्तत्वेन मन्त्रब्राह्मणमयस्य वेदस्य नित्यत्वमुपपद्यते। यतो ब्रह्मा वैदिकाच्छब्दादर्थान् स्मृत्वा सृजति। अनधीतमन्त्रादिदर्शनशक्तत्वात्। तथाच पूर्वविश्वामित्रादीनामाकृतिविशेषांस्तत्तद्वैदिकशब्दैस्स्मृत्वा तदाकारानेवाऽपरान् तत्तच्छक्तिविशेषयुक्तान् ब्रह्मा नैमित्तिकप्रलये

भूभूधरसरित्समुद्रादिरूपेण च विविधान्यकरोदित्यर्थः। **इत्यादिरिति**। आदिशब्देन **सभुव इति व्याहरत् सोऽन्तरिक्षमसृजदित्याद्यास्सङ्गृह्यन्ते**। भूर्भुवस्सुवरितिशब्दाः पृथिव्यन्तरिक्षस्वर्गलोकवाचकाः। एवञ्च तत्तल्लोकनामभिस्तत्तल्लोकनामाऽर्थभूतानाकृतिविशेषाननुसन्धाय भूलोकादीनसृजदित्यर्थः। **सर्वेषाञ्चेति**। **नामानीन्द्रादीनि**। **कर्माणि** - इन्द्रादियोग्यत्रैलोक्याधिपत्यादीनि। **पृथक्संख्याः** - सहस्राक्षत्वादिविशिष्टान्विविधानाकृतिविशेषानित्यर्थः इत्यादिस्मृतिरिति। **आदिशब्देन** -

नामरूपञ्च भूतानां कृत्यानाञ्च प्रपञ्चनम्।
वेदशब्देभ्य एवादौ देवादीनां चकार स।।

इत्यादिस्मृतिर्गृह्यते। नन्वेवं वैदिकशब्देऽर्थद्वारकविरोधे परिहृतेऽपि मन्त्रकृतो वृणीते। विश्वामित्रस्य सूक्तं भवतीत्यादिप्रामाण्याद्वेदस्याऽपौरुषेयत्वभङ्गाच्छब्दद्वारको विरोधस्तदवस्थ एवेत्याशङ्कानिराकरणार्थं सूत्रम्।

ननु कथं विश्वामित्रादिशब्दानामाकृतिनिमित्तत्वरूपहेतुस्सिद्ध्यति? कथं च तेन हेतुना वेदाऽनित्यत्वशङ्का परिहृता भवतीत्याशङ्कानिराकरणार्थम् अत एवेति निर्दिष्टं सूत्रसिद्धं हेतुं विवृणोति - **यत** इति। परमेश्वरानुग्रहलब्धसकलवेदार्थज्ञानशक्तियुतश्चतुर्मुखो वैदिकाच्छब्दादृषिमनुष्यादीनामसाधारणनामरूपकृत्याननुसन्धाय तथैव सृष्टवान्। ततश्च अतीतवर्तमानगतास्सर्वेऽपि विश्वामित्रादयः विश्वामित्रादिपदप्रापकपूर्वकल्पानुष्ठितपुण्यवशाद्विश्वामित्रसूक्तादीननधीत्यैव पश्यन्तीति तत्तत्सूक्तादिद्रष्टृत्वमेव नत्वपूर्वानुपूर्वीकाभिनवसूक्तादिकर्तृत्वरूपं तत्कर्तृत्वमिति सिद्ध्यति। तस्माद्विश्वामित्रादीनाम्मन्त्रकर्तृत्वं वेदनित्यत्वञ्चाऽविरोधेन सिद्धमित्यर्थः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

गते सृजति। ते चाऽनधीत्यैव तान्मन्त्रानखिलान्पठन्ति। अतस्तेषां मन्त्रादिकर्तृत्वं वेदनित्यत्वं च भवत्येवम् इत्यत आह -

नैमित्तिकप्रलये प्राकृतप्रलये ब्रह्मादौ वेदाख्यशब्दे च विनष्टे कथं वैदिकत्वम्?

समाननामरूपत्वाच्चाऽवृत्तावप्यविरोधो दर्शनात् स्मृतेश्च

।।१-३-२९।।

सृज्यानां समाननामरूपत्वादेव प्राकृतलयावृत्तावप्यविरोधः। तथाहि, सर्वज्ञः, सर्वशक्तिर्विद्याधिपः परमेश्वरः आदिकर्ता पूर्वप्रपञ्चसंस्थानं स्मृत्वा तदाकारमेवाऽपरं पुनः प्रपञ्चं सृजति। वेदानपि पूर्वानुपूर्वीविशिष्टान्संस्मृत्य पुत्रभूताय ब्रह्मणे प्रयच्छति। कथमवगम्यते? श्रुत्या स्मृत्या च,

'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्। दिवं च पृथिवीं चाऽन्तरिक्षमथो सुवः, यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' इति श्रुतिः।

स्मृतिरपि,

उत्तरसूत्रमवतारयति - **भवत्वेवमिति**। चतुर्मुखस्य स्वमानेन शतवर्षजीविनः चतुर्युगसहस्ररूपैकैक-दिनरूपावान्तरकल्पस्याऽवसाने तावत्कालप्रमाणारात्रिर्नैमित्तिकप्रलयः। ततस्त्रैलोक्यं नश्यति महर्लोकादयस्तिष्ठन्ति। एवं तदीयशतवर्षावसाने तावत्प्रमाणः कालः प्राकृतः प्रलयः। तत्र ब्रह्माण्डादिकं सर्वं नश्यति। प्रकृतिमात्रमवशिष्यते। नैमित्तिकप्रलये वेदस्याऽवस्थानात्तस्य नित्यत्वेऽपि प्राकृतप्रलये तन्न सम्भाव्यते। तस्मात्पूर्वसूत्रोपवर्णितं वेदनित्यत्वमनुपपन्नमित्याशङ्कानिराकरणाऽर्थमुत्तरसूत्रम्।

प्राकृतप्रलये वेदानामभावेन स्वरूपतो वेदस्य नित्यत्वमनुपपन्नमितिचेदिष्टापत्तिः। **अस्य महतो भूतस्य निश्वसितमे**वेत्यादिश्रुतिषु महदहङ्कारादीनामिव तेषामुत्पत्तिश्रवणात्। एकरूपवर्णपदवाक्य तदानुपूर्विकत्वलक्षणे तु नित्यत्वे न विरोधः। अवान्तरकल्पेष्विव महाकल्पाऽऽवृत्तावपि सृज्यानां समाननामरूपत्वस्य श्रुतिस्मृतिभ्यामवगमादित्याशयेन सूत्रं व्याचष्टे - **सृज्यानामिति**। ननूदाहतश्रुतिस्मृत्यो-रवान्तरकल्पविषयत्वोपपत्तेः प्राकृतप्रलयेऽयं हेतुरसिद्ध इत्याशङ्क्य परिहरति - **यो ब्रह्माणमिति**। श्रुतिरवान्तरकल्पविषया न भवति। तत्र ब्रह्मसृष्टेरभावात्। ततश्च तस्या महाकल्पविषयत्वेन तत्रोक्तं ब्रह्मणे वेद तदर्थ प्रदानं पूर्वकल्पगतेन्द्रादिनामरूपवैभवानि वैदिकेभ्यो मन्त्रार्थवादेभ्यो विज्ञाय इन्द्रादीनयं सृजत्वित्येतदभिप्रायेणेति समाननामरूपत्वसिद्धिस्ततो वेदनित्यत्वमपि सिद्ध्यतीत्याशयः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

'अप एव ससर्जादौ तासु वीर्यमवासृजत्।
तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्।।
तस्मिञ्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः।
ब्रह्माणं विदधे पूर्वं वेदा तस्मै प्रयच्छति।।' इत्यादिः।

ततः प्राकृतप्रलयावृत्तावपि वेदानां नित्यत्वमेव। मतान्तरमाह -

मध्वादिष्वसम्भवादनधिकारं जैमिनिः ।।१-३-३०।।

मधुविद्यादिषु वस्वादिदेवानामेवोपास्यत्वात्प्राप्यत्वाच्च वस्वादीनां कर्तृकर्मभाव-विरोधेनोपास्यत्वासम्भवाद्वस्वादीनां सतां वस्वादित्वं प्राप्तमिति प्राप्यत्वाऽसंभवाच्च तत्र वस्वादीनामनधिकारं जैमिनिर्मन्यते।

ज्योतिषि भावाच्च ।।१-३-३१।।

'तं देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम्' इति ज्योतिषि परब्रह्मणि देवानां साधारण्येन प्राप्तत्वेऽप्यधिकारभाववचनात्। अन्यत्र मध्वाद्युपासनेऽनधिकारो न्यायसिद्धोऽवगम्यते।

एवं देवानां ब्रह्मविद्यास्वधिकारस्समर्थितः तत्र मधुविद्यादीनां ब्रह्मविद्यात्वाभावात्तासु देवानां नाधिकार इति जैमिनेर्मतमनूद्य तास्वपि ब्रह्मविद्यात्वसमर्थनेन तन्मतनिरासार्थं मध्वादिष्वित्यादिसूत्रत्रयम्। तदपि देवताविषयविद्याधिकारनिरूपणार्थत्वाद्देवताधिकरणैकदेशमित्यभिप्रेत्याऽवतारयति - **मतान्तरमिति**।

छान्दोग्योपनिषदि **असावादित्यो देवमधु** - इत्यारभ्य निरूपिता मधुविद्या। तस्यामुपास्याः प्राप्याश्च वस्वादयश्श्रूयन्ते। ततश्च वस्वादीनां स्वस्वोपास्यत्वासम्भवात्स्वस्वपदप्राप्तेः फलत्वाऽसम्भवाच्च वस्वादीनां मधुविद्यायां नाऽधिकारः। एवं **वायुर्वावसंवर्ग** इत्यादिश्रुतिविहितासु संवर्गविद्यास्वपि वाय्वादीनामनधिकारः - इत्यस्मिन्नर्थे सूत्रं योजयति - **मधुविद्यादिष्विति**।

तं देवाज्योतिषां ज्योतिरिति परब्रह्मणि देवानामुपासनं श्रूयते तत्र देवा एव ज्योतिरुपासते इति वा। देवा ज्योतिरेवोपासत इति वा वाक्यस्याऽर्थो वर्णनीयः। अत्र प्रथमः कल्पो न युज्यते मनुष्याणामनधिकारप्रसङ्गात्। तस्माज्ज्योतिरेवोपास्यमित्यर्थः तस्मादपि मधुविद्यादिषु तेषामनधिकार एवेत्यर्थः। एवं प्राप्ते स्वमतमाहेत्यर्थः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भावन्तु बादरायणोऽस्ति हि ।।१-३-३२।।

मधुविद्यादिष्वपि वस्वादीनामधिकारभावं बादरायणो मन्यते। अस्ति हि वस्वादीनां सतां वस्ववस्थब्रह्मण उपास्यत्वसंभवः। कल्पान्तरे वसुत्वादेः प्राप्यत्वसंभवश्च कार्यकारणोभयावस्थं ब्रह्माऽत्र समुपास्यम्, तत्र 'असौ वा आदित्यो देवमधु' इत्यारभ्याऽदित्यवस्वादिनामरूपकृत्ययुक्त-कार्यविशेषावस्थं ब्रह्मोपास्यमुपदिश्यते। अथ, 'तत्तदूर्ध्वम् उदेति नैवोदितो नाऽस्तमेति' इत्यादिना नामरूपकृत्यरहितसूक्ष्माऽदित्यान्तराऽत्मतयाऽवसितं कारणावस्थं ब्रह्मोपास्यमुपदिश्यते तदुभयावस्थब्रह्मोपासनाफलं कल्पांतरे वस्वादित्वमुभयाधिकारावसाने ब्रह्मप्राप्तिश्च। तत्र 'स य एतदेवममृतं वेदवसूनामेवैको भूत्वाऽग्निनैव मुखे नैतदेवामृतं दृष्ट्वा तृप्यति',' इत्यादिना वस्वादिरूपं फलमुपदिश्यते। 'न ह वा अस्मा उदेति न निम्रोचति सकृद्दिवा हैवास्मै भवति य एतामेवं

कल्पान्तर इति। अत्रायं भावः। वसूनामेवैको भूत्वेत्यादिस्वारस्यात् वसुत्वादिकमेवाऽत्र प्राप्यं फलम्। न वस्वादिभोगसाम्यमात्रम्। न चाऽत्र वस्वादिसङ्ख्यातिरेकप्रसङ्गोऽत्र बाधकोऽस्तीति शङ्क्यम्। वर्तमानवस्वाद्यधिकारसमाप्त्यनन्तरं कल्पान्तरे भाविवस्वादिसृष्टिसमये तदन्यतमभावप्राप्तेः फलत्वसम्भवात् इति। वस्तुतस्तु उपसंहारस्वारस्याद्वस्वाद्यन्तर्यामिपरमेश्वर एवाऽत्रोपस्य इत्यभिप्रेत्याह - **कार्यकारणे**ति। तत्र कार्यावस्थब्रह्मोपासकोपदेशं दर्शयति तत्रेति। आदित्यादीनामादित्यवस्वादीनि नामानि; आदित्यस्य वस्वादिदेवभोग्यमधुत्वेन रूपितं ज्योतिर्मण्डलं रूपम्। वस्वादीनां तत्तदमृतभोगाऽऽक्षिप्तानि रूपाणि। आदित्यस्य **पुरस्तादुदेता पश्चादस्तमेता** इत्यादिना निरूपितं कृत्यम्। वस्वादीनां **तद्वसव उपजीवन्ते**त्यादिना निरूपितं कृत्यम्। एवंभूतनामादियुक्ततया कार्यभूतेष्वादित्यादिजीवेष्वन्तर्यामितयाऽवस्थितं ब्रह्म तदवस्थमुच्यते। कारणावस्थब्रह्मोपासनोपदेशं दर्शयति - **अथ तत** इति। ब्रह्म दिवसरूपस्य कल्पस्य समाप्त्यनन्तर-मुदयास्तमयाभ्यां प्राण्यनुग्रहादूर्ध्वमुदयास्तमयरहित इत्यर्थः। कृत्याभावादेव तदुपयोगिरूपराहित्यं तदर्थकनामराहित्यं च फलितम्। **न हवा अस्मा** इति। अस्मै कार्यकारणावस्थब्रह्मविदे नामरूपकृत्ययुक्त-दशायामप्यादित्यो नोदेति। तत्प्रयुक्तप्रकाशापेक्षाभावात्। नाऽस्तमेति तत्प्रयुक्तज्ञानप्रतिबन्धाऽप्रसक्तेः। किन्त्वस्मै ब्रह्मविदे सकृद्दिवैव भवति सदाऽहरेव भवति। सन्ततमनावृतज्ञानप्रकाशोऽस्य भवतीत्यर्थः। अस्मा इत्युक्तिः कस्मा इत्याकाङ्क्षायामाह - **य एतामि**ति। ब्रह्मोपनिषदं ब्रह्मविद्यां वेद ब्रह्मोपासनं करोतीत्यर्थः। एवमुपसंहारे ब्रह्मप्राप्तिफलश्रवणात्, ब्रह्मविद्यात्वश्रवणाच्च, वस्वादिशब्दाः वस्वाद्यन्तर्यामिपराः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ब्रह्मोपनिषदं वेद' इति ब्रह्मप्राप्तिरूपं फलमुपदिश्यते। ततो मध्वादिष्वपि देवानामधिकारोऽस्तीति सर्वथा देवा ब्रह्मविद्याधिकारिणः।

।। इति देवाधिकरणम् ।। २८

***

अथ अपशूद्राऽधिकरणम् २९

अथ मनुष्याधिकारत्वादिति सामान्येन मनुष्याणामधिकारे प्राप्ते विशेषमाह-

शुगस्य तदनादरश्रवणात्तदाद्रवणात् सूच्यते हि ।। १-३-३३ ।।

छान्दोग्ये श्रूयतेऽस्य विषयः - 'आजहारेमाश्शूद्राऽनेनैव मुखेनाऽलापयिष्यथ' इति।

अत्राचार्यश्शिष्यं शूद्रेत्यामन्त्रयते। अतश्शूद्राणामपि ब्रह्मविद्यायामधिकारोऽस्ति न वा इति सन्देहः।

तस्मात्तदुपासनायां वस्वादीनामधिकारस्सम्भवतीत्यधिकरणार्थमुपसंहरति - **तत** इति। मध्वादिष्वित्यादिशब्देन संवर्गविद्यादीनां सङ्ग्रहः।

।। इति देवताधिकरणम् ।। २८

***

अथ अपशूद्राधिकरणम् २९

उत्तराधिकरणस्याऽङ्गुष्ठाऽधिकरणेन सङ्गतिमाह – **अथेति**। हृद्यपेक्षयेत्यादिसूत्रे उपासनाशास्त्रस्य मनुष्याऽधिकृतत्वमुक्त्वा तत्र देवानामप्यधिकारस्समर्थितः। एवं सति सर्वेषां मनुष्याणां तत्राऽधिकारे न कापि विचिकित्सेति शूद्राणामप्यधिकारोऽस्तीति प्राप्तौ तेषामधिकारनिराकरणार्थमिदमधिकरणं प्रवर्तत इत्यर्थः। अत्रापि प्रासङ्गिकी सङ्गतिः।

छान्दोग्य इति। तत्रैवमुपाख्यायते। जानश्रुतिः पौत्रायणः श्रद्धया बहुधनान्नप्रदः सर्वासु दिक्षु ग्रामनगरमार्गारण्यतीर्थादिषु पान्थानामनाथानाञ्च शीतवातातपवर्षबाधानिवारकाऽन्नोदकशयनाच्छादनादि-भोग्यजातसम्पूर्णा नावसथान् निर्मापयाञ्चकेण तस्य धार्मिकप्रवरस्य कर्मभिः क्षीणदुरितस्य ब्रह्मविविदिषामुत्पादयितुं केचन महर्षयो हंसरूपमास्थाय निशायां हर्म्ये शयानस्य तस्योपरि पङ्क्तिमाबध्याजग्मुः। तेषामग्रेसरं हंसं भो भो - भल्लाक्ष भल्लाक्षेति विपरीतलक्षणया मन्दलोचनेति सम्भ्रमेण द्विवारं संबोध्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तेषामधिकारोऽस्त्यर्थित्वादिसंभवात्। न च त्रैवर्णिकानामेवेति नियमः। अत्रैवर्णिकानामपि देवानां तद्दर्शनात्। देवानामुपनयनाऽध्ययनाऽभावेऽपि स्वयम्भातवेदार्थतया युज्यते विद्वत्ता। कथमेषामिति न शङ्क्यम्। एषामपि पुराणश्रवणादिना बोधोपपत्तेः। निषादस्थपतिन्यायेन

पृष्ठगामी कश्चिद्धंस उवाच। जानश्रुतेरन्नदानादिप्रभावजनितं ज्योतिर्द्युलोकपर्यन्तं व्याप्तं वर्तते। तत्र त्वं लग्नो मा भूः। तेन तव प्रदग्धता मा भूदिति। एवमुक्तवन्तमग्रगामी हंसः प्रत्युवाच। एनं जानश्रुतिं मनुष्यसामान्यदशामतिक्रम्य वर्तमानं शकटसहितं रैक्वमिव कीदृश माहात्म्यशालिनमात्थ। रैक्व एव खलु महाप्रभावः ब्रह्मज्ञः। अस्य जानश्रुतेरब्रह्मज्ञस्य कः प्रभावः। यज्ञनितमस्य तेजो रैक्वप्रभावजं तेज इव दहेरित्याह - एतदाकर्ण्य तेन पृष्ठगामिना कोऽसौ रैक्व इति पुनः पृष्टस्स एवं प्रत्युवाच। सर्वेषामपि यद्यावत्कर्मजातं विज्ञानञ्च यदीयकर्मविज्ञानान्तर्भूतं स रैक्व इति। तदेतद्धंसवाक्यं रैक्वप्रशंसारूपं तथाभूतस्य रैक्वस्यैव ज्योतिरसह्यं न त्वस्य वराकस्येति स्वनिन्दागर्भञ्च जानश्रुतिराकर्ण्य, कथमपि निशामतिवाह्य, तल्पं त्यजन्नेव क्षत्तारमाहूय, सचिह्नं रैक्वमुक्त्वा तदन्वेषणाय प्रेषयित्वा क्वचिद्विविक्तदेशे शकटस्याऽधस्तात्पाप्मानं कण्डूयमानं रैक्वमुपलभ्य, प्रत्यागत्य निवेदितवति तस्मिन् स्वयं रैक्वमुपगम्य गवां षट् शतानि निष्कं हारमश्वतरीयुक्तं रथं चोपहृत्य त्वदुपास्यां देवतामनुशाधीति रैक्वं प्रार्थयामास। रैक्वस्तेन दीयमानं सर्वं प्रत्याचक्षाण उवाच। **अह हारेत्वा शूद्र तवैव सह गोभिरस्त्वि**ति। अहेति निपातः। हारसहित इत्वा रथः गोभिस्सह तवैवाऽस्तु। किमनेनाऽल्पधनेन सन्तोषो मम कलत्रहीनस्य प्रतिष्ठाहीनस्य च का मम एतद्धनरक्षणे शक्तिः। तव वा मत्प्रयोजनाऽपर्यवसाय्यल्पधनदानेन ब्रह्मविद्या प्रतिष्ठिता न भवेदिति भावः। पुनर्जानश्रुतौ सहस्रं गवां पूर्वानीतं हारादिकं रैक्वस्य परिणयनार्थं कन्यामावसथार्थं तत्रत्यं ग्रामं चोपहृत्य प्रार्थयमाने, विद्याप्रदानार्थमुपहारस्य पर्याप्ततामनुजानानस्य रैक्वस्येदं वाक्यम् - **आजहारेमाश्शूद्रे**त्यादि। इमा दक्षिणा आहृतवानसि। अनेनैव सुमुखेन विद्याग्रहणोपायेन मामालपयिष्यसि ब्रह्मविद्योपदेष्टारं करिष्यसीत्यर्थः।

ननु कर्मणीव ब्रह्मविद्यायामपि शूद्रस्य नाधिकार इत्येवमुक्तम्। अस्याऽधिकारसंशयः कथमित्याशङ्क्य पूर्वपक्षकोटेर्बीजमुपन्यस्य संशयन्दर्शयति - **अत्रे**ति। अत्र आजहारेति दक्षिणा प्रत्याख्यानवाक्ये शूद्रेत्यामन्त्रणं शूद्रवद् ब्रह्मविद्यागौरवमजानानः दक्षिणां स्वल्पामाहृतवानसीति कोपेन शूद्रेत्यामन्त्रणं कृतमिति योजनायामपि प्रसादवाक्ये तथा वक्तुमयुक्तत्वात्। शूद्रेत्यामन्त्रणलिङ्गेन तेषामधिकारोऽस्तीति प्रतीयते। जानश्रुतेश्शोकाविष्टत्वस्य प्राक्सूचितत्वेन तादृशलिङ्गस्याऽसिद्ध्या नाऽधिकारस्तेषामित्यवगम्यते। तस्मात्संशय इति भावः। ननु सम्भवेप्यर्थित्वादीनां कर्मणि यथा त्रैवर्णिकानामेवेति नियमस्तथा ब्रह्मविद्यायामपि तेषामेवाऽधिकार इति नियमोऽस्तीत्याशङ्क्याह - **न चे**ति। वेदाधिकारमुपपादयति - **निषादस्थपतिन्यायेने**ति। निषादस्थपतिं याजयेदित्यत्र निषादस्थपतिशब्दे निषादानां स्थपतिरिति षष्ठीसमासपरिग्रहे षष्ठ्यर्थलक्षणा स्यादिति तत्परिहाराय निषादश्चासौ स्थपतिरिति समानाधिकरणसमासोऽङ्गीकृतः। तस्मात् अत्रैवर्णिकस्याऽपि निषादस्य रौद्रं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

महावाक्यग्रहणेऽधिकारसंभवाच्च। तस्मादमीषामधिकारो ब्रह्मविद्यायामुचित इति प्राप्ते ब्रूमः -

नाऽस्ति शूद्राणां ब्रह्मविद्यायामधिकारस्तेषामध्ययनाऽभावेन तदुपायभूतोपास्य-तद्गुणादिज्ञानाऽसंभवात्। इतिहासपुराणानि वेदोपबृंहणं कुर्वन्त्येव। उपायभावमनुभवन्ति न स्वातन्त्र्येण। शूद्राणामितिहासपुराणश्रवणानुज्ञानं तु पापक्षयफलम्। विदुर, धर्मव्याधादीनां जन्मान्तरसिद्धज्ञानाप्रमोषात् ब्रह्मनिष्ठता। कथं ब्रह्मविद्योपदेशे शूद्रेत्यामन्त्रणमिति चेत् नात्र जातियोगेन शूद्रेत्यामन्त्रणम्। किंतु, ब्रह्मज्ञानाप्राप्त्या शुगस्य सञ्जातेति दर्शनात्। शुगस्य सञ्जातेति

वास्तुमयं चरुं निर्वपेदिति प्रकृतायामिष्टावधिकारसिद्ध्या तदङ्गभूतमन्त्रग्रहणं सिद्ध्यति तथैव ब्रह्मप्रतिपादकवाक्यपरिग्रहोऽत्रैवर्णिकानामपि सिद्ध्यतीति भावः। ननु विधिबलान्निषादस्य मन्त्रग्रहणं सिद्धम्। नत्वर्थवादमात्राऽनुरोधाच्छूद्रस्य महावाक्यग्रहणेऽधिकारो युक्तः। गावो वा एतत्सत्रमासत इत्यादिवदार्थवादिकस्य लिङ्गस्य स्तुत्यालम्बनत्वोपपत्तेः, इति चेन्न। गवां सत्रेष्वशक्त्यादिवत् शूद्राणामशक्त्यादिबाधकाऽभावात्। ननु - **तस्माच्छूद्रो यज्ञेऽनवक्लृप्तः** इति श्रुतिर्बाधिका। तस्याश्श्रुतेर्यज्ञा-ऽनधिकारप्रतिपादनमात्रपरत्वात्। प्रत्युत, शूद्रस्य विशिष्य यज्ञाधिकारनिषेधेन ब्रह्मविद्याधिकारेऽनुमतेरेव सिद्धेः। पूर्वपक्षमुपसंहरति - **तस्मादिति**।

सिद्धान्तयति - **नास्तीति**। तेषामनधिकारे हेतुमाह - **अध्ययनाभावेनेति**। सामर्थ्याभावादित्यर्थः। अध्ययनाभावेन ब्रह्मस्वरूपतदुपासनप्रकारमजानतः न खलूपासने सामर्थ्यं विद्यते। ननु वेदान्तेष्विव पुराणेतिहासेष्वपि ब्रह्मणस्तद्गुणानाञ्च प्रतिपादनं प्रपञ्चेन दृश्यते। तज्जन्यं ज्ञानं यद्युपासनाङ्गं न स्यात्तर्हि तत्र तत्प्रतिपादनं व्यर्थमेव स्यादित्याशङ्क्याह - **इतिहासेति**। **इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्। बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरेदिति।।**, इति वेदतात्पर्यनिर्णयार्थत्वेन न तेषां वैयर्थ्यमिति भावः।

ननु पुराणेतिहासानां वेदोपबृंहणार्थत्वेऽपि तेभ्यस्सिद्ध्यत् ब्रह्मज्ञानं न वारयितुं शक्यम्। तदुपासनाङ्गमेव भवति। तदभावे शूद्रकर्तृकपुराणादिश्रवणं विफलमेव स्यादित्याशङ्क्याह - **शूद्राणामिति**। एवं सूत्राभिमतं शूद्रस्य विद्यानधिकारमुपपाद्य, सूत्रेण कण्ठोक्तं शूद्रेत्यामन्त्रणस्याशयं विशदयितुमाशङ्कते - **कथमिति**। एतच्छङ्कोत्तरत्वेन शुगस्येति सूत्रांशनिवेदितमर्थमाह - **नाऽत्र जातीति**। शूद्रशब्दस्य जातौ रूढित्वेऽपि प्रकृते ब्रह्मज्ञानाऽप्राप्त्या जानश्रुतेश्शुक् सञ्जातेति तां दृष्ट्वा रैक्केण शोचितृत्वयोगेन स्वज्ञानवैभवप्रकटनाय शूद्रेत्यामन्त्रणं कृतमिति विज्ञायते। स्वज्ञानवैभवप्रकटनस्य प्रथमामन्त्रणे राज्ञोऽधिकदक्षिणादित्सा-सञ्जननार्थत्वेन, द्वितीयामन्त्रणे राज्ञः स्वोपदेक्ष्यमाणविद्यायां श्रद्धातिशयसम्पादनाऽर्थत्वेन च, प्रकृतोपयुक्तत्वाच्चेति भावः। ननु जानश्रुतेश्शुक् संजातेति कथमवगम्यते। यां दृष्ट्वा रैक्वश्शूद्रेत्यामन्त्रितवानि-त्याशङ्कापरिहारार्थत्वेन तदनादरेत्यादिसूत्रशेषं व्याचष्टे - **शुगस्येति**।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तदनादरश्रवणात् ब्रह्मविद्यावैकल्येन स्वात्मानं प्रति हंसोक्ताऽनादरवाक्यश्रवणात्। तदैवाचार्य प्रत्याद्रवणाच्च। सूच्यते हि शब्दो हेतौ यतः शूद्रेत्यामन्त्रणं, न जातियोगेन, ततः शूद्रस्य ब्रह्मोपासनं नास्तीति।

इतश्च शूद्रेत्यामंत्रणं न जातियोगेनेत्याह -

क्षत्रियत्वगतेश्च ।।१-३-३४।।

शुश्रुषोर्जानश्रुतेः क्षत्रियत्वावगतेश्च न जातियोगेन शूद्रेत्यामन्त्रणम्। उपाख्यानोपक्रमे हि जानश्रुतिर्हि पौत्रायणः श्रद्धादेयो बहुदायि बहुपाक्य आस सह सर्वत आवसथान् मापयांचक्रे सर्वत एवमेवाऽन् मत्स्यन्तीति। जानश्रुतौ दानपतित्वं बहुतरपक्वान्नप्रदायित्वं चोक्तम्। मध्ये च, सह संजिहान एव क्षत्तारमुवाचेति क्षत्रप्रेषणमुक्तम्। अन्ते च, 'इयं जाया अयं ग्रामो यस्मिन्नास' इति, 'ते हैतेरैक्यपर्णानाम महावृषेषु यत्राऽसावुवास' इति बहुग्रामप्रदायित्वमुक्तम्। एतैर्लिङ्गैर्जानश्रुतेः क्षत्रियत्वमवगम्यते।

उत्तरत्र चैत्ररथेन लिङ्गात् ।।१-३-३५।।

उपरिष्टाच्चाऽस्यां संवर्गविद्यायां ब्राह्मणक्षत्रिययोरेवाऽन्वयो दृश्यते। अथ 'ह शौनकं च कापेयमभिप्रतारिणं च कांक्षसेनिं परिविष्यमाणो ब्रह्मचारी बिभिक्ष' इत्यादौ। अत्राऽभिप्रतारी

हंसोक्ताऽनादरवाक्यश्रवणेन कारणेन, तथैवाचार्यप्रत्याद्रवणेन कार्येण च शुगस्य सञ्जातेति ज्ञाप्यत इत्यर्थः। अतश्शूद्रेत्यामन्त्रणं न रूढ्या, किन्तु शोचितृत्वयोगेनैवेत्यर्थः। शूद्रेत्यामन्त्रणस्य यौगिकत्वे हेत्वन्तरपरत्वेनोत्तरसूत्रमवतारयति - **इतश्चेति**।

जनश्रुतस्याऽपत्यं जानश्रुतिः। पुत्रनाम्नो गोत्रापत्यं पौत्रायणः। श्रद्धया देयमस्येति श्रद्धादेयः। अर्थिभ्यो बहु दातुं शीलमस्येति बहुदायी। बहुपाक्यः - पक्तव्यमन्नादिकमस्य बहुपाक्यः। आगत्य वसन्ति येष्वतिथयस्तानावसथान्। अतिथीनां निवासार्थान् गृहान्कारयामास। वैश्याद्ब्राह्मणकन्यायां क्षत्ता नाम प्रजायते। जीविकावृत्तिरेतस्य राजान्तःपुररक्षणमित्युक्तलक्षणः क्षत्ता। अत्र क्षत्तप्रेषणग्रामदानरूपं लिङ्गद्वयं साक्षात्क्षत्रियत्वज्ञापकमित्यर्थः। तस्य क्षत्रियत्वाऽवगतौ हेत्वन्तरप्रदर्शनपरं सूत्रम्।

जानश्रुतेस्संवर्गविद्यायामुपदिश्यमानायामुत्तरत्र श्रुतेनाऽभिप्रतारिनाम्ना चैत्ररथेन क्षत्रियेणाऽस्य क्षत्रियत्वमवगम्यते। कथमित्याशङ्क्याऽत्र प्रमाणमाह - **अथ शौनकमित्यादि**। परिविष्यमाणौ

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चैत्ररथः क्षत्रियश्चेत्यवगम्यते। कापेययाज्यस्य कापेयाख्ययाजकयोगात्। कापेययाजकयोगो हि चित्ररथस्य श्रुतः, 'एतेन चैत्ररथं कापेया अयाजयन् तमेकाकिनमन्नाद्यस्याऽध्यक्षमकुर्वन् इति।' तेनाऽभिप्रतारिणस्संज्ञाभेदाच्चित्ररथत्वासिद्धावपि तद्वंश्यत्वं सिध्यति। समानान्वयानां हि समानान्वयाः प्रायेण याजका भवन्ति। चित्ररथवंशत्वे सति क्षत्रियत्वम्। तस्मात् चैत्ररथिर्नामैकः क्षत्रपतिर्जायत, इति तद्वाक्यशेषेण सिद्ध्यति। एवं चोत्तरत्र ब्राह्मणेन कापेयेन युक्तोऽभिप्रतारी क्षत्रिय इति निश्चीयते। तद्वत् ब्राह्मणेन रैक्केण युक्तो जानश्रुतिरपि क्षत्रिय इति गम्यते। अतः क्षत्रिय एव शूद्रेत्यामंत्रितः।

भोजनार्थमुपविष्टौ सूपकारैः प्रदीयमानान्नावित्यर्थः। अत्र कपिगोत्रोत्पन्नश्शौनकः प्रसिद्धो ब्राह्मणः। एवं कापेयशौनकसहपाठेनाऽभिप्रतारिनाम्नः क्षत्रियत्वमवगम्यते। कथमितिचेत्। **चैत्ररथं कापेया अयाजयन्नि**तिश्रुत्या कापेययाज्यत्वयोगात्।

ननु - परिविष्यमाणौ भोजनार्थमुपविष्टौ सूपकारैः प्रदीयमानाऽन्नौ। अत्र कपिगोत्रौत्पन्नश्शौनको ब्राह्मणः प्रसिद्धः। तत्सहितस्याऽभिप्रतारिणः क्षत्रियत्वं साधनीयम्। तत् चैत्ररथवंश्यत्वेन सिसाधयिषुः प्रतिजानीते। **अत्रे**ति। तस्य चित्ररथवंश्यत्वे हेतुमाह – **कापेययाज्यस्ये**ति। तस्य हेतुत्वमुपपादयति कापेययाजकेति। चैत्ररथस्य कापेययाज्यत्वे प्रमाणं दर्शयति - **एतेने**ति। अत्र चित्ररथस्य कापेययाजकयोगश्श्रुतः। ननु - तेनाऽभिप्रतारिणश्चित्ररथत्वमेव सिद्ध्येन्नतु तद्वंश्यत्वमित्याशङ्क्याह - **समानान्वयानामेवे**ति। याजकास्त्रिविधाः शाट्यायनिशाखायां श्रुताः। पितृभूता मनुष्यभूता देवभूता इति। पितृपितामहादि परम्परया कुलक्रमेणागता ऋत्विजः पितुभूताः। तदसम्भवे कस्यचिदाधानप्रभृति यावज्जीवमृत्विक्त्वेन प्राप्ता मनुष्यभूताः। तदसम्भवे तत्र तत्र कर्मणि दैवादागत्याऽऽर्त्विज्यं कुर्वन्तो देवभूताः इति। एवं नियमो नास्तीत्याशङ्क्याह - **प्रायेणे**ति। नियमाभावेऽपि मुख्यत्वात्पूर्वराजचरितेषु बहुशो याज्ययाजककुलव्यवस्था दर्शनादिहाऽपि चित्ररथं कापेया अयाजयन्निति कपिगोत्रोत्पन्नानामेव बहूनां चित्ररथं प्रति याजकत्ववर्णनाच्च। तेषां पितृभूतयाजकत्वनिश्चयात् कापेययाजकयोगेन चित्ररथवंश्यत्वं सिद्ध्यतीति भावः। चित्ररथवंश्यत्वसिद्धौ ततस्तस्य क्षत्रियत्वं सिद्ध्यति। उक्तार्थमुपसंहरति - **एवञ्चे**ति। एवं ब्राह्मणेन युक्तोऽभिप्रतारी क्षत्रिय इति निश्चिते सति तथैव रैक्केण ब्राह्मणेन सहितो जानश्रुतिरपि क्षत्रिय इत्येव सिद्ध्यति। **उत्तरत्र**। उपरिष्ठात् अस्यामेव विद्यायां। लिङ्गात् कापेयसाहचर्यलिङ्गात् क्षत्रिय इति निश्चितेन चैत्ररथेन चित्ररथवंश्येनाऽभिप्रतारिनाम्नाऽपि जानश्रुतिरपि क्षत्रिय एव न शूद्र इति निश्चीयत इति सूत्रार्थः। एवं शूद्रस्य विद्याधिकारे शूद्रेत्यामन्त्रणरूपं लिङ्गं निराकृतम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यदुक्तं निषादस्थपतिन्यायेन शूद्रस्य महावाक्यश्रवणमात्रेऽधिकार इति तत्राह -

संस्कारपरामर्शात्तदभावाभिलापाच्च ।।१-३-३६।।

ब्रह्मविद्योपक्रमे 'उप त्वा नेष्ये तं होपनिन्ये' इत्यादि प्रदेशेषु उपनयनसंस्कारपरामर्शात् शूद्रस्य च न शूद्रे पातकं किंचित्, न च संस्कारमर्हति, 'शूद्रश्चतुर्थो वर्ण एकजातिः' इत्यादिस्मृतिषु तदभावश्रवणात् तस्य ब्रह्मविद्यायामनधिकारः। 'निषादस्थपतिं याजयेत्' इति विधिरस्तीति तत्र न

अथाऽर्थित्वादिसद्भावादध्ययनाऽभावेऽपि निषादस्थपतिन्यायेन विद्याधिकारस्स्यादित्याशङ्का-परिहारार्थत्वेनोत्तरसूत्रमवतारयति - **युदुक्तमित्यादिना**।

ब्रह्मविद्योपक्रम इति। एवं छान्दोग्योपनिषद्याख्यायते। शैशवे प्रमीतपितृकस्सत्यकामः, **'विद्यार्थमाचार्यमुपेत्य ब्रह्मचर्यं चरिष्यामि किं गोत्रोऽहमि'**ति मातरं पृष्ट्वा, तया **'नाहमेतद्वेद। तात! यद्गोत्रस्त्वमसि, बह्वहं चरन्ती परिचारिणी यौवने त्वामलभे, साऽहमेतन्न वेद यद्गोत्रस्त्वमसि, जाबाला तु नामाऽहमस्मि, सत्यकामो नाम त्वमसि, स सत्यकाम एव जाबालोऽब्रवीथाः।'** इति। स त्वेवमुक्तो गौतममासाद्य ब्रह्मचर्यं भगवति वत्स्यामि। उपेयां भगवन्तमित्युक्त्वा, **'किं गोत्रस्त्वमसी'**ति तेन पृष्टो **'नाहं मम गोत्रं वेद माताऽपि नाऽवेदीत्। माता मे जाबाला सत्यकामोऽहमेतावद्वेद्मी'**त्युवाच। अथ गौतमस्सत्यवचनेनाऽयं ब्राह्मण इति निर्धार्य समिधं सोम्याऽऽहर उप त्वा नेष्ये - इति चोक्त्वा तथैव, तमुपनीय स्वीयाद् गोयूथात् कृशानां दुर्बलानां गवां चत्वारि शतानि पृथक्कृत्य तत्पोषणे तं नियुयुजे। स तु सत्यकामो गवां सहस्रसंङ्ख्यापूरणात्प्राक् न प्रत्यागच्छेयमिति प्रतिज्ञाय, तृणोदकबहुलमरण्यं नीत्वा तास्संरक्षन् वर्षगणं प्रोवास। ताश्च सहस्रं संपेदिरे। तदनन्तरमृषभोऽग्निः हंसो, मद्गुरिति चत्वारो देवतात्मानः तस्य गुरुशुश्रूषया सन्तुष्टास्तस्मै षोडशकलब्रह्मविद्यामुपदिदिशुः। ततस्सहस्रगोभिराचार्यकुलं प्राप्याऽऽचार्येण, **ब्रह्मविदिव सोम्य भासि, को नु त्वामनुशशास** इति पृष्टस्तद्वृत्तान्तमुक्त्वा देवैरुपदिष्टमित्यतोऽपि नाहं हृष्यामि, स्वीयादाचार्यादेव किल लब्धा विद्या साधीयसी भवति। भगवानेव मह्यं ब्रवीत्विति प्रार्थयामास। ततो गौतमस्तामेव षोडशकलब्रह्मविद्यामुपदिदेशेति।

अत्र विद्योपक्रमे **उप त्वा नेष्ये** इत्यादिनोपनयनं परामृश्यते तस्मादुपनयनवतामेव ब्रह्मविद्याऽधिकार इति सिद्धमित्यर्थः। अस्तु शूद्रस्याप्युपनयनमित्याशङ्क्याह - **शूद्रस्येति**। पातकं वृथामांसभक्षणादिकृतम्। शूद्रस्योपनयननिषेधे गौतमस्मृतिमुदाहरति - **शूद्र** इति। एकजातिः द्वितीयजन्मरहित इत्यर्थः। एवं शूद्रस्य द्वितीयजन्मरूपोपनयनाभावाद्विद्यायां नाधिकार इत्याह - **तस्येति**। नन्वेवं निषादस्य कथं तद्विहितया

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विरोधः। उपनयनाभावेऽपि शूद्रस्य महावाक्यश्रवणे कुत्राऽपि न विधिः।

तदभावनिर्धारणे च प्रवृत्तेः ।।१-३-३७।।

'नैतदब्राह्मणो विवक्तुमर्हति समिधं सोम्य! आहरोपत्वानेष्ये न सत्यादगा' इति सत्यवचनेन जाबालस्य शूद्रत्वाभावनिर्धारणे सत्येव तदुपनयनानुशासनविद्योपदेशप्रवृत्तेश्च न शूद्रस्याऽधिकारः।

ननु उपनयनाऽभावे ब्रह्मोच्चारणनिषेधः क्वाचित्कस्सार्वत्रिको वा? न सार्वत्रिकः, शिशोरुपनयनाभावेऽपि न ब्रह्माऽभिव्याहरेदन्यत्र स्वधानिनयनादिति। स्वधानिनयनेऽपि ब्रह्मोच्चारणविधानात्। तेन क्वाचित्क इति युज्यते। अतः शूद्रस्याऽनुपनीतस्य पाकयज्ञादिषु ब्रह्मोच्चारणानिषेधो न ब्रह्मविद्यायामित्याशंकायामाह -

श्रवणाध्ययनार्थप्रतिषेधात् ।। १-३-३८ ।।

शूद्रस्य वेदवाक्यश्रवणादिनिषिध्यते, तस्माच्छूद्रसमीपे नाध्येतव्यमिति। अनुपश्रुण्वतः कुतोऽध्ययनादिप्रवृत्तिः।

गोपयुक्तमन्त्रोच्चारणाऽधिकार इत्याशङ्क्याह - **निषादेति**। तस्य विधिप्राप्तत्वादधिकारस्सिद्धः। शूद्रस्य तु तथा महावाक्यश्रवणाऽधिकारविधिरिति भावः। शूद्रस्य विद्यायामनधिकारे हेत्वन्तरप्रदर्शनं परं सूत्रम्।

नैतद्ब्राह्मणो विवेक्तुमर्हतीत्यादिना जाबालस्य सत्यवचनेन शूद्रत्वाऽभावे निर्धारिते सत्येव गौतमः जाबालमुपनेतुं प्रववृते। तस्मादपि शूद्रस्य ब्रह्मविद्यायां नाधिकार इत्यर्थः।

ननु - अनुपनीतानां वेदवाक्यग्रहणनिषेधो हि न सर्ववेदवाक्यविषयः त्रैवर्णिकानां माता पित्रोः पैतृमेधिके कर्मणि तदुपयुक्तवेदवाक्योच्चारणस्योपनयनाऽभावेऽपि स्मृत्यनुमतत्वात्। किन्तु तदतिरिक्तवेदवाक्यविषय इत्यङ्गीकार्यम्। तस्माच्छूद्रस्योपनयनाभावेऽपि विद्याधिकार इति शङ्कानिराकरणार्थत्वेनोत्तर सूत्रमवतारयति - **नन्विति**।

शूद्रस्य तत्समीप एव नाध्येतव्यमिति वेदश्रवणनिषेधेन वेदाध्ययनतदर्थविचारज्ञानानुष्ठानान्यर्थात्प्रतिषिध्यन्ते। यस्य समीपेऽपि नाध्येतव्यं स कथं तच्छृणुयात्। अश्रृण्वतः कथमध्ययनं, तदभावे कुतोऽर्थज्ञानमनुष्ठानं वेति सूत्रार्थमभिप्रेत्य विवृणोति - **शूद्रस्येति**। न केवलं शूद्रसमीपे वेदोच्चारणनिषेधमात्रात् शूद्रस्य वेदश्रवणादिप्रतिषेधस्सिद्ध्यति, अपि तु श्रवणादौ दण्डश्रवणाच्चेत्येतदर्थं सूत्रम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्मृतेश्च ।। १-३-३९ ।।

स्मर्यते च शूद्रस्य वेदवाक्यश्रवणादौ दण्डः अथ हाऽस्यवेदमुपश्रुण्वत स्त्रपुजतुभ्यां श्रोत्रप्रतिपूरणमुदाहरणे जिह्वाच्छेदो धारणे शरीरभेदः इति। एवं श्रुतिस्मृतिभ्यां शूद्रसमीपेऽध्ययनादिनिषेधात् कुतस्तेषां वेदार्थविचारादिकम्? अतस्सर्वथाऽष्टवर्षब्राह्मणाद्युपयुक्तोपनयनसंस्कारमन्तरेण वेदाध्ययनप्राप्तिर्न कुत्राऽपि कस्यचिदिति शूद्रा ब्रह्मविद्यायामनधिकारिण एव।

।। इति अपशूद्राधिकरणम् ।। २९

***

अथ कम्पनाधिकरणम् ३०

एवं प्रासङ्गिकमधिकारनिरूपणं कृत्वा प्रकृतमनुसरति -

कम्पनात् ।।१-३-४०।।

स्मर्यते चेति। **अथ हाऽस्य वेदमुपश्रृण्वतः त्रपुजतुभ्यां श्रोत्रप्रतिपूरणमित्यादिना** वेदश्रवणादौ शूद्राणां दण्डस्मरणादपि तेषां श्रवणादौ नाधिकार इति सिद्ध्यति। एवं तस्य समीपेऽध्ययनस्य निषेधे न कथमपि तस्य वेदार्थविचारादिकं सम्भवतीत्यधिकरणार्थमुपसंहरति - **अत** इति।

।। इति अपशूद्राऽधिकरणम् ।। २९

***

अथ कम्पनाधिकरणम् ३०

उत्तराधिकरणमवतारयति - **प्रासङ्गिकमिति**। मनुष्याधिकारोक्तिप्रसङ्गादागतं देवा अप्युपासनायामधिकारिण इति देवताधिकरणम्। तत्प्रसङ्गादेव शूद्राणामपि विद्याधिकारे प्रसक्ते तत्र शूद्रस्याऽनधिकारादपशूद्रास्त्रयोवर्णा एवाऽधिकारिण इत्यर्थ प्रतिपादकमपशूद्राधिकरणञ्चेति। तत्र तत्राधिकारिनिरूपणं कृत्वा प्रकृतमङ्गुष्ठवाक्यविचारमेवाऽनुसृत्य तत्प्रकरणपठितवाक्यान्तरविचारं करोतीत्यर्थः। एतेनाऽनन्तराऽधिकरणस्याऽङ्गुष्ठाधिकरणेन सङ्गत्या प्रवृत्तिः न तु प्रासङ्गिकेन देवताधिकरणेनेत्युक्तं भवति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अङ्गुष्ठप्रमितपुरुषप्रकरणे कठवल्लीषु श्रूयते -

'यदिदं किंच जगत्सर्वं प्राण एजति निस्सृतम्।
तं महद्भयं वज्रमुद्यतम् य एतद्विदुरमृतास्ते भवन्ति।' इति।

तत्र प्राणशब्दनिर्दिष्टजनितभयेन सकलजगत्कम्पनमुच्यते।

अत्र कम्पनहेतुः परमेश्वरोऽन्यो वा इति संशयः।

परमेश्वरस्य सकलजगदभयप्रदानमधुरस्वभावस्य परमकारुणिकस्य जगत्कम्पनहेतुत्वमयुक्तम्। तस्माद्वज्रश्रुतेरशनिः कम्पनहेतुः। यद्वा प्राणवायुः कम्पनहेतुः, प्राणश्रुतेः प्राणवायोर्देहचलनहेतुत्वेन प्राणे निमित्ते सर्वमिदं जगच्छरीररूपं चलतीति। यदिदं किञ्च जगत्सर्वं प्राण एजति निस्सृतमित्यस्य तत्रोपपत्तेः। वायुनिमित्तमेव विद्युत्; स्तनयित्नु वृष्टिवत्। महाभयहेतुरशनिरपि विवर्तत इति। महद्भयं वज्रमुद्यतमित्यस्याऽपि तत्रोपपत्तेः। वायुरेव व्यष्टिर्वायुरेव समष्टिरप पुनर्मृत्युं जयति य एवं वेद इति श्रुतेर्वायुविज्ञानादमृतत्वोपपत्तेश्चेति प्राप्ते परमेश्वर एव कम्पनहेतुरिति ब्रूमः -

---

अत्र प्रकरणं परमेश्वरपरत्वसाधकं प्राणवज्रश्रुती च वाय्वशनिपक्षयोस्साधक इत्यभिप्रेत्य प्रकरणस्य श्रुत्यपेक्षया दुर्बलत्वात् श्रुत्योः परस्परविरुद्धत्वाच्च बलाबलानिर्णयात्संशय इत्याह - **परमेश्वरोऽन्यो वेति**। यदिदं किञ्चेत्यादिकं कठवल्लीगतविषयवाक्यम्। अत्र प्राणशब्दवाच्यजनितभयेन सकलस्याऽपि प्रपञ्चस्य कम्पनमुच्यते। तच्छासनाऽतिक्रमे किं भविष्यति वेति महाभयादुद्यताद्वज्रादिव कम्पत इत्यर्थः। यदिदं किञ्चेत्यादिना सामान्येन तस्य भयहेतुत्वमुक्त्वा **भयादस्याऽग्निस्तपति भयात्तपति सूर्यः** इत्यादिना विशिष्याऽपि तदेव प्रतिपादितम्। एवमत्र भयहेतुः क इति संशयः। अन्यो वेति प्राणवायुरशनिर्वेत्यर्थः। अशनिपूर्वपक्षमुपपादयति - **अत्रेति**।

प्रकरणेन परमेश्वरः कम्पनहेतुरित्याशङ्क्याह - **परमेश्वरस्येति**। द्वितीयपूर्वपक्षमुपपादयति - **यद्वेति**। उपक्रमगतप्राणश्रुत्यनुसारेण कम्पनहेतुः प्राणवायुरेवेत्यर्थः। शरीररूपस्य सकलस्याऽपि जगतश्चलनस्य तन्निमित्तकत्वादिति भावः। अमृतत्वफलश्रुतेरुपपत्तिमाह - **वायुरेवेति**। पुनर्मृत्युमपजयति अपहन्ति पुनर्न म्रियते - मुक्तो भवतीत्यर्थः।

सिद्धान्तयति - **परमेश्वर एव कम्पनहेतुरिति**। प्राणवायोश्शरीरकम्पनहेतुत्वस्य भयजननद्वारा कम्पनहेतुत्वस्याऽशनेश्च सम्भवेऽपि महद्भयमिति विशेषणादुत्तरमन्त्रे वाय्विन्द्रादीनामपि भयहेतुत्वश्रवणेन

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

परमेश्वरस्य सकलजगत्कम्पनहेतुत्वं शासकत्वात् भवति। यस्य शासनभयेन सर्वे वयं निषिद्धमुखा विहितेषु प्रवर्तामहे, तच्छासनभयादेव वाय्वादीनां स्वस्वाऽधिकारप्रवृत्तिः; 'भीषास्माद्वातः पवते ' इत्यादिष्ववगम्यते। कल्याणमूर्तिरपि परमेश्वरः शासकतया भयदर्शनो भवति। तच्छ्रूयते, 'तस्माद्राजमुखं भीष्मभावुकम्' इति। तस्मात्स्वामितया सकलजगद्भयहेतुरीश्वर एव।

।। *इति कम्पनाधिकरणम्* ।। ३०

अथ ज्योतिरधिकरणम् ३१

दहरादिषूपास्यतया निर्दिष्टस्य परमेश्वरस्य प्राप्यत्वमुपपादयितुमधिकरणान्तरमारभ्यते -

ज्योतिर्दर्शनात् ।।१-३-४१।।

छान्दोग्येऽस्य प्रजापतिविद्यायामाम्नायते विषयः; 'एष संप्रसादोऽस्माच्छरीरात् समुत्थाय परंज्योतिरूपसम्पद्य स्वेन रूपेणाऽभिनिष्पद्यते। स उत्तमः पुरुष' इति।

वाय्वशनिपरत्वे तदसम्भवाच्च। तद्भयादग्न्यादीनां स्वस्व कृत्येषु प्रवृत्युक्तेश्च, शासकत्वात् भयजननद्वारा सम्भावितं कंपनहेतुत्वं विवक्षितमिति प्रतीयते। ननु - परमकारुणिकस्य भयजनकत्वं न युक्तमित्यस्य समाधानमाह - **कल्याणमूर्तिरपीति**। अत्र प्राकरणिकानां ब्रह्मलिङ्गानां पूर्वपक्षे कम्पनहेतोरन्यत्राऽभिप्राय-वर्णनात्तत्र तदन्वयोऽस्पष्ट इति स्पष्टाऽस्पष्टब्रह्मलिङ्गतेति पादसङ्गतिः।

।। *इति कम्पनाधिकरणम्* ।।

अथ ज्योतिरधिकरणम् ३१

अनन्तराधिकरणमवतारयति – **दहरादिष्विति**। पूर्वाधिकरणाऽन्तेष्वधिकरणेषु दहरादिस्थानेषू-पास्यतया परमेश्वरः प्रतिपादितः। अथ तदुपासनया प्राप्योऽपि स एवेति प्रतिपादयितुमिदमधिकरणमारभ्यत इत्यर्थः। ननु - **मुक्तोपसृप्यव्यपदेशादिति** सूत्रे परमेश्वरस्य मुक्तप्राप्यत्वमुक्तमितिचेन्न। क्वचिद्विषयवाक्यविशेषे प्रसक्तशङ्कानिराकरणेन तस्यैव दृढीकरणार्थत्वात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मुक्तप्राप्यतया श्रूयमाणं परं ज्योतिः परमेश्वरः? किं वा नारायणो मूर्त्यात्मा। इति संशयः।

उत्तमः पुरुष इति मुक्तप्राप्यस्य परंज्योतिषः पुरुषोत्तमशब्दवाच्यतयाऽवगमात्, पुरुषोत्तमशब्दस्य नारायणे रूढतया स एवोत्तमपुरुषशब्दसमानाधिकरणं परंज्योतिरिति प्राप्ते ब्रूमः -

मुक्तप्राप्यं परंज्योतिरिह परं शिवाभिधानं परं ब्रह्म। तत्प्राप्तानामेवाऽनावृत्तिदर्शनात्। परब्रह्मणोऽन्यत् प्राप्तानां कथमनावृत्तिस्समुचिता? पुरुषोत्तमशब्दो नारायणे रूढोऽपि ब्रह्मण्यपि

अत्र प्रजापतिविद्यागतेन वाक्येन उपासकश्शरीरादुत्थाय यदुपसम्पद्याऽपहतपाप्मत्वादिस्वरूपेणाविर्भवतीत्युच्यते - **तत्परञ्ज्योतिः नारायणः परमेश्वरो वेति**। उत्तमपुरुषशब्दरूढियोगाभ्यां संशयं दर्शयति - **मुक्तप्राप्यतयेति**। पूर्वपक्षमाह - **उत्तमः पुरुष** इति वाक्यं तावत्पुरुषोत्तमशब्दाऽसाधारणयौगिकाऽर्थप्रतिपादकतया निरूढमिह मुक्तप्राप्ये परस्मिन् ज्योतिषि प्रयुक्तम्। तस्मान्मुक्तप्राप्यं परञ्ज्योतिर्नारायण इति सिद्ध्यति। किञ्च, गीतासु -

द्वाविमौ पुरुषौ लोके क्षरश्चाऽक्षर एव च।
क्षरस्सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते।।

इति श्लोके पुरुषशब्दाऽभिधेयतया प्रसिद्धं जीवजातं क्षराऽक्षरशब्दोक्तसंसार्यसंसारिरूपेण द्वेधा विभज्य

उत्तमः पुरुषस्त्वन्यः, परमात्मेत्युदाहृतः।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः।।

इति श्लोकेन द्विविधादपि जीवजातादुत्कृष्टं तदुभयनियामकमन्यपुरुषं पुरुषोत्तमपदयौगिकार्थप्रतिपादकेन उत्तमः पुरुष इति वाक्येन निर्दिश्य, स क इति जिज्ञासायां **यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तम।।** इति श्लोकेन लोकवेदयोः पुरुषोत्तमपदवाच्यतया प्रसिद्धोऽहमेव स उत्तमः पुरुष इति भगवतोपदिष्टम्। लौकिकप्रसिद्धिरपि तत्रैवाऽस्ति **देवकीनन्दनश्शौरिश्श्रीपतिः पुरुषोत्तम** इति। **हरिर्यथैकः पुरुषोत्तमस्स्मृतः महेश्वरस्त्र्यम्बक एव नाऽपर** इति च। तस्माद्ब्रह्मोपासकैः मुक्तैः प्राप्यं परञ्ज्योतिर्नारायण एवेति। सिद्धान्तयति - **मुक्तप्राप्यमिति**। पूर्वपक्षहेतुमन्यथा करोति। पुरुषोत्तमशब्द इति। प्रबलाऽपि तस्य रूढिरनन्यथासिद्धाऽनावृत्तिरूपलिङ्गविरोधात् बाध्यत्वात् ब्रह्मणि तस्य योग एवाश्रयणीय इति भावः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वर्तते, पुरुषेभ्यो जीवेभ्योऽधिकत्वात्। ब्रह्ममेधसंकल्पेऽपि 'वेष्टितं पुरुषोत्तमम्' इति प्राप्यस्य परब्रह्मणः पर्यायत्वेन पुरुषोत्तमशब्दप्रयोगात्। अतः परब्रह्मैव परंज्योतिः।

।। इति ज्योतिरधिकरणम् ।।

***

ननु - **अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तम** इति गीतावाक्यस्य का गतिरिरितिचेदुच्यते। तत्रैव **ऊर्ध्वमूलमधश्शाखमश्वत्थं प्राहुरव्ययमि**ति संसारवृक्षं परिकीर्त्य **ततः परं तत्परिमार्गितव्यं यस्मिन्गता न निवर्तन्ति भूयः**। इति संसारमण्डलाऽतीतमप्राकृतदिव्यपदे स्थितम्। परम्ब्रह्माऽनावृत्तिफलसिद्धये समुपासनीयमित्युक्त्वा **तमेव चाद्यं पुरुषं प्रपद्य** इति भगवान् श्रीकृष्ण तमेवादिमं सर्वोत्तमं पुरुषमहमप्युपास इति बृवन्, स चोपास्य उत्तमः पुरुषः प्राप्यश्च परमशिव इति स्पष्टीचकार। एवं मुमुक्षूणां श्रीकृष्णस्य चोपास्यत्वेनोक्तः परमशिवाख्यस्सर्वोत्तमः पुरुष एव क्षराऽक्षररूपोत्तमत्वप्रतियोगिनिर्देशपूर्वक**मुत्तमः पुरुषस्त्वन्य** इति श्लोकेन वर्णितः। तद्विषय एव वर्तमानो **यस्मात् क्षरमतीतोहमि**ति तदनन्तरश्लोकः कथं परमशिवविषयो न स्यात्। तद्विषयत्वेऽपि तदभेदभावनादाढर्येन **शास्त्रदृष्ट्या तूपदेशो वामदेववदि**ति न्यायेन पुरुषोत्तमः प्रथितोऽस्मीति कृष्णवचनं लोकवेदप्रसिद्धिश्चेति सर्वमुपपन्नम्। तस्मान्मुक्तप्राप्यं परञ्ज्योतिः परमेश्वराख्यं परम्ब्रह्मैवेत्युपसंहरति - **अत** इति।

एष सम्प्रसाद इति यद्वाक्यं प्रजापतिविद्यायां पठ्यते, तदेव दहरविद्यायामपि पठ्यते। तत्र स उत्तमः पुरुष इति पूर्वपक्षलिङ्गं नास्तीति तदिह नोदाहृतम्। तथा च प्रजापतिविद्यायां परञ्ज्योतिरित्यस्य नारायणपरत्वे दरविद्यायामपि तन्नारायणपरमेव पर्यवस्यतीति तस्यां श्रूयमाणानामपहतपाप्मत्वादीनां स्पष्टब्रह्मलिङ्गानां परञ्ज्योतिषोऽन्यत्रैवान्वय इति स्पष्टाऽस्पष्टब्रह्मलिङ्गता - इति पादसङ्गतिः।

इदमधिकरणम् श्रीभाष्यकृतां प्रतिपक्षमिति तदीयसिद्धान्तपूर्वपक्षीकरणेनैव विशदम्।

अथ ये शुद्धाद्वैतभाष्यकृतस्तेषामपीदं विपक्षमेव। तथाहि - अत्र मुक्तप्राप्यस्य परञ्ज्योतिष्ट्वनिर्णयेन प्राप्यप्राप्तभेदस्य प्रकृताधिकरणसिद्धत्वाद्विषयवाक्ये **अस्माच्छरीरात्समुत्थाये**ति ब्रह्मविदश्शरीरादुत्क्रान्त्यभिधानेन केवलाद्वैतवाद्यनिष्टशरीरोत्क्रान्त्यभिधानाच्चेति दिक्।

।। इति ज्योतिरधिकरणम् ।। ३१

***

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ अर्थान्तरत्वादिव्यपदेशाधिकरणम्

आकाशोऽर्थान्तरत्वादिव्यपदेशात् ।।१-३-४२।।

छान्दोग्ये श्रूयते 'आकाशो ह वै नाम नामरूपयोर्निर्वहिता। ते यदन्तरा तद्ब्रह्म तदमृतं स आत्मा' इति।

अत्र आकाशः परमेश्वरो वियद्वा? जीवो वा? इति संशयः।

सर्वभूतावकाशप्रदानेन नामपरूपनिर्वोढृत्वस्य वियति संभवात्। वियदिहाकाशः। अथवा जीवः, 'ति तस्य नामरूपव्याकरणसंबन्धदर्शनात्।' इत्येवं प्राप्ते ब्रूमः -

परमेश्वर एवाऽकाशशब्देन नामरूपनिर्वोढा श्रूयते, अमृतत्वादि तद्धर्मव्यपदेशात्। नहि आकाशेऽमृतत्वादिकं संभवति; जीवे वा। अतः परमेश्वर एवाऽकाशः।

अथ अर्थान्तरत्वादिव्यपदेशाधिकरणम् ३२

प्रजापतिविद्यान्तर्गतवाक्यार्थनिर्णयानन्तरं प्रजापतिविद्यानन्तरपठिताऽऽकाशवाक्यार्थनिर्णयार्थम-धिकरणान्तरमारभ्यते।

अत्र विषयवाक्ये आकाशस्य नामरूपनिर्वोढृत्वं ब्रह्मणो नामरूपमध्यस्थत्वञ्च प्रतीयते। अत्र आकाशस्य ब्रह्मणोऽन्यत्वं प्रतीयते वा न वा। यदि प्रतीयते तर्हि निर्वोढृत्वमाधारत्वं वा उत व्याकर्तृत्वं वा। यद्याधारत्वं विवक्षितं तर्हि अयमाकाशो जगदाधारो भूताकाशस्स्यात्। अथ व्याकर्तृत्वञ्चेदिन्द्रादि-नामरूपव्याकर्ता हिरण्यगर्भजीवस्स्यात्।

अथ यद्याकाशाद् ब्रह्मणो भेदप्रतीतिर्नास्तिचेत्तर्हि आकाशशब्दनिर्दिष्टः परमेश्वर एव स्यादिति प्रकृते संशयस्त्रिकोटिक उपपद्यते। पूर्वकोटिद्वये तत्कर्तुकसकलनामरूपा स्पष्टत्वेन, तृतीयकोटौ सकलनामरूप-निर्वोढृत्वेन स्वनिर्वाह्यसकलनामरूपमध्यस्थत्वेन चोपासनेति फलविशेषः।

क्रमेण पूर्वपक्षद्वयमुपपादयति - **सर्वभूतेत्यादिना**। सिद्धान्तयति - **परमेश्वर एवेति**। सौत्रहेतुं व्याचष्टे - **अमृतत्वादितद्धर्मव्यपदेशादिति**। आकाशशब्दनिर्दिष्टः परमेश्वर एव प्रकृतात्प्रत्यगात्मनो-ऽर्थान्तरत्वनामरूपनिर्वोढृत्वनामरूपाऽस्पृष्टत्वाऽमृतत्वादिव्यपदेशादित्यर्थः।

अत्र नामरूपनिर्वोढृत्वस्य हिरण्यगर्भसाधारणत्वात्तन्न मुख्यं ब्रह्मलिङ्गम्।

अथ नामरूपसध्यवर्तमानत्वमपि न तटाकद्वयमध्यवर्तिवृक्षतुल्यम्। तटाकयोर्मध्य इव नामरूपयोर्मध्ये-ऽवकाशस्याऽप्रसिद्धत्वात्। किन्तु मध्यस्थस्येवाऽन्यतरपक्षपाताभावेन तदुभयस्पृष्टत्वम्। तदपि न साकल्येन

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ननु तत्वमसीत्यादिनैक्यव्यपदेशात् न प्रत्यगात्मनोऽर्थान्तरभूतः परमेश्वरोऽस्तीत्याशङ्क्याह-

सुषुप्त्युत्क्रान्त्योर्भेदन **।।१-३-४३।।**

'प्राज्ञेनाऽत्मना संपरिष्वक्तो न बाह्यं किञ्चन वेदनान्तरम्। प्राज्ञेनाऽत्मनान्वारूढ उत्सृजन्याति' इति सुषुप्त्युत्क्रान्त्योर्बाह्यान्तरविषयज्ञानशून्याज्जीवात्तदानीमेव प्राज्ञतया भेदेन व्यपदेशाज्जीवादर्थान्तरभूतः परमेश्वरोऽस्ति। स एवाऽत्राऽऽकाशशब्दवाच्यः।

युज्यते। शिवभवादिनामभिः नीलकण्ठत्वादिविशिष्टविग्रहैश्च नित्ययुक्ते परमेश्वरे तदभावात्। किन्तु व्याकर्तव्यत्वेन पूर्ववाक्यसन्निहितैतत्पदपरामृष्टैर्देवमनुष्यादिशब्दैस्तद्वाच्यरूपैर्ब्रह्माण्डान्तर्गतैस्तनुभुवनभोगस्थानभोगोपकरणैश्चाऽसाधारणसम्बन्धराहित्यम्। एवमिदं लिङ्गद्वयं हिरण्यगर्भसाधारणमिति शङ्काकलुषितमिति तद्विहाय प्रथमममृतत्वमुपात्तम्। आदिशब्देनात्मत्वब्रह्मत्वादयो गृह्यन्ते। नामरूपनिर्वोढृत्वमपि **तस्मादेतद् ब्रह्मनामरूपमन्नं च जायते। सर्वाणि रूपाणि विचिन्त्य धीरो नामानि कृत्वाभिवदन्यदास्त** इति परमेश्वरस्यैव मुख्यमिति श्रुतम्। तथा ते यदन्तरेत्येतदपि यस्य मध्ये ते नामरूपे वर्तेते यदाधारकोयं नामरूपप्रपञ्च इति व्याख्याने, परमेश्वराऽसाधारणमेव भवति। तस्मादमृतत्वादीत्यत्र अमृतत्वस्यादिभूतयोः नामरूपनिर्वोढृत्वतदस्पृष्टत्वयोः तत्पूर्वयोरपि ग्रहणम्। ननु प्रयोगोयं क्लिष्ट इति चेदुच्यते। यथा पाणिनिर्गाङ्कुटादिसूत्रे कुटादिभ्य इति पदं बहुव्रीहितत्पुरुषयोरेकशेषं प्रायुङ्क्त, तत्र कुटादिपदं तद्गुणसंविज्ञानबहुव्रीहिणा कुटतिधातोस्तदनन्तरपठितधातूनाञ्च यथा ग्राहकं तथा ततः प्राक्पठितस्य लिखति धातोरपि कुटस्यादिः कुटादिरिति तत्पुरुषाश्रयणेन ग्राहकम्। अन्यथा लिखतिधातोः परेषामेवं ञ्णितां प्रत्ययानां ङिद्वद्भावविधानासिद्ध्या लिखितुमलिखदित्यादिरूपासिद्धिः प्रसज्येत। तस्मादमृतत्वादीत्यादिपदेन पूर्वयोर्ग्रहणं न विरुध्यते। अत्र सौत्रहेतोरयमर्थः। अर्थान्तरत्वं जीवादाकाशाच्च भिन्नत्वं तस्माज्जीवाकाशव्यावर्तकनामरूपनिर्वोढृत्वादिधर्मव्यपदेशादिति।

उत्तरसूत्रमवतारयितुं शङ्कते - **नन्विति**। **ऐक्योपदेशादिति**। द्वैतप्रतिषेधाच्चेत्यर्थः। न प्रत्यगात्मनोऽर्थान्तरभूत इत्यनेन अर्थान्तरत्वरूपहेतोरसिद्धिरुक्ता। यद्यपि जीवातिरिक्तपरमेश्वराभावशङ्कानिराकरणं नास्मिन्नधिकरणे विशिष्योपयुज्यते। सर्वेष्वप्यधिकरणेषु तस्योपयुक्तत्वात्। तथाऽपि प्रपञ्चेनैतच्छङ्कानिराकरणार्थमुत्तरः पादः प्रवर्तिष्यत इति तदुपोद्घातरूपमुत्तरसूत्रद्वयं प्रवृत्तमित्यर्थः।

प्राज्ञेनेत्यादि सम्परिष्वक्तवाक्यं सुषुप्तिविषयम्। प्राज्ञेनेत्याद्यन्वारूढवाक्यमुत्क्रान्तिविषयम्। उत्सृजन् शरीरमित्यर्थः। तदानीमेव प्राज्ञतयेति। यदा जीवस्य बाह्याभ्यन्तरविषयज्ञानशून्यत्वं तदैव प्रकर्षेण ज्ञातृत्वरूपं सर्वज्ञत्वं न सम्भवति। तस्मादुभयोरात्यन्तिकभेदसिद्धिरिति भावः। व्यपदेशादित्यनुवर्तते। एवं सुषुप्तावुत्क्रान्तावपि जीवाद्भेदेन परमेश्वरस्य व्यपदेशात् जीवादर्थान्तरभूतः परमेश्वरोऽस्तीति। इदं साध्यहेतुसामर्थ्याल्लब्धम्। सर्वज्ञो मुक्तजीवः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पत्यादिशब्देभ्यः ।।१-३-४४।।

परिष्वङ्गके प्राज्ञे श्रूयमाणेभ्यः पत्यादिशब्देभ्योऽयमन्य एव जीवादित्यवगम्यते। 'सर्वस्य वशी सर्वस्येशानः सर्वस्याऽधिपतिः। एवं स न साधुना कर्मणा भूयान् नो एवाऽसाधुना कनीयान् एष सर्वेश्वर एष भूताधिपतिरेष भूतपालः' इत्यादिकमुत्तरत्र हि श्रूयते। 'पशूनां पतये वृक्षाणां पतये' इत्यादिभिश्च परमेश्वरस्य जगदाधिपत्यं प्रसिद्धं न कुत्राऽपि जीवस्य। तस्मादयं जीवादन्यः परमेश्वर एवाकाशः।

।। इति अर्थान्तरत्वादिव्यपदेशाधिकरणम् ।।

इति श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये

प्रथमाध्यायस्य तृतीयः पादः

***

परिष्वङ्गकस्यादित्याशङ्कानिराकरणार्थं सूत्रम्।

परिष्वङ्गक इति। उत्तरत्र श्रूयमाणाः सर्वस्याऽधिपतिरित्यादिशब्दाः प्राज्ञ एव श्रूयन्ते। ततः परिष्वञ्जकतया श्रुतः प्राज्ञः परमेश्वर एव। न तु मुक्तजीवः। तस्मिन् जगद्व्यापाराभावेन सर्वेश्वरत्वादीनामनन्वयादित्यर्थः। **सर्वस्य वशी**ति। सर्वस्याऽपि तदधीनत्वमुक्तम्। **सर्वस्येशान** इति। सर्वस्याऽपि तन्नियम्यत्वमुच्यते सर्वस्याऽधिपतिरिति सर्वरक्षकत्वम्। सर्वेश्वर इति सर्वनियन्तृत्वम् भूताधिपतिरिति भूतरक्षकत्वम्। भूतपालक इति भूतपालकत्वम्। रक्षणमिष्टप्रदानमुखं पालनमनिष्टनिवारणमिति विशेषः। जीवातिरिक्तपरमेश्वराभावशङ्कानिराकरणसिद्धमधिकरणार्थमुपसंहरति – **तस्मादि**ति।

इदमधिकरणं विशिष्य जीवेश्वरभेदनिर्धारणात्मकतया शुद्धाद्वैतिनां विरुद्धमिति विशदमेव। तथा श्रीभाष्यकृतामपि। विषयवाक्ये भूतपतित्वेशानत्वसर्वेश्वरत्वादिपरमेश्वराऽसाधारणलिङ्गप्रतिपादकतयेति न बहुवक्तव्यमिति दिक्।

।। इति अर्थान्तरत्वादिव्यपदेशाधिकरणम् ।। ३१

इति श्री नागलिङ्गशिवाराध्यकृतिमुख्यायां लघुशिवार्कमणिदीपिकासख्यायां श्रीशिवचिन्तामणिप्रभाख्यायां श्री नीलकण्ठभगवत्पादीयब्रह्म-सूत्रभाष्यव्याख्यायां प्रथमाध्यायस्य

तृतीयः पादः

***

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

श्रीनीलकण्ठभगवत्पादाराध्यकृतौ
शारीरकब्रह्ममीमांसासूत्रभाष्ये प्रथमाध्यायस्य
चतुर्थः पाद आरभ्यते

***

अथ आनुमानिकाधिकरणम् ३३

पूर्वपादे स्पष्टाऽस्पष्टब्रह्मलिङ्गप्रतिपादकवाक्यानि विचारितानि। इहाऽस्पष्टब्रह्मलिङ्गानि कतिचन वेदान्तवाक्यानि विचार्यन्ते।

आनुमानिकमप्येकेषामितिचेन्न शरीररूपकविन्यस्तगृहीतेः दर्शयति च
।।१-४-१।।

एकेषां कठानां शाखायामाम्नायतेऽस्य विषयः -

इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः।।
महतः परमव्यक्तमव्यक्तात् पुरुषः परः।
पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः।। इति।

अथ आनुमानिकाधिकरणम् ३३

पूर्वोत्तरपादार्थकथनेन सङ्गतिं सूचयति - **पूर्वपाद** इति। प्रथमे पादे स्पष्टब्रह्मलिङ्गानि वाक्यानि विचारितानि। द्वितीयेऽनतिस्पष्टलिङ्गानि। तृतीये स्पष्टाऽस्पष्टब्रह्मलिङ्गानि। चतुर्थे त्वस्मिन्नस्पष्टब्रह्मलिङ्गानि वाक्यानि विचार्यन्त इति ब्रह्मलिङ्गानां स्थूलसूक्ष्मसूक्ष्मतरसूक्ष्मतमत्वक्रमेण पादा अवतारिता इति भावः।

पादत्रयेण ब्रह्मणो जगत्कारणत्वे वेदान्तानां तात्पर्यं प्रसाध्य ईक्षत्यधिकरणे संक्षेपतो निराकृतस्य प्रधानकारणवादस्य सविस्तरं निराकरणेनाऽस्मिन्पादे ब्रह्मकारणत्वं स्थिरीक्रियते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अत्र महतः परत्वेनोच्यमानमव्यक्तशब्दवाच्यं कापिलं प्रधानं शरीरं वा इति संशयः।

प्रधानमिति पूर्वपक्षः, कथम्? महदव्यक्तपुरुषाणां साङ्ख्यतन्त्र एव प्रसिद्धेः। तेषामिह श्रुतौ प्रत्यभिज्ञानाच्च पुरुषेण न कश्चिदिह प्रसङ्गः। तस्मात् सांख्यं प्रधानमेव न वपुरिति।

सिद्धान्तः, पूर्वत्र

आत्मानं रथिनं विद्धि शरीरं रथमेव तु।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च।।

इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्।

इत्यात्मशरीरादिषूपासनोपायेषु वशीकार्यत्वाय रथिरथादिरूपकविन्यस्तेषु परिशिष्टस्य शरीराख्य-

---

एकेषामिति पदं विवृण्वन् विषयवाक्यमुदाहरति - **इन्द्रियेभ्य** इत्यादिना। अत्र महतः परत्वेनोच्यमानमिति विशेषणेन **महदव्यक्तम्** इति साङ्ख्यस्मृतितत्वक्रमप्रत्यभिज्ञा सूचिता। अव्यक्तशब्दवाच्यमित्यनेनाऽव्यक्तशब्दस्य प्रधाने रूढत्वेन स्वारस्यमिति सूचितम्।

शरीरं वेति। रथिरथभावकल्पनायाम् **आत्मानं रथिनं विद्धि शरीरं रथमेव च** इति श्रुतौ प्रयुक्तस्य शरीरपदस्य प्रयोगेण तस्यां श्रुतावात्मशरीरादीनां रथिरथभावकल्पनायां शरीरस्य प्रकृतत्वं शरीरातिरिक्तानामिहेन्द्रियादिशब्दैर्गृहीतत्वेन शरीरस्य परिशिष्टत्वञ्च सूचितम्। पूर्वपक्षं स्थिरीकर्तुं पृच्छति - **कथमिति**। **महदव्यक्तपुरुषाणामिति**। अत्राऽयम्भावः। महदव्यक्तं पुरुष इति क्रमेण उत्तरोत्तरं पराणि तत्त्वानि साङ्ख्यतन्त्र एव प्रसिद्धानि अतस्तेषामिह प्रत्यभिज्ञा न वारयितुं शक्या। रूढिरप्यव्यक्तशब्दस्य प्रधाने प्रबला पूर्वपक्षमुपसंहरति - **तस्मादिति**। साङ्ख्यं प्रधानमिति। सङ्ख्यया बुद्ध्या कल्पितं साङ्ख्यमित्यानुमानिकपदविवरणम्। साङ्ख्यानुमानकल्पितं परमेश्वरानधीनं स्वतन्त्रं प्रधानमिहाऽव्यक्तशब्दार्थ इति भावः। सिद्धान्तयति - **वपुरित्यादिना**। **पूर्वत्रेति**। अत्राऽयम्भावः। इन्द्रियेभ्यः परा इति वचनात्पूर्वम् आत्मा रथित्वेन शरीरं रथरूपत्वेन बुद्धिस्सारथित्वेन इन्द्रियाणि तुरगत्वेन मनस्तुरगरज्जुत्वेन शब्दस्पर्शरूपरसगन्धास्तदीयमार्गत्वेन च रूपिताः। एवमेतत्कार्य इव न शोभार्थम् मुक्तिफलोपासनोपयोगितया वशीकरणायैवेत्यध्यात्मप्रकरणादवगम्यते। एतानि वशीकृतान्येव ह्युपासनोपकरणानि भवितुमर्हन्ति। तत एव च -

यस्त्वविज्ञानवान्भवति अयुक्तेन मनसा सह।
तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः।। इति,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

रूपकविन्यस्तस्याऽव्यक्तशब्देन गृहीतेः 'इन्द्रियेभ्यः परा ह्यर्था इत्यारभ्य सा काष्ठा सा परा गतिः' इत्यन्तेन वशीकार्यत्वाय ह्युत्तरोत्तरं पर उच्यते। तदेतत्,

यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेत् ज्ञान आत्मनि।
ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनि।।

इति श्रुतिरेवाऽग्रे दर्शयति। तस्मादव्यक्तशब्देन वपुरत्र प्रतिपाद्यम्।

यस्तु विज्ञानवान्भवति युक्तेन मनसा सह।
तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः।।

इत्यादिना वशीकृतानामिन्द्रियादीनां साधकत्वादिकमाम्नातम्। एवं वशीकरणाय पूर्वत्र रथिरथादिरूपत्वेन विन्यस्तानां षण्णाम्मध्ये इन्द्रियेभ्य इत्यादिविषयवाक्ये शरीराऽतिरिक्तानामिन्द्रियादिशब्दैर्गृहीतत्वेन पूर्वं रथत्वेन विन्यस्तस्य परिशिष्टस्य शरीरस्यैव प्रकृतेऽव्यक्तशब्देन ग्रहणमुचितमिति। एवञ्च कठानां शाखायां कठवल्ल्याम् **इन्द्रियेभ्यः परा ह्यर्थाः** इति विषयवाक्ये अव्यक्तशब्देन प्रधानमुच्यत इति चेन्न। **शरीरं रथमेव चे**ति रूपकविन्यस्तस्य शरीरस्य ग्रहणादिति सूत्रार्थः उत्तरोत्तरं परा उच्यन्त इति। **इन्द्रियेभ्य** इतिवाक्ये हयत्वेन रूपितेभ्य इन्द्रियेभ्यः मार्गत्वेन रूपिता विषयाः प्रबलाः। विषयसन्निधौ वशिनोपीन्द्रियाणां दुर्जयत्वात्। विषयेभ्योऽपि तुरगरज्जुत्वेन रूपितं मनः बलवत्तरम्। मनसोऽनवधाने-र्विषयासन्निधेरनुपयोगात्। ततो सारथित्वेन रूपिता बुद्धिः परा बलवत्तमा। अध्यवसायाभावे मनसोऽकिञ्चित्करत्वात्। ततोऽपि महान् आत्मा जीवः प्रबलः, कर्तृत्वेन प्रधानत्वात्। अत्र सर्वस्याऽपि जीवेच्छाधीनतया जीवो महानिति विशेषितः। अस्मादप्यव्यक्तं शरीरं बलवत्तरं जीवकर्तृक सकलपुरुषार्थप्रवृत्तीनामपि शरीरायत्तत्वात्। तस्मादपि सर्वान्तर्यामी परमेश्वरः परः परात्परस्सर्वोत्कृष्टः षडध्वातीतत्वात्। **परात्तु तच्छ्रुतेरि**ति जीवात्मनस्तदधीनकर्तृत्वाच्चेत्यर्थः दर्शयतीति सूत्रशेषं व्याचष्टे। **तदेतदि**ति। इति श्रुतिरिति **यच्छेदि**त्यादि श्रुतिः वशीकार्यत्वाय **एष सर्वेषु भूतेषु गूढोऽऽत्मा न प्रकाशते। दृश्यते त्वग्र्यया बुद्ध्या** इति अजितेन्द्रियाणां परमेश्वरस्य दुर्दर्शत्वमुक्त्वा यच्छेदित्यादिकमुच्यते। वाचं मनसि नियच्छेत्। वागादीनीन्द्रियाणि मनसि नियच्छेत्। तन्मनो ज्ञाने बुद्धौ नियच्छेत्। बुद्धिं कर्तर्यात्मनि नियच्छेत्। तद्यच्छेच्छांत आत्मनि तं कर्तारं परमेश्वरे नियच्छेदित्यर्थः। एवमिन्द्रियादीनां वशीकरणत्वाय शरीरादीनां रथादित्वेन रूपितत्वात्। शरीराऽतिरिक्तेष्विन्द्रियादिशब्दैर्गृहीतेषु परिशिष्टत्वाच्छरीरमेवाऽव्यक्तशब्देन निगद्यते, न प्रधानमित्यर्थः। **ग्रहणं युक्तमि**त्युपसंहरति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ननु प्रधानमव्यक्तमिति प्रसिद्धं, कथमिह शरीरमुच्यते? इत्याशङ्कायामाह -

सूक्ष्मन्तु तदर्हत्वात् ।।१-४-२।।

सूक्ष्ममित्यव्यक्तमुच्यते अव्यक्तमेव शरीरावस्थं कार्यार्हत्वादव्यक्तशब्देनोच्यत इति युक्तम्। युक्त्यन्तरमुच्यते -

तदधीनत्वादर्थवत् ।।१-४-३।।

आत्मशरीरादिकं परमेश्वराधीनतयाऽर्थवदुपासननिवृत्तये भवति। परमेश्वरोऽन्तर्यामी सर्वमात्मादिकं प्रेरयन्नेवोपासनोपायत्वेन वशीकार्यकाष्ठेति प्राप्यत्वेन सा परा गतिरिति प्रोच्यते ततोऽव्यक्तमिह शरीरमेव।

उत्तरसूत्रमवतारयितुं शङ्कते - **नन्विति**। शरीरस्य व्यक्तत्वादव्यक्तपदेन तद्ग्रहणमयुक्तमिति शङ्काऽभिप्रायः।

सूक्ष्ममिति। प्रकरणेन पारिशेष्येण च अव्यक्तमेव सूक्ष्मशब्देनोच्यत इत्यर्थः। सूत्रं योजयति। **अव्यक्तमेवेति**। सूक्ष्मस्य प्रधानस्य स्थूलावस्थाविशेषः शरीरम्। तस्मात्सूक्ष्मावस्थावाचकेनाऽव्यक्तपदेन स्थूलावस्थं तदेव लक्ष्यते। पारिशेष्येण शरीराव्यक्तपदयोरेकार्थकत्वावश्यंभावादिति भावः।

ननु तयोरेकार्थकत्वे शरीरपदमेवाऽव्यक्तलक्षकं कुतो न स्यादित्याशङ्कां निराकरोति - **तदर्हत्वादिति**। कारणस्याऽस्पष्टतयाऽव्यक्तशब्दार्हत्वात् तेन कारणेन व्यक्तं शरीरं लक्ष्यते। न तु कार्येण कारणमिति भावः।

उत्तरसूत्रमवतारयति - **युक्त्यन्तरमिति**।

अर्थवदित्यस्य विशेष्यमध्याहृत्य सूत्रार्थमुक्त्वा, तस्य युक्त्यन्तरपरत्वे तात्पर्यमाह - **परमेश्वरोऽन्तर्यामीति**। उपासनोपायतया वशीकार्येषु सर्वोत्तरतया परमेश्वरश्श्रुतावुच्यते - **सा काष्ठेति**। तस्य तथाविधत्वे कारणमाह - **सर्वान्तर्यामिण** इति। तेन प्रेर्यमाणस्य सर्वस्याऽपि तदधीनस्यैव शरीरेन्द्रियादेरुपासननिर्वर्तनक्षमत्वादित्यर्थः, एवञ्च यानि वशीकार्याण्यपेक्ष्य परमेश्वरस्योत्तरावधित्वं प्रदर्शयितुमिष्यते तेषां कार्त्स्न्येनाऽनुपादाने तदपेक्षितोत्तरावधित्वस्य प्रदर्शयितुमशक्यतया केनचित्पदेन शरीरस्य ग्राह्यतया प्रकृतेऽव्यक्तपदेन पारिशेष्यात्तस्यैव ग्रहणमुचितमिति भावः। प्राप्यत्वेन चेति। परमेश्वरः प्राप्यत्वेन चोच्यते - **सा परा गतिरिति**।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ज्ञेयत्वावचनाच्च ।।१-४-४।।

यदि साङ्ख्यं प्रधानमत्राऽव्यक्तं तदाऽस्य ज्ञेयत्वमुच्येत, न च तदस्ति अतो न कापिलमव्यक्तम्। ज्ञेयत्वमप्यस्योक्तमस्तीत्याशङ्क्य परिहरति -

वदतीतिचेन्न प्राज्ञो हि प्रकरणात् ।।१-४-५।।

अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत्।
अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात् प्रमुच्यते।।

इत्यग्रेतनमन्त्रोऽस्याऽपि ज्ञेयतां वदतीतिचेन्न। 'यच्छेद्वाङ्मनसी प्राज्ञः' इति प्राज्ञस्यैव पूर्वं प्रकृतत्वात् अतोऽव्यक्तं शरीरमेव।

अत्र यद्यपि श्रीभाष्यकृतः अस्यामेवोपनिषदि, **सोध्वनः पारमाप्नोति तद्विष्णोः परमं पदमिति** वचनस्य वैष्णवपदपरमत्वप्रदर्शनपरतया विवृण्वन्ति, तथापि विष्णोः नारायणात्परमं सर्वोत्कृष्टं तत्पदं शैवमेवेति भाष्यकारैर्निराकृतत्वादुभयनिर्देशे पञ्चमीनिर्देशो बलीयानिति वैयाकरणपरिभाषाविरुद्धत्वाच्च तद्विवरणं स्वगोष्ठीनिष्ठानामेव तुष्टिकरमिति दिक्।

अथ ये तावत् महदव्यक्तादिकशब्दश्रवणमात्रेण कापिलतन्त्रस्य वैदिकत्वमभिमन्यन्ते तान्प्रत्याह -

दशमन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः। भौतिकास्तु शतं पूर्णं सहस्रं त्वाभिमानिकाः। बौद्धा दशसहस्रं तु तिष्ठन्ति विगतज्वराः। पूर्णं शतसहस्रं तु तिष्ठन्त्यव्यक्तचिन्तकाः पुरुषं निर्गुणं प्राप्य कालसङ्ख्या न विद्यत इति वदन्ति। यदि **महतः परमव्यक्तमिति** वाक्यम् साङ्ख्यतन्त्रस्य मूलं स्यात्तदा निर्गुणपुरुषान्तरज्ञानात्कैवल्यमिति वदतां साङ्ख्यानामभिमतं प्रधानस्य मुमुक्षुज्ञेयत्वमप्यत्रोच्येत। नहि तदुच्यते एवं प्रधानस्य मुमुक्षुज्ञेयत्वस्याऽनुक्तत्वादप्यव्यक्तशब्देन शरीरमेवोच्यते न प्रधानमित्यर्थः। ननु ज्ञेयत्वावचनमसिद्धम्। अशब्दमस्पर्शमित्यादिना प्रधानस्य ज्ञेयत्वप्रतिपादनादिति शङ्कानिराकरण-परतयोत्तरसूत्रमवतारयति - **ज्ञेयत्वमित्यादिना।**

अशब्दमित्यादिका श्रुतिः प्रधानमेव वदतीतिचेन्न। **यच्छेद्वाङ्मनसी प्राज्ञ** इति। प्राज्ञशब्देन परमेश्वरस्यैव प्रकरणेन प्रकृतत्वात्तस्मादव्यक्तशब्दितं शरीरमेव न प्रधानमित्यर्थः। प्रधानस्य शब्दादिरहिततया-ऽशब्दमित्यादिमन्त्रेण तदेव निगद्यत इति शङ्का - अक्षरवाक्ये परमेश्वरस्याऽपि शब्दादिरहितत्वोक्त्याऽयं मन्त्रः परमेश्वरपर एव, प्रकरणादिति परिहारः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रधानस्य प्रसङ्ग एव नास्तीत्याह -

त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ।।१-४-६।।

त्रयाणामुपास्योपासनोपासकानामेवाऽत्र प्रकरणे ज्ञेयतया प्रश्न उपन्यासश्च श्रूयते। न प्रधानादेः। यथा

तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्।
अध्यात्मयोगाधिगमेन देव मत्वा धीरो हर्षशोकौ जहाति।।

इत्यादिरुपन्यासः।

ननु प्रकरणस्य परमेश्वरविषयत्वेऽपि यथाऽस्मिन्नेव प्रकरणे **योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः। स्थाणुमन्ये प्रपद्यन्ते यथाकर्म यथाश्रुतमि**ति जीवस्य गतिर्निगदिता। तथैवाऽशब्दमित्यादिमन्त्रेण प्रधानं निगद्यतामित्याशङ्क्याह –

त्रयाणामेव चैवमुपन्यासः प्रश्नश्च। त्रिशब्दार्थमाह - **उपास्योपासनोपासकानामिति एवमिति** पदस्य विवरणं ज्ञेयतयेति। उपन्यासः प्रश्नविहित उपन्यासः प्रतिवचनमित्यर्थः। अत्र प्रतिवचनस्य उपास्योपासनोपासकरूपत्रितयविषयत्वदर्शनेन प्रश्नोऽपि तत् त्रितयविषय एवेति स्फुटमवगन्तव्यमित्यर्थः। सूत्रे प्रतिवचनस्यैव पुरस्तान्निर्दिष्टत्वात्तदनुरोधेन प्रतिवचनमेव प्रथममुदाहरति - **अध्यात्मयोगेति**। इत्यादिरित्यादिशब्देन **मत्वा धीरो हर्षशोकौ जहाती**ति चतुर्थपादो गृह्यते। अत्र देवमात्मेत्युपास्योपासनयोः **अध्यात्मयोगाधिगमेन धीर** इत्युपासकस्य सचोपन्यासो दृश्यते। अध्यात्मयोगः उपास्यस्वरूपसाक्षात्कारविषयो योगः निदिध्यासनम्। येयं प्रेत इति एवं तत्रोपाख्यायते। वाजश्रवसो महर्षिः सर्ववेदसदक्षिणेन यज्ञेनेष्ट्वा जरद्गवीर्दक्षिणाः प्रयच्छन् बालेन नचिकेतसा पुत्रेणाऽनर्ह दक्षिणादाननिमित्तक्रतुवैकल्यात् पितुरनिष्टमाशङ्कमानेन तदनिष्टं स्वात्मप्रतिपादनेनाऽपि क्रतुसम्पत्तिं कारयित्वा निवारणीयमिति मन्यमानेन **तात! मां कस्मै दास्यसी**ति पुनः पुनः पृष्ट्वा बहुवारनिर्बन्धसञ्जातकोपस्य **मृत्यवे त्वा ददामी**त्युक्तवतः वचनेन नचिकेतस्तथैव मृत्युलोकं गत्वा मृत्योर्द्वारि तिस्रो रात्रीरनश्नन्नुषित्वा प्रवासागतेन मृत्युना ब्राह्मणो यदनश्नन् द्वारि स्थित इति भीतेन त्रीन्वरान्वृणीष्वेति पृष्टः प्रथमेन वरेण पितुस्सौमनस्यं, द्वितीयेनाऽग्निविद्याञ्च प्रतिलभ्य,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

येयं प्रेते विचिकित्सा मनुष्ये अस्तीऽत्येके नाऽयमस्तीति चैके।
एतद्विद्यामनुशिष्टस्त्वयाऽहं वराणामेषः वरस्तृतीयः।। इति।

अन्यत्र धर्मादन्यत्राऽधर्मादन्यत्राऽस्मात् कृताऽकृतात्।
अन्यत्र भूताच्च भव्याच्च यत्तत् पश्यसि तद्वद।।

इति च प्रश्नः।

अथ -

येयं प्रेते विचिकित्सा अस्तीत्येके नाऽयमस्तीति चैके।
एतद्विद्यामनुशिष्टस्त्वयाऽहं वराणामेष वरस्तृतीयः।।

इति। पप्रच्छेति। अत्र **येयं प्रेत** इति मृतजीवविषयप्रश्नस्य तं दुर्दर्शमिति परमेश्वरविषयोत्तरदानेनाऽस्या उपनिषदः जीवब्रह्मैक्यपरत्वं शुद्धाद्वैतभाष्यकृतोऽभिमन्यन्ते तद्विस्तरेण ब्रह्मपथे केवलाद्वैतप्रतिषेधे निराकृतमिति नेह अत्र **येयं प्रेत** इति प्रश्नः। **न प्रेत्य संज्ञास्ती**ति वाक्ये प्रेत्यशब्दप्रयोगानुसारेण प्रेतशब्दस्य प्रकर्षेणेतः पुनरावृत्तिरहितां गतिं प्राप्त इति योगेन मुक्तविषयत्वमङ्गीकृत्य मुक्त्यनन्तरानुबन्धिमलमयादि सकलपापक्षयपूर्वकं जन्ममृत्युभयशोकाद्यस्पृष्टपरमशिवलोकप्राप्तिमदात्मसदसद्भावविषयो वर्णनीयः। ततस्तं **दुर्दर्शमि**ति मन्त्रे उपास्योपासनोपासकानामतिसंक्षिप्तोपदेशः कृतः। ततस्तदनुसारेण तत् त्रितयं विविच्य वक्तव्यमिति प्रश्नार्थः - **अन्यत्र धर्मादन्यत्राऽधर्मादन्यत्राऽस्मात्कृताकृतादि**ति। तत्र **अन्यत्र धर्मादन्यत्राऽधर्मादि**ति वैषयिकहर्षशोकहेतु - धर्माधर्मविलक्षणस्य तदुभयप्रमाणहेतोरुपासनस्य प्रश्नः। **अन्यत्राऽस्मात्कृताकृतादि**ति कृतमपि कर्म यस्याऽकृतप्रायं क्षणभङ्गुरफलं तस्मादैहिकामुष्मिककर्मानुष्ठानव्यग्रादमुमुक्षोर्विलक्षणस्य परमेश्वरोपासकस्य प्रश्नः।

अन्यत्र भूताच्च भव्याच्चेति। भूतादुत्पन्नादतीताद्वर्तमानाच्च भव्याद्भविष्यतश्च अन्यस्य देवादीनामपि दुरवगाहत्वेन विलक्षणस्योपास्यस्य प्रश्नः।

तत्ते पदं सङ्ग्रहेण ब्रवीमीति प्रतिवचनमुपक्रम्य, **ओमित्येत**दित्यादिना उपासनसाधनप्रणवप्रशंसाद्वारा प्रणवेन ब्रह्मोपासने प्रदर्शिते, **न जायते न म्रियते वा विपश्चिदि**ति सामान्यत उपासकस्वरूपमुच्यते। विशेषतश्च **नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुधा श्रुतेन, यमेवैष वृणुते तेन लभ्य** इति परमशिवानुग्रहकटाक्षविषय एव उपासनायां मुख्योऽधिकारी। तस्मा एव परमशिवस्स्वात्मानं प्रकाशयतीत्युच्यते उपास्यस्वरूपन्तु **अणोरणीयानि**त्यादिना प्रपञ्चितम्। तस्मादुपास्योपासनोपासकानां त्रयाणामेवाऽत्र निरूपणीयत्वात्साङ्ख्यतन्त्रप्रसिद्धस्य प्रधानस्य नात्रावकाश इति भावः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तस्मात् प्रकृतत्वादपि शरीरमेवाऽव्यक्तं, न प्रधानम्। किञ्च लिङ्गान्तरमप्यस्तीत्याह -

महद्वच्च **।।१-३-७।।**

यथेह 'बुद्धेरात्मा महान्परः' इत्यत्र न तान्त्रिको महान्भवति महच्छब्दात्, तथा अव्यक्तशब्दादपि न प्रधानमिति निर्णयः।

।। इत्यानुमानिकाधिकरणम् ।।

***

अथ चमसवदधिकरणम् ३४

अप्रकृतत्वादिह न प्रधानप्रस्ताव इति भवतु। अन्यत्र प्रधानमेव कारणत्वेन श्रूयत इत्याशङ्क्याऽधिकरणान्तरमिदमारभ्यते -

चमसवदविशेषात् ।।१-४-८।।

श्वेताश्वतरोपनिषदि श्रूयतेऽस्य विषयः -

सूत्रान्तरमवतारयति - **लिङ्गान्तरमिति**। अव्यक्तं न प्रधानमिति साध्ये हेत्वन्तरमुच्यत इत्यर्थः।

बुद्धेरात्मा महान्पर इत्यत्र यथा आत्मशब्द सामानाधिकरण्यान्महच्छब्देनाऽणुरपि जीवो गृह्यते न कापिलतन्त्रसिद्धम्महत्तत्वम्, तथैवाऽव्यक्तशब्देन शरीरमेव गृह्यते न प्रधानमित्याशयः।।

।। इत्यानुमानिकाधिकरणम् ।।

***

चमसवदधिकरणम् ।।३४।।

पूर्वाधिकरणेन प्रत्युदाहरणसङ्गतिं दर्शयन्नुत्तराधिकरणम् अवतारयति - **अप्रकृतत्वादिति**।

ननु महतः परमव्यक्तमित्यत्राऽप्रकृतत्वादव्यक्तशब्देन प्रधानं न निगद्यताम्। श्रुत्यन्तरे तु प्रधानमेव स्वातन्त्र्येण जगतः कारणत्वेनाम्नायत इति शङ्कानिराकरणार्थमुत्तराधिकरणमित्यर्थः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजास्सृजमानां सरूपाः।
अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः।। इति।

इह सर्वप्रपञ्चकारणत्वेन जन्मरहितत्वादजेति श्रूयमाणा प्रकृतिः साङ्ख्यसिद्धा? परा वा? इति संशये साङ्ख्यसिद्धेति वक्तुं युक्तम्। अजामिति जन्माभाववचनात्, सर्वप्रजाकारणत्वाच्च, लोहितशुक्लकृष्णामिति वर्णोपलक्षितगुणत्रयावगमाच्च न तदन्यस्याः कस्याश्चिदेवंविधत्वं युक्तमिति प्राप्ते सिद्धान्तः।

न तन्त्रसिद्धा प्रकृतिरिह कारणत्वेनोच्यते। न हि जन्माभावमात्रेण तस्या एव प्रतीतिः। अर्वाग्बिलश्चमस इतिवत्। प्रकरणे विशेषाभावात्। यथा, 'इदं तच्छिर' इति चमसो विशेष्यते। यौगिकशब्दाद्विशेष(षा)प्रतीतिर्हि विशेषणाऽपेक्षा। ततो न तान्त्रिकी प्रकृतिरिति।

तन्त्रसिद्धायाः प्रकृतेरन्या कीदृशीत्यत आह -

ज्योतिरुपक्रमात्तु तथाह्यधीयत एके **।। १-४-९ ।।**

विषयवाक्यमुदाहरति - **अजामिति**। अत्र अजामिति मन्त्रोक्तायाः प्रकृतेः जन्मरहितत्वलिङ्गेन साङ्ख्यसम्मतस्वतन्त्रप्रकृतिपरत्वमुत परमेश्वरकारणकत्वलिङ्गेन परमेश्वराधीनप्रकृतिपरत्वमिति संशयं दर्शयति - **इहेत्यारभ्य परावेत्यन्तेन**। पूर्वपक्षमाह - **साङ्ख्यसिद्धे**त्यादिना। सर्वप्रजाकारणत्वादिति। **बह्वीः प्रजास्सृज्यमानास्सरूपा** इति सकलकारणत्वस्य श्रवणात्। पूर्वपक्षमुपसंहरति - **इति प्राप्त** इति। सिद्धान्तयति - **न तन्त्रसिद्धा प्रकृतिरि**ति। **अर्वाग्बिलश्चमस** इति वदति। **'अर्वाग्बिलश्चमस ऊर्ध्वबुध्नः'** इति मन्त्रे चम्यते अनेनेति योगेन भक्षणसाधनमात्रपरस्य चमसशब्दस्य **इदं तच्छिर** इति प्रकरणे विशेषार्थबोधकवाक्यमिव, न जायत इति योगेन जन्माभावमात्रपरस्याऽजाशब्दस्य साङ्ख्यसम्मतप्रकृतिपरत्वे विशेषकाभावादिति सूत्रोक्तहेतुर्व्याख्यातः।

ननु - पङ्कजादिशब्दादभिमतविशेषार्थप्रतीतिर्विशेषशब्दाभावेऽपि दृश्यते। तद्वदिहाऽपि विशेषकाभावेऽपि कुतो न स्यादित्याशङ्क्याह - **यौगिकादि**ति। पङ्कजशब्दस्याऽम्बुजे रूढ्या विशेषशब्दाभावेऽपि तस्माद्विशेषार्थप्रतीतावपि केवलयौगिकशब्दाद्यौगिकार्थान्तरप्रतीतेर्विशेषापेक्षतया प्रकृतेऽजाशब्देन न तन्त्रप्रसिद्धा प्रकृतिर्गृह्यत इति सूत्रार्थमुपसंहरति - **तत** इति।

अथ सिद्धान्ताभिमतप्रकृतावपि विशेषो नास्तीति दोषमाशङ्क्य, तत्परिहारार्थत्वेनोत्तरसूत्रमवतारयति - **तन्त्रसिद्धाया** इति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ज्योतिरिति परमेश्वर उच्यते। परमेश्वरकारणिकेयमजा प्रकृतिरुच्यते। तथाहि परमेश्वरकारणिकाया एव प्रतिपादकं तैत्तरीयास्तत्स्वरूपमन्त्रमधीयते। 'अणोरणीयान्महतो महीयान्' इति परमेश्वरमुपक्रम्य, 'सप्तप्राणाः प्रभवन्ति तस्मात्' इत्यादिना प्रपञ्चस्य परमेश्वरादुत्पत्त्या तदात्मकत्वप्रतिपादनसमये ह्यजामिति पठन्ति। अतस्तत् प्रत्यभिज्ञानादियमपि परमेश्वरकारणिकेति निश्चीयते। अतो न तन्त्रसिद्धेति वादो युक्तः।

ननु परमेश्वरकारणिकेत्यस्याः परमेश्वरकार्यत्वमुच्यते कथमस्यास्तादृश्या अजामितिवाद इत्याशङ्क्याह -

कल्पनोपदेशाच्च मध्वादिवदविरोधः ।।१-४-१०।।

कल्पनेति सृष्टिरुच्यते 'छंदांसि यज्ञाः क्रतवो व्रतानि भूतं भव्यं यच्च वेदा वदन्ति अस्मन्मायी सृजते विश्वमेतत् तस्मिन्श्चान्यो मायया संनिरुद्धः।, मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम्' इति सृष्ट्युपदेशादजात्वमहेश्वरकार्यत्वयोरविरोधः। तथाहि, प्राकृतप्रलयकाले नामरूपे विहायाऽचिद्वस्तुरूपा मायाऽपि सूक्ष्मरूपेण महेश्वरस्य शरीरतया तिष्ठतीत्यजा; सृष्टिसमये नामरूपोपेता

तं देवा ज्योतिषां ज्योतिरिति प्रसिद्धेः ज्योतिश्शब्दः परमेश्वरपर इत्याह - **ज्योतिरित्यादिना**। उपक्रमशब्दः कारणपर इत्याह - **परमेश्वरकारणिके**ति। हि शब्दं हेतुपरं दर्शयन् अजामिति मन्त्रस्य शाखान्तरे परमेश्वरकारणिकाया एव प्रकृतेः प्रतिपादकत्वेनाऽध्ययनादित्यर्थे सूत्रं योजयति - **तथे**ति। तु शब्दोऽवधारणार्थः, एवमेवाऽङ्गीकर्तव्यमित्यर्थः।

जन्मराहित्यपरमेश्वरसृज्यत्वयोर्विरोधमाशङ्क्य तदुत्तरत्वेनाऽनन्तरसूत्रमवतारयति - **नन्विति**।

सृष्टिरिति। **सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयदित्यादौ** क्लृप्तेः सृष्टिपरत्वश्रवणादित्यर्थः। सृष्टिमुपपादयति - **छन्दांसी**त्यादिना। अत्र **मायिनन्तु महेश्वरमि**ति महेश्वरशब्दवाच्यत्वेन लोकप्रसिद्धः परमशिव एव विश्वस्रष्टेति प्रदर्शितः। ननु - अस्मान्मायीति वाक्यात् जन्मराहित्यपरमेश्वरसृज्यत्वयोरविरोधोऽसिद्ध इत्याशङ्क्य ततस्तत्सिद्धिमुपपादयति - **तथाही**ति। **माया** इति। जगत्कर्तुर्मायाविशिष्टत्वाम्नानेन सृष्टेः प्रागप्यविभक्तनामरूपाप्रकृतिस्सूक्ष्मरूपेण महेश्वरस्य विशेषणतया तिष्ठतीत्यर्थदर्शनेन जन्मराहित्यम् अस्मादिति पञ्चम्यन्तेन सर्गसमये मायारूपात् स्वविशेषणात् विश्वं सृजतीति प्रकृतेर्विश्वोपादानत्ववर्णनेन सृष्टिसमये विभक्तनामरूपत्वात् **प्रज्ञा च तस्मात्प्रसृता पुराणी**ति श्रवणाच्च तस्याः परमेश्वरकारणकत्वं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तत् कारणिकेति। यथा आदित्यस्य सृष्टिसमये वस्वादिभोग्यरसाधारत्वेन मधुत्वं, कार्यत्वं च; तस्य पुनः प्रलयकाले मध्वादिव्यपदेशाऽनर्हात्यन्तसूक्ष्मरूपेणावस्थानादकार्यत्वं च मधुविद्यायां प्रतीयते, 'असौ वा आदित्यो देवमधु नैवोदेता नाऽस्तमेतैक एव मध्ये स्थाता' इतिश्रुतेः। एवं प्रकृतेरजात्वेश्वरकारणिकत्वयोरविरोधः। तस्मादजा न तन्त्रसिद्धा।

।। इति चमसवदधिकरणम् ।। ३४

***

अथ सङ्ख्योपसंग्रहाधिकरणम् ३५

पुनरन्यत्र तन्त्रसिद्धानि पंचविंशतिसङ्ख्यानि तत्वानि श्रूयन्त इत्याशङ्क्य तत्परिहर्तुमधिकरणान्तरमारभ्यते-

न सङ्ख्योपसंग्रहादपि, नानाभावादतिरेकाच्च ।।१-४-११।।

श्रूयतेऽस्य विषयः -

यस्मिन् पञ्चपञ्चजना आकाशश्च प्रतिष्ठितः।
तमेव मन्य आत्मानं विद्वान् ब्रह्माऽमृतोऽमृतम्।।

चेत्युभयोरविरोध इत्यर्थः। **मध्वादिवदि**ति दृष्टान्तांशं व्याचष्टे - **यथे**ति। यथा सूर्यस्य सर्गसमये मधुत्वकार्यत्वोदयास्तमयवत्त्वं प्रलयसमये तद्राहित्यञ्च मधुविद्यायां श्रवणात्तयोरविरोधः। तथा प्रकृतेऽपि विरोधो नास्तीत्यर्थः।

।। इति चमसवदधिकरण् ।। ३४

***

अथ सङ्ख्योपसंग्रहाधिकरणम् ३५

प्रत्युदाहरणसङ्गतिं दर्शयन्नुत्तराधिकरणमवतारयति - **अन्यत्रे**ति। **अजामि**ति मन्त्रे प्रकृतिश्रवणं परमेश्वराधीनप्रकृतिपरं नीयताम्। बृहदारण्यके पञ्चविंशतेस्तत्वानां साङ्ख्यतन्त्रप्रसिद्धतत्त्वपरमेवेति तत्र कथमप्यन्यत्र नेतुमशक्यमिति शङ्कानिराकरणार्थत्वेनोत्तराधिकरणमवतारयति - **पुनरन्यत्रे**ति।

विषयवाक्यमुदाहरति - **यस्मिन्पञ्चपञ्चजना** इति। यस्मिन्पञ्चेत्यादिमन्त्रमात्रस्य विचार्यत्वेऽपि **प्राणस्य प्राणमि**त्यादि वाक्यशेषस्य पञ्चजनशब्दापेक्षितार्थसम्पादकत्वं सम्भवति न वेति तादर्थ्येन

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इत्यत्र पञ्चपञ्चजनाः किं सांख्यतत्वानि श्रुतिसिद्धानि इति संशयः। पञ्चविंशतिसङ्ख्यायाः साङ्ख्यशास्त्रप्रसिद्धत्वात् अत्र तदवभासात् पञ्चपञ्चजना इति तान्येव प्रतिपाद्यानीति प्राप्ते ब्रूमः। पञ्चपञ्चेति पञ्चविंशतिसङ्ख्योपसङ्ग्रहादपि न तान्त्रिकानि तत्वानि; यस्मिन्निति यच्छब्दनिर्दिष्टपरमेश्वराधारत्वममीषां प्रतीयत इति तेभ्य एतेषां पृथग्भावात् आकाशस्य पृथङ्निर्देशेन तत्वातिरेकाच्च। तत्वातिरेकस्तत्वानामधिकसङ्ख्यात्वम्। अतोऽत्र न पञ्चविंशतितत्वप्रसंगः किञ्च पञ्चविंशतिसङ्ख्योपसङ्ग्रहोऽपि न युक्तः 'दिक्सङ्ख्ये संज्ञायाम्' इति संज्ञाविषयो ह्ययं समासः तस्मात् पञ्चजनानाम् केचित् पञ्चपञ्चजना इत्युच्यन्ते सप्तसप्तर्षय इतिवत् अतो न साङ्ख्यतत्वप्रसक्तिः। के पुनरेत इत्यत आह -

---

विचार्यत्वमस्ति। तस्य तत्समर्पकत्वसम्भवे तान्त्रिकार्थग्रहणस्य आनुमानिकाधिकरणे प्राकरणिकवाक्यान्तर-समर्पितार्थग्रहणसम्भवे तान्त्रिकार्थग्रहणस्येवाऽयुक्तत्वात्। तस्माद्वाक्यशेषस्य पञ्चजनशब्दापेक्षितार्थ-सम्भवाऽसम्भवाभ्यां संशयं दर्शयति - **अत्रेति**। पूर्वपक्षमुपपादयति - **पञ्चविंशतिसङ्ख्याया** इति। पञ्चपञ्चजना इति वाक्येन पञ्चकृत्व आवृत्ताः पञ्चजना इत्यर्थे पञ्चविंशतिसङ्ख्याकत्वावभासात् पञ्चविंशतिसङ्ख्याकतत्वानां साङ्ख्यतन्त्र एव प्रसिद्धत्वादनेन वाक्येन साङ्ख्याभिमता एव पदार्थाः निगद्यन्त इत्याशयः। सिद्धान्तयति - **इहेति**। अत्र वाक्ये पञ्चपञ्चेति पञ्चद्वयं श्रूयते - न तेन वस्तुतः पञ्चविंशतिसङ्ख्याप्रतीतिरेव नास्ति। 'तुष्यतु'न्यायेन तदभ्युपगमेऽपि पञ्चविंशतिसङ्ख्यया सङ्ख्येयानामुपसङ्ग्रहादपि तदुपसङ्गृहीतानि तत्त्वानि साङ्ख्यतन्त्रसिद्धानीति न सिद्ध्यतीति प्रतिज्ञा। तत्र हेतुः नानाभावादिति हेतुं विवृणोति - **यस्मिन्निति**। नानाभावः पृथक्त्वम्। पृथक्त्वञ्चेह परमेश्वरप्रतिष्ठितत्वरूपमेतेषां वैलक्षण्यम्। यस्मिन्पञ्चपञ्चजना आकाशश्च प्रतिष्ठित इति सङ्ख्येयानां परमेश्वर प्रतिष्ठितत्वमाम्नातम्। किञ्च अतिरेकाच्चेति हेत्वन्तरं विवृणोति - **आकाशस्य पृथङ्निर्देशेनेति**। पञ्चविंशतिसङ्ख्याकानामेन तत्त्वानां साङ्ख्यतन्त्रप्रसिद्धत्वेन प्रकृते तदधिकसङ्ख्याकतत्वाश्रवणेन पञ्चविंशतिसङ्ख्याकत्वतान्त्रिकप्रसिद्धिर्भग्नेति भावः अथ वस्तुगत्या तत्प्रतीतिरपि नास्तीति सूत्रगतेनाऽपि शब्देन ध्वनितं युक्त्यन्तरमाह - **किञ्चेति**। अत्राऽयम्भावः। अवश्याभ्युपगन्तव्यत्त्वे पञ्चजनशब्दे समासो न समाहारविषयो युज्यते। तदा स्त्रीप्रत्ययाभावस्य छान्दसतया नेयत्वेन क्लिष्टत्वात्। किन्तु दिक्सङ्ख्ये संज्ञायामिति संज्ञासमास एवाऽभ्युपगन्तव्यः एवञ्च पञ्चभिरारब्ध समूहपञ्चकासम्भवादपि सङ्ख्येयानां पञ्चविंशतिसङ्ख्याकत्वं न सिद्ध्यति। तस्मात् सप्तसप्तर्षय इतिवत् पञ्चपञ्चजना इत्येव सिद्धमिति सूत्रार्थमुपसंहरति - **अत** इति। नन्वेवमत्र पञ्चजनसंज्ञिताः पञ्चसङ्ख्याकाः केचिद् ग्राह्याः। ते के इत्याकाङ्क्षानिवर्तकत्वेनोत्तरसूत्रमवतारयति - **के पुनरेत** इति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्राणादयो वाक्यशेषात् ।। १-४-१२ ।।

'प्राणस्य प्राणमुत चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रमन्नस्याऽन्नं मनसो ये मनो विदुः' इति वाक्यशेषात् पञ्चजनसंज्ञिताः प्राणादयः पञ्चेन्द्रियाणीति गम्यते, अतोऽपि न तान्त्रिकतत्त्वप्रसक्तिः।

पुनरुपपत्तिरुच्यते -

ज्योतिषैकेषामसत्यन्ने ।।१-४-१३।।

एकेषां काण्वानाम् *अन्नस्यान्नम्* इति शब्दाभावे 'तं देवा ज्योतिषां ज्योतिरायुर्होपासते अमृतम्' इत्युपक्रमगतेन ज्योतिश्शब्देन पञ्चपञ्चजना इन्द्रियाणीति ज्ञायन्ते। ज्योतिषां ज्योतिः

सन्दिग्धे तु वाक्यशेषादिति न्यायेन **प्राणस्य प्राणमि**त्यादिवाक्यशेषात्पञ्चञ्पञ्चजनाः पञ्चेन्द्रियाणीत्यवगम्यत इत्यर्थः। तस्मादपि साङ्ख्यतन्त्रसिद्धपञ्चविंशतितत्त्वानां प्रसक्तिर्नास्तीत्याह - **अतोऽपी**ति। ननु - काण्वानां माध्यन्दिनानाञ्च शाखयोः **यस्मिन्पञ्चे**त्यादिमन्त्रस्समान एव, **प्राणस्य प्राणमि**ति वाक्यशेषस्तु काण्वशाखायाम् **अन्नस्याऽन्नमि**ति वाक्यरहितश्श्रूयते। तस्मात्कथं पञ्चजनसङ्ख्या लभ्यत इत्याशङ्क्य तदुपपादनपरत्वेनोत्तरसूत्रमवतारयति - **पुनरुपपत्तिरुच्यत** इति।

शब्दाभावे इति। अत्रायम्भावः। काण्वानाम्पाठे **अन्नस्याऽन्नमि**ति वाक्याभावेऽपि **यस्मादर्वाक्संवत्सरोऽहोभिः परिवर्तते। तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतमि**ति पूर्वमन्त्रे ज्योतिषां ज्योतिष्ट्वेन ब्रह्मणि श्रुते ब्रह्माधीनप्रकाशानि कानिचिज्ज्योतींषि सिद्धानि। तानि हि विषयाणां प्रकाशकानीन्द्रियाणीति **यस्मिन्पञ्चपञ्चजना** इत्यनिर्धारितविशेषनिर्देशेन गम्यन्त इति। किञ्च काण्वशाखायाम् **अन्नस्याऽन्नमि**ति वाक्याभावेऽपि शाखान्तरगुणोपसंहारेण माध्यन्दिनपाठलभ्यार्थ-स्तत्राप्यस्त्येव। तथाहि - उपपादितं पूर्वसूत्रे पञ्चसङ्ख्याकान् कांश्चिदप्रसिद्धान् पञ्चजनसंज्ञाया विषयान्निर्दिश्य तदनन्तरम्प्राणादीनां पञ्चानां पाठात् एव सञ्जिन इति। एवञ्च निर्णीतार्थशाखान्तरवाक्यानुसारेण काण्वशाखायामपि प्राणादिशब्दानां वागिन्द्रियादिरर्थश्शाखान्तरादुपसंहृतः निर्णीतार्थशाखान्तर वाक्यानुसारेणाऽर्थनिश्चयो हि न्यायविद्भिः परिगृह्यते। न त्वनिर्णीतार्थवाक्यानुसारेण निर्णीतवाक्यार्थत्याग इति दिक्।

अत्र प्राणशब्देन वायुसम्बन्धित्वात्स्पर्शनेन्द्रियं गृह्यते। चक्षुष इति दृगिन्द्रियम्। श्रोत्रस्येति श्रोत्रम्। अन्नस्येत्यन्नशब्दोदितपृथिवीसम्बन्धित्वाद् घ्राणरसनयोस्तन्त्रेणोपादानम् अद्यतेऽनेनेत्यन्नमिति योगेनाऽपि रसनेन्द्रियं गृह्यते मनस इति मन इति च, पञ्चेन्द्रियाणि सिद्धानि। एवञ्च एकेषां कण्वानां शाखायाम् अन्ने असति अन्नस्याऽन्नमिति शब्दाऽभावेऽपि, ज्योतिषा **तन्देवा ज्योतिषां ज्योतिरि**ति ज्योतिश्शब्देन पञ्चपञ्चजना

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रकाशानामपि प्रकाशकं ब्रह्मेत्युक्त्वा ततः पञ्चपञ्चजना इत्युक्ते हि तानि प्रकाशानि पञ्चेन्द्रियाणीति गम्यन्ते।

कारणत्वेन चाऽकाशादिषु यथा व्यपदिष्टोक्तेः ।।१-४-१४।।

यथाऽकाशादिषु कार्यवर्गेषु कारणत्वेन सर्वत्र वेदान्तवाक्येषु 'असद्वा इदमग्र आसीत्तद्धेदं तर्ह्यव्याकृतमासीत्' इत्यादिषु अनिर्ज्ञातविशेषेषु आत्मा वा इदमेकमेवाग्र आसीत् । इति विशेषवाक्यनिर्दिष्टस्यैवोक्तेः न तान्त्रिक व्याकृतग्रहणम्। तथाऽत्र विशेषवाक्यदृष्टाणामिन्द्रियाणामेवोक्तेः न तान्त्रिकतत्वग्रहणम्।

तत्र तान्त्रिकतत्वग्रहणाऽयोगः कथमित्यत आह -

समाकर्षात् ।।१-४-१५।।

'सोऽकामयत बहुस्याम् ' इति पूर्वनिर्दिष्टस्य सर्वज्ञस्यैव। 'असद्वा इदमग्र आसीत् ' इति

पञ्चेन्द्रियाणीति गम्यन्त इति सूत्रार्थः। एवं मन्त्रान्तरपर्यालोचनया पञ्चजना इन्द्रियाणीति प्रदर्शितमर्थं दृष्टान्तेनोपपादयति -

असद्वा इदमग्र आसीदित्यत्र अनभिव्यक्तदशाभिप्रायेणाऽसच्छब्दस्सद्वस्तुपर एव वाच्यः। अत्यन्ताऽसतः कारणत्वाऽयोगात्। एवं **तद्धेदं तर्ह्यव्याकृतमासीदि**ति वाक्येऽप्यव्याकृतशब्दस्साक्षादेवाऽनभिव्यक्तनामरूपवस्तुपरः। एवञ्च असदव्याकृतशब्दाभ्यामनभिव्यक्तवस्तुवाचिभ्यां यथा **आकाशो ह वै नामरूपयोर्निर्वहिते**त्यादिवाक्यगतेषु आकाशादिषु कारणत्वेन **आत्मा वा इदमेक एवाग्र आसीदि**ति विशेषवाक्यनिर्दिष्टस्य परमेश्वरस्यैवोक्तेः। यथा न तान्त्रिकस्याऽव्यक्तस्य ग्रहणम्, तथैवेहाऽपि पञ्चपञ्चजना इति वाक्येन **प्राणस्य प्राणमि**त्यादिविशेषवाक्यनिर्दिष्टानामिन्द्रियाणामेव ग्रहणं न कथमपि कापिलतन्त्रसिद्धपञ्चविंशतितत्त्वग्रहणमित्यर्थः।

ननु - **असद्वा इदमग्र आसीदि**त्यसदेव कारणत्वेनाम्नायते कथं परमेश्वरस्य कारणत्वेन ग्रहणम्। कथं वा तद्दृष्टान्तेन पञ्चजनशब्देन तान्त्रिकतत्त्वपरित्यागपूर्वकमिन्द्रियग्रहणञ्च युज्यत इत्याशङ्कानिराकरणार्थत्वेनोत्तरसूत्रमवतारयति - **तत्रे**त्यादिना।

सोऽकामयतेत्यादि। अत्राऽयं भावः। **'असद्वा इदमग्र आसीदि'**त्यत्र आत्मा वा इत्युक्तः परमेश्वरस्समाकृष्यते। कथमितिचेत् **'तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्माऽऽनन्दमयः।'**,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

समाकर्षात् पूर्वनिर्दिष्टस्याऽव्याकृतस्यैव 'स एष इह प्रविष्ट आनखाग्रेभ्यः' इति समाकर्षाच्च यथा स एवाऽवगम्यते, तथाऽत्राऽपि समाकर्षात् पञ्चजनानामिन्द्रियत्वाऽवगतिरिति न विरोधः।

।। इति सङ्ख्योपसंग्रहाधिकरणम् ।। ३५

***

अथ जगद्वाचित्वाधिकरणम् ३६

गतस्साङ्ख्यतत्वशङ्काप्रसङ्गः, पुनरपि जीवात् परमेश्वरस्याऽन्यभावमुपपादयति -

***जगद्वाचित्वात्* ।।१-४-१६।।**

श्रूयतेऽस्य विषयः कौषीतकीब्राह्मणोपनिषदि 'ब्रह्म ते ब्रुवाणि' इत्युपक्रम्य 'यो वै

'सोऽकामयत बहुस्यां प्रजायेयेति।', 'इदं सर्वमसृजत। यदिदं किञ्च।', 'तत्सृष्ट्वा तदेवाऽनुप्राविशत्। तदनुप्रविश्य सच्च त्यच्चाभवदि'त्यादिना ब्राह्मणेनान्दमयं ब्रह्म सर्वानुप्रवेशेन सर्वात्मभूतमुक्त्वा **तदप्येष श्लोको भवतीत्युक्त**स्याऽर्थस्य साक्षित्वेनोदाहृतोऽयं श्लोकः **'असद्वा इदमग्र आसीदि'**ति। एवमुत्तरत्राऽपि **'भीष्माऽस्मादि'**त्यादिना तमेव परमेश्वरं समाकृष्य तस्यैव प्रशासितृत्वादयोऽभिहिताः। तथा **'तद्धेदं तर्ह्यव्याकृतमासीदि'**ति निर्दिष्टस्यैव **स एष इह प्रविष्टः। आनखाग्रेभ्यः पश्यत्यचक्षुरित्यत्र** समाकर्षादपि असच्छब्देन अव्याकृतशब्देन च परमेश्वर एव निगद्यत इत्यवगम्यते। असदव्याकृतशब्दौ सृष्टेः पुरस्तान्नामरूपविभागाभावादुपपन्नौ। एवञ्च, यथा असदव्याकृतशब्दाभ्यां समाकर्षात्परमेश्वरोऽवगम्यते, तथैव पञ्चजनशब्देनाऽपि समाकर्षादिन्द्रियाण्येवेत्यवगम्यते। तस्मात् कापिलतन्त्रसिद्धानां पञ्चविंशतितत्त्वानामत्र न प्रसक्तिरिति भावः।

।। इति सङ्ख्योपसङ्ग्रहाधिकरणम् ।। ३५

***

अथ जगद्वाचित्वाधिकरणम् ३६

पेटिकासङ्गतिमाह - **गत** इति। पूर्वाधिकरणेषु त्रिष्वपि पूर्वपक्षतया शङ्काद्वयं प्रसक्तं **'महतः परमव्यक्तम्।', 'अजामेकाम्।', 'यस्मिन्पञ्चपञ्चजना।'** इतिमन्त्राः साङ्ख्यतन्त्रसिद्धाऽव्यक्तादीनि प्रतिपादयन्तीत्येका शङ्का; तदनुबन्धिनी, जीवादन्यः परमेश्वरो नाम नास्तीत्यपरा। आद्ये तावद्विषयवाक्ये प्रथमशङ्कोपयोगिनीं तान्त्रिकमहदव्यक्तपुरुषक्रमप्रत्यभिज्ञामुपन्यस्यतः पूर्वपक्षिणः **'पुरुषान्नापरं किञ्चिदि'**ति वाक्यं पञ्चविंशाज्जीवात्परस्य तत्त्वान्तरस्य निषेधकमिति, स्पष्ट एव तत्र परमेश्वरप्रतिक्षेपः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

बालाक! एतेषां पुरुषाणां कर्ता, यस्य वैतत् कर्म स वै वेदितव्यः' इत्यादिकः।

इह वेद्यत्वेन श्रुतः परमेश्वरो जीवो वा इति संशयः।

'य एवैष आदित्ये पुरुषस्तमेवाऽहमुपास य एवैष चन्द्रमसि पुरषो य एवैष विद्युति' इत्यादि पूर्ववाक्यसन्दर्भप्रकृतादित्यादिसकलपुरुषकर्तृत्वस्य जीवेऽपि विद्यमानत्वात् कर्मशब्दस्याऽपूर्ववाचित्वादपूर्वस्य तदर्थत्वात् निर्धूतसकलकर्मसम्बन्धे परमेश्वरे तदयोगाज्जीव एवाऽयमिति पूर्वपक्षः।

द्वितीये विषयवाक्ये स्वतन्त्रप्रकृतिपरत्वशङ्का परमेश्वरप्रतिक्षेपपर्यन्ता। परमेश्वरसत्त्वे तदधीनत्वाऽवश्यम्भावेन स्वातन्त्र्याऽयोगात्। तृतीयेप्येवमेव। तत्र पूर्वपक्षे पञ्चविंशतेस्तत्त्वानां परमेश्वराधीनत्वात्। **नानाभावादतिरेकाच्चे**ति दूषणमुक्तम्। तत्राद्यशङ्काप्रसङ्गो निवृत्तः। इदानीमुत्तराधिकरणद्वयेन कयोश्चिद्विषयवाक्ययोर्मुक्त्यर्थं वेदितव्यतया मुक्तप्राप्यतया चोपदिश्यमानं ब्रह्म जीव इति पूर्वपक्षकरणेन पुनरपि जीवादन्यः परमेश्वरो नाम नास्तीति द्वितीयां शङ्कामुद्भाव्य जीवादन्यस्य परमेश्वरस्य सद्भाव उपपाद्यत इत्यर्थः। तस्मात्पूर्वाधिकरणत्रयेणोत्तराधिकरणद्वयस्य प्रत्युदाहरणसङ्गतिः।

अत्रेयं विषयवाक्यप्रसक्तिः। अजातशत्रुर्नाम काशिराजस्स्वसमीपमागत्य **ब्रह्म ते ब्रुवाणी**त्युक्तवन्तं **बालाकिं गार्ग्यं सहस्रं दद्म एतस्यां वाचि जनको जनक इति जना धावन्ती**ति प्रशस्य बालाकिना **य एवैष आदित्ये पुरुषस्तमेवाऽहमुपास** इत्यादिभिर्वाक्यैर्ब्रह्मत्वेनोपदिष्टानादित्यचन्द्रविद्युत्स्तनयित्वादिगतान्पुरुषानब्रह्मत्वेन तदुक्त्यनन्तरमेव प्रत्याख्याय, ततस्तूष्णीम्भूते तस्मिन् **किमेतावदेव तव ज्ञानमि**ति पृष्ट्वा, तेनैतावदेवेत्यभिहिते **मृषा वै किलमासमवादयिष्ठाः ब्रह्म ते ब्रुवाणी**त्युक्त्वा तमपोद्य **यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य वै तत्कर्म स वेदितव्य** इति स्वयमुपदिदेश। अत्र यो वेदितव्य उपदिष्टः उपसंहारे च **स पूर्वान्धात्मनोऽपहत्य स पूर्वेषाञ्च भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति य एवं वेदे**ति यद्वेदनस्य फलं वर्णितम्, स जीवः परमेश्वरो वेति कर्मशब्दयोगरूढिभ्यां संशयमाह - **इहे**ति। नन्वेतेषां पुरुषाणां कर्तेति श्रुतं प्रकृत्यादित्यमण्डलादिगतपुरुषकर्तृत्वं जीवे न सम्भवतीति कथं पूर्वपक्ष इत्याशङ्क्य, तत्र तत्सम्भावयति - **य एवे**ति। अत्राऽयं भावः। आदित्यादिपुरुषास्तावदालोकदानादिना जीवस्योपकारकाः। तस्माद्ध्येयस्य भोगोपकरणभूतास्ते तददृष्टजन्या इति आदित्यादिपुरुषोत्पत्त्यनुकूलादृष्टहेतुकृतिमान् जीवः कथं तेषां कर्ता न स्यात् कार्यानुकूलकृतिमत्त्वं हि कर्तृत्वमिति।

ननु - सकलपुरुषकर्तृत्वं जीवेऽपि सम्भवतु नाम। तथापि जीवगतमेव तद्ग्राह्यम्। न परमेश्वरगतमित्यत्र किं नियामकमित्याशङ्क्य प्रधानयुक्तिमाह - **कर्मशब्दस्ये**ति। **अपूर्वस्ये**ति। आदित्यादिपुरुषकर्तृत्वं वेदितव्यपुरुषस्य कीदृशमित्याकाङ्क्षायामपूर्वद्वारकं विवक्षितमित्याकाङ्क्षितार्थनिरूपणार्थतया

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सिद्धान्तस्तु, कर्मशब्दस्यैतच्छब्दसामानाधिकरण्येन क्रियत इति व्युत्पत्त्या च जगद्वाचित्वाज्जगत्कार्यवान् परमेश्वर एवाऽत्र प्रतिपाद्यः न हि जीवे सकलजगत्कर्तृत्वसंभवः। पुनराशङ्क्य परिहरति -

जीवमुख्यप्राणालिङ्गान्नेतिचेत्तद्व्याख्यातम्।।१-४-१७।।

कर्मशब्दस्याऽपूर्वरूढिरिहोपयुज्यते निर्धूतेति। सर्वथा निर्धूतसकलकर्मबन्ध एव परमेश्वरः **न कर्मणा वर्धते नो कनीयान्**इति श्रुतेः। अवश्यं च वेदितव्यत्वोपदेशः परमेश्वर एव योजनीयः **ब्रह्म ते ब्रवाणी**त्युपक्रमानुरोधादित्याशङ्कामवधारणेन व्यावर्तयन् पूर्वपक्षमुपसंहरति - **जीव एवाऽयमि**ति।

सिद्धान्तयति - **कर्मशब्दस्ये**ति। **यस्य वै तत्कर्मे**त्यत्र एतच्छब्दः प्रत्यक्षादिसन्निधापितसकलजगद्वाची। तत्समानाधिकरणं कर्मपदमपि तद्वाचीत्येवाऽभ्युपगन्तव्यम्। किञ्च - कर्मपदं क्रियत इति व्युत्पत्त्या यौगिकत्वादपि सकलजगद्वाचि; न त्वपूर्वमात्रवाचि। अन्यत्राऽपि योगस्याऽविशेषात्क्वचित्सङ्कोच-कल्पनाऽयोगात्। किञ्च **यो वै बालाक,** इत्यादिवाक्यद्वयमपि यच्छब्दोपबन्धादनुवादरूपं विज्ञायते तत्र ब्रह्मपरत्वेन श्रुत्यन्तरेषु बुद्धिस्थानि। **'चक्षोस्सूर्यो अजायत।', 'चन्द्रमा मनसो जातः।', 'सूर्या चन्द्रमसौ।', 'धाता यथापूर्वमकल्पयत्।'** इत्यादीनि प्रथमवाक्यस्य पुरोवादकानि,

छन्दांसि यज्ञाः क्रतवो व्रतानि भूतं भव्यं यच्च वेदा वदन्ति।
अस्मान्मायी सृज्यते विश्वमेतत्तस्मिन्श्चाऽन्यो मायया सन्निरुद्धः।।

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्। इति,

यद्यद्भूतं भविष्यद्वर्तमानरूपं कार्यं वेदवाक्यान्तरैरेवाऽवगम्यते, तत्सर्वमनितरसाधारणमहेश्वर-शब्दवाच्येन परमेश्वरेण सृज्यमिति प्रतिपादयत् श्वेताश्वतरवाक्यद्वयस्य पुरोवादः। पुरोवादानुसारेणाऽपि कर्मशब्दस्य कियत इति योगेन जगद्वाचित्वं युक्तम्। तस्मादसङ्कुचितसकलजगत्कर्तृत्वस्य जीवानां मध्ये क्वचिदप्यसम्भवात्परमेश्वर एवाऽत्र प्रतिपाद्य इति सिद्धम्।

तन्निष्कर्ष एव वाक्यशेषे जीवलिङ्गं दृश्यत इत्याशङ्कानिराकरणाऽर्थत्वेनोत्तरसूत्रमवतारयति - **पुनरि**ति।

एतैरात्मभिर्भु इति वाक्यशेषे श्रेष्ठिदृष्टान्तोपपादितमादित्यादिपुरुषहेतुकभोक्तृत्वमेकं जीवलिङ्गम्। **अथाऽस्मिन्प्राण एवैकधा भवती**ति वाक्यशेषे सप्तम्यन्तनिर्दिष्टे वेदितव्यपुरुषाश्रयत्वेनोक्तः प्राणोऽन्यज्जीवलिङ्गम्। अनयोराद्यं मुख्यम्। तद्धि निर्विचिकित्सं जीवासाधारणम्। द्वितीयन्त्वमुख्यम्। तथाहि - प्राणस्य ब्रह्माश्रितत्वं **'यस्मिन्द्यौः पृथिवी चाऽन्तरिक्षं।', 'पञ्चपञ्चजना'** इति मन्त्रयोः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तद्यथा, 'श्रेष्ठीम्वैर्भुङ्क्ते, तथा वा स्वाश्श्रोष्ठिनं भुञ्जन्त्येवमेवैष प्राज्ञ आत्मा एतैरात्माभिर्भुङ्क्ते ऐवमेवैत आत्मान एतमात्मानं भुञ्जन्ति' इति 'यदा सुप्तस्स्वप्नं न कञ्चन पश्यति अथाऽस्मिन् प्राण एवैकधा भवति ' इति जीवमुख्यप्राणलिङ्गदर्शनात् नाऽसौ परमेश्वर इति न वाच्यम्।

पूर्वत्र प्रतर्दनविद्यायां व्याख्याततत्वात्। इहाऽपि पूर्वापरपर्यालोचनया ब्रह्मपरत्वे स्थिते तदनुरूपतयाऽन्यलिङ्गानि नेतव्यानि। पूर्वत्र ह्युपक्रमे, 'ब्रह्म ते ब्रुवाणि' इति ब्रह्मोपक्षिप्तं मध्ये च 'यस्य वैतत् कर्म' इति सकलजगत्कर्तृत्वमुक्तं, परत्र च उपसंहारे सर्वान् पाप्मनोऽपहत्य सर्वेषां च, भूतानां श्रेष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति य एवं वेद इति ब्रह्मोपासनैकान्तं सर्वपापहतिपूर्वकं स्वाराज्यफलमुक्तम्। एवमस्य प्रकरणस्य ब्रह्मपरत्वनिश्चये जीवमुख्यप्राणलिङ्गानि तत्परतयैव नेतव्यानि। पक्षान्तरमुच्यते -

अन्यार्थन्तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ।।१-४-१८।।

प्रतिपन्नं तस्मादुपकरणोपकरणिभावसम्बन्धेनाश्रितः प्राणः जीवलिङ्गमिति विवक्षा। भोक्तृत्वरूपस्फुटतरजीवलिङ्गसमभिव्याहारेण निगमयितव्येति परमुखनिरीक्षणवत्त्वादिदममुख्यम्। तस्मात् **जीवमुख्यप्राणलिङ्गान्नेतिचेदिति** सूत्रभागस्य भोक्तृत्वरूपान्मुख्यजीवलिङ्गात्प्राणरूपादुपपादनीयादमुख्यजीवलिङ्गाच्च जीव एवाऽत्र प्रतिपाद्यो वाच्य इति, न परमेश्वरः प्रतिपाद्य, इत्यर्थमभिप्रेत्य तत्परतया व्याचष्टे - **एतैरिति**। तद्व्याख्यातमिति परिहारभागं व्याचष्टे - **पूर्वत्रेति**। **प्राणस्तथानुगमादित्यधिकरणे** प्रतर्दनविद्याप्रकरणम्। पूर्वापरपर्यालोचनया ब्रह्मपरमवगम्यत इति। तदनुरोधेन तदन्तर्गतान्यप्यन्यलिङ्गानि ब्रह्मणि नेतव्यानीत्युपपादितम्। **उपासात्रैविध्यादाश्रितत्वादिह तद्योगादिदमपि** प्रकरणं तेनैव व्याख्यातम्। तथेदमपि पूर्वापरपर्यालोचनया ब्रह्मपरमवसीयते। कथम्। **ब्रह्म ते ब्रूवाणी**त्युपक्रमस्तावद्ब्रह्मपरः। तथा **सर्वान्पाप्मनोऽपहत्ये**त्युपसंहारोऽपि तद्विषय एव जरामृत्युशोकादिसकलपापहतिपूर्वकं शिवस्यात्मरूपं स्वाराज्यं हि शिवाख्यस्य परब्रह्मणः वेदनादेव श्रुत्यन्तेषु प्रसिद्धम्।

एवञ्च, यथा प्रतर्दनविद्यायामन्यलिङ्गानि त्रिविधोपासनतात्पर्येण ब्रह्मणि नीतानि, एवमिहाऽपि तानि तथैव ब्रह्मणि नेतव्यानीति तात्पर्यार्थः।

उत्तरसूत्रमवतारयति - **पक्षान्तरमुच्यत** इति। पूर्वसूत्रे यष्टिघातोत्थापनेन जीवलिङ्गं भोक्तृत्वादिलिङ्गाज्जीवशरीरब्रह्मोपासनाऽर्थत्वेन नीतम्। इदानीन्तज्जीवातिरिक्तपरमेश्वरप्रतिबोधनार्थमित्युत्तरग्रन्थपर्यालोचनादवश्यं स्थायिपक्षान्तरमुच्यत इत्यर्थः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

'तौ ह सुप्तं पुरुषमाजग्मतु स्तं हाजातशत्रुरामन्त्रयांचक्रे बृहन् पाण्डरवास। सोमराजन् इति स तूष्णीमेव शिश्ये तदुह एनं यष्ट्या व्याचिक्षेप स तत एव समुत्तस्थौ' इत्यत्र प्राणानामामन्त्रणेऽपि तदश्रवणेन, ततः परं यष्टिघाते सत्युत्थानेन च प्राणाद्यतिरिक्तजीवसद्भावप्रतिपादनं, तदतिरिक्तपरमेश्वरप्राज्ञोपासनार्थमिति 'क्वैष एतत् बालाके पुरुषोशयिष्ट क्व वा एतदभूत् कुत एतदागात् इति' प्रश्नात् 'यदा सुप्तस्स्वप्नं न कञ्चन पश्यत्यथास्मिन् प्राण एवैकधा भवतीति, सता

अन्यार्थमित्येतद्विशेष्याध्याहारपूर्वकं व्याचष्टे - **तौ हे**ति। राज्ञा वेदितव्यतयोपदिष्टस्यादित्यादिपुरुषाणां कर्तृवेदनाय गार्ग्योपसत्तिप्रतिपादनान्तरं श्रूयते **तं ह पाणावभिपद्य प्रवव्राज तौ ह सुप्तं पुरुषमीयतु स्तंहाऽजातशत्रुरामन्त्रयाञ्चक्रे बृहन् पाण्डरवासः! सोमराजन्निति। स इह तूष्णीमेव शिश्ये। तदु हैनं यष्ट्या व्याचिक्षेप स तत एव समुत्तस्थावि**ति। अत्र बृहन्नित्यादि नामभिः प्राणस्यामन्त्रणम्। प्राणः खलु बृहन् महान् श्रेष्ठः। असपत्नो वा। पाण्डरवर्णा आपोऽस्य वासस्त्वेनोपचरिताः शरीरं वा प्राणविद्यायाम् प्राणो वाव ज्येष्ठश्च श्रेष्ठश्चेति तस्य श्रैष्ठ्यश्रवणात् **किं मे वास** इति प्राणप्रश्ने **आपो वा स** इत्युत्तरश्रवणाच्च सप्तान्नब्राह्मणे **स एषोऽसपत्नः इत्यथैतस्य प्राणस्यापश्शरीरमि**त्यसपत्नत्वा-ऽऽप्शरीरकत्वश्रवणाद्वा। सोमश्चायमुपचारात्। सप्तान्नब्राह्मण एव **ज्योतीरूपमसौ चन्द्र** इति श्रवणात्। राजा च। **प्राणो वै सम्राडि**ति श्रवणात्। एवं प्राणनामभिरामन्त्रणेऽपि अनुत्थानप्रदर्शनं प्राणान्यत्वज्ञापनार्थम्। सुषुप्तिदशायामुपरतव्यापारेभ्यश्शरीरेन्द्रियेभ्यः अन्यत्वं सुज्ञानमिति तस्यामपि दशायामनुपरत-व्यापारात्प्राणादन्यत्वमेव ज्ञापनीयम्। एवं प्राणनामभिरामन्त्रणेऽपि अनुत्थानस्य यष्टिघातेनोत्थानस्य च प्रदर्शनेनाऽन्वयव्यतिरेकाभ्यां यत् कैमुतिकन्यायेन स्थूलसूक्ष्मदेहातिरिक्तजीवसद्भावप्रतिपादनं तदन्यार्थं जीवातिरिक्तपरमेश्वरप्रतिपादनार्थमेवेति जैमिनिराचार्यो मन्यत इत्यर्थः।

सूत्रे, तुशब्दः अस्य जीवलिङ्गस्य पूर्वसूत्रदर्शितगतिव्यावृत्त्यर्थः। जैमिनिग्रहणमस्य पक्षस्य युक्ततरत्वज्ञापनार्थं प्रश्नव्याख्यानाभ्यामिति हेतुं व्याचष्टे - **क्वैष एतदि**ति। यष्टिघातेनोत्थापनानन्तरं, **क्वैष एतद्बालाके पुरुषोऽशयिष्ट क्व वा एतदभूत्। कुत एतदागादि**ति राज्ञा गार्ग्यं प्रति कृतः प्रश्नः। यद्यपि यत्राऽशयिष्ट तत्रैव यावत्प्रबोधमभूदिति प्रबोध्यमानस्तत एवागादिति चाऽर्थात्सिध्यन्नर्थो न पृथक्प्रश्नमर्हति। तथाऽपि जीवस्य सुषुप्तेः प्राक्स्वपतोऽधिकरणतया सुषुप्तस्य यावत्प्रबोधमधिकरणतया यष्टिघातेनोत्थापनान्तरं तदुत्थानाऽपादानतया च जीवातिरिक्तपरमेश्वरसद्भावं दृढीकर्तुं त्रेधा प्रश्नः। गार्ग्येण पृष्टं सुषुप्तजीवा-धिकरणमविजानति **हिता नाम हृदयस्य नाड्य** इत्यादिना **तासु तदा सुप्तः स्वप्नं न कञ्चन**

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सोम्य तदा संपन्नो भवति' इत्यादि वाक्यान्तरसमानार्थात्तत्प्रतिवचनाच्चावगम्यते। एके वाजसनेयिनो विस्पष्टमस्मिन् बालाक्यजातशत्रुसंवादे एतत्समानार्थमधीयते तत्र हि 'यत्रैष एतत् सुप्तोऽभूद्य एष विज्ञानमयः पुरुषः क्वैष तदाऽभूत् कुत एतदागात्' इति प्रश्नः, 'यत्रैष एतत् सुप्तोऽभूद्य एष विज्ञानमयः पुरुषस्तदेषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते' इति प्रतिवचनम्। तस्मात् परमेश्वर एवाऽयं सकलजगत्कर्तेति सिद्धम्।

।। *इति जगद्वाचित्वाधिकरणम्* ।। ३६

***

पश्यतीत्यन्तेन जीवसुषुप्त्यधिकरणं हृदयावच्छिन्नं ब्रह्म प्राप्तुमार्गे तदधिगन्तव्यासु नाडीषूपसर्पणमुक्त्वा **अथाऽस्मिन्प्राण एवैकधा भवती**ति राज्ञैव कृतं स्वपृष्टार्थविवरणम्। तस्य व्याख्यानमिदं च सुषुप्तजीवस्य ब्रह्मणि लयप्रतिपादकम्। **सता सोम्य तदा सम्पन्नो भवती**ति श्रुत्यन्तरसमानार्थत्वात्। एवञ्चाऽस्मिन्वेदितव्यतयोपदिष्टे परब्रह्मणि जीवः सुषुप्तौ लीनो भवतीति तदर्थो ग्राह्यः।

एताभ्यां प्रश्नव्याख्यानाभ्यां जीवाऽतिरिक्तः परमेश्वरोऽत्र प्रतिपाद्योऽवसीयत इति भावः।

'अपि चैवमेक' इति सूत्रशेषं विवृणोति - **एक** इति। अपि च वाजसनेयिनोऽस्मिन्प्रकरणे स्पष्टमेतत्समानार्थवाक्यजातमधीयते **यत्रैष एतत्सुप्तोऽभूत्। य एष विज्ञानमयः षुरुषः क्वैष तदाऽभूत्। कुत एतदागादि**ति प्रश्नः। **यत्रैष एतत्सुप्तोऽभूत् य एष विज्ञानमयः पुरुषस्तथैषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोन्तर्हृदयाकाशस्तस्मिन्शेत** इति व्याख्यानम् अत्र निर्दिष्टं जीवस्य सुषुप्त्यधिकरणं ब्रह्मेति स्पष्टम्।

आकाशशब्देन तन्निर्देशात्। तस्य ब्रह्मणश्श्रुत्यन्तरेषु प्रसिद्धतरत्वात्। एतत्स्थाने कौषीतकिब्राह्मणपठितस्य प्राणशब्दस्य एकार्थस्य वक्तव्यतया तयोर्ब्रह्मण्यैकार्थ्यस्य **आकाशस्तल्लिङ्गात्।, अत एव प्राण** इति सूत्रदर्शितन्यायतस्सिद्धत्वाच्च। अतोऽत्र जीवप्रतिपादनस्य जीवातिरिक्तपरमेश्वरप्रतिबोधनार्थत्वं युक्तमिति भावः तस्मात्परमेश्वरस्य सद्भावे तस्य जीवाद्भेदे वा न विवदितव्यमित्याशयेनाऽधिकरणमुपसंहरति - **तस्मादि**ति।

।। *इति जगद्वाचित्वाधिकरणम्* ।। ३६

***

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ वाक्यान्वयाधिकरणम् ३७

मैत्रेयिब्राह्मणे सर्वत्र जीवेश्वरयोरेकत्र शब्दविषयत्वे प्रतीयमाने तत्सामानाधिकरण्यं कथमित्येतन्निरूपणाय इदमधिकरणमारभ्यते -

वाक्यान्वयात् ।।१-४-१९।।

बृहदारण्यके 'न वा अरे पत्युः कामाय पतिः प्रियो भवति आत्मनस्तु कामाय पतिः प्रियो भवति इत्यारभ्य आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इत्यादि श्रूयते।

अथ वाक्यान्वयाधिकरणम् ३७

उत्तराधिकरणमवतारयति - **सर्वत्रेति**। उदाहरिष्यमाणे मैत्रेयीब्राह्मणे सर्वत्र आदिमध्यावसानेषु जीवेश्वरयोरेकशब्दविषयत्वं प्रतीयते जीवपरत्वेन सम्प्रतिपन्नानामीश्वरपरत्वम्। ईश्वरपरत्वेन सम्प्रतिपन्नानां जीवपरत्वम्। एवमेकशब्दविषयत्वे प्रतीयमाने जीवेश्वरयोरन्यतर एव परिशिष्यत इत्यन्यतरः प्रत्याख्यातो भवति। तत्र प्रत्यक्षसिद्धजगत्प्रत्याख्यानाऽयोगादीश्वरस्यैव प्रत्याख्यानं पर्यवस्यति, जीवेश्वरयोरभेदो वा पर्यवस्यति। एवमीश्वरस्य तत्र जीवाद्भेदस्य बाधकं तज्जीवेश्वरवाचित्वेन सम्प्रतिपन्नशब्दानां सामानाधिकरण्यमुपपादयितुं शक्यमित्याशङ्क्य तदुपपादनायाऽधिकरणमारभ्यत इत्यर्थः। अनेन माभूज्जीवाधिकरणवाक्यमीश्वरे तद्भेदे वा बाधकम्। इदन्तु बाधकं स्यात् सामानाधिकरण्यस्याऽन्यथानिर्देष्टुमशक्यत्वादित्याशङ्क्य प्रत्युदाहरणसङ्गतिर्दर्शिता भवति। तदुपपादनार्थमधिकरणमारभ्यत इत्यर्थः।

बृहदारण्यके मैत्रेयीब्राह्मणे याज्ञवल्क्यस्स्वयं प्रविव्रजिषया मैत्रेयीकात्यायन्योस्स्वभार्ययोर्वित्तसंविभागं चिकीर्षन् वित्तेन किममृतत्वं प्राप्तुं शक्यमिति मैत्रेय्या पृष्टो **यथैवोपकरणवतां जीवितं तथैव ते जीवितं स्यात्। अमृतत्वस्य तु नाशास्ति वित्तेनेत्युक्त्वा, येनाऽहं नामृता स्यां किमहं तेन कुर्यां, यदेव भगवान्वेद तदेव मे ब्रूहीति** तया पुनरमृतत्वसाधनं पृष्टो, **न वा अरे पत्युः कामाय पतिः प्रियो भवति आत्मनस्तु कामाय पतिः प्रियो भवतीत्यादिभिः। न वारे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवतीत्यन्तैर्वाक्यैः** पतिजायापुत्रमित्रपश्वादिसर्वं भोगार्थतयैव प्रियं भवति। तं पत्यादिसर्वभोक्तारमात्मानमुपक्रम्य **आत्मा वा अरे द्रष्टव्यश्श्रोतव्यो मन्तव्यो निदिध्यासितव्य** इत्यमृतत्वसाधनमात्मदर्शनं दर्शनसाधनानि श्रवणादीनि चोपदिश्य **आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितमित्यात्मविज्ञानेन** सर्वविज्ञानमुक्त्वा **स यथाऽग्नेरभ्याहितस्य पृथग्धूमाविनिस्सरन्त्येवं वा अरे अस्य महतो भूतस्य निश्वसितमेतदृग्वेदो यजुर्वेदस्सामवेद अथर्वाङ्गिरसः पुराणं विद्या उपनिषदश्श्लोकास्सूत्राण्यनुव्याख्यानानि इष्टं शृतमशितम्पायितमयञ्च लोकः परञ्च**

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इह 'आत्मनस्तु कामाय' इत्यादिवाक्यैर्भोगप्रीतियुक्ततया संसारित्वावगमादत्र प्रतिपाद्यमानो

लोकः **सर्वाणि च भूतान्यस्यैवैतानि सर्वाणि निश्वसितानी**ति तस्य नामरूपात्मकसकलप्रपञ्चकारणत्वं प्रदर्श्य, **यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नोरसघनः** एवं वा अरे **अयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवैतेभ्यो भूतेभ्यस्समुत्थाय तान्येवाऽनुविनश्यति न प्रेत्य संज्ञास्तीति** स्वोत्पत्तिविनाशविशेषविज्ञानाऽभावानुक्त्वा **एतावदरे खल्वमृतत्वमि**ति वर्णितस्यैतस्यात्मनो वेदनममृतत्व-साधनमित्युपसञ्जहारेति श्रूयते। अत्र **आत्मा वा अरे द्रष्टव्य** इत्यादिना निर्दिष्टस्तावदात्मा परमेश्वरः प्रतीयते। अमृतत्वार्थिन्यै मैत्रेय्यै तद्दर्शनाद्युपदेशात्तद्विज्ञानेनाऽमृतत्ववर्णनात्तस्य नामरूपात्मकसकलप्रपञ्चो-पादानत्वप्रतिपादनाच्च। **स यथा सैन्धवघन** इत्यादिनोक्तस्तु जीवः प्रतीयते। **एतेभ्यो भूतेभ्यस्समुत्थाय तान्येवाऽनुविनश्यती**ति देहाकारपरिणतभूतोपाधिकोत्पत्तिविनाशवत्ववचनात्। एवमिह प्रतीयमान जीवेश्वरसामानाधिकरण्यनिर्देशे **आत्मा वा अरे द्रष्टव्य** इति प्रकृतस्यैवात्मनः **एवं वा अरे अयमात्मे**ति इदमात्मशब्दाभ्यां परामर्शाच्चतुर्थे मैत्रेयीब्राह्मणे **एवं वा इदं महद्भूतमनन्तमपारमि**ति विज्ञानघनवाक्य एव च तैस्सामानाधिकरण्येन निर्दिश्यते। **महद्भूतमनन्तमपारमि**ति शब्दानां ब्रह्मपरत्वात् सर्वविज्ञानवाक्यादिगतैरात्मादिशब्दैस्ततो भिन्नविभक्तिकानां जीवविषयशब्दानां सामानाधिकरण्याभावे-प्येकविषयत्वमविचलमेव। प्रतीतौ सत्यामपि जीवेश्वरयोरन्यतर एवाऽत्र प्रतिपाद्यः, न उभावप्यभेदेनेति व्यवस्थापनीयम्। तयोर्भेदस्य प्रबलानेकश्रुत्यन्तरसिद्धत्वादिति स्थिते किं जीवोऽत्र प्रतिपाद्य उत परमेश्वर इति संशयस्सूत्रावतारिकायां सूचितत्वादिह पुनर्नोक्तः।

पूर्वपक्षमुपपादयति - **इहे**ति।

अत्राऽयम्भावः - **न वारे पत्युः कामाये**त्यादि वाक्येषु स्वभोगार्थं पत्यादिप्रीतियुक्ततया प्रतिपाद्यमानस्तावदात्मा जीव एव। **न वा अरे पत्युः कामाये**त्यादि सन्दर्भस्य **आत्मा वा अरे द्रष्टव्य** इत्यादिना वक्ष्यमाणस्य आत्मैव द्रष्टव्य इत्यस्य उपपादनार्थतया तदनुरोधेन द्रष्टव्य आत्मा जीव इत्येव सिद्ध्यति। एवं पतिजायादिवाक्यसन्दर्भेण द्रष्टव्यत्वादिवचनं जीवविषयमित्यवगते तदुत्तरसन्दर्भो-ऽप्युपक्रमानुरोधेन तद्विषय एव पर्यवस्यति। तथाहि सर्वविज्ञानवचनं शिवे पूजिते सर्वे देवताः पूजिता इति वचनमिवाऽन्येषां प्रकृतिमहदहङ्कारभूतेन्द्रियाणां प्रत्येकं श्रवणमननाभ्यामुपासनेन यावत्फलं भवति तत्सर्वं पुरुषोपासनायामेवान्तर्भवतीति गौणं वर्णनीयम्। अत एवाहुः - **'दशमन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः। भौतिकास्तु शतं पूर्णं सहस्रं त्वाभिमानिकाः।। बौद्धा दशसहस्राणि तिष्ठन्ति विगतज्वराः। पूर्णं शतसहस्रन्तु तिष्ठन्त्यव्यक्तचिन्तकाः।। पुरुषं निर्गुणं प्राप्य कालसङ्ख्या न विद्यते।'** इति। **एतावदरे अमृतत्वमि**त्येतत्तु अनात्मविविक्तजीवज्ञानस्य मोक्षसाधनत्वाभिप्रायेण योजनीयम्। एवञ्च मैत्रेयीब्राह्मणे जगदुपादानप्रकृतिविशिष्टत्वेन मोक्षार्थं प्रकृतिविविक्ततया ज्ञातव्यत्वेन

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

जीव इति पूर्वपक्षे प्राप्ते सिद्धान्तयामः -

परमेश्वर इति, कुतः? 'अमृतत्वस्य तु नाऽशास्ति वित्तेन।', आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितम्।, 'इदं सर्वं यदयमात्मा' इत्यादेः 'येनेदं सर्वं विजानाति तं केन विजानीयात्' इत्यवसानस्य कृत्स्नस्य वाक्यस्य परमेश्वरेऽन्वयात्। भोगप्रीतियुक्तस्य जीवस्यानुवादेन

च प्रतिपाद्य इति पूर्वपक्षं स्थिरीकरोति - **जीव** इति। इति सन्देहेन पूर्वपक्षे प्राप्ते इत्यत्र जीव इति पूर्वपक्षे प्राप्त इत्यन्वयः। सन्देहेनेत्यवतारिकायां सूचितस्यानुवादः **वाक्यान्वयादि**ति सूत्रस्य मैत्रेयीब्राह्मणे प्रतिपाद्यः परमेश्वर इत्यध्याहृतेन साध्येन तत्रादिमध्यावसानवाक्यानां परमेश्वरे तद्विषयत्वेनाऽन्वयादिति सूत्रहेतोरन्वयमभिप्रेत्य सिद्धान्तयति - **परमेश्वर इती**ति। अत्र इत्यारभ्येत्यन्तेन अमृतत्वोपायप्रार्थनारूपं पुरस्तादुपदेष्टव्यमुपक्रमगतं ब्रह्मलिङ्गं दर्शितम्। इत्यादेरित्यन्तेन सर्वविज्ञानप्रतिज्ञानं जगदुपादानत्वमित्यादि-मध्यावसानगतं ब्रह्मलिङ्गजातं दर्शितम्। **इत्यवसानस्ये**त्यन्तेन - **येनेदं सर्वं विजानाति तं केन विजानीयात्। विज्ञातारमेकेन विजानाती**त्यादि ह्युपसंहारगतं ब्रह्मलिङ्गं दर्शितम्। जीवः स्वाऽन्तर्यामितया स्थितेन येन परमेश्वरेणाद्दतज्ञानशक्तिकस्सन्निदं सर्वं विजानाति, तम्परमेश्वरं केनोपायेन विजानीयात्। तद्दर्शने तत्प्रसादहेतुं प्रागुक्तश्रवणमननपूर्वकमुपासनमेकं विहाय न किञ्चिदप्युपायान्तरमस्तीत्यभ्यासेन प्रतिपाद्यमानं दुरधिगमत्वरूपं ब्रह्मलिङ्गं दर्शितम्।

ननूपक्रमादीनां ब्रह्मणि स्वारस्यं भवतु, तथाऽपि पतिजायादिवाक्यस्य भोगप्रीतियुक्तजीवविषयतया अपह्नोतुमशक्यतया अनन्यथासिद्धजीवलिङ्गानुसारेण जीव एव प्रकृतिविविक्तो मुमुक्षभिर्द्रष्टव्यं परतत्त्वं तदतिरेकेण किमपि नास्तीति मैत्रेयीब्राह्मणस्य तात्पर्यं वर्णनीयमिति तत्रैव ब्रह्मलिङ्गानि सर्वाणि योजनीयानीत्याशङ्क्याह - **भोगप्रीतियुक्तस्ये**ति। पतिजायादिभोगप्रीतियुक्तस्य जीवस्यैव द्रष्टव्यादि वाक्यविषयत्वावश्यम्भावे हि तस्यैव मुमुक्षुभिर्ज्ञातव्यत्वं शङ्क्येत, तदेव नास्ति। पतिजायादिवाक्ये भोगप्रीतियुक्तस्य जीवस्यानुवादः उत्तरवाक्येषु मुमुक्षुद्रष्टव्यत्वादिना परमेश्वररस्य प्रतिपादनमिति सङ्गत्युपपत्तेः। जीवानुवादस्य परमेश्वरप्रतिपादनस्य च कथमेकवाक्यतेति चेदित्थम् - यस्मात्पतिजायादयः पतिजायादि-प्रयोजनाय प्रिया न भवन्ति, किन्तु स्वप्रयोजनायैव। तस्माद्यस्यामृतत्वरूपस्वप्रयोजनस्य पतिजायादिविषयो रागो भङ्गकरस्तस्य सिद्धिमपेक्षमाणेन पतिजायादिभ्यो विरज्य परमेश्वर एव द्रष्टव्य इति।

नन्वेवं सति एकस्यैवात्मशब्दस्य पतिजायादिवाक्यगतस्य जीवोऽर्थः। तदुत्तरवाक्यगतस्य परमेश्वर इत्यर्थभेदस्स्यात्। नाऽयं दोषः। पतिजायादिवाक्यगतस्य जीवपरत्वे द्रष्टव्यवाक्यस्य **यदा चर्मवदाकाशमि**त्यादि श्रुत्यन्तरानुसारेण परमेश्वरपरत्वे चाऽवश्यं वक्तव्ये **स्याच्चैकस्य ब्रह्मशब्दवदि**ति न्यायेन तदर्थभेदाङ्गीकारस्यो-चितत्वात्। एवं द्रष्टव्यवाक्यस्य परमेश्वरपरत्वे तदुत्तरवाक्यानां तत्परत्वं स्वत एव सिद्ध्यति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

परमेश्वर प्रतिपादनादविरोधः। कथमिह सर्वत्र जीवशब्देन परमेश्वराभिधानमिति चेत्तदिदं मतान्तरेणोपपादयति -

प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ।।१-४-२०।।

'आत्मनि खल्वरे दृष्टे' इत्यादिनोक्तस्यैकविज्ञानेन सर्वविज्ञानस्य सिद्धये जीवस्य तत्कार्यतया तदव्यतिरिक्ततां ज्ञापयितुं जीवशब्देन परमेश्वरस्याभिधानमित्याश्मरथ्यो मेने।

उत्क्रमिष्यत एवं भावादित्यौडुलोमिः ।।१-४-२१।।

उत्क्रमिष्यतो मुक्तस्य परमेश्वररूपस्वभावादात्मशब्देन परमेश्वराभिधानमित्यौडुलोमिर्मेने।

अवस्थितेरिति काशकृत्स्नः ।।१-४-२२।।

'य आत्मनि तिष्ठन्' इत्यादिश्रुतेर्जीवात्मनि परमेश्वरस्याऽत्मतयाऽवस्थानाज्जीवशब्दवाच्यत्वं परमेश्वरस्येति काशकृत्स्नो मेने। इदमेव मतं सूत्रकारस्य मतद्वयमुपन्यस्य तद्विरोधेनाऽभिधानात्,

---

ननु - सर्वविज्ञानप्रतिज्ञादिकं परमेश्वरविषयमेव भवतु नाम। **तान्येवानुविनश्यती**त्यादिजीवपरामर्शः कथं तद्विषयतां प्राप्नुयादित्याकाङ्क्षायां तत्र स्वाभिमतं प्रकारं प्रदर्शयिष्यन्मतान्तरेण तावदुपपादयतीत्याह - **कथमिहे**ति। **सर्वत्रे**ति। **एतेभ्यो भूतेभ्यस्समुत्थाय तान्येवाऽनुविनश्यति न प्रेत्य संज्ञास्ति अविनाशी वा अरे अयमात्माऽनुच्छित्तिधर्मे**त्येतेषु वाक्येष्वित्यर्थः।

सर्वविज्ञानस्य प्रतिज्ञासिद्ध्यर्थस्य जीवपरमेश्वरयोः कार्यकारणभावकृतस्यैकस्य लिङ्गन्तज्ञापनार्थं जीववाचिशब्दैः परमेश्वराभिधानमिति प्रकृताधिकरणे विषयवाक्ययोः प्रतिज्ञासिद्ध्यर्थमिति भावः।

संसारदशायां जीवस्य परमेश्वराद्भेदेऽपि मोक्षदशायां तद्भावप्राप्तेः जीवशब्दैः परमेश्वराभिधानमित्यौडुलोमिमतमिति सूत्रं व्याचष्टे - **उत्क्रमिष्यत** इति।

जीवेष्वन्तर्यामितया परमेश्वरस्याऽवस्थितेस्तन्नियम्यत्वेन तच्छरीरभूतानां जीवानां शब्दाश्शरीरिपरमेश्वरपर्यन्ताः। अतो जीवशब्दैः परमेश्वराभिधानमिति काशकृत्स्नमतमिति सूत्रार्थमभिप्रेत्य व्याचष्टे - **य आत्मनी**ति परस्परविरुद्धेषु त्रिष्वेतेषु मतेषु सूत्रकारस्य किमभिमतमित्याशङ्कायां तन्निर्धारयति - **इदमेवे**ति। जीवानां कार्यत्वस्य **नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः** इत्यधिकरणे निराकरिष्यमाणत्वात्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अन्यस्याऽनभिधानाच्च निश्चीयते। बहुश्रुत्यानुगुण्यं चाऽत्र सम्भवति। तथाह्यथर्वशिरसि सर्वचिदचिदनुप्रवेशात् परमेश्वरस्य सर्वशब्दवाच्यत्वमिति श्रूयते प्रथमखण्डे 'देवा ह वै स्वर्गलोकमगमन्, ते देवा रुद्रमपृच्छन् को भवान्' इति, 'सोऽब्रवीदहमेकः प्रथममांस वर्तामि च भविष्यामि च नाऽन्यः कश्चिन्मत्तो व्यतिरिक्तः' इति, 'सोन्तरादन्तरं प्राविशद्दिशश्चाऽन्तरं संप्राविशत् सोऽहं नित्यानित्यो ब्रह्माऽहं ब्रह्माऽहं प्रांचः प्रत्यंचोऽहं दक्षिणांच उदंचोऽहं अथश्चोर्ध्वं च दिशश्च विदिशश्चाहं पुमानपुमान् स्त्रियश्चाहं सावित्र्यहं गायत्र्यहं त्रिष्टुपञ्जगत्यनुष्टुप्चाहं छंदोऽहं गार्हपत्योऽहं दक्षिणाग्निराहवनीयोऽहं सत्योऽहं गौरोऽहं गौर्यहं ज्येष्ठोऽहं श्रेष्ठोऽहं वरिष्ठोऽहमापोऽहं तेजोऽहमृग्यजुस्सामाथर्वांगिरसोऽहं अक्षरमहं क्षरमहं गुह्योऽहं गोप्योऽहं अरण्योऽहं पुष्करमहं पवित्रमहं अग्रं च मध्यं च बहिश्च पुरस्ताज्ज्योतिरित्यहमेकः सर्वे च मामेव मां यो वेद स सर्वान्देवान्वेद' इत्यन्तेन। द्वितीयखण्डे च सर्वानुप्रवेशादेव 'यो वै रुद्रस्स भगवान् यश्च ब्रह्मा तस्मै वै 'नमो नमः' इत्यारभ्य ब्रह्मविष्णुमहेश्वरोमाविनायकादिसर्वप्रपञ्चशब्दवाच्यत्वं प्रतिपाद्यते

मुक्तावागन्तुकरूपाभिनिष्पत्तेः **सम्पद्याविर्भावस्स्वेन शब्दादित्यधिकरणे** निराकरिष्यमाणत्वाच्च काशकृत्स्नमतमेव स्वाभिमतमिति पूर्वं मतद्वयोपन्यासपूर्वकं तदभिधानेन तदनन्तरमन्यस्याऽनभिधानेन च सूत्रकृत्सूचयामासेति भावः। काशकृत्स्नमतस्यैव सूत्रकारसम्मतत्वे किं कारणमित्याशङ्क्याऽऽह प्रबलश्रुत्यानुगुण्यं चाऽत्र सम्भवतीति अथर्वशिरसि **'सोऽन्तरादन्तरं प्राविशदित्यन्तेन** रुद्रः प्राणिनां शरीरान्तरात्प्राणादेरप्यन्तरं चेतनवर्गमन्तर्यामितया प्राविशदित्युक्तम्। **दिशश्चान्तरं स प्राविशदि**'त्यन्तेन दिगन्तर्गतं सर्वासु दिक्षु स्थितमचेतनवर्गमन्तर्यामितया प्राविशदित्युक्तम्।

'ततस्सोहं नित्योऽनित्यः ब्रह्माऽहमि'त्यादिना प्रथमखण्डशेषेण **'यो वै रुद्रस्य भगवान् भूर्भुवस्वः यश्च ब्रह्मे**'त्यादिना द्वितीयखण्डेन च शिवस्य सर्वान्तर्यामितया सर्वशरीरकत्वप्रयुक्तं सर्वशब्दवाच्यत्वं दर्शितं, तथा **'घृतात्परं मण्डमिवाऽतिसूक्ष्मं ज्ञात्वा शिवं सर्वभूतेषु गूढम्। एष देवो विश्वकर्मा महात्मा सदा जनानां हृदये सन्निविष्टः।', 'यो रुद्रो अग्नावप्सु य ओषधीषु यो रुद्रो विश्वा भुवना विवेश।', 'नमस्स्रोतस्याय च द्वीप्याय चे**'त्यादि ब्रह्मकर्मकाण्डगतसर्वश्रुतिषु च सर्वेषाञ्चेतनाऽचेतनानामन्तर्यामितया तान्यनुप्रविष्टोऽन्तर्यामित्वादष्टमूर्तिरन्तर्यामिब्राह्मणादिषु पञ्चभूतचन्द्रसूर्य सकलचेतनरूपाष्टमूर्तित्वप्रसिद्धेश्च सर्वशरीरकः **'इमा रुद्राय स्थिरधन्वने गिरः'** इति श्रुतेश्च

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तथा सर्वश्रुति सामरस्यविचारे सर्वेषां चिदचिद्वस्तूनामन्तर्यामितयाऽनुप्रविष्टः सर्वशरीरः सर्वशब्दवाच्यः परमेश्वरश्शिव इति विज्ञायते। अतः काशकृत्स्नमतमेव श्रुतिसूत्रमहाभियुक्तसम्मतमिति समञ्जसम्।

।। इति वाक्यान्वयाधिकरणम् ।। ३७

***

सर्वशब्दवाच्यश्च शिव एवेत्यवधार्यते। तस्मात्काशकृत्स्नमतमेव वेदसम्मतमित्युपसंहरति - **अत** इति। **श्रुतिसूत्रे**ति। श्रुतिसूत्राण्युदाहृतानि महाभियुक्तसूक्तयः स्मृतिपुराणानि तेषु मानवधर्मशास्त्रोपसंहारे **'प्रशासितारं सर्वेषामणीयांसमणोरपि। रुक्माभं स्वप्नधीगम्यं विद्यात्तु पुरुषं परमि'**ति सर्वेषां नियन्तारं पुरुषं प्रस्तुत्य एनमेके वदन्त्यग्निम्मरुतोऽन्ये प्रजापतिम्। **'इन्द्रमेके परे प्राणमपरे ब्रह्मशाश्वतमि'**ति तेषु तेषु वेदभागेषु तस्याग्न्यादिशब्दैर्व्यवहारमुपन्यस्य सर्वेषां तेषामविरोधसिद्ध्यर्थ**'मेष सर्वाणि भूतानि पञ्चभिर्व्याप्यमूर्तिभिः जन्मवृद्धिक्षयैर्नित्यं संसारयति चक्रवदि'**ति श्लोकेन तस्य सर्वनियन्तृत्वं राज्ञः प्रजानियन्तृत्वमिव ताटस्थ्येन स्थितस्य न भवति, किन्तु जीववर्गस्य स्वस्वशरीरनियन्तृत्वमिव नियम्यानि व्याप्यस्थितस्येति वर्णितम्। तेन सर्वेषां तच्छरीरत्वसूचनात्तस्य स्वशरीरभूताऽग्न्यादिशब्द-वाच्यत्वमुपपादितम्। शिवस्याग्न्यादिशब्देन व्यवहारस्तावत् **'अग्निं पुरातनयित्नोरचित्तात्।'**, **'रुद्रो वा एष यदग्निः'** इत्यादिश्रुतिषु प्रसिद्धः। इन्द्रशब्देन व्यवहारः अथर्वशिरसि ईशाननामनिर्वचनान्तरपठिते **'अभित्वा शूर नोनुम'** इति मन्त्रे प्रसिद्धः। पञ्चभिर्व्याप्यमूर्तिभिरित्यनेन वियदादिभूतरूपाः शिवस्याष्टमूर्त्यन्त-र्गतास्तदभिमानिनस्सद्योजातादिपञ्चब्रह्मरूपा वा मूर्तयो विवक्षिताः।

ननु - मानवधर्मशास्त्रोपक्रमे **'आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्। अप्रतर्क्यमनिर्देश्यं प्रसुप्तमिव सर्वतः। ततस्स्वयम्भूर्भगवानव्यक्तो व्यञ्जयन्निव। महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः। अभिध्याय शरीरात्स्वात्सिसृक्षुस्सकलाः प्रजाः। अप एव ससर्जादौ तासु वीर्यमपासृजत्। तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्। तस्माज्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः'** इत्युक्त्वा **'आपो नारा इति प्रोक्ता आपो वै नरसूनवः। ता यदस्याऽयनं पूर्वं तेन नारायणस्स्मृतः।।'** इत्यादिश्लोके पितामहस्यापि स्रष्टरि जगत्कारणे पुरुषे नारायणनामनिर्वचनेन नारायणस्यैव जगत्कारणत्वमाविष्कृतमिति-चेदुच्यते। **'ततस्स्वयम्भूर्भगवानि'**त्यादिना पितामहस्य स्रष्टृत्वेन प्रतिपाद्यमानस्य नारायणस्य **'प्रादुरासीत्तमोनुद'** इति तमःप्रेरकान्मायाधिष्ठातुः परमेश्वरात् ततश्शब्दोदिते प्रलयानन्तरकाले प्रथमं प्रादुर्भावोक्त्या परमशिवस्यैव सर्वकारणत्वमनेन सिद्धम्।

तमोनुद इति हि क्विप्प्रत्ययेन पञ्चम्यन्तम्। प्रादुरासीदित्युक्ते कस्मादित्याकाङ्क्षानुरोधात्। न त्विगुपधलक्षणकप्रत्ययेन प्रथमान्तं प्रादुर्भवितृविशेषणम्। पश्चात्प्रादुर्भवतः पूर्वसिद्धतमोधिष्ठातृत्वायोगात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ततश्च मानवधर्मशास्त्रमुपक्रमोपसंहाराभ्यां परमेश्वरमेव जगतः कारणमावेदयतीति सिद्धम्। तथा - कात्यायनगृह्यसूत्रे नदीमुत्तरिष्यन्नभिमन्त्रयते **'नमो रुद्रायाऽप्सु पदे स्वस्तिमासम्पादये'**ति वनस्पतिमारोक्ष्यन्नभिमन्त्रयते - **'नमो रुद्राय वनस्पतिपदे स्वस्तिमासम्पादये'**त्यादिना नदीतरुगिरिचतुष्पथाद्याक्रमणेषु तदधिष्ठातृत्वेन तत्र तत्र सन्निहितस्य रुद्रस्य नमस्कारमन्त्रान्विधायैवमन्यत्राऽपि **नमो रुद्राये**त्येव ब्रूयादित्यन्याक्रमणेष्वपि सामान्यतस्तन्नमस्कारमन्त्रं विधाय **रुद्रो ह्येवैतत्सर्वमि**ति तदनन्तरवाक्येन रुद्रस्य सर्वाधिष्ठातृत्वे **सर्वो वै रुद्र** इति श्रुतिः प्रमाणत्वेन स्मारिता। तेन **'सर्वो वै रुद्रः।', 'सर्वं खल्विदं ब्रह्मे'**त्यादिसर्वपदसामानाधिकरण्यं विशिष्य तत्तद्वाचिकपदसामानाधिकरण्यञ्च सर्वाधिष्ठातृत्वप्रयुक्त सर्वशरीरकत्वकृतमिति दर्शितं भवति। आश्वलायनसूत्रे शिवं प्रस्तुत्य **'सर्वाणि ह वा एतस्य नामधेयानि भवन्ती'**ति साक्षादेव सर्वेषां नाम्नां तत्र पर्यवसानं स्थापितम्।

अत्र यद्यपि श्रीभाष्यकारैरपि नारायणस्य सर्वान्तर्यामित्वप्रतिपादनद्वारा सर्वशब्दवाच्यत्वं सिसाधयिषितं तथाऽपि प्रबलश्रुत्याद्यानुकूल्यविरहात्सर्वभूतान्तरात्मेत्यादि सौबालवाक्येनैव कार्तार्थ्यं सम्भावितम्। तथाऽपि सुबालोपनिषदः पाञ्चरात्रतन्त्रानुग्राहकत्वात्पूर्वोदाहृतहुश्रुतिविरोधेन विप्रतिषिद्धधर्माणां समवाये **भूयसांस्यात्स्वधर्मत्वमि**ति न्यायेन बाधितत्वाच्च न तया परेषामिष्टं सिद्ध्यतीति दिक्।

卐 卐 卐

अथ यदत्र शुद्धाद्वैतिनोऽपि - **न वारे पत्युः कामाये**त्यादिना जीवात्मानमनूद्य **आत्मा वा अरे द्रष्टव्यः** इति तस्यैव द्रष्टव्यत्वविधानाज्जीवब्रह्मणोरभेदस्सिद्ध इति **अवस्थितेरिति काशकृत्स्न** इति सूत्रस्य **अस्यैव परमात्मनो विज्ञानात्मभावेनाऽवस्थानादि**त्यर्थ इति च वदन्ति - तदसङ्गतम्। **भेदव्यपदेशादि**ति, **अर्थान्तरव्यपदेशादि**ति **सुषुप्त्युत्क्रान्त्योर्भेदेन** इति च, जीवब्रह्मणोर्भेदस्य बहुसूत्रनिर्धारितत्वेन, प्रकृते अभेदरूपार्थग्रहणस्य तद्विरुद्धत्वात्। अत्र यद्यपि न्यायरक्षामणौ **अवस्थितेरिति काशकृत्स्नः** रज्जोरेव भुजङ्गरूपेणेव व्याधकुलसंवर्धितस्य राजपुत्रस्यैव व्याधभावेनेव च परमात्मन एव जीवभावेनाऽवस्थितेरित्यारभ्य केचित्तु अत्र अवस्थितेरितिपदस्य **य आत्मनि तिष्ठन्नि**ति श्रुत्युक्तायाञ्जीवात्मनि परमात्मनि स्थिता स्वारस्यं मन्यमानाः परिदृश्यमाने शरीरे जीवात्मन इव जीवात्मनि परमात्मन आत्मतयाऽवस्थितेः जीवशब्देन परमात्माभिधानमिति सूत्रार्थं वर्णयन्ति, अत्र विपरीतमपि वक्तुं शक्यम्। अस्मिन्नर्थे अवस्थितेरिति पदस्य स्वारस्यं नास्तीति तथाहि, स्थितेरित्येव सूत्रणीयम्। **य आत्मनि तिष्ठन्नि**ति मूलश्रुत्यनुरोधाल्लाघवाच्च स्थानादिव्यपदेशादित्यत्र अवोपसर्गाभावाच्च। तस्मादिहाऽवोपसर्गासत्त्वात् ततोऽन्य एव कश्चिदर्थो विवक्षितः। परमात्मन एव जीवात्मभावेनाऽवस्थानादित्येवंरूपः इत्युक्तमितिचेदुच्यते - निपातानां द्योतकतया धात्वर्थातिरिक्तार्थप्रदत्वाभावादवस्थितिपदं स्थितिपदसमानार्थकमेव। अथाऽत्र, यदिदमवोपसर्गमवलम्ब्य विपरीतार्थग्रहणम्परेषां तदसम्मतमेव सुतरां सूत्रकर्तुः यद्यभेद एव तस्येष्येत

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ प्रकृत्यधिकरणम् ३८

पूर्वं 'जन्माद्यस्य यतः' इति द्वितीयाधिकरणे 'यतो वा इमानि भूतानि' पञ्चमीश्रुत्युदाहरणेन परमेश्वरस्य जगदुपादानत्वं सामान्येन निरूपितम्। तद्विशेषतस्समर्थयितुमिदमधिकरणमारभ्यते -

प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ।।१-४-२३।।

'तस्माद्वा एतस्मादात्मन आकाशस्सम्भूतः।', 'द्यावा भूमी जनयन्। देव एकः' इत्यादिवाक्यान्यस्य विषयः।

तर्हि अवस्थितेरिति न सूत्रयेत्। स्थितेरिति सूत्रणेऽपि परमात्मन एव जीवभावेन स्थितेरित्यर्थलाभस्य तुल्यत्वात्। एवम्परपक्षेऽप्यवोपसर्गस्याऽनर्थकतया, तस्य यस्स्वाभिलषितार्थप्रदत्वभ्रमस्स निरस्त एव। तस्मादभेद एव यदि सूत्रकृत इष्येत, तर्हि अभेदादित्येव सूत्रणीयम्। रज्जोरेवेत्यध्याहारपरिहारेण लाघवादसन्दिग्धत्वाच्च। इह यद्यपि तत्त्वमस्यादीनि वचनानि जीवब्रह्मणोरभेदमापाततो बोधयन्ति, तथाऽपि तानि सर्वाण्यप्यन्तर्यामिब्राह्मणानुसारेण जीवब्रह्मणोश्शरीरशरीरिभावाभ्युपगमे तादात्म्यसम्बन्धेन सुसङ्गतान्येव भवन्ति। अथ यदि तत्त्वमस्यादिवाक्यैर्जीवब्रह्मणोरभेद एव मुख्यतयाऽभ्युपगम्येत, तर्हि **तमात्मस्थं येऽनुपश्यन्ति धीरा** इत्यादीनि, **द्वा सुपर्णा** इत्यादीनि चाऽनन्तानि श्रुतिवचनान्युपरुध्येरन्। सूत्रकारश्च अन्तर्याम्यधिकरणे **उभयेऽपि हि भेदेनैवमधीयत** इति ब्रुवन् जीवपरमात्मनोर्भेदं स्फुटमङ्गीचकार। एवं सर्वश्रुत्यनुगतत्वाज्जीवब्रह्मणोश्शरीरशरीरिभावस्यैव याथार्थ्याभ्युपगमेन पारमेश्वरसर्वात्मत्वरूप-महाविभूतिवर्णनपर एव वेदार्थः। अथ उपासनाङ्गाऽभेदस्यैव पारमार्थिकतामभ्युपेत्य भूयसीनां भेदश्रुतीनां श्रुतिसूत्राश्रुतस्वकल्पिताऽविद्याप्रत्युपस्थापितभेदपरत्वं प्रतिज्ञाय एकोऽहि प्रत्यगात्मा भवति, न द्वौ प्रत्यगात्मानौ सम्भवत इत्यन्तर्यामिब्राह्मणं तदधिकरणञ्च स्ववचनैरेव निराकृत्य, प्रसाध्यमानोऽर्थः कीदृग्वा सुधियां विदित एवेत्यलमधिकेन।

।। *इति वाक्यान्वयाधिकरणम्* ।। ३७

अथ प्रकृत्यधिकरणम् ३८

सङ्गतिं सूचयन्नुत्तराधिकरणमवतारयति - **पूर्वमिति**। **विशेषतस्समर्थयितुमिति**। परमेश्वरः केवलं कर्तैव, उपादानं तु प्रधानमिति सेश्वरसाङ्ख्यमतनिराकरणपूर्वकं ब्रह्मण उपादानत्वं समर्थयितुमित्यर्थः। प्रकृतपादारम्भे निरीश्वरसाङ्ख्यस्य निराकृतत्वेन सेश्वरसाङ्ख्यमतनिराकरणस्य प्रासङ्गिकी पादसङ्गति-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एतेषु प्रसिद्धमुभयकारणत्वं युक्तं नवेति सन्देहः। सन्देहश्च निमित्तस्य कुलालादेरुपादान-मृत्पिण्डादिभावादर्शनात्। उपादानस्य मृत्पिण्डादेर्निमित्तकुलालादिभावादर्शनात् कथमेतस्मिन् निमित्तत्वमुपादानत्वं च जगत्कार्यं प्रतीति।

पूर्वपक्षस्तु जगत्सृष्टौ निमित्तमेव नोपादानमिति। कुतः? असम्भवात्। नहि घटं निर्मिमाणः कुलालस्स्वयमेव मृत्पिण्डीभूय घटं करोति; पटं वा कुविन्दः किं वा कुलालीभूय मृत्पिण्डस्तं कर्तुमीहते तन्न सम्भवत्येव। अतो निमित्तभूतस्य ब्रह्मण उपादानत्वं न सम्भाव्यते, निष्प्रयोजनं च

रित्याशयः। अतीतवाक्यान्वयाधिकरणविषयवाक्ये **आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितमि**ति सर्वविज्ञानप्रतिज्ञायाश्श्रुतत्वेन तन्मूलभूतनिखिलजगदुपादानत्वस्याऽऽक्षेपादाक्षेपरूपा पूर्वाधिकरणसङ्गतिरिति भावः।

दृष्टान्ताभ्यां सन्देहमुपपादयति - **सन्देहश्चे**ति। पूर्वपक्षयति - **पूर्वपक्षस्त्वि**ति।

ननु - लोके घटादिकर्तृणां कुलालादीनां घटादीन्प्रत्युपादानत्वाभावेऽपि इह जगत्कर्तुः प्रतिज्ञादृष्टान्ताभ्यामुपपादितं जगदुपादानत्वं परित्यक्तुं न युज्यते। अथ यदि निमित्तोपादानयोर्लोके भेद एव दृश्यत इति तदनुरोधेन जगदुपादानत्वं परित्यज्येत। तर्हि लोके कतिपयकार्यकर्तुः कार्यान्तरकर्तृत्वादर्शनात्। **इदँ सर्वमसृजते**ति श्रुतिसिद्धं सर्वकर्तृत्वमपि हातव्यमेव स्यात्। तस्माल्लोकादृष्टमपि सर्वकर्तृत्वमिव श्रुतिप्रामाण्यादेव जगदुपादानत्वमप्यवश्याङ्गीकरणीयमित्याशङ्क्याह - **अत** इति। कुलालस्येव निमित्तस्य ब्रह्मण उपादानत्वं न सम्भवति कर्मकर्तृभावविरोधस्य तुल्यत्वात्। तस्मादुपादानत्वप्रतिपादकश्रुतयस्तु **प्रजापतिस्स्ववपामुदखिददि**ति वाक्यवदौपचारिकतया नेया इति भावः।

ननु - ऊर्णनाभावुपादानत्वदर्शनान्न हि दृष्टेऽनुपपन्नमिति न्यायेन न विद्यते कर्तुरुपादानत्वे विरोधः। एवञ्च **यथोर्णनाभिस्सृजते गृह्णते चे**तिश्रुत्या तन्तून् सृजत ऊर्णनाभेरेव तल्लयाधारत्वप्रतिपादनेन ब्रह्मणो जगदुपादानत्वसिद्ध्या छान्दोग्यादिगतप्रतिज्ञादृष्टान्तश्रुतयोऽपि मुख्यार्थपरा भवन्तीत्याशङ्क्याह - **निष्प्रयोजनञ्चे**ति। चकारेण निरालम्बनमित्यपि सिद्ध्यति। अत्रायं भावः। तल्लयाधारस्य तदुपादानत्वं नियतमित्यङ्गीकर्तुं न युक्तम्। मृदि घटाकारेण परिणममानायां तदाकारेण परिणममानस्य घटलयाधारस्याऽपि भूतलस्य तदुपादानत्वाभावेनोक्तनियमासिद्धेः ऊर्णनाभिदृष्टान्तोऽनुपपन्नः। तन्तुसृष्टौ तदीयलालाजलस्य जडस्यैवोपादानत्वेन चेतनस्योर्णनाभेरुपादानत्वाऽदर्शनात्। तस्मादत्र सिद्धान्तिनाऽपि **मायां तु प्रकृतिं विद्यादि**ति श्रुतिमनुसृत्य परिणामिन्या मायाया उपादानत्वमवशतोऽभ्युपगम्यते। ब्रह्मणोऽप्युपादानत्वकल्पनं निरर्थकमेव। मायायां जगदाकारेण परिणममानायां निर्विकारं ब्रह्माप्युपादानमितिवचनं निराधारम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

निमित्तस्योपादानत्वकल्पनम्। विनाऽपि तत्कल्पनं कार्यनिष्पत्तेः कुलालस्य मृत्पिण्डादन्यत्वेऽपि घटनिष्पत्तिदर्शनात्। अतो ब्रह्म निमित्तमेव नोपादानमिति।

अत्रोच्यते। जगतो निमित्तमुपादानं च ब्रह्मैव। 'स्तब्धोऽस्युत तमादेशमप्राक्ष्यो येनाऽश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्' इति श्रुत्या येनाऽदेष्ट्रा निमित्तभूतेन विज्ञातेन चिदचिद्रूपं सर्वं जगद्विज्ञातं भवतीत्यादेष्टृविज्ञानेन सर्वविज्ञानप्रतिज्ञानात्। यथैकेन मृत्पिण्डेन ज्ञातेन सर्वमिदं मृन्मयं विज्ञातं स्यादिति तदुपपादकमृत्पिण्डदृष्टान्तानुरोधाच्च ब्रह्मणो निमित्तमात्रत्वे तद्विज्ञानेन

कार्यकारेण परिणामित्वस्यैवोपादानत्वात्। घटादिकर्तुरुपादानत्वादर्शनेन व्यभिचाराच्च प्रतिज्ञादृष्टान्तादिश्रुतय उपचरितार्था एवेति। पूर्वपक्षमुपसंहरति - **अत** इति।

सूत्रगतं प्रकृतिपदमुपादानत्वपरं चकारो निमित्तत्वसमुच्चायक इत्याशयेन व्याचक्षाणस्सिद्धान्तं प्रतिजानीते - **उच्यत** इति। **प्रतिज्ञादृष्टान्ताऽनुपरोधादि**ति हेतुं विवृणोति - **तमादेशमि**त्यादिना। ननु सर्वविज्ञानप्रतिज्ञानं प्राधान्याभिप्रायम्। यथा प्रधानपुरुषाणां ज्ञानाज्ञानाभ्यां ग्रामो ज्ञातोऽज्ञात इति व्यपदिश्यते। ततस्तदौपचारिकमित्याशङ्क्याह - **ब्रह्मण** इति। ब्रह्मणो निमित्तत्वमात्रेऽभ्युपगते तद्विज्ञानेन सर्वप्रपञ्चविज्ञानं श्रूयमाणं गौणमेव स्यात्। तथैवाऽङ्गीक्रियत इति चेन्न, श्रुतिविरोधात्। तथाहि - एवं छांन्दोग्य उपाख्यायते। उद्दालको महर्षिस्स्वपुत्रं श्वेतकेतुं स्वनियोगाद् गुरुकुले स्थित्वा सर्वान्वेदानधीत्य प्रतिनिवृत्तं वैदुष्यगर्वेण स्तब्धमविनीतोऽयमप्राप्तब्रह्मविद्य इति निश्चित्य, तं ब्रह्मविदं च कर्तुं **सोम्य महामना अनूचानमानी स्तब्धोऽस्युत तमादेशमप्राक्ष्यो येनाऽश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमि**ति पृष्ट्वा, कथमेकेन श्रुतेन सर्वं श्रुतं मतं विज्ञातं च स्यात्कथमिदमाश्चर्यमुपपद्यते - इत्याशयवता श्वेतकेतुना पुनः पृष्टो मृत्पिण्डादिदृष्टान्तैस्तदुपपाद्य, **न वै नूनं भगवन्तस्त एतदवेदिषुर्यद्ध्येतदवेदिष्यन्कथं मे नाऽवक्ष्यन्नि**ति भगवांस्त्वमेव मे तद्ब्रवीत्विति तेन पुनः पृष्टस्तथा - **सोम्ये**ति प्रतिज्ञाय **सदेव सोम्येदमग्र आसीदि**त्यादिनोपदिदेशेति। अत्र किल यदि प्रतिज्ञा गौणी, तर्हि प्रधानज्ञानेन सर्वमन्यदप्रधानं विदितप्रायं भवतीत्यस्याऽर्थस्य लोकसिद्धत्वात्तदुपपत्तिं विदितवतः **कथं नु भगवस्स आदेश** इति प्रश्नस्य तदुत्तरवाक्ये मृद्घटादिदृष्टान्तैस्तदुपपादनस्याऽप्यसामञ्जस्यं स्यात्। तस्मात्तद्यथा मुख्यं भवति तथा समर्थनीयम्। **सदेव सोम्येदमि**त्यत्र सत्पदं सूक्ष्मचिदचिद्विशिष्टवस्तुपरम्। अन्यथा ब्रह्मातिरिक्तस्य जीववर्गस्य सत्त्वेन सदेवेत्यवधारणं विरुद्ध्येत। तस्मात्पृथग्भूतवस्त्वन्तरव्यवच्छेदकत्वेनैवाऽवधारणं समर्थनीयम्। एवञ्च तज्ज्ञाने तत्कार्यं सर्वमपि जगद्विषयो भवति। कार्यद्रव्यस्य कारणाऽनन्यत्वात् तत्र स्थौल्यापत्तिः परं न विषयी भवति। एवं सर्वविज्ञानप्रतिज्ञानमुपपद्यत इति। इत्थं प्रतिज्ञा मुख्यत्वोपपादनप्रकारमभिप्रेत्यैव भाष्ये हेतुविचारवाक्ये चिदचिद्विशिष्टं सर्वं जगदिति विशेषितम्। स्थूलचिदचित्प्रकारकब्रह्मात्मकं सर्वकार्यमिति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सकलप्रपंचविज्ञानं न संभवति। तथाहि, कुलाले ज्ञाते घटादिकार्यं न ज्ञायते, किं तु तदुपादान-मृत्पिण्डज्ञानेन अतो निमित्तस्य ब्रह्मण उपादानत्वे तत्सम्भवतीति ब्रह्मैवोपादानमपि। आदिश्यतेऽनेनेत्यादेश शब्देनाऽदेष्टृभूतं ब्रह्मोच्यते।

न तदर्थान्तरत्वमुपादानस्येति ज्ञापयितुं हेत्वन्तरमाह -

अभिध्योपदेशाच्च ।।१-४-२४।।

'तदैक्षत बहुस्यां प्रजायेय' इति निमित्तभूतस्येक्षितुस्सर्वज्ञस्य ब्रह्मण एव विचित्रजगदाकारेण बहुभवनसङ्कल्प उपदिश्यते। अतो निमित्तादनन्यदुपादानम्।

ननु, 'विश्वाधिको रुद्रो महर्षिः हिरण्यगर्भं पश्यत जायमानम्' इति विश्वोत्तीर्ण एव परमेश्वरो निमित्तभूतः स्वव्यतिरिक्तप्रकृतौ स्वसङ्कल्पेन जायमानं सकलदेवप्रथमं हिरण्यगर्भं

तस्याऽर्थः। एवं प्रतिज्ञानुपरोधाद् ब्रह्मोपादानमभ्युपगन्तव्यमित्युपपाद्य दृष्टान्तानुपरोधादपि तथैवाऽभ्युप-गन्तव्यमित्यमुमंशमुपपादयति - **तथाहीति**। अत्र ब्रह्मणि केवलनिमित्तत्वे तज्ज्ञानात्सकलज्ञानं न सम्भवति किन्तूपादानत्वे सत्येवेति भावः। नन्वेवं सौत्रहेतुना ब्रह्मण उपादानत्वसिद्धावपि सूत्रगतचकारेण समुच्चितं निमित्तत्वं न सिद्धमित्याशङ्क्य येनादेष्टा निमित्तभूतेनेति हेतुविवरणवाक्यगत यत्पदार्थविशेषणसूचितात्तमा-देशमिति श्रुतिगतप्रतिज्ञावाक्यगतादेशशब्देन विशेष्य निर्देशात्तत्सिद्धिमुपपादयन् तस्याऽर्थमाह - **आदिश्यतेऽनेनेति**। अयमादेशशब्दः प्रशासितृपरः। अकर्तरि च कारक इति विधानेन कर्त्रर्थे घञोऽप्राप्तेः आदिश्यते प्रशिष्यतेऽनेनेति कर्तुस्साधकतमत्वविवक्षयाऽयमादेशशब्दः करणार्थे व्युत्पन्न इति भावः। निमित्तोपादानयोरभेदे हेत्वन्तरप्रदर्शनपरेणोत्तरसूत्रेणाऽपि निर्देश आदेशशब्दस्य निमित्तपर्यवसायित्वं ज्ञापयतीत्यभिप्रेत्य उत्तरसूत्रमवतारयति - **इति ज्ञापयितुमाहेति**।

अतो निमित्तादनन्यदुपादानमिति। यद्विज्ञानेन सर्वविज्ञानं प्रतिज्ञातं तस्य प्रपञ्चेन निरूपणार्थं प्रवृत्ते मानाऽन्तराऽगोचरविषये **तदैक्षत बहुस्यां प्रजायेयेति** श्रुतावुपचारकल्पनाया अयुक्तत्वात्। ईक्षिता जगतो निमित्तं यः परमेश्वरस्स एव जगदुपादानमिति तदैक्षतेति। बहुभवनसङ्कल्पोपदेशात्सिद्ध्यति। प्रतिज्ञातार्थप्रपञ्चनपरवाक्यस्य निमित्तोपादानाभेदपरत्वव्यवस्थितौ प्रतिज्ञावाक्येप्युपादानत्वेन वर्ण्यमानस्य निमित्तत्वमप्यपेक्षणीयमित्यादेशशब्दस्याऽऽदेष्टृपरत्वमस्मादेव सिद्ध्यतीति च भावः।

उत्तरसूत्रव्यावर्त्यां शङ्कां दर्शयति - **स्वव्यतिरिक्तेति**। ननु मन्त्रे **जायमानमित्येव** श्रूयते। न तु स्वस्मिन्परस्मिन्वेति विशेषः कथं स्वव्यतिरिक्तप्रकृतिस्थान इति विवृतम्। उच्यते। तस्मिन्नेव मन्त्रे विश्वाधिकत्वेन वर्ण्यमानस्य विश्वाकारं न सम्भवति विश्वजीवसमष्टिरूपहिरण्यगर्भोपादानत्वेन च

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्त्रष्टुमनुग्रहदृष्ट्या पश्यतीति विज्ञायते। कथमस्य विश्वाकारत्वं प्रकृतिरूपत्वेन सम्भवति? 'मायान्तु प्रकृतिं विद्यात्' इति मायायाः प्रकृतित्वं श्रूयते। 'तस्माद्विराडजायत। विराजो अधिपूरुषः' इति पुरुषस्य प्रकृतित्वमाम्नायते। अतस्तयोरेव प्रकृतित्वेन जगदाकारत्वमुचितमित्यत आह -

साक्षाच्चोभयाम्नानात् ।।१-४-२५।।

साक्षात् प्रत्यक्षमेव वेदान्तभागेषु परमेश्वरस्य प्रकृतित्वेन जगदाकारत्वं, निमित्तत्वेन जगदुत्पादकत्वञ्च श्रूयते। तथाहि, 'विश्वाधिको रुद्रः' इत्यादिना यथा विश्वाधिकत्वमवगम्यते,

---

विश्वाकारत्वमवर्जनीयम्। श्रूयते हि श्रुत्यन्तरेषु मायापुरुषश्चेत्युपादानान्तरम्। अतस्तस्माज्जायमानत्वमेव श्रुत्यर्थ इत्यभिप्रेत्य तथा व्याख्यातम्। अत एव मन्त्रार्थकथने विश्वोत्तीर्णत्वेन विशेषितः उपादानान्तरसद्भावे च श्रुत्यन्तरोदाहरणं कृतम्।

प्रकृतित्वेनेति। नन्वन्तर्याम्यधिकरणे ह्यन्तर्यामिभावेन जगदाकारत्वं तत एव **'सर्वो वै रुद्र'** इत्यादिषु श्रुतिषु जगद्वाचिभिश्शब्दैः परमेश्वरस्य निर्देश इत्युक्तम्। इह कथं सर्वोपादानत्वेन जगदाकारत्वादित्युक्तमिति चेदुच्यते। उभयथाऽपि श्रौतनिर्देशस्योपपन्नतया न दोषः। अनयोः प्रकारयोर्येन केनाऽपि प्रकारेणोदाहृताधिकरणेषु प्राप्तशङ्कासमाधानस्य सम्भवात्। पूर्वोत्तरयोः प्रकारयोर्भेदेऽपि सूक्ष्मचिदचिद्विशिष्टः परमेश्वर उपादानं स्थूलचिदचिद्विशिष्टः कार्यमिति कारणशरीरेण वाऽचेतनात्मक-प्रपञ्चानुप्रवेशोऽन्तर्यामिभावेन वेत्युभयथाप्यविशिष्टे परमेश्वरस्य तदनुप्रवेशे प्रपञ्चवाचिनां शब्दानां नीलादिशब्दवदप्रधानभूतविशेषण वाचितया वा देवमनुष्यादिशब्दवच्छरीरवाचितया वा परमेश्वरपर्यन्तत्व-लाभादुभयथाऽपि श्रुतिषु प्रपञ्चवाचिभिश्शब्दैः परमेश्वरस्य निर्देश उपपद्यत एव। यथा कथमपि तदुपपत्तौ कथं जीववाचिशब्दैः परमेश्वराभिधानमिति पूर्वाधिकरणशङ्कासमाधानं सम्भवति। विश्वातीतस्य कथं विश्वाकारत्वमित्यन्तर्याम्यधिकरणे तदधिकरणकृतशङ्कासमाधानमपि विश्वान्तर्यामितया विश्वोपादानतया वा विश्ववाचकशब्दानां परमेश्वरे प्रयोगेण विश्वाकारत्वावसायाल्लभ्यते। विश्वोत्तीर्णत्वञ्च विश्वाकारत्वस्या-म्नातस्य त्यागायोगादिति। न चोभयोर्विरोधः। जीवेषु देवमनुष्यत्वाद्याकारत्वस्य देवमनुष्यादिशरीरेभ्योऽधिकत्वस्य च समावेशात्। हेयवस्त्वनुप्रवेशप्रयुक्तदोषप्रसङ्गशङ्का तु **न स्थानतोऽपी**त्यधिकरणे सूत्रकृतैव निराकरिष्यते। इह त्वेवमपि विरोधशङ्कासमाधानं सम्भवति। यथा बृहत्त्वमात्रेण प्रवृत्तिनिमित्तेन परमेश्वरे ब्रह्मशब्दस्य प्रवृत्तौ प्रकरणोपपदादिसङ्कोचकाभावात्। स्वरूपतो गुणतश्च बृहत्त्वं तस्य लभ्यत इति क्वचित्परमेश्वरस्य स्वरूपबृहत्वे प्रमाणत्वेनोपन्यस्तमेव ब्रह्मपदमन्यत्र तस्य गुणबृहत्त्वेऽपि प्रमाणत्वेनोपन्यस्यते। तथा तस्मिन् पृथक्प्रसिद्ध्या विशेषणभूतचेतनाचेतनात्मकप्रपञ्चान्तर्गतस्याऽसाधारणाकारेण प्रवृत्तिनिमित्तेन तस्मिन्प्रवर्तमानस्य **'सर्वो वै रुद्रः।'**, **'प्राञ्चोहं प्रत्यञ्चोहमि'**त्यादि तत्तद्वस्तुवाचकशब्दजातस्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तथा 'सर्वो वै रुद्रः' इत्यादिना प्रकृतित्वाद्विश्वरूपत्वमपि श्रूयते। शतरुद्रीये 'नमो हिरण्यबाहवे' इत्यारभ्य 'कुलुञ्चानां पतय' इत्यन्तेन विश्वाधिपत्यं, ततश्च 'नमः पर्ण्याय च पर्णशद्याय च' इत्येतत्पर्यन्तेन जगदाकारत्वं च परमेश्वरस्य श्रूयते। प्रदेशान्तरे च 'ब्रह्मवनं ब्रह्म स वृक्ष आसीत् ब्रह्माऽध्यतिष्ठत् भुवनानि धारयन्' इत्युभयश्रुतिः। अथर्वशिरसि च प्रथमद्वितीयखण्डयोर्जगदाकारत्वं तदुपरि *जगदीश्वरत्वं च। ततः प्रत्यक्षमुभयाम्नानात् जगच्च जगदीश्वरश्च प्रकृतिनिमित्तत्वेन परंब्रह्म परमेश्वरः शिव इति युक्तमेतत्।

तस्मिन्प्रवृत्तौ सङ्कोचकाभावाद्वाक्यान्तरानुसाराच्च सर्वोपादानत्वेन सर्वान्तर्यामितया सर्वशरीरत्वेन च स्वाऽपृथक्सिद्धप्रपञ्चाकारविशिष्टत्वं तस्य ततो लभ्यत इति प्रागन्तर्यामितया सर्वाकारतायां प्रमाणत्वेनोपन्यस्तमेवाऽत्र सर्वोपादानतया सर्वाकारतायां प्रमाणत्वेनोपन्यस्यत इति न कश्चिद्विरोध इति **साक्षाच्चोभयाम्नानादि**तीदं सूत्रं शङ्काद्वयपरिहारार्थत्वेनाऽवतारितम्। तत्र विश्वाधिकस्य कथं विश्वाकारत्वमिति शङ्का विश्वाधिकत्ववद्विश्वाकारस्याप्याम्नानादुभयोश्च विरोधाभावादिति परिहृता। ब्रह्मनिमित्तमेव न तूपादानमपि मायापुरुषयोरुपादानयोश्श्रवणादिति शङ्कासमाधानबलादेव निमित्तत्ववदुपादानत्वमपि ब्रह्मणोऽङ्गीकार्यम्। श्रुतिबलान्मायापुरुषयोरिव ब्रह्मणोप्युपादानत्वसम्भवादित्यभिप्रेत्य परिहरति - **ब्रह्मवनमि**ति। निमित्तोपादानाऽभेदाङ्गीकरणाय **किंग स्विद्वनं क उ स वृक्ष आसीत्। यतो द्यावा पृथिवी निष्टतक्षुः। मनीषिणो मनसा पृच्छते दुतम्। यदध्यतिष्ठद्भुवनानि धारयन्नि**ति मन्त्रेण श्रुतिरेव परमेश्वरेण कर्त्रा जगति स्रष्टव्ये तक्ष्णा रथे निर्मातव्ये वनाध्यक्ष इव किमुपादानात्कुतः प्रदेशादानीतम्। जगद्धारयित्रा च परमेश्वरेण नृत्यद्दारुपुत्रिकादिधारकेण सूत्रधारेण सूत्रमिव किं वाऽधिष्ठितमिति प्रश्नमवतारयामास। तत्र **द्यावा पृथिवी** - इत्यनेन सर्वाणि भुवनान्युच्यन्ते। **अग्रे भुवनानि धारयन्नि**ति श्रवणात्। भुवनग्रहणञ्च तनुभुवनभोगोपकरणभोक्तृणां सर्वेषामप्युपलक्षणम्। एकस्मिन्नेव परमेश्वरे निष्टतक्षुरिति छान्दसं बहुवचनम्। अनन्तरमन्त्रेण अस्य प्रश्नस्योत्तरमुच्यते। **ब्रह्मवनं ब्रह्मा स वृक्ष आसीत्।, यतो द्यावा पृथिवीनिष्टतक्षुः। मनीषिणो मनसा विब्रवीमिवः ब्रह्माध्य तिष्ठद्भुवनानि धारयन्नि**ति। ब्रह्मैव जगत्कर्तृभूतमुपादानं तदधिकरणञ्च। जगद्धारणे च सूत्रवत्तदेवाऽधिष्ठेयमिति मन्त्रार्थः। **अथर्वशिरसी**ति। तत्र प्रथमद्वितीयखण्डयोः ब्रह्माहमित्यारभ्य विश्वाकारत्वं पञ्चमखण्डे **एको रुद्रो न द्वितीयाय तस्थु, य इमं लोकमीशत ईशनीयु**रित्यादौ विश्वेश्वरत्वञ्चोक्तम्। तस्मादथर्वशिरसि विश्वाधिकत्वविश्वाकारत्वोभयाम्नानञ्चास्तीत्येतेन शङ्काद्वयस्याऽपि समाधानं लभ्यत इत्यर्थः। अत्राऽथर्वश्रुत्युदाहरणमानन्दवल्ल्यादीनामप्युपलक्षणम्। आनन्दवल्ल्यां हि **इदँ सर्वमसृजत यदिदं किञ्चे**ति

---

* **जगदीश्वरत्वं चेति श्रूयत इति शेषः।**

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

किञ्च प्रमाणान्तरमस्तीत्याह -

आत्मकृतेः ।।१-४-२६।।

'तदात्मानं स्वयमकुरुत' इति स्वस्यैव जगदाकारत्वेन कृतिरवगम्यते परमेश्वरस्य। अतः स एवोपादानं निमित्तं च।

नन्वज्ञानविकारास्पदहेयप्रपञ्चरूपेण प्रकृतिभावेन कथं वर्तते निरस्तसमस्तदोषलवकलङ्को निस्सीममङ्गलगुणरत्नाकरो निरङ्कुशनित्यसिद्धवैभवः प्रपञ्चातीतः परमशिव इत्यत आह -

परिणामात् ।।१-४-२७।।

नित्यशुद्धानन्दस्य निरतिशयमङ्गलस्वभावस्याऽपि निमित्तस्य परमशिवस्य प्रकृतित्वेन जगदाकारत्वं युक्तमेव, चिदचिदाकारेण परिणामात्। हन्त, कारणरूपविकारो हि परिणामः। पूर्वरूपपरित्यागेन रूपान्तरापत्तिः परिणाम इति कथं परमेश्वरोऽनर्थधर्मात्परिभूत इतिचेत्सत्यम्, यथा निमित्तस्य प्रकृतित्वेऽपि न विकारादिस्पर्शः तथा परिणामस्संभवति। कोऽयमपूर्वः परिणामः कुतूहलिनो वयं तच्छ्रवणे विविच्यतामिति - चेच्छृणु, विवेचयामः। 'यदा तमस्तन्न दिवा न रात्रिर्न

कर्तृत्वम् **आत्मन आकाशस्सम्भूत** इत्युपादानत्वञ्चाम्नातम्। पूर्वसूत्रयोः विषयैः प्रतिज्ञादृष्टान्ताऽभिध्योपदेशैः शिवस्य निमित्तोपादानत्वद्वयमाक्षेपतस्सिद्ध्यति। ब्रह्मवनमित्यादिभिस्तु श्रुतित एवेत्यभिप्रेत्य साक्षादिति विशेषितम्।

सूत्रान्तरमवतारयति - **किञ्चेति**।

सर्वज्ञस्य निर्विकारस्य निरतिशयपुरुषार्थरूपस्य परमस्वतन्त्रस्य शिवस्य किञ्चिज्ज्ञत्वसङ्कोच-विकासादिविकारदुःखद्वेषभयादिकलुषितपरतन्त्रैकस्वभावचित्प्रपञ्चरूपेण विविधविकारास्पददुःखस्वभाव-संसारपाशात्मकाचित्प्रपञ्चरूपेण च परिणामरूपं जगदुपादानत्वं न सम्भवतीति शङ्कोत्तरत्वेनोत्तर-सूत्रमवतारयति - **नन्विति**।

ननु - परिणामसाम्भवशङ्कायां परिणामादित्येतदेव कथमुत्तरं स्यादिति शङ्कते - **हन्तेति**। **परिणामादिति** सूत्रस्य निर्विकारत्वाद्यविरोधिपरिणामविशेषसम्भवादित्यर्थमभिप्रेत्य परिहरति - **सत्यमिति**। निर्विकारत्वविरोधिविकारवत्त्वं रूपं परिणामित्वं न सम्भवतीति शङ्कते - **कोऽयमिति**। तत्सम्भवमुपपादयितुं शङ्कते - **कोऽयमिति**। तत्सम्भवमुपपादयितुं प्रतिजानीते - **विवेचयाम** इति। अत्राऽयम्भावः -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सन्न चाऽसच्छिव एव केवलः तदक्षरं तत् सवितुर्वरेण्यं प्रज्ञा च तस्मात् प्रसृता पुराणी' इति यस्मिन्काले विगतचन्द्रसूर्यादितेजस्कतया दिवारात्रिविभागशून्यं, नामरूपविशेषराहित्येन स्थूलसूक्ष्मचेतनाचेतनसदसद्व्यवस्थारहितं सर्वमिदं तमोभूतमवर्तत, तदा शिव एवाऽद्वितीयः केवल स्वाविभागापन्न चिदचिच्छक्तिः स्वप्रकाशः परिशिष्टोऽभूत्।

तदक्षरं तदेव तदानीं क्षररहितं नाशरहितं परं वस्तु। तत्सवितुर्वरेण्यं तत् सवितुरादित्यस्य पूर्वं तेजःप्रदत्वेन वरेण्यम् अन्तर्वर्तितेजः तदपि तदेव। तस्मात्तादृशात् स्वविलीनस्वेतर निखिलचिदचित्प्रपञ्चाद्द्वितीयात् पुराणी नित्यसिद्धा तत्कालतमोऽपनोदिनी महास्फुरत्तारूपा परमाप्रज्ञा *ज्ञानशक्तिः प्रसृता प्रावर्तत। ततः, 'सोऽकामयत बहुस्याम्' इति नामरूपादिविभागरहितः

निष्कलं निष्क्रियं शान्तमित्यादिश्रुतिभिः परमेश्वरस्य निर्विकारत्वमिव प्रागुदाहृतश्रुतिभिः प्रपञ्चोपादानत्वमपि सिध्यति। न च तयोर्विरोध इति शङ्क्यम्। स्वयं साक्षान्निर्विकारोऽपि शिवः किञ्चिद्द्वारा विकारवत्त्वेनोपादानतया विरोधाभावात्। तदेवं निर्विकारस्याऽपि परमेश्वरस्य प्रकृतिद्वारा विकाराश्रयत्वं सम्भवतीति तस्य जगदुपादानत्वोपपादनं मनसि निधाय शिवस्य प्रकृतिद्वारकमुपादानत्वं प्रकृतित्वेनाऽभिमतायास्तदीयचिच्छक्तेः परिणामित्वे सम्भवे तदेव मृग्यमित्याशङ्कानिराकरणाय तत्र श्वेताश्वतरोपनिषदि श्रुतो मन्त्रः प्रमाणमित्याशयेन तन्मन्त्रमुदाहृत्य तस्याऽर्थमाह - **यदा तम** इति। महास्फुरत्तारूपा सकलप्रपञ्चानुगतस्फुरणरूपेत्यर्थः। अत एव तत्कालतमोपनोदिनी तस्मिन्काले प्रलयारम्भादारभ्य सुषुप्ताविव जीवानां प्रपञ्चास्फुरण रूपं यत्तमोऽनुवृत्तं तस्याऽपनोदिनीत्यर्थः। **ज्ञानशक्तिः प्रसृते**ति। प्रलयदशायां शिवेनाऽविभागापन्नतया स्थिता पराशक्तिः ज्ञानशक्तिरूपेण प्रवृत्तेत्यर्थः। अनेन मन्त्रे शक्तेः प्रसृतेत्युक्तिः तस्याः परिणामित्वे प्रमाणमिति दर्शितं भवति। एवं शक्तेः परिणामित्वे सम्भाविते सति शरीरस्य परिणामित्वाच्छरीरविशिष्टस्य **कृशोऽहं पुष्टः स्यामि**ति सङ्कल्प इव सूक्ष्मचिदचित्प्रपञ्चरूपापन्नचिच्छक्तिविशिष्टस्य परमेश्वरस्य संविभक्तनामरूपचिदचित्प्रपञ्चापन्नचिच्छक्ति-शरीरको भवेयमित्येवंभूतः **सोऽकामयते**त्यादिश्रुत्युक्तः बहुभवनसङ्कल्प **इदँ सर्वमसृजते**त्यादि-श्रुत्युक्तस्संविभक्तनामरूपस्थूलप्रपञ्चसर्गः **तस्माद्धे**त्यादिश्रुत्युक्तः सृष्टप्रपञ्चानुप्रवेशः, **तदनुप्रविश्ये**त्यादिश्रुत्युक्तः प्रविष्टचेतनाचेतनप्रपञ्चरूपापन्नचिच्छक्तिशरीरकतया प्राग्वर्णितरूपशिवस्य बहुधापरिणामः पुरुषस्य बालत्वयुवत्ववत्प्रपञ्चशरीरिणस्तस्य कारणत्वं कार्यत्वञ्च बालयुवपुरुषानन्यत्ववत्प्रतिज्ञादृष्टान्तसिद्धं कार्यकारणानन्यत्वञ्चेति सर्वमिदमुपपद्यत इत्याह - **ततः सोकामायते**त्यादिना।

*** ज्ञानशक्तिः प्रसृतेति प्रलयदशायां शिवेनाविभागापन्नतया स्थिता पराशक्तिः ज्ञानशक्तिरूपेण प्रसृतेत्यर्थः। इयमेव प्रसरणक्तिः शक्तेः परिणामित्वे प्रमाणमिति तत्त्वं, मायाशब्दश्च ज्ञानपर्याय इति वैदिकनिघंटौ।**

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सूक्ष्मचिदचिद्वस्तुशरीरको कारणावस्थः परमेश्वरः संविभक्तनामरूपचिदचिद्वस्तुशरीरको भवेयमिति सङ्कल्पमकरोत्। ततश्च, 'इदं सर्वमसृजत यदिदं किञ्च' इति स्वशरीरभूतं सूक्ष्मं चिदचिद्वस्तु स्वस्माद्विभज्य 'तत् सृष्ट्वा तदेवानुप्राविशत्' इति स्वतो विभक्ते चिदचिद्वस्तुनि स्वयमात्मतया प्रविश्य 'सच्च त्यच्चाऽभवत्' इति नानासदसत्प्रपञ्चरूपेण बहुधा परिणतोऽभवदिति पुरुषस्य बालत्वयुवत्वादिवत् ब्रह्मणो जगच्छरीरिणः कारणत्वं कार्यत्वञ्च

मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम्।
तस्याऽवयवभूतेन व्याप्तं सर्वमिदं जगत्।।

इति श्रवणात् *मायायास्सकलप्रकृतित्वं तद्विशिष्टत्वं महेश्वरस्य तदवयवभूतेनांऽशभूतेन

ननु सर्वमिदमुपपद्यते यदि **'प्रज्ञा च तस्मादि'**ति श्रुतौ परिणामित्वेन प्रसिद्धा शैवी चिच्छक्तिः प्रपञ्चस्य प्रकृतिर्भवेत्। तत्र प्रमाणं वक्तव्यम्। **'यच्च किञ्चिज्जगत्यस्मिन् दृश्यते श्रूयतेऽपि वा। अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणस्स्थितः।।'** इति नारायणस्याऽन्तर्बहिश्च जगद्व्याप्तिश्रुत्या जगदुपादानत्वमवसीयते। **'तस्माद्विराडजायते'**त्यादिमन्त्रेषु साक्षाच्च तस्य तदाम्नायते। तद्विरोधश्च परिहरणीयः। नारायणस्य शिवशक्त्यंशत्वात्तद्द्वारा तस्याः प्रपञ्चप्रकृतित्वमिति न विरोध इति चेत्तर्हि तत्र प्रमाणं वाच्यमित्याशङ्कायां तत्रोभयप्रमाणत्वमभिप्रेत्य श्वेताश्वतरमन्त्रमुदाहृत्य तस्य तात्पर्यमाह - **मायान्त्विति**। वैदिकनिघण्टौ ज्ञानपर्यायेषु पठितेन मायाशब्देनाऽत्र शैवी चिच्छक्तिरभिधीयते।

ननु **'छन्दांसि यज्ञाः क्रतवो व्रतानि भूतं भव्यं यच्च वेदा वदन्ति। तस्मान्मायी सृज्यते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः।।'** इति पूर्वस्मिन्मन्त्रे मायाया जीवं प्रति निरोधकत्वरूपं

---

*मायायास्सकलप्रकृतित्वमिति,

यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणस्स्थितः।।

इति नारायणस्य तच्छ्रवणस्तु शक्त्यंशत्वादुपपन्नं, अत एव मायां तु प्रकृतिं विद्यादित्यत्र तस्यावयवभूतेन व्याप्तं सर्वमिदं जगदत्युत्तरार्थेन शक्त्यंशस्य जगद्व्यापकत्वमुक्तम्।

येन सर्वमिदं जगद्व्याप्तं स तस्यावयवभूत इति नारायणस्य मायांशत्वविधायकत्वमेवेदं वाक्यमिति दीक्षितचरणैर्दीपिकायां विस्तृतम्, अत एव, मम योनिरप्स्वन्तस्समुद्रे - इति बह्वृचि श्रुतौ देव्याः समुद्रमध्यवर्तित्वमाम्नायते, आहुश्चाऽभियुक्ताः -

योऽयं चकास्ति भगणार्णवरत्नमिंदुः, यो यस्सुरामरगुरुः पुरुषः पुराणः।
यद्वा ममार्धमिदमन्धकसूदनस्य, देवि त्वमेव तदिति प्रतिपादयन्ति।। इति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

बन्धहेतुत्वमुक्तम्। सैव **'मायान्तु प्रकृतिं विद्यादि'**त्यत्राऽपि परामृश्यते। सा कथं सर्वानुग्राहकत्वेन प्रसिद्धा शैवी चिच्छक्तिस्स्यात्। स्यादेव। जीवानां जीवत्वापादकस्य सकलसंसारनिदानस्य मलावरणस्य रोधशक्त्याख्यस्य पाशत्वव्यपदेशस्य शिवागमेषु तस्यां प्रसिद्धत्वात्। यदाहुः **'तासां माहेश्वरीशक्तिस्सर्वानुग्राहिका परम्। परानुवर्तनादेव पाश इत्युपचर्यते'** इति। अत एवाऽजामन्त्रे भजनीयाया अपि तस्यास्स्वेन रूपेण हातव्यत्वमुक्तम् - **'जहात्येनां भुक्तभोगामजोऽन्यः'** इति। कूर्मपुराणे च **'कैषा भगवती देवी शङ्करार्धशरीरिणी। शिवा सती हैमवती यथावद् ब्रूहि पृच्छतामि'**ति प्रश्नोत्तरतया **'तस्य सर्वजगत्सूतिश्शक्तिर्मायेति विश्रुता। तयेदं भ्रामयेदीशो मायावी पुरुषोत्तमः। सैषा माहेश्वरी शक्तिस्सर्वाकारा सनातनी। सैवरूपं महेशस्य सर्वदा सम्प्रकाशयेत्। सर्वशक्त्यात्मिका माया दुर्निवारा दुरत्यया।।'** इत्यादिवचनजातं दृश्यते। या **'मायया सन्निरुद्धः'** इति पूर्वमन्त्रे प्रकृता, तां मायामेव प्रकृतिं प्रपञ्चाकारेण परिणामिनीं विद्यात्। परमेश्वरं मायिनमेव तथा तथा परिणममानमायाधिष्ठातारमेव विद्यात्। न तु साक्षात्स्वयंपरिणामिनीमिति पूर्वार्थस्यार्थः। **'तस्मान्मायी सृजते विश्वमेतदि'**ति पूर्वमन्त्रे पञ्चम्यन्तपदनिर्दिष्टमन्यदेव प्रकृतित्वेनोक्तम्। कथमस्मिन्मन्त्रे माया प्रकृतिरुच्यते। नैष दोषः। **'ऋचो अक्षरे परमे व्योमन्। यस्मिन्देवा अधिविश्वे निषेदुः। यस्तन्न वेद किमृचा करिष्यति। य इत्तद्विदुस्त इमे समासत'** इति। ततः पूर्वस्मिन्मन्त्रे **'यो वेद निहितं गुहायां परमे व्योमन्नि'**ति श्रुत्यन्तरेषु ब्रह्मणोभिन्नत्वेन प्रसिद्धं परमव्योमप्रकृतं तस्मादितिपदेन निर्दिश्यते।

ननु - तस्य प्रकृतित्वे कथमजामन्त्रादिषु शिवशक्तेः प्रकृतित्वमित्याशङ्कायां **'मायान्तु प्रकृतिं विद्यादि'**त्युक्तम्। या पूर्वमुक्ता परमव्योमशब्दिता प्रकृतिः तां मायां शिवशक्तिमेव विद्यात्। न तु ततोऽन्यत्परमव्योमेति न तद्विरोध इति भावः। मायायाः प्रकृतित्वेऽपि **'आत्मन आकाशस्सम्भूतः'** इत्यादिश्रुतिषु ब्रह्मणः प्रकृतित्वव्यवहारेण विरोध इत्याशङ्कायां तस्य प्रकृतित्वं मायाद्वारकं श्रुत्यन्तरेषूक्तम्। न तु साक्षादित्याशयेन **मायिनन्तु महेश्वरमि**ति शिवस्य मायाधिष्ठातृत्वमुक्तम्। एवं शिवपरमव्योममायाप्रकृतित्वव्यवहाराविरोधेऽपि **अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः** इत्यादिश्रुत्यन्तरे नारायणस्य प्रकृतित्वव्यवहारेण विरोधोऽस्तीत्याशङ्कायामुत्तरार्थम्। येन नारायणेन सर्वमिदं जगद्व्याप्तमिति श्रुत्यन्तरे प्रसिद्धम्। तेन मायाशब्दित परमव्योमांशभूतेनैवैतद्व्याप्तं न तु स्वतन्त्रेणेति तस्याऽर्थः। एवमुत्तरार्थं - **येन नारायणेन व्याप्तं जगदि**ति श्रुत्यन्तरे प्रसिद्धम्। तमनूद्य तस्य परमव्योमांशत्वविधायकं, न तु परमव्योमांशमनूद्य तस्य जगत्प्रकृतित्वविधायकम्। तदंशस्य कस्यचिज्जगदुपादानत्वे योग्यस्याऽनुवादार्हस्य कस्यचिदभावात्। नापि तदवयवस्य तदीयजगद्व्यापकत्वस्य च विधायकं, वाक्यभेदप्रसङ्गात्। अतो मन्त्रोऽयमुभयत्राप्युक्तार्थे प्रमाणं भवत्येवेति भावः। एवं नारायणस्य शिवशक्त्यंशत्वे **मम योनिरप्स्वन्तस्समुद्र** इत्यारम्भणी सूक्तवचनमपि प्रमाणमम्। स्वांशभूतस्य नारायणस्य समुद्रः योनिः स्थानमित्येवं परतायां हि मम योनिरितिवचनं समञ्जसं भवति। इदञ्च नारायणस्य शिवशक्त्यंशत्वं हरिवंशपारिजातसंहितायां पारिजातप्रार्थनार्थं भगवता निसृष्टार्थदूततया इन्द्रं प्रति प्रेषितेन नारदेन नानाविधोपायैः प्रार्थित इन्द्रः यदा

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पारिजातं न दातुमैच्छत्तदा - **य एको विश्वमध्यास्ते प्रधानं जगतो हरः। प्रकृत्यायं यं परं सर्वे क्षेत्रज्ञं वै विदुर्बुधाः। तस्याऽव्यक्तस्य यो व्यक्तो भागस्स च सवोद्भवः। तस्यात्मा प्रथमो देवो विष्णुस्सर्वत्र धीमतः। प्रकृत्याः प्रथमोभाग उमादेवीह शाश्वती। व्यक्तस्सर्वमयो विष्णुः स्त्रीसंज्ञो लोकभावनः। रुक्मिण्याद्याः स्त्रियस्तस्य व्यक्तत्वे प्रथमो गुणः। अव्यक्ता प्रकृतिर्देवी गुणी देवो महेश्वरः। न विशेषोस्ति रुद्रस्य विष्णोश्चामरसत्तम। गुणिनश्चाव्यवायाच्च सादरः प्रभृतो गुणः। नारायणो महातेजाः सर्वकृल्लोकभावनः। भोक्ता महेश्वरो देवः कर्ता विष्णुरधोक्षजः। ब्रह्मा देवगणाश्चान्ये पश्चात्सृष्टा महात्मना। महादेवेन देवेशाः प्रजापतिगणास्तथा।** एवं **पुराणपुरुषो विष्णुर्वेदेषु पठ्यते। अचिन्त्यश्चाप्रमेयश्च गुणेभ्यश्च परस्तथा।।** इति भगवद्वाक्यस्याऽवश्यपरिपालनीयत्वोपदेशनार्थे तस्य महिमातिशयं दर्शयता आविष्कृतम्। तत्रहि - **य एक** इति श्लोकेन शिवं प्रकृत्य **तस्याव्यक्तस्येति** श्लोकार्थे **प्रज्ञा च तस्मादिति** श्रुतिसिद्धम्, ततश्चिच्छक्त्युन्मेषं पुरस्कृत्य **तस्यात्मेति** तदुत्तरार्थेन विष्णोश्चिच्छत्त्यंशत्वमुक्तम्। एवं **प्रकृत्याः प्रथमो भाग** इति श्लोकेनाऽपि श्रुतम्। तत्र **स्त्रीसंज्ञ** इत्यस्य विष्णुरुमारूपतया स्त्रीत्वेन सम्यक्पुराणादिभिर्ज्ञायत इत्यर्थः। घञर्थे कं विधानं कर्तव्यमिति घञर्थे कर्मणि प्रत्ययः। इदं विष्णोरुमांशतया तद्रूपत्वं श्रीकूर्मपुराणे - **कैषा भगवती देवी शङ्करार्धशरीरिणी। शिवा सती हैमवती यथावद् ब्रूहि पृच्छतामिति** ऋषीणां प्रश्नमवतार्य तेषां **तद्वचनं श्रुत्वा ऋषीणां पुरुषोत्तमः। प्रत्युवाच माहायोगी ध्यात्वा स्वं परमं पदमिति**श्लोके तदानीमुपदेश्यत्वेनौचित्याद्ध्यानविषयतया प्राप्तायामुमायां **स्वं परमं पदमिति** विशेषणेनाविष्कृतम्। तत्रैव कृष्णतपश्चर्यानन्तरं शिवेन सह प्रत्यक्षीभूताया उमायाः कृष्णं प्रति **वत्स जाने तवाऽनन्तां निश्चलां सर्वदाऽच्युत। अनन्यामीश्वरे भक्तिमात्मन्यपि च केशव। त्वं हि नारायणस्साक्षात्सर्वात्मा पुरुषोत्तमः। प्रार्थितो दैवतैः पूर्वं सञ्जातो देवकीसुतः। पश्य त्वमात्मनात्मानममलं परमं पदम्। नाऽवयोर्विद्यते भेद ऐक्यं पश्यन्ति सूरयः।** इति वचनेनाऽपि स्फुटीकृतम्। एवमादिष्वपि वचनान्युदाहर्तव्यानि। एवं स्त्रीत्वेन पुराणादिप्रसिद्धस्य कथं रुक्मिण्याद्याः स्त्रिय इत्याशङ्कापरिहाराय **रुक्मिण्याद्या** इत्यर्थे शिवशक्तिरूपतया स्त्रीत्वेऽपि तस्य पुरुषरूपेण व्यक्तत्वे सति रुक्मिण्याद्याः स्त्रिय इत्येतदुपपन्नमिति भावः। प्रथमो गुण इति तासां प्रधानमहिषीत्वेन तदर्थं पारिजातप्रदानस्याऽवश्यकत्वज्ञापनाय प्रकृतोपयोगितयोक्तम्। **अव्यक्ताप्रकृतिरिति** श्लोकेन शक्तिशिवयोर्गुणगुणिभावेनाऽविशेषं प्रदर्श्य, शक्त्यंशत्वाद्विष्णोरपि शिवान्नास्ति विशेष इति समर्थितम्। एवं शिवशक्त्यंशत्वेन नारायणस्य तदुभयं गुणत्वं रुक्मिणीसत्यभामादिस्वशक्तिसहितस्यैव न तु केवलस्येति प्रकृतोपयोग्यर्थो **गुणिनश्चेति**श्लोकेन दर्शितः। **भोक्ता महेश्वर** इति श्लोकेन संहारपालनसृष्ट्यधिकृतानां गुणमूर्तीनामिन्द्रादीनाञ्च सृष्टेः प्रागेव चिच्छक्त्यंशभूतादिनारायणोन्मेषप्रदर्शनेन तस्य सर्वोत्तरत्वमाविष्कृतम्। उक्तस्य सर्वस्याऽप्यर्थस्य वेदमूलतया श्रद्धेयत्वमेव **पुराणपुरुष** इति श्लोकेन दर्शितम्। तदीयचिच्छक्तिशकलेनेत्यनेन **विश्वोत्तरोत्तरविचित्रमनोरथस्य यस्यैकशक्तिशकले सकलस्समाप्त** इति पुराणवचनार्थस्स्मारितः। भोक्तृत्वदशायां पुरुषसंज्ञिकेनेति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चिच्छक्तिशकलभूतेन भोक्तृत्वदशायां पुरुषसंज्ञकेन सकलजगद्व्याप्तिश्च अवगम्यते। यथा केवलात् शरीरात् लोमनखाद्युत्पत्तिर्न संभवति, आत्मनश्च तथा न केवलं मायाया जगदुत्पत्तिर्महेश्वराच्च किंतु मर्त्याच्छरीरिणः केशनखाद्युत्पत्तिवत् मायिनः परमेश्वरात् सकलचेतनाऽचेतनप्रकृतिः पुरुषोऽभिव्यक्तो भवति।

अनेन ब्रह्मादिसकलचिदचित्प्रपञ्चाधिष्ठातृत्वरूपस्वातन्त्र्यनिमित्ता नारायणस्य पुरुषसंज्ञेत्युक्तं भवति। एतदभिप्रायेणैवोक्तं नरसिंहपुराणे **सदैव वासुदेवोऽयं साक्षात्पुरुष उच्यते। स्त्रीप्रायमितरत्सर्वं जगद्ब्रह्मपुरस्सरमिति।**

सकलजगद्व्याप्तिश्चेति ननूदाहृतमन्त्रेण महेश्वरस्य मुक्तौ जीवस्य स्वप्रभाद्वारेणेव नारायणद्वारा सकलजगद्व्याप्तिर्नाऽवगम्यते, किन्तु नारायणस्यैव तदवयवभूतेनेति हि कर्तरि तृतीया। इति चेदुच्यते। नारायणस्य महेश्वरशक्त्यवयवत्वोक्तिसामर्थ्यात्तदीयाव्याप्तिरवयवद्वारा शिवस्यैव। यथा देवदत्तावयवभूत हस्तकर्तृकस्स्पर्शोऽवयवद्वारा देवदत्तस्यैव भवतीति श्रुतेस्तात्पर्यमवगम्यत इत्यभिप्रेत्य तथा व्याख्यातम्। इयांस्तु विशेषः। जीवस्य मुक्तौ प्रभयैव जगद्व्याप्तिश्शिवस्य तु स्वरूपेण प्रभया तदंशभूतेन नारायणेन चेति।

ननु चिच्छक्तेः परिणामित्वम् **प्रज्ञा च तस्मादि**तिश्रुत्या जगदुपादानत्वं **मायां त्वि**तिश्रुत्या चावगम्यते। ततोऽस्या एवोपादानत्वमस्तु किमपरिणामिस्वभावस्य शिवस्याऽपि पारिभाषिकोपादानत्वाश्रयणेनेत्याशङ्क्याऽऽह - **यथे**ति। शरीरात्मनोः परिणाम्यपरिणामिस्वभावत्वेऽपि केवलस्य शरीरस्य लोमनखाद्युपादानत्वं नास्ति किन्तु साऽऽत्मकस्यैव यथा; एवं परिणामिन्या अपि केवलायाश्चिच्छक्तेर्न जगदुपादानत्वं किन्तु शिवाश्रिताया एव। अतश्शरीरविशिष्टस्यात्मनोऽपि केशनखादाविव मायाविशिष्टस्य शिवस्याऽपि जगदुपादानत्वं न पारिभाषिकं किन्तु **यथा सतः पुरुषात्केशलोमानि तथाऽक्षरात्सम्भवतीह विश्वमि**ति सयुक्तिकश्रुतिसिद्धमिति भावः। दृष्टान्तदार्ष्टान्तिकवाक्ययोरात्मनः महेश्वराच्चेति केवलात्मनः केवलमहेश्वराच्च कार्योत्पत्त्यसम्भवप्रदर्शनं दृष्टान्तार्थम्।

ननु शरीरविशिष्टादात्मनः केशनखादेरिव मायाविशिष्टान्महेश्चराज्जगत उत्पत्तिरित्यङ्गीकारे तत्रैवोपादानत्वविश्रान्तिस्स्यात्। कथं पुरुषस्याप्युपादानकोटिप्रवेश इत्याशङ्क्याह - **मायिन** इति। सर्गाद्यकाले प्रथमोन्मिषितायाश्चिच्छक्तेस्सकाशादभिव्यक्ते पुरुषे तच्छरीरात्परमेश्वरादव्यक्तचतुर्मुखाद्युत्पत्तिरिति युक्तमस्याप्युपादानकोटिप्रवेश इति भावः। यद्यप्यव्यक्तं सूक्ष्मरूपेण प्रलयेप्यस्ति, तथापि यथा चतुर्मुखस्य ज्ञानविकासवत्त्वेन शरीरविशिष्टत्वेन च पुरुषादुत्पत्तिस्तथा अव्यक्तस्याऽपि **मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहमि**त्यादिवचनोक्तरीत्या कार्योन्मुख्यविशिष्टरूपेण तत उत्पत्तिरस्तीत्यभिप्रायेणाऽव्यक्तग्रहणं कृतम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तद्रूपादीश्वरादव्यक्तचतुर्मुखाद्युत्पत्तिः। तथा च श्रुतिरीश्वरस्य पुरुषरूपत्वमभिधत्ते, 'पुरुषो वै रुद्रः' इति। ततस्समुचितं चिदचिद्विशिष्टः परमेश्वरः कारणं कार्यञ्च तत्तदवस्थाविशेषादिति।

योनिश्च हि गीयते **।।१-४-२८।।**

साक्षात् परमेश्वर एव भूतयोनिरित्युच्यते 'उमासहायं परमेश्वरम्' इत्यारभ्य, 'भूतयोनिं समस्तसाक्षिं तमसः परस्तात्' इति समस्तसाक्षिणस्सर्वज्ञस्य, तमसः परस्य, विश्वोत्तीर्णस्य परमशक्त्युमया सहितस्य परमेश्वरस्यैव भूतयोनित्वं भूतप्रकृतित्वं च गीयते। ततश्चोपादानमपि निमित्तं परंब्रह्मैव।

।। इति प्रकृत्यधिकरणम् ।। ३८

***

परमेश्वरस्य पुरुषशरीरकत्वे श्रुतिमुदाहरति - **पुरुषो वै रुद्र** इति। सामानाधिकरण्यं पुरुषशरीरकत्वाऽभिप्रायमिति भावः। एवञ्च निर्विकारस्याऽपि परमेश्वरस्य जगदुपादानत्वं सर्वविज्ञानोपपादकं स्वयमेवोपादानत्वञ्चोपपन्नमित्युपसंहरति - **तत** इति।

ननु चिच्छक्त्यवस्थाविशेषरूपस्य पुरुषस्य जगदुपादानत्वाङ्गीकारे प्रतिज्ञादृष्टान्ताऽभिध्योपदेशसाक्षादुभयाम्नानात्मकृतयस्तद्विषयतया चिच्छक्तिविषयतया वा प्रामाण्यं लभन्ते। परिणामहेतुश्च समञ्जसो भवति निर्विकारसाक्षिरूपतया श्रुतिशतप्रतिपन्नस्य परमेश्वरस्य जगदुपादानतायां नैतानि प्रमाणानि भवितुमर्हन्तीत्याशङ्कानिराकरणार्थत्वेनेदं सूत्रं व्याचष्टे - **साक्षादिति**। **उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम्। ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तादिति** कैवल्योपनिषदि समस्तसाक्षित्वतमसः परत्वलिङ्गाभ्यां **स ब्रह्मा स शिवस्सेन्द्रस्सोक्षरः परमस्स्वराट्। स एव विष्णुस्स प्राणस्स कालोऽग्निस्स चन्द्रमाः।। स एव सर्वं यद्भूतं यच्च भव्यं सनातनम्। ध्यात्वा तं मृत्युमत्येति नाऽन्यः पन्था विमुक्तय।।** इति तद्वाक्यशेषे सकलप्रपञ्चशेषित्वमोक्षोपायसाक्षात्करणीयत्वलिङ्गाभ्याञ्चाऽवगमिते साक्षात्परब्रह्मणि परमशिव एव सकलकार्योपादानत्ववाचिभूतयोनिशब्दो दृश्यते। तस्मात्तस्योपादानत्वाऽभ्युपगम आवश्यक इति नोपादानत्वप्रापकाणां परब्रह्मपरश्रुत्यन्तराणामन्यत्र नयनक्लेशस्समाश्रयणीय इति भावः। अधिकरणमुपसंहरति - **ततश्चेति।** यन्निमित्तम्परब्रह्म तदेवोपादानमपीत्यर्थः।

।। इति प्रकृत्यधिकरणम् ।। ३८

***

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ सर्वव्याख्यानाधिकरणम् ३९

एतेन सर्वे व्याख्याताः व्याख्याताः ।।१-४-२९।।

'जन्माद्यस्य यतः' इत्यादिना एतदन्तेन वेदान्तवाक्यानां व्याख्यानेन ब्रह्मलिङ्गाभिधायिनो वेदान्तरूपाः कर्मकाण्डमध्यपातिनः पुरुषसूक्तशतरुद्रीयप्रभृतयो मन्त्रब्राह्मणभागा स्मृतीतिहासपुराणागमाभियुक्तसूक्तिविशेषाश्च सर्वे व्याख्याता इति। द्विरुक्तिरध्यायसमाप्त्यर्था। अत्र कर्मप्रकरणपठितानां पुरुषसूक्तशतरुद्रियादीनां स्मृतीतिहासपुराणादीनां च तात्पर्यलिङ्गसमन्वयेन ब्रह्मबोधकमस्ति न वेति संशयः। संशयबीजं प्रकरणभेदादिकम्।

अथ सर्वव्याख्यानाधिकरणम् ३९

एतेन योगः प्रत्युक्त इत्यादाविवैतेनेत्यस्याऽव्यवहितपूर्वाधिकरणन्यायमात्राति देशार्थत्वशङ्कामपाकरोति - **जन्माद्यस्य यत इत्यादिनैतदन्तेने**ति। पूर्वोत्तराधिकरणेषूदाहृतोदाहरिष्यमाणेभ्यो वेदान्तवाक्येभ्योऽन्यानि यानि ब्रह्मपराण्यनिर्णीतार्थानि वेदान्तवाक्यानि, तेषामेव परामर्शार्थस्सर्वशब्दो न भवति, किन्तु ये कर्मकाण्डे ब्रह्मप्रतिपादका मन्त्रब्राह्मणभागास्स्मृतिपुराणेतिहासास्सिद्धान्ततन्त्रादय आगमाः, योगशास्त्रादयोऽभियुक्तसूक्तिविशेषाश्च, तेषां सर्वेषामपि परामर्शार्थः। शास्त्रयोनिसूत्रे शास्त्रशब्दस्य ब्रह्मप्रतिपादकसकलशब्दज्ञानपरत्वादित्यभिप्रेत्याह - **कर्मकाण्डे**त्यादि।

द्विरुक्तिरिति। न च द्विरुक्तेर्नित्यवीप्सादाविव समाप्तावनुशासनं नास्तीति शङ्क्यम्। **न स पुनरावर्तते, न स पुनरावर्तत** इत्यादिश्रुतिषु, **मातेत्येके मातेत्येक** इत्यादिस्मृतिषु च द्विरुक्तेस्समाप्त्यर्थत्वावगमेनेहाऽपि तदर्थत्वावसायात्। प्रकरणभेदादिकमिति कर्मकाण्डमध्यपठितानां मन्त्रब्राह्मणानां पुरुषसूक्तादीनाञ्च प्रकरणभेदः पूर्वपक्षकोटिबीजमिति, तेषां स्मृतिपुराणादीनाञ्च, नानादेवताविषयं श्रुतिलिङ्गादिकमादिशब्देन गृह्यते। **पुरुषसूक्तादीनामि**ति। अत्रेदं बोध्यम्। पुरुषसूक्तं हि कर्मकाण्डमध्य एव पठ्यते। तस्मात्तस्य प्रकरणात्कर्माङ्गत्वमवगम्यते। अग्निचयनादिषु चेतनस्य हविरादिरूपेण विनियोगाभावात्पुरुषशब्दनिर्दिष्टदेवताविरहाच्च चेतनवाचिपुरुषशब्दसामर्थ्यरूपाल्लिङ्गात्कर्तृप्रकाशनद्वारा कर्माङ्गमेव भवितुमर्हति। न च तत्र **सहस्रशीर्षा पुरुषस्सहस्राक्षस्सहस्रपादि**त्यादिना श्रुतानां सहस्रशीर्षत्वादीनां चेतनेऽनुपपत्तिरिति शङ्क्यम्। तत्र सहस्रपदस्यापरिमितवाचित्वेनाऽनादाविह संसारे पर्यायेणाऽपरिमितशरीरपरिग्रहादपरिमितमूर्धादिमत्त्वसम्भवात्।

ननु **स भूमिं विश्वतोवृत्त्वे**तिश्रुतं सर्वभूमिव्यापकत्वं न सम्भवतीति चेन्न। तत्र तत्र जन्मनि नानाविधशरीरैस्सर्वभूमिव्याप्तेस्सम्भवात्। नापि सहस्रपदस्य व्यवस्थितसङ्ख्याविशेषपरत्वेन चेतनस्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कर्मप्रकरणगतानां पुरुषसूक्तादीनामनुष्ठातृजीवपरत्वमेव समीचीनं, न नित्यमुक्तब्रह्मविषयत्वं, प्रयोजनाभावात्। स्मृतिपुराणादीनामपि नैकार्थपरत्वमस्ति। यतस्तेषु कतिचित् ब्रह्माणं परंब्रह्मेत्याहुः, कतिचित् विष्णुं, कतिचित् रुद्रं, कतिचिच्चेन्द्रं, कतिचिच्छक्तिमेव, कतिचिदग्निं, कतिचित्सूर्यं, कतिचिदन्यम्। एवमनवस्था। अत एतेषां न ब्रह्मबोधकत्वमिति प्राप्ते ब्रूमः। पुरुषसूक्तादीनां ब्रह्मबोधकत्वमस्ति तल्लिङ्गदर्शनात्। 'तस्माद्विराडजायत।', 'आदित्यवर्णं तमसस्तु पारे।', 'तमेवं विद्वानमृत इह भवति' इति सकलकारणत्वतमःपरत्वामृतहेतुत्वादीनां परमेश्वरलिङ्गानामत्र संबन्धो दृश्यते। अत ईश्वर एवाऽत्र पुरुषशब्देन प्रतिपाद्यते। शतरुद्रीये च साक्षात्परमेश्वरस्य जगदाधिपत्यं

सहस्रशीर्षत्वादिकं न सङ्गच्छत इति शङ्क्यम्। तथाऽपि क्वचिज्जन्मनि विशेषभावेन सहस्रशीर्षत्वस्य क्वचन शक्रभावेन सहस्राक्षत्वस्य, कदाचिदादित्यभावेन सहस्रपात्त्वस्य च सम्भावितत्वात्। न च तत्र **पुरुषं महान्तमिति**श्रुतं महत्त्वं न सम्भवतीति वाच्यम्। यजमानस्याऽनादिकालप्रवृत्ताऽपरिमितशरीराऽनुस्यूततया कालानवच्छिन्नत्वेन तत्र महत्त्वस्याऽविरुद्धत्वात्। नाप्यादित्यवर्णमित्याम्नातमादित्यवर्णत्वं न घटत इति शङ्क्यम्। **अङ्गुष्ठमात्रो रवितुल्यरूपस्सङ्कल्पाहङ्कारसमन्वितो य** इति चेतने रवितुल्यरूपत्वस्य प्रसिद्धत्वात् इत्यभिप्रेत्याह - पुरुषसूक्तादीनामनुष्ठातृजीवपरत्वमेव समीचीनं, **नन्वित्यादिना**। **एवमनवस्थेति**। अव्यवस्थेत्यर्थः। लिङ्गदर्शनादित्युक्तमर्थं विवृणोति - **तस्मादिति**। अत्रेदमाकूतम्। **तस्माद्विराडजायत। विराजो अधिपुरुष** इत्यव्यक्तचतुर्मुखकारणत्वप्रतिपादनद्वारा सकलजगत्कारणत्वस्य प्रतिपादितत्वेन तस्य चेतनेऽनुपपन्नत्वात्। न चेदमारोपितमित्यभ्युपगन्तुं युक्तं, बाधकाऽभावात्। न च प्रकरणेन चतुर्मुखादिकारणत्वलिङ्गं बाध्यत इति शङ्क्यम्। लिङ्गस्य प्रबलत्वेन दुर्बलस्य प्रकरणस्य लिङ्गबाधकत्वाऽभावात्। किञ्च **तमसस्तु पार** इति श्रुत तमः पारवर्तित्वमपि जीवे न सम्भवति। न च श्रवणमननादिसाध्यन्तज्ञीवेऽपि सम्भवतीति शङ्क्यम्। अत्र हेत्वाक्षेपकल्पनाया गौरवदूषितत्वेन नित्यसिद्धस्यैव ग्राह्यत्वात्। अपि च **तमेवं विद्वानमृत इह भवती**त्याम्नातममृतहेतुत्वमपि जीवेऽसम्भवात् ब्रह्मलिङ्गतया परमेश्वरविषयमेव प्रतिपादयति इति। पुरुषसूक्तविषयसिद्धान्तमुपसंहरति - **अत ईश्वर एवाऽत्र पुरुषशब्देन प्रतिपाद्यत** इति।

नन्वेवमपि शतरुद्रीयस्य **नमस्ते रुद्र मन्यव** इत्यादिमन्त्रश्रुतरुद्रश्रुत्या प्रकरणप्राप्तमग्निपरत्वं वारयितुं न शक्यम्। **रुद्रो वा एष यदग्निरिति** श्रुत्यैव रुद्रशब्दस्याऽग्निपरत्वेन व्याख्यातत्वेन; **गौणं लाक्षणिकं वाऽपि वाक्यभेदेन वा पुनः। वेदोयमाश्रयत्यर्थं को नु तं प्रतिकूलयेत्** इति तन्त्रवार्तिकोक्तन्यायेन साक्षाद्वेदकृतव्याख्यानस्य श्रुतिलिङ्गादिभिरन्यथयितुमशक्यत्वादित्याह - **शतरुद्रीये चेति**। अत्राऽयं भावः। तत्र **दिशाञ्च पतय** इत्यादिना श्रुतेन सर्वाधिपतित्वलिङ्गेन भवरुद्र शर्वपशुपतिशिव-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

जगदात्मकत्वं नीलग्रीव इत्यादिलक्षणं च श्रूयते। अतः परमेश्वरस्य तद्बोध्यत्वं युक्तम्।

ननु, परमेश्वरस्य मङ्गलगुणैकनिदानस्य शतरुद्रीयप्रतिपाद्यत्वमयुक्तमिति प्रतिभाति। प्रथममेवाऽत्र 'नमस्ते रुद्र मन्यव' इति हेयगुणमन्युसंबन्धावगमादितिचेत् - नैवं विचारणीयम्। मन्युशब्दस्याऽत्र यज्ञवाचकत्वात्। अथवा क्रोधपर्यायत्वेऽपि मन्युशब्दस्य न दोषः। *दुष्टनिग्रहार्थं स्वेच्छागृहीतप्रकृतिगुणत्वेनाऽस्य परमेश्वरे संबन्धाभावात्। पुराणादीनां च तात्पर्यलिङ्गवशेन ब्रह्मविष्णवादि तत्तच्छब्दवाच्यं सर्वात्मकं सर्वज्ञं सर्वशक्तिकं सर्वाधिकमनन्यसामान्यवैभवं ब्रह्मशब्दार्थविश्रान्तिपदं निखिलवेदान्तवाक्यसामरस्यसमन्वयतात्पर्यपर्यवसानविषयं शिवमुमासहितं

शङ्करादिश्रुतिबृन्देन च शतरुद्रीयश्रवणकाल एव शतरुद्रीयस्य परमेश्वरपरत्वस्य सिद्धतया अर्थवादे श्रुतेन **रुद्रो वा एष यदग्निरि**तिवाक्येनाऽग्निपरत्वकल्पनस्य निरालम्बनत्वादिति। नन्वेवमग्निपरत्वासम्भवेऽपि शतरुद्रीयस्य परशिवपरत्वग्रहणमयुक्तम्। **रुद्र मन्यव** इति तत्प्रतिपाद्यस्य क्रोधवत्त्वश्रवणेन कारुण्यादिमाङ्गल्यगुणनिधौ परशिवे क्रोधस्याऽसम्भावितत्वेन शतरुद्रीयश्रुतश्रुतिलिङ्गानां संहाररुद्रेऽपि सङ्गतत्वेन तत्परत्वौचित्यादित्याशङ्कते - **नन्विति**। **नैवं विचारणीयमि**ति। अत्रेदमाकूतम्। **याते रुद्र शिवा तनूरि**त्यादिमन्त्राणां मन्त्रोपनिषदि परशिवप्रकरणे आम्नातानामिहाम्नानेन तत्प्रत्यभिज्ञा-बलाज्जाबालश्रुतौ **किञ्जप्येनाऽमृतत्वं नो ब्रूही**ति प्रश्नस्य शतरुद्रीयेणेत्युत्तरानन्तरम्। **अमृतस्य ह वा नामधेयानी**त्यस्मिन्नाम्नातानां नाम्नामनादिमुक्तपरशिवनामत्वप्रतिपादनात्।

एकशतञ्च यजुश्शाखास्तासु सर्वासु रुद्रोपनिषदाम्नायत इत्युपनिषच्छब्देनाऽस्य ब्रह्मविद्यात्वप्रतिपादनादप्यस्य परशिवपरत्वमविचलमिति। क्रोधश्रवणमसिद्धमित्याह - **मन्युशब्दस्ये**ति। तस्य क्रोधपरत्वेप्यदोष इत्याह - **अथवे**ति। वस्तुतस्तु सर्वानुग्राहकस्य शिवस्य स्वतः क्रोधो नास्त्येवमपि दुष्टनिग्रहार्थं प्रकृतिगुणभूतस्य तस्य स्वेच्छया गृह्यमाणत्वे नाऽस्मदादीनामिव परमेश्वरस्य क्रोधेन सम्बन्धो न विद्यत इत्याशयः। अथ पुराणादीनामविरोधेन शिवपरत्वमुपपादयति - **पुराणादीनाञ्चे**ति। अत्र केचित् वैष्णवपुराणविरुद्धानि शैवादिपुराणवचनान्यप्रमाणानि। पुराणानां प्रणेतुर्गुणानुरोधेन प्राबल्य-दौर्बल्यवत्त्वविशेषस्य न्याय्यत्वात्। यद्यपि सर्वेषामपि पुराणानाम्प्रणेता चतुर्मुख एक एव। तथापि स केषुचित्कल्पेषु सत्वोद्रिक्तो भवति। केषुचिद्रजो दूषितः। केषुचित्तमोभिभूतश्च। एवं स्वीयसत्वोद्रेकाऽदिना सात्विकाभिधानेषु कल्पेषु वैष्णवानि। राजससंज्ञितेषु ब्राह्माणि तामसनामसु कल्पेषु शैवानि च पुराणानि

---

* **दुष्टनिग्रहमिति अत एव क्रोधोपि गुणायते, निदानज्ञस्य भिषजः रुग्णे हिंसां प्रयुञ्जतः न किञ्चिदपि नैघृण्यं घृणैवात्र प्रयोजिकेति न्यायात्।**

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रणिनाय। तेन तानि पुराणान्यपि वक्तृगुणानुसारेण सात्विकराजसतामससंज्ञितानीत्युच्यन्ते तस्मात्सात्विकपुराणविरुद्धं तमोभिभूतचेतसा प्रणीतैश्शैवपुराणैरुक्तं न ग्राह्यम्। तदेतत् - **सङ्कीर्णास्सात्विकाश्चैव राजसाश्चैव तामसाः**। इति कल्पानां सात्विकादिविभागप्रतिपादनपूर्वकं -

यस्मिन्कल्पे तु यत्प्रोक्तं पुराणं ब्रह्मणा पुरा।
तस्य तस्य तु माहात्म्यं तत्स्वरूपेण वर्ण्यते।

अग्नेश्शिवस्य माहात्म्यं तामसेषु प्रकीर्त्यते।
राजसेषु तु माहात्म्यमधिकं ब्रह्मणो विदुः।।

सङ्कीर्णेषु सरस्वत्याः पितॄणाञ्च निगद्यते।
सात्विकेषु तु कल्पेषु माहात्म्यमधिकं हरेः।।

तेष्वेव योगसंसिद्धा गमिष्यन्ति पराङ्गतिम्।

इति, मात्स्यपुराणे प्रतिपादितम्। तत्खलु **यस्मिन्कल्प** इत्यादिश्लोकेन तत्तत्कल्पे ब्रह्मप्रोक्तानां पुराणानां तत्तत्कल्पविषयत्वमुक्त्वा **अग्नेश्शिवस्य माहात्म्यमि**त्यादिना शैवादिपुराणानां तामसादिकल्पविषयत्वप्रतिपादनात्तेषां तामसादिकल्पेष्वेव ब्रह्मणा प्रणीतत्वं सिद्ध्यति। तस्मात्पुराणानां वक्तृगुणानुगुणो बलाबलविभागो लभ्यते। न च कल्पानां तामसत्वादिकं ब्रह्मविषयतत्तद्गुणोद्रेकमूलमिति नोक्तमिति शङ्क्यम्। इह कल्पानां सात्विकादिविभागस्य तत्तत्कल्पे पुराणवक्तुर्ब्रह्मणस्तत्तद्गुणप्राचुर्यमूल इत्येवाऽभ्युपेयः। नाऽप्येवं विधविभागो निष्प्रयोजन इति वाच्यम्। तत्तत्कल्पेषु तेन प्रोक्तानां परस्परविरुद्धानां देवतोत्कर्षापकर्षपराणां पुराणानां कार्त्स्न्येन प्रामाण्यस्याऽयुक्ततया तेषु हेयोपादेयविशेष परिज्ञानाय वक्तृगुणाऽनुगुणप्रामाण्यसमर्पकतया सप्रयोजनत्वात्। अन्यथा सात्विकादिविभागस्य निरर्थकत्वाच्च। तत्राऽपि विष्णुपुराणं प्रबलं पुलस्त्यवरदानलब्धदेवतापरमार्थवेदनेन पराशरेणोपदिष्टत्वात्। जगत्कारणवस्तुविषयसामान्यप्रश्ने **विष्णोस्सकाशादुद्भूतं जगत्तत्रैव च स्थितमि**त्याद्युत्तरक्रमेणाऽवतीर्णतया देवताविशेषमहिमविषयप्रश्नोत्तरसन्दर्भरूपपुराणान्तरवत् **न बुद्धिभेदं जनयेदि**ति न्यायेन प्रष्टरभिमतार्थो बहूकृत इति नेतुमशक्यत्वेनाऽन्यथा सिद्धत्वाच्चेति। तस्यैतस्य सर्वस्याऽपि निरासस्तात्पर्यलिङ्गवशेनेत्यनेन सिद्धः। सर्वकारणत्वादिकं यद्ब्रह्मलिङ्गन्तदेवाऽत्र तात्पर्यलिङ्गत्वेन विवक्षितम्। अत एवोत्तरत्र वक्ष्यति - **यत्र यत्र चेतने अचेतने वा जगत्कारणत्वादिकं शिवतात्पर्यलिङ्गं श्रूयते** इति। तस्माद् ब्रह्मविष्णुरुद्रादिषु सर्वकारणत्वं सर्वसंहर्तृत्वं सर्वान्तर्यामित्वमित्यादि ब्रह्मलिङ्गं साक्षात्परब्रह्मपदं वा श्रूयते तत्सर्वं तत्तदात्मभूते शिव एव परब्रह्मणि पर्यवस्यति। **यथैव प्राणोस्मि प्रज्ञात्मा तं मामायुरमृतमुपास्वे**त्यादिकमिन्द्राद्यन्तर्यामिणि तस्मिन्तथैव ब्रह्मलिङ्गाऽनुगमाऽविशेषात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्मृतयश्च पुराणानि भारतादीनि सत्तम।
शिवमेव सदा साम्बं हृदि कृत्वा ब्रुवन्ति हि।।

इति पराशरपुराणवचनाच्च। एवं पुराणादीनां विरोधपरिहाराऽनङ्गीकारेऽतीताधिकरणोदाहृतविषयवाक्येषु सर्वकारणत्वमुमुक्षूपास्यत्वादीनां ब्रह्मलिङ्गानां प्राणाकाशेन्द्रादिषु श्रुतानां विरोधस्य दुष्परिहारत्वमेवापद्येत। श्रुतिवदेव पुराणादीनामप्यविरोधेन प्रामाण्यमवश्याभ्युपेयम्। **पुराणं मानवो धर्मस्साङ्गो वेदश्चिकित्सितम्। आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिरि**ति स्मरणात्। यदत्र शिवपुराणाऽप्रामाण्यसाधकतया परैर्मात्स्यपुराणवचनजातमुदाहृतं तत्तु वृत्रं स्ववाग्वज्रमिव परपक्षमेव हिनस्ति तस्य वचनजातस्य ब्रह्मविष्ण्वादीनां परस्परस्मादुत्कर्षं प्रतिपादयताम्पुराणानां कल्पभेदप्रवृत्ततत्तदुत्कर्षविषयतयाऽविरोधेन सर्वेषामपि प्रामाण्यमुपपादयितुम्प्रवृत्तत्वेन पुराणेषु केषाञ्चिद्भ्रान्तकल्पिततयाऽप्रामाण्यमापादयितुम्प्रवृत्तत्वाऽभावात्। तथाहि - यथा उष्णागमहिमागमादीनां ग्रीष्महेमन्तादीनामुष्णत्वादिव्यपदेशः यथैव च तत्तत्पुरुषेषु सत्त्वादिगुणोत्कर्षात्सात्त्विकादिव्यपदेशतथैव कल्पेषु सात्त्विकादिविभागोऽपि तत्तत्कालेषु परमेश्वराज्ञा-सिद्धात्सत्त्वादिगुणोत्कर्षादेव। न तु तत्तत्कल्पावस्थायिनो ब्रह्मणस्तत्तद्गुणोत्कर्षात्। तत्र तथा कण्ठोक्तेरभावात्। प्रयोजनाऽनुरोधेन तादृशविभागाऽभिप्रायः कल्प्यत इत्यपि वक्तुमयुक्तम्। मात्स्य एव **पुराणं मानवो धर्मस्साङ्गो वेदश्चिकित्सितम्। आज्ञा सिद्धानि चत्वारि न हन्तव्यानि हेतुभिरि**ति पुराणमात्रप्रामाण्य-स्मरणमविगीतमहाजनपरिग्रहञ्चोल्लङ्घ्य केषाञ्चित्पुराणानां भ्रान्तिमूलत्वकल्पनस्य वैदिकमार्गप्रद्वेष-मात्रविजृम्भितस्य प्रयोजनवत्त्वाऽयोगेन पररीत्या शैवपुराणानां प्रधानस्य भूयसश्चार्थस्य बाधितत्वेन सर्वथैवाऽनर्थत्वस्य दुरुद्धरत्वात्। तस्मात्सङ्कीर्णास्सात्विका इत्यादिश्लोकोक्तस्य सात्विकादिविभागस्या-ऽस्मद्रीत्या सकलवैदिकसम्मतनिखिलपुराणप्रामाण्योपपादकत्वमेव समञ्जसम्। अत्र यस्मिन्कल्पे तु यत्प्रोक्तमित्यन्तरश्लोकोऽपि पुराणानां तत्तत्कल्पेषु ब्रह्मप्रणीतत्वविधिपरो न भवति किन्तु तत्तत्कल्पेषु ब्रह्मणा प्रणीतानि परस्परविरुद्धदेवतोत्कर्षपराणि पुराणान्यनूद्य तेषान्तत्तत्कल्पविशेषप्रवृद्धदेवता-विशेषमहिमवर्णनरूपत्वविधिपरः न च **तस्य तस्य तु माहत्म्यमि**त्युक्त्या तत्तत्कल्पमाहात्म्यवर्णनमात्रविधि पर इति प्रतीयत इति शङ्क्यम्। पुराणानां कल्पमाहात्म्यवर्णनार्थं प्रवृत्त्यभावात्तेषु देवताविशेष-माहात्म्यवर्णनस्यैवोपलभ्यमानत्वात्। **अग्नेश्शिवस्य माहात्म्यमि**त्यनन्तरसन्दर्भाऽनुरोधेनाऽप्यस्मदुक्तार्थस्यैव सिद्धत्वाच्च। अस्य श्लोकस्य परपक्ष एवाऽसङ्गतत्वेन तत्सङ्गत्यनुरोधेनाऽप्यस्मदुक्तैवरीतिरास्थेया। एवञ्च **सङ्कीर्णास्सात्विका** इत्यादिश्लोकः सत्वाद्युत्कर्षकालत्वेन कल्पानां सात्विकादिविभागपरः यस्मिन्कल्पेत्वित्यादिश्लोकस्तु पुराणानां तत्तद्गुणाधिककल्पभेदप्रवृत्ततत्तद्देवतामाहात्म्यवर्णनपरत्वेन **यथर्तुष्वृतुलिङ्गानि नानारूपाणि पर्यये। दृश्यन्ते तानि तान्येव तथा भावा युगादिषु।।** इत्यादिपौराणिकश्लोकवदविरोधप्रदर्शनपर इत्येव युक्तम्। एवं प्रदर्शितमविरोधं सत्त्वाद्युत्कर्षसमयेषु तत्तदुपाधिकगुणमूर्त्युत्कर्षमौचित्यरूपेण वस्तुसामर्थ्येनोपपादयितुं देवतान्तराणामपि केषाञ्चित्कल्प-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भेदेषूचितोत्कर्षप्रयोजकमुपाधिविशेषञ्च दर्शयितुम् **अग्रेशिवस्य माहात्म्यमि**त्यादिश्लोकाः न तु परोक्तरीत्या किङ्गुणकेन ब्रह्मणा प्रोक्तं पुराणं किं देवतापरमिति जिज्ञासायां तद्विशेषमाख्यातुम्। **सात्त्विकेष्वथ कल्पेष्वि**त्यत्र कल्पग्रहणेन सात्त्विकादिशब्दानां कल्पपरत्वेन पुराणपरत्वाऽभावात्। कल्पविशेषेषु च **माहात्म्यमधिकं हरेरि**ति स्वतस्सम्भविन एव माहात्म्याधिक्यस्य प्रतिपादनान्निराकाङ्क्षेषु पूर्ववाक्येषु श्रुतनिगद्यत इत्यादि क्रियानुषङ्गस्यायुक्तत्वात्पूर्ववाक्येषु प्रकीर्त्यते विदुर्निगद्यत इत्यादि क्रियाश्रवणेन तामसकल्पेऽसन्नप्यग्रेरुत्कर्षः कीर्त्यते इत्यादिक्रमेण कथञ्चिन्नेतुं शक्यत्वेऽपि **सात्त्विकेष्वथ कल्पेषु माहात्म्यमधिकं हरेरि**ति हरेरुत्कर्षस्य कल्पविशेषे व्यवस्थाप्रतिपादनदर्शनेन पूर्ववाक्यानामपि देवताविशेषमहिम्नां कल्पविशेषव्यवस्थाप्रतिपादनपरत्वावसायात्। **असङ्ख्याताः स्मृताः कल्पा ब्रह्मविष्णुशिवात्मकाः। कथिताश्च पुराणेषु मुनिभिः कालचिन्तकैः।। सात्त्विकेष्वथ कल्पेषु माहात्म्यमधिकं हरेः। तामसेषु महेशस्य राजसेषु प्रजापतेः।।** इति कौर्मे।

क्वचिद्ब्रह्मा, क्वचिद्रुद्रः, क्वचिद्विष्णुः प्रशस्यते। नाऽनेन तेषामाधिक्यं न्यूनत्वं वा कथञ्चन। तत्तत्कल्पान्तवृत्तान्तमधिकृत्य महर्षिभिः। तानि तानि प्रणीतानि विद्वांस्तत्र न मुह्यतीति वायुसंहितायाञ्च स्फुटमेव कल्पभेदेन ब्रह्मादीनामुत्कर्षापकर्षप्रतिपादनाच्च। एवञ्च परोदाहृतमात्स्यवचनैरेव सर्वपुराणानां प्रामाण्यव्यवस्थापनात्तद्विरोधादेव निहतः परेषां शिवपुराणतामसत्ववादः। किञ्च मात्स्यवचनानां परोक्तार्थपरत्वेऽपि शैवपुराणादीनां तमोगुणाद्युपाधिकब्रह्मप्रणीतत्वमात्रं सिद्ध्येत्। न त्वप्रामाण्यं केषाञ्चित्। **ज्ञानमप्रतिमं यस्य वैराग्यं च जगत्पतेः। ऐश्वर्यं चैव धर्मश्च सहसिद्धं चतुष्टयमि**ति ब्रह्मणोऽव्याहतज्ञानशक्तिकत्वस्य स्मरणात्। ब्रह्मणः पुराणविशेषप्रणयनोपाधिभूतस्याऽपि तमसः परब्रह्मणः संहर्तृत्वोपाधिभूतस्यैव तत्त्वज्ञानप्रतिबन्धकत्वाऽयोगात्। यदि च ब्रह्माऽप्यस्मदादिवत्तमःप्रतिबद्धतत्वज्ञान इति तत्कृतपुराणेषु कानिचिदप्रमाणानि स्युः, तर्हि उदाहृतमात्स्यवचनेष्वपि तथात्वशङ्काया दुर्निवारत्वात्, तैः कथमप्यर्थव्यवस्था न सिद्ध्येत्। अपि च मात्स्यादिवचनप्रामाण्यादेव तत्तत्कल्पविशेषेष्वपि पुराणानां ब्रह्मप्रणीतत्वं न सिद्ध्यति। किन्तु सर्गाद्यकृतयुगे वेदप्रवर्तनसमये अविभक्तपाद्मादिप्रभेदोऽयं पुराणस्कन्धः शतकोटिप्रविस्तरो युगपदेव तेन प्रणीत इति तस्यैव पुनस्त्रेतायां ब्रह्मादिभिरष्टादशभीऋषिभिरष्टादशधा विभज्य ग्रन्थकोट्या संक्षेपः कृतः। तस्यैव पुनर्द्वापरान्ते चतुर्लक्ष्या वेदव्यासेन संक्षेपः कृत इति विज्ञायते।

तथा मात्स्येऽपि प्रोक्तम् - **पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतं। अनन्तरन्तु वक्त्रेभ्यो वेदास्तस्य विनिर्गताः। पुराणमेकमेवासीच्छतकोटिप्रविस्तर**मित्यारभ्य, **तदर्थोऽत्र चतुर्लक्षैस्संक्षेपेण निवेशितः।** इति। तथा प्रतिपादनाद्धर्मसंहितायामपि - **ब्राह्ममेव कृते चाद्ये पुराणं धर्मसंहितम्। अष्टादशविधं तच्च कृतं कोटिप्रभेदतः** इति। एवञ्च तदनुरोधात्। **यस्मिन्कल्प** इति वचनं कल्पभेदेषु पुराणविशेषाणां प्रवचनमात्रपरम्। न प्रणयनपरम्। **तेन प्रोक्तमि**ति पाणिनिसूत्रमिव प्रोक्तपदेन प्रवचनमात्रसमर्पणात्। एवञ्च नानुवाद्यस्वारस्यादपि सात्त्विकादिविभागः प्रामाण्याऽप्रामाण्यसाधक

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इति सिद्धम्। अन्यथा केनचित्तामसेन प्रवचनीकृतानां सात्त्विकानामपि पुराणानां तामसत्वापत्तेः। वस्तुतस्तु सर्गाद्यकृतयुगेऽपि ब्रह्मणा पुराणस्कन्धो न प्रणीतः। किन्तु तदानीं वेदैस्सह परमेश्वराद् गृहीत्वा ब्रह्मणा प्रवर्तितः **यो वै वेदांश्च प्रहिणोति तस्मै** इति चशब्देन शिवागमसंहितानां पुराणस्कन्धस्य च समुच्चयात्। **तस्मै वेदान्पुराणानि दत्त्वा तानग्रजन्मने** इति तदुपबृंहणदर्शनात्। **अस्य महतो भूतस्य निश्वसितमेतद्यद् ऋग्वेदो यजुर्वेदस्सामवेदोऽथर्ववेद इतिहासपुराणमि**त्यादिश्रुत्या **आदिकर्ता कविस्साक्षाच्छूलपाणिरि**ति श्रुतिः तदुपबृंहणेन, **भूयस्स भगवान् ध्यात्वा चिरं शूलवरायुधः। च असृजत्सर्वशास्त्राणि महादेवो महेश्वर** इत्यादिना **इत्येताश्शङ्करप्रोक्ता विद्याश्शब्दार्थसंयुताः।** इत्यनेन राजधर्मवचनेन सर्वविद्यास्थानानामपि परमेश्वरकर्तृकत्वप्रतिपादनाच्च ब्रह्मणस्तमोभिभूत्या पुराणानां केषाञ्चिदप्रामाण्यमिति शङ्काया एव नाऽवकाश इति सिद्धम्।

एतेन, वैष्णवनारदीयगारुडभागवतपाद्मवाराहपुराणानि सात्त्विकानि। ब्राह्मब्रह्माण्डब्रह्मवैवर्त-मार्कण्डेयभविष्यद्वामनपुराणानि राजसानि। लैङ्गशैवाग्नेयस्कान्दकौर्ममात्स्यानि तामसानि। अतस्तामसैः लैङ्गादिभिरुक्तं न ग्राह्यमिति केषाञ्चिदवैदिकानां पुराणविषयसात्त्विकादिविभागः निराकृतः। तस्य सत्त्वाद्युद्रिक्तवक्तृकत्वस्याऽसिद्धत्वात्। सत्त्वादिगुणकदेवतापरत्वविषयत्वे हान्यभावात्।

सात्त्विकत्वेन पराभिमते गारुडे शिवरहस्ये पाद्मे शिवराघवसंवादाद्यनेकप्रदेशेषु च लैङ्गादिभ्यो-ऽप्यधिकशिवोत्कर्षव्यवस्थापनदर्शनेनानेनाऽस्य विभागस्य मृगतृष्णायमाणतया तेन परदुराशाया वृथायासमात्रफलकत्वादिति दिक्।

अथ यत्तु पराशरसंहितारूपस्य विष्णुपुराणस्य प्राबल्यकारणमुक्तम्, तदपि वायुसंहितारूपस्य शिवपुराणस्य प्राबल्यसाधकतया परेषां विपरीतमेव। तथाहि - **ज्ञानमप्रतिमं यस्य वैराग्यञ्च जगत्पतेः। ऐश्वर्यञ्चैव धर्मश्च सहसिद्धं चतुष्टयमि**ति सहजसार्वज्ञ्यवैराग्यादिमातापितामहेनोपदिष्टत्वात्। तत्र **मुनीनां षट्कुलीनानां ब्रुवतामितरेतरम्। इदम्परमिदं नेति वादस्सुमहानभूत्। परस्य दुर्निरूपत्वाज्ञातस्तत्र न निर्णयः। .....** इत्युपक्रम्य, तेषाम्मुनीनामन्योन्यं विवदमानानां ब्रह्मसभोप-सर्पणमुक्त्वा **भगवन्नन्धकारेण महता वयमावृताः। खिन्ना विवदमानाश्च न पश्यामोऽत्र यत्परमि**त्यारभ्य **केनेदं चित्रकृत्येन प्रथमं सृज्यते जगत्। अन्तकाले पुनश्चेदं कस्मिन्प्रलयमेष्यतीति** सामान्येन सकलकारणस्य तस्य परदेवतस्य प्रश्नमुत्थाप्य, **एवं पृष्टस्तदा ब्रह्मे**त्यारभ्य **उत्थाय सुचिरं ध्यात्वा रुद्र इत्युच्चरन्निरम्। आनन्दक्लिन्नसर्वाङ्गः कृताञ्जलिरभाषत। यस्मात्सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रपूर्वकम्। सहभूतेन्द्रियैस्सर्वैः प्रथमं सम्प्रसूयते। कारणानाञ्च यो धाता ध्याता परमकारणम्। न सम्प्रसूयतेऽन्यस्मात्कुतश्च न कदाचन।** इत्यारभ्य, अनेकशाखाविप्रकीर्णं बहुविधं शिवस्य वैभवं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

परमेश्वरं प्रति बोधकत्वं युक्तमेव। यदुक्तं कर्मप्रकरणमिति तन्न। लिङ्गेन प्रकरणबाधो युक्तः। अनेन न्यायेन यत्र यत्र चेतनेऽचेतने वा जगत्कारणत्वादिकं श्रूयते वेदादिषु प्रमाणवचनेषु तत्र

प्रपञ्चेन प्रदर्श्य, **तेनेदं चित्रकृत्येन प्रथमं सृज्यते जगत्। अन्तकाले पुनश्चेदं तस्मिन्प्रलयमेष्यतीत्यादिना** शिव एव सकलकारणभूतं परमदैवतमिति व्यवस्थापितत्वेन विष्णुपुराणे तु प्रष्टुरेकस्य प्रागेव शिष्यभूतस्य मैत्रेयस्य हृदयाऽभिज्ञेन गुरुणा सामान्यप्रश्नेऽपि तथैव पूर्वसिद्धभक्तिविवर्धनाय तदनुकूलं विशेषविषयमुत्तरमुक्तमित्यन्यथासिद्धिवदिह परस्परं विवदमानानां बहूनामृषीणां प्रश्ने, कस्यचिद्धृदयमनुसृत्योत्तरमुक्तमित्यत्र विनिगमनाविरहेण, तथान्यथासिद्धेर्वक्तुमयुक्तत्वाच्च तस्माद्युक्तमुक्तं पुराणादीनामपि तात्पर्येण शिवे समन्वय इति। उक्तन्यायमविचारितेषु वेदान्तवाक्येष्वतिदिशति - **अनेने**ति। अयमर्थस्स्कान्दे सूतस्य संहितायां दर्शितः - **कानिचद्वेदवाक्यानि ब्राह्मणा वेदवित्तमाः। रुद्रमूर्तिं समाश्रित्य शिवे परमकारणे पर्यवस्यन्ति विप्रेन्द्रास्तथा वाक्यानि कानिचित्। विष्णुमूर्तिं समाश्रित्य ब्रह्ममूर्तिं च कानिचित्। आग्नेयमूर्तिमाश्रित्य श्रुतिवाक्यानि कानिचित्। सूर्यमूर्तिं मुनिश्रेष्ठास्तथैवाऽन्यानि कानिचित्। एवं मूर्त्यभिधानेन द्वारेणैव मुनीश्वराः। प्रतिपाद्यो महादेवः स्थितस्सर्वासु मूर्तिष्वि**ति। एवं क्वचित् - **सूर्य आत्मा जगतस्तस्थुषश्चे**ति श्रूयते। अत्र जगदात्मत्वरूपपरमेश्वरलिङ्गात्। **स यश्चाऽयम्पुरुषे यश्चासावादित्ये** इति **यस्यादित्यश्शरीरमि**त्यादिश्रुत्यन्तरेषु परमेश्वरस्यादित्यान्तर्यामित्वश्रवणाच्च तत्र प्रतिपाद्यः परमेश्वर एव। तथा **इन्द्रो राजा जगतो य ईशे** इतीन्द्रस्य जगदीशत्वं श्रूयते। तत्राऽपि **इन्द्रस्यात्मानं शतधा चरन्तम्** इति शक्राद् भेदव्यपदेशात्। **सहैव सन्तं न विजानन्ति देवा** इति देवाऽविज्ञेयत्वरूपपरमेश्वरलिङ्गाच्च प्रतिपाद्यः परमेश्वर एव। एवमेव **आपो वा इदँ सर्वमि**त्यादिष्वपि सर्वात्मत्वलिङ्गादबाह्यन्तर्यामी परमेश्वर एव प्रतिपाद्य इत्यनुसन्धेयम्।

नन्वन्तर्यामिपरत्वं कारणत्वादिब्रह्मलिङ्गयुक्तेषु वाक्येष्विति कुतस्सङ्कोचः क्रियते। अन्येष्वपि विद्यत एव। सर्वेषामपि शब्दानां तत्र मुख्यत्वादित्याशङ्क्याह - **यत्र यत्रे**ति। अत्रायं भावः। यत्र शरीरादिषु वैराग्यसिद्धये तेषां जुगुप्सितविकाराश्रयत्वं प्रतिपाद्यते यथा मैत्रायणोपनिषदि - **भगवन्नस्थिचर्मस्नायुमज्जामांसशुक्लशोणितश्लेष्माऽश्रुदूषिकाविण्मूत्रवातपित्तसङ्घाते दुर्गन्धे निस्सारेऽस्मिन्शरीरे किं कामोपभोगैरि**त्येतादृग्वाक्यजातस्य शरीरादिदूषण एव तात्पर्यं, न तु ब्रह्मणस्तदन्तर्यामित्वप्रतिपादने। यत्र जीवस्य वैराग्यार्थजननमरणपरलोकगतागतक्लेशरूपविकारः प्रतिपाद्यते।

यथा - गर्भोपनिषदि, छान्दोग्यबृहदारण्यकादिषु च, तादृग्वाक्यजातस्य संसारदूषण एव तात्पर्यम्, न तु जननमरणादिवज्जीवान्तर्यामित्वप्रतिपादने। तत्प्रतिपादनस्य दूषणानुपयोगित्वात्। यत्र जीवान्तर्यामिब्रह्मप्रतिपादनार्थं जीवस्य ब्रह्माश्रयत्वब्रह्मशरीरत्वादिकं प्रदर्श्यते, यथा - **यं पृथिवी न वेद यस्य पृथिवी शरीरमि**त्यादौ तत्र पृथिव्यादिपदस्य नियम्य पृथिव्यादिदेवतासमर्पण एव तात्पर्यं न तु न तदन्तर्यामिसमर्पणे।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पृथिव्याद्यविज्ञेयत्वं तच्छरीरत्वादिना तदनन्तरमेवोपदेश्यत्वादन्तर्यामिणः। तस्मादेतादृशेषु वाक्येषु **देवदत्तो विद्वान्, घटः श्यामः** इत्यादिलौकिकवाक्येष्विव चिदचिद्वस्त्वेव बोद्धव्यम्। नहि लौकिकवाक्यवद्वैदिकवाक्येषु शक्तिभ्रमात्पदप्रयोगः पदार्थप्रतिपत्तिर्वा वक्तुं शक्यते - इत्याशङ्क्य, शिवस्य ब्रह्मणश्शरीरमिति चेदस्तु चिदचिद्वस्तुविशेषितम्। लोके चिदचिद्वस्तुषु प्रयुज्यमानाश्शब्दाः केवलस्यान्तर्यामिणः वाचका नेष्यन्ते। किन्तु तत्तद्वस्तुरूपशरीरविशिष्टस्य, तथाऽपि विशिष्टवाचिनां शब्दानामेकदेशैकदेशिसम्बन्धेन विशेषणेषु लक्षकत्वं युक्तमिति।

अथ - अत्राऽधिकरणे यत् श्रीभाष्यव्याख्यात्रा श्रुतप्रकाशिकाकृता, नारायणस्य कारणत्वमुपपादयितुं वाचाटत्वमाविष्कृतं तत्सर्वमभिमानमात्रमेव। तत्र यद्यपि तदीय वागाडम्बरेण सर्वेषामपि प्रमाणानां व्याकुलीभावमन्तरा नैव निष्पन्नोऽल्पीयानपि तदीय मनोरथः। तथाऽपि प्रमाणवैरुध्यं केषाञ्चिदाश्वासाय किञ्चिदिह प्रदर्शयामः।

इह यद्यपि नारायणस्य कल्पान्तरेऽवान्तरसृष्टौ कारणत्वं क्वचिदाम्नायते, तथाऽपि न तदेव आदिसृष्टिविषयं सर्वकारणत्वमिति भ्रमितव्यम्। न च आदिसर्गाऽवान्तरसर्गमूलसर्वकारणत्वकल्पान्तर-विषयसङ्कोचितकारणत्वरूपविशेषसाधकं बीजं नोपलभ्यत इति शङ्क्यम्। ब्रह्मविष्णुरुद्ररूपत्रिमूर्ति-जनकत्वरूपादिसर्गविषयसर्वकारणत्वस्य मूर्तिद्वयजनकत्वरूपाऽवान्तरसर्गविषयसङ्कुचितकारणत्वस्य च बहुप्रमाणसिद्धत्वात्। नापि ब्रह्मविष्णुरुद्ररूपमूर्तित्रयमेव प्रामाणिकम्। तज्जनकं तुरीयं तत्त्वान्तरं न प्रामाणिकमिति शङ्क्यम्। त्रिमूर्त्युत्तीर्णपरतत्त्वस्य श्रुतिस्मृतिपुराणादिसिद्धत्वात्। तथाहि ब्रह्मोपनिषदि **अकारं ब्रह्माणं नाभौ उकारं विष्णुं हृदये मकारं रुद्रं भ्रूमध्ये** इति मात्रात्रयवाच्यब्रह्मविष्णुरुद्राणामु-पासनविधानान्तरं **ॐकारं सर्वेश्वरं द्वादशान्त** इति समष्टिप्रणववाच्यसर्वेश्वराख्यतुरीयतत्त्वस्य प्रतिपादितत्वात्। मैत्रेयोपनिषदि च **तमो वा इदमेकमास तत्परेणेरितं विषमत्वं प्रयाति अथ यो ह खलु वा वाऽस्य राजसोंऽशोऽसौ स योऽयम्ब्रह्मा। अथ यो ह खलु वा वाऽस्य सात्त्विकोंऽशोऽसौ स योऽयं विष्णुः। अथ यो ह खलु वा वाऽस्य तामसोंऽशोऽसौ स योऽयं रुद्रः** इति तमोधिष्ठातुः परस्य रजोगुणाद्युपहिता अंशभेदा ब्रह्मादय इति प्रतिपादनेन, तेभ्यः परस्य तुरीयतत्त्वस्य स्पष्टीकृतत्वाच्च। नापि तुरीयतत्त्वस्य शिवाऽभिधेयत्वं न श्रुतमिति शङ्क्यम्। माण्डूक्योपनिषदि **शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेय** इति तुरीयतत्त्वस्य शिवसंज्ञाकत्वाम्नानात्। ब्रह्मोपनिषदि च शिवाऽसाधारण-सर्वेश्वरसमाख्याकत्वश्रवणाच्च। न च शिवस्य मूर्तित्रयकारणत्वं न श्रूयत इति वाच्यम्। अथर्वशिखायाम्। **ब्रह्मविष्णुरुद्रेन्द्रास्सम्प्रसूयन्ते** इतीशानस्य त्रिमूर्तिकारणत्वाम्नानात्। त्रिमूर्तिस्रष्टृत्वस्य शिवविषयत्वेनैवा-ऽऽनुशासनिके प्रतिपादितत्वाच्च। तथाहि - **स एष भगवानीशस्सर्वतत्त्वादिरव्ययः। सर्वतत्त्वविधानज्ञः प्रधानपुरुषेश्वरः। सोऽसृजद्दक्षिणादङ्गाद् ब्रह्माणं लोकसम्भवम्। वामपार्श्वात्ततो विष्णुं लोकरक्षार्थमीश्वरः। युगान्ते चैव सम्प्राप्ते रुद्रं प्रभुरथाऽसृजदिति**। किञ्च तत्संरक्षकत्वस्याऽपि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शिवविषयत्वेनैव शान्तिपर्वणि प्रतिपादितत्वात्। तथा च, **यं विष्णुरिन्द्रश्शम्भुश्च ब्रह्मा लोकपितामहः। स्तुवन्ति विविधैः स्तोत्रैर्देवदेवं महेश्वरम्। तमर्चयन्ति ये शश्वद्दुर्गाण्यतितरन्ति ते** इति। अत्र शिवाराधनस्य दुर्गातितरणत्वोक्त्या ब्रह्मविष्ण्वादीनां स्तोत्रमपि तदर्थमिति पर्यवसायात्। स्तुतिभिः प्रीतस्य तस्य शिवस्य तत्संरक्षकत्वं विवक्षितमित्यवसीयते। एवं शिवस्य तत्संहर्तृत्वमपि शान्तिपर्वण्येव प्रतिपादितम्।

ईश्वरश्चेतनः कर्ता पुरुषः कारणं शिवः।
विष्णुर्ब्रह्मा शशी सूर्यः शक्रो देवाश्च सान्वयाः।।

सृज्यते ग्रस्यते चैव तमोभूतमिदं यदा।
अप्रज्ञातं जगत्सर्वं तथाह्येको महेश्वरः।। इति।

अत्र संहाररुद्रस्याऽपि ग्रासो विवक्षितः। **तथा ह्येको महेश्वर** इति वाक्यशेषात्। एवं ब्रह्मविष्णुरुद्राणामपि सृष्टिस्थितिप्रलयकर्तृत्वकथनेन कैमुतिकन्यायेन सर्वस्य जगतः कर्तेति सिद्ध्यति। एवञ्च **यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ती**त्यादिलक्षणलक्षितं ब्रह्म शिव एवेति सिद्धम्। एवं शिवपुराणे -

त्रयस्ते कारणात्मानस्संजाता हि महेश्वरात्।
सृष्टेः प्रवर्तको ब्रह्मा स्थितेर्विष्णुर्विमोहकः।।

संहारस्य तथा रुद्रस्तयोर्नित्यं नियामकः।
तस्मात्त्रयस्ते कथ्यन्ते जगतः कारणत्रयम्।।

कारणत्रयमेतत्तु शिवः परमकारणमिति।। इति।

स्कान्देऽपि -

ब्रह्मा विष्णुश्च रुद्रश्च परतत्त्वविभूतयः।
एषां त्रयाणामधिकः सर्वकारणमीश्वर।। इति,

एवं, श्रौतं त्रिमूर्ति कारणत्वं शिवविषयमिति महाभारतेन पुराणैश्चोपबृंहितम्।

ननु - महोपनिषदि **एको ह वै नारायण आसीदि**ति नारायणस्य सृष्टिपूर्वसिद्धत्वाऽऽम्नानेन **ब्रह्मविष्णुरुद्रेन्द्रास्सम्प्रसूयन्त** इति वचनावगतविष्णुप्रसूतेः स्वेच्छाऽविर्भावपरत्वं ग्राह्यमितिचेन्न - **हिरण्यगर्भस्समवर्तताग्र** इति वचनेन हिरण्यगर्भस्याऽपि नारायणतुल्ययोगक्षेमतया तत्प्रसूतेरपि तथाविधत्वापत्तेः प्रायपाठाविरोधाय च त्रिमूर्तीनामपि महेश्वरसृज्यत्वमविशेषमित्येवाऽवश्याऽभ्युपेयत्वात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वस्तुतस्तु **ब्रह्मविष्णुरुद्रेन्द्रास्सम्प्रसूयन्त** इति वचनाऽनुरोधेनैव **एको ह वै नारायण आसीदिति**वाक्यगतस्य आसीदितिपदस्य **रोहितो लोहितादासीत्सिन्धुस्तस्य सुतोऽभवत्। शक्तेरासीत्पराशरः** इत्यादाविवोत्पत्ति-वाचकतया कल्पान्तरे ब्रह्मरुद्राद्युत्पत्तेः पूर्वं सर्गाद्यसमये नारायणस्यैकाकिनः परमशिवादुत्पत्तिबोधकत्वा-ऽवसायात्। ब्रह्मादीनां नारायणस्य च सृष्टत्वेन प्रतिपादयिष्यमाणतया पारिशेष्यात्परमशिवस्यैतदुत्पत्तौ हेतुकर्तृत्वेनाऽन्वयलाभात्। आसीदित्यस्योत्पत्त्यर्थकत्वे एक इत्यवधारणस्य उत्पत्तिमदितरमात्रव्यवच्छेद-कारितया अनादिमुक्तपरमशिवसद्भावप्रतिक्षेपाऽसामर्थ्यात्।

अथ कथमप्यासीत्पदस्य सत्तामात्रार्थग्रहणेऽपि, **एष वाव प्रथमो यज्ञ** इति ज्योतिष्टोमस्य सर्वयज्ञप्राथम्यबोधकश्रुतेः। **दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेते**ति श्रुत्यन्तरदर्शनात्संकोचवत्त्रिमूर्त्युत्तीर्ण सर्वमूलभूतपरमशिवमूर्तिसद्भावप्रतिपादनपराऽनेकश्रुतिविरोधपरिहाराय सङ्कोच एवोपपद्यते। अत एव तदुपबृंहणे मनुधर्मशास्त्रोपक्रमे

आसीदिदं तमो भूतमप्रज्ञातमलक्षणम्।
अप्रतर्क्यमनिर्देश्यं प्रसुप्तमिव सर्वतः।।

ततस्स्वयम्भूर्भगवानव्यक्तो व्यञ्जयन्निव।
महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः।।

अभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः।
अप एव ससर्जादौ तासु वीर्यमवासृजत्।।

तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्।
तस्माज्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः।।

इत्युक्त्वा -

आपो नारा इति प्रोक्ता आपो वै नरसूनवः।
ता यदस्यायनं पूर्वं तेन नारायणस्स्मृतः।।

इति हिरण्यगर्भस्य स्रष्टुर्नारायणस्य **प्रादुरासीत्तमोनुद** इति तमः प्रेरकान्महेश्वरादुत्पत्तिरुपबृंहिता। न च तमोनुद इति पदस्य इगुपधलक्षणकप्रत्ययान्ततया प्रादुर्भवितुर्नारायणस्येव विशेषणत्वेन तमोधिष्ठातृत्वं नारायणात्परस्य न सिद्ध्यतीति वाच्यम्। **आसीदिदं तमोभूतमि**ति श्लोकेन सर्गादौ तमोरूपेण जगदवस्थानं प्रतिपाद्य, **ततस्स्वयम्भूर्भगवानि**त्यादिना तदनन्तरं प्रादुर्भूतत्वेनोच्यमानस्य रूपस्य पूर्वसिद्धतमो-ऽधिष्ठातृत्वायोगात्। तस्मात्तमोनुद इति पदं क्विबन्तत्वेन पञ्चम्यन्तम्। प्रादुर्भावयितृपरमेव। न च स्वयम्भुवः प्रादुर्भावोक्तौ न प्रादुर्भावयित्रुक्तिः युज्यते, विरोधादिति शङ्क्यम्। स्वयम्भूशब्दस्य नारायणजन्ये

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चतुर्मुखेऽप्यन्यत्र प्रयुज्यमानत्वेन मनुस्मृतावेव। **तस्माज्जज्ञे स्वयं ब्रह्मे**ति नारायणसृष्टे चतुराननेऽपि स्वयम्भूत्वकथनेन च तथैव परमशिवसृष्टे नारायणेऽप्युपचरितार्थत्वेनाऽविरोधात्। एवं मनुधर्मशास्त्रोपक्रमेण **एको ह वै नारायण आसीदि**ति श्रुतमासीदितिपदमुत्पत्तिपरमिति सिद्धम्। अत एव तदुपसंहारेऽपि **प्रशासितारं सर्वेषामणीयांसमणोरपि। रुक्माभं स्वप्नधीगम्यं विद्यात्तु पुरुषं परम्। एष सर्वाणि भूतानि पञ्चभिर्व्याप्य मूर्तिभिः। जन्मवृद्धिक्षयैर्नित्यं संसारयति चक्रवदि**ति, सद्योजातादिमूर्तिपञ्चकेन **मूर्तयस्तस्य विख्याताः पञ्च ब्रह्माह्वयाः पराः। सर्वलोकशरण्यस्य शिवस्य परमात्मन** इति पुराणवचनप्रतिपादितेन वा पृथिव्यादिपञ्चकेन मूर्त्यष्टकान्तर्भूतेन वा परशिवासाधारणसर्वभूतव्याप्तिलिङ्गस्योपन्यासेन शिवस्य तमोऽधिष्ठातृत्वस्य हिरण्यगर्भजनकस्याऽपि नारायणस्य प्रथमोत्पादकत्वप्रतिपादनाच्च शिव एव आदिसर्गकर्ता सर्वकारणमिति सिद्धम्। तथा योगयाज्ञवल्कीये धर्मशास्त्रेऽपि -

पृथिव्यां वायुमारोप्य लकारेण सह्वामन्वितम्।
ध्यायं चतुर्भुजाकारं ब्रह्माणं परमेष्ठिनम्।।

धारयेत्पञ्चघटिकाः धारणात्सिद्धिमाप्नुयात्।
वारुणे वायुमारोप्य वकारेण समन्वितम्।।

शुद्धस्फटिकसंकाशं पीतवाससमच्युतम्।
धारयेत्पञ्चघटिकास्सर्वपापैः प्रमुच्यते।।

वह्नौ चानिलमारोप्य रेफाक्षरसमन्वितम्।
त्र्यक्षं च वरदं रुद्रं तरुणादित्यसन्निभम्।।

इति त्रिमूर्तिधारणामुक्त्वा -

आकाशे वायुमारोप्य हकारेण समन्वितम्।
बिन्दुरूपं महादेवं व्योमाकारं सदाशिवम्।।

शुद्धस्फटिकमाकाशं बालेंदुकृतशेखरम्।
पञ्चवक्त्रधरं सौम्यं दशबाहुं त्रिलोचनम्।।

सर्वायुधोद्यतकरं सर्वभूषणभूषितम्।
उमार्धदेहं वरदं सर्वकारणकारणम्।।

चिन्तयेच्चित्तविन्यस्तं मुहूर्तमपि धारयेत्।
स एवमुक्त इत्युक्तस्तान्त्रिकेष्वपि शिक्षितैः।। इति,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

त्रिमूर्त्युत्तीर्णस्योमापतेः धारणाया मुक्तिहेतुत्वात् सर्वकारणत्वमपि निगद्य -

एतदुक्तं भवत्यत्र गार्गि ब्रह्मविदां वरे।
ब्रह्मादिकार्यरूपाणि स्वस्वे संहृत्य कारणे।।

युक्तचित्तस्तथात्मानं धारयेत्परमेश्वरः।

इति च वचनेन परमशिवस्य सर्वकारणत्वप्रतिपादनेन च, **एको ह वै नारायण आसीदि**त्यत्राऽऽसीत्पदं नारायणस्य प्रथमोत्पन्नत्ववाचकमेवेत्यवगम्यते। एवं न्यायोपबृंहणाभ्यां महोपनिषदो महादेवात्प्रथममुत्पन्नस्य नारायणस्य सकलप्रपञ्चसर्गकारित्वबोधकत्वान्न विरोधः। एवं सुबालनारायणोपनिषदादिषु तस्य कारणत्वप्रतिपादनस्याऽपीयमेव गतिर्द्रष्टव्या। नन्वेवमपि कथं सर्वाविरोध उपपद्यते **यो ब्रह्मणमि**ति मन्त्रे **यो देवानामि**ति मन्त्रे च सकलदेवोत्पत्तेः पूर्वं ब्रह्मणः परमशिवादुत्पन्नत्वप्रतिपादनात्। **युजुर्भ्यो विष्णुमि**ति श्रुतावष्टमूर्तिब्राह्मणे च तेनैव पुनर्विष्णुरुद्रयोः सृष्टत्वाऽभिधानात्। **अण्डं हिरण्मयं मध्ये समुद्रं रुद्रस्य वीर्यात्प्रथमं सम्बभूव। तत्र ब्रह्मा विष्णुर्जातो जातवेदा** इत्यादिश्रुतौ।

रुद्रसंज्ञस्य देवस्य रूपे मूर्तिः प्रजायते।
तेन क्षिप्तं रसे वीर्यं परमूर्त्यभिमानिना।।

तदण्डमभवद्वीर्यं सहस्त्रकिरणप्रभम्।
विष्णुस्तत्प्राऽविशत्साक्षात् मम शक्तेस्तु वैभवात्।।

पुनर्नारायणाभ्यां मे नियोगात्प्राप्तवानसौ।

इत्यादिवासिष्ठलैङ्गादिदृष्टतदुपबृंहणैश्च ब्रह्मनारायणयोः रुद्रसृष्टत्वोक्तेश्च महोपनिषदादिप्रक्रियया ब्रह्मरुद्रयोस्तदितरप्रपञ्चस्य नारायणसृष्टत्वोक्तेश्च निर्धारणायोगादिति चेदुच्यते। अत्र भगवान्वायुः,

तपसा तोषयित्वा तं पितरं परमेश्वरं।
ब्रह्मनारायणौ पूर्वं रुद्रः कल्पान्तरेऽसृजत्।।

कल्पान्तरे पुनर्ब्रह्मा रुद्रविष्णू जगन्मयः।
विष्णुश्च भगवांस्तद्वत् ब्रह्माण्डमसृजत्पुनः।।

नारायणं पुनर्ब्रह्मा ब्रह्माणं च पुनर्भवः।
एवं कल्पेषु कल्पेषु ब्रह्मविष्णुमहेश्वराः।।

परः परस्माज्जायेत परस्परजयैषिणः।
तत्तत्कल्पान्तवृत्तान्तमधिकृत्य महर्षिभिः।।

प्रभावः कथ्यते तेषां परस्परसमुद्भवः।। इति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एतेन त्रिमूर्तिषु कार्यकारणभावस्तत्तत्कल्पविषय इति तस्य अविरोधस्समर्थितः। एवञ्च **नारायणाद्ब्रह्मा जायते नारायणाद्रुद्रो जायत** इत्यादिना नारायणस्य ब्रह्मरुद्रमात्रजनकत्ववचनमवान्तर-कल्पप्रवृत्तसृष्टिविषयम् इति सिद्धम्। एवमेव सर्वाविरोध एष्टव्यः। अन्यथा **शिव एव केवलः**।, **एको ह वै नारायण आसीत्, हिरण्यगर्भस्समवर्तताग्र** इत्यादिवचनानां परस्परविरोधादप्रामाण्यमेव प्रसज्येत।

ननु - रुद्रस्य परमकारणत्वं न सिद्ध्यति चतुर्मुखकार्यत्वस्य श्रुत्यन्तरावगतस्याऽनपोदितत्वादि-त्यादिना रुद्रस्य हिरण्यगर्भकार्यत्वादिति परैराशङ्क्यते इति चेत्तत्सर्वं परमशिवगुणि रुद्रतदंशविशेषाविवेक-मूलतयाऽकिञ्चित्करम्। तथाहि सूतसंहितायाम् -

तताप परमं घोरं ततो विप्राश्चतुर्मुखः।
सृष्ट्यर्थं ब्रह्मणस्तस्य भ्रुवोर्घ्राणस्य मध्यतः।।

अविमुक्ताभिधाद्देशात्स्वकीयात्तु विशेषतः।
त्रिमूर्तीनां महेशस्य द्विजा वेदान्तवित्तमाः।।

अंशभूतो महादेवस्सर्वदेवनमस्कृतः।
अर्धनारीश्वरो भूत्वा प्रादुरासीत्कृपानिधिः।। इति।

अमुमेवाऽर्थं संग्रहेणाह, राजधर्मे पराशरः -

सृष्ट्यर्थं ब्रह्मणः पुत्रो ललाटादुत्थितः प्रभुः। इति।

लैङ्गे च शिलादं प्रति शक्रः -

तस्य हृत्कमलस्थस्य नियोगादंशजो विभोः।
ललाटं तस्य निर्भिद्य प्रादुरासीत्प्रभोर्मुखात्।।

अंशः परमशिवस्य संहाररुद्रः। ततो जातस्तदेकदेशविभागरूप इति यावत्। एवञ्च यद्वायुसंहितायाम् -

निर्दिष्टः परमेशेन महेशो नीललोहितः।
पुत्रो भूत्वाऽनुगृह्णाति ब्रह्माणं ब्रह्मणोऽनुजः।।

इति परमशिवनियोगाद्रुद्रस्य ब्रह्मणः पुत्रभावेनाऽविर्भाववर्णनं यच्चादित्यपुराणादिषु **त्वामेव पुत्रमिच्छामीति** प्रार्थयमानाय तस्मै दत्तवरपरिपालनाय ततस्तदाविर्भाववर्णनं तत्सर्वं शिवादुत्पन्नत्वेन महासंहारपर्यन्ताव-स्थायित्वेन च वर्णितस्य तस्यावान्तरकल्पेषु पुनः पुनरुत्पत्त्यसम्भवेन तेषु प्रत्यवाऽन्तरकल्पं तदाविर्भाववर्णनस्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तदंशविशेषविषयत्वस्याऽवश्याऽभ्युपेयत्वात्। एवञ्च तस्य ललाटात् चक्षश्शूलपाणिः पुरुषोऽजायत। **बिभ्रत्सर्वं ब्रह्मचर्यं तप** इति प्रतिपादितस्याऽपि रौद्राविर्भावस्य द्रोणपर्वणि -

ततः पार्श्वे वृषाङ्कस्य ब्रह्मचारी व्यवर्तत।
पिङ्गाक्षस्तपसा श्रेष्ठो बलवान्नीललोहितः।।

इति कैलासे श्रीकण्ठपार्श्वेऽवस्थानोक्त्या,

कौर्मे नारायणम्प्रति -

अहञ्च भवतो वक्त्रात्कल्पान्ते घोररूपधृत्।
शूलपाणिर्भविष्यामि क्रोधजस्तव पुत्रक।।

इति रुद्रोक्त्या चैच्छिकांशावतारत्वाविष्करणात्। तन्मूलः पौराणिकव्यवहारोऽप्यंशावताराऽभिप्राय एव। एतेन यत्र क्वचित्क्वचिद्रुद्रस्य पितामहान्नारायणाद्वा निकर्षवर्णनं तदपि तत्तदाविर्भूतस्यांशविशेषस्य स्थाण्वादिशब्दितस्य रामकृष्णाद्यवताराणां दशरथवसुदेवादिभ्य इव लोकदृष्ट्या निकर्षाभिनयपरम्। विष्णुपितामहयोस्तु स्वमूलरूपेणाऽपि रुद्रान्निकर्षस्सहजः। अत एव, **परात्परतरो ब्रह्मा तत्परात्परतो हरिः। तत्परात्परतो हीश** इति श्रुतिः ब्रह्मविष्ण्वपेक्षया रुद्रस्याऽधिक्यं विदधाति - अत्र शतानन्दस्य गोविन्दस्य वा महेश्वरात्प्रसूतिरेव मुख्या। अत एव **यो देवानां प्रथमं पुरस्ताद्विश्वाधिको रुद्रो महर्षिः। हिरण्यगर्भं पश्यत जायमानं स नो देवश्शुभया स्मृत्या संयुनक्त्वि**ति नारायणे आम्नानात् **ब्रह्मविष्णुरुद्रेन्द्रास्सम्प्रसूयन्त** इत्यथर्वशिखायां श्रुतत्वाच्च। ब्रह्मविष्ण्वोः परस्परस्मादुत्पत्तिस्तु गौण्येव। तदुक्तमादित्यपुराणे -

प्रविष्टो ब्रह्मणो देहं तत्र दर्शनलालसः।
विस्मितः कमलाकान्तो निर्जगाम विधेर्मुखात्।।

सहस्रशीर्षा पुरुषः पुनर्ब्रह्माणमब्रवीत्।
विधे! त्वमद्य मद्देहं प्रविश्याऽऽशु विलोकय।।

चराचरात्मकान् लोकान् सदेवासुरमानुषान्।
ततो विरिञ्चिर्भगवान् सुन्दरं कमलापतेः।

प्रविश्य सकलान् लोकान् दृष्ट्वाऽभूद्विस्मितो विधिः।
नापश्यन्निर्गमद्वारं पिहितं चक्रपाणिना।

ततोऽसौ नाभिचक्रस्य नाभिमार्गमविन्दत।
निर्गतस्तेन मार्गेण ब्रह्मा ब्रह्मविदां वरः।। इत्यादि।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथाऽत्र यत्परैः रुद्रस्य पितामहकार्यत्वेन नारायणसृष्टत्वेन च कारणत्वमयुक्तमिति यदपि **ब्रह्मविष्णुरुद्रेन्द्रास्सम्प्रसूयन्त** इति विष्णोः प्रसूतिमुद्दिश्य भगवज्जन्मनोऽवताररूपत्व उत्पत्तिप्रापकवाक्येषु चाऽकर्महेतुत्वेनातत्फलार्थत्वेन च विलक्षणतया भगवज्जन्मनः स्वेच्छाकृतस्य निरङ्कुशैश्वर्याविरोधित्वादिति भगवज्जन्मनः स्वेच्छावतारत्वादेव यदोः कुले जायमानो नारायण इति च। तत्सर्वमवैदिकमतान्धकूपपतनमूलं मतिवैपरीत्यमेव। **अजात इत्येवं कश्चिद्भीरुः प्रपद्यते।, रुद्र यत्त** इति मन्त्रेण जन्मरहिततया श्रुतस्य सकलदेवगरिष्ठयोर्ब्रह्मविष्ण्वोरपि प्रार्थनावशात् **का वै वरणा, का च नासा सर्वानिन्द्रियकृतान् दोषान्वारयतीति वरणा नाशयतीति नासे**त्यादिना परशिवध्यानस्थानवरिष्ठतया प्रसिद्धादविमुक्त-स्थलादाविर्भावस्य कर्ममूलत्वमिति **नमो विष्णवे बृहते करोमी**त्यादौ बृहत्पदेन व्यवहृतस्य **जातो बृहन्नभिपाति तृतीयमि**ति जन्मवत्तया श्रुतस्य मनुष्यमात्रादपि जायमानस्य पुरुषवीर्यकरणानुषङ्गस्त्रैणगर्भ-नरकवासहीनयोनिजत्वादि सकलजन्मलक्षणभृतश्श्रीपतेर्जन्मादिकं स्वेच्छावताररूपजन्माऽकर्मवश्यमिति प्रजल्पनस्य सर्वप्रमाणविरुद्धत्वात्। नारायणमुद्दिश्याऽकर्मवश्यत्वादीनां क्वचिदप्यश्रुतत्वाच्च। अत एवोक्तमुत्तररामायणे एकपञ्चाशे सर्गे दशरथम्प्रति दूर्वाससः उक्तिमनूद्य -

श्रृणु राजन् पुरावृत्तं तथा दैवासुरे युधि।
दैत्यास्सुरैर्भर्त्स्यमाना भृगुपत्नीं समाश्रिताः।।

तया दत्ताऽभयास्तत्र न्यवसन्नभयास्तदा।
तया परिगृहीतांस्तान् दृष्ट्वा क्रुद्धस्सूरेश्वरः।।

चक्रेण शितधारेण भृगुपत्न्याश्शिरोऽहरत्।
ततस्तां निहतां दृष्ट्वा पत्नीं भृगुकुलोद्वहः।।

शशाप सहसा कृद्धो विष्णुं रिपुकुलार्दनम्।
यस्मादवध्यां मे पत्नीमवधीः क्रोधमूर्छितः।।

तस्मात्त्वं मानुषे लोके जनिष्यसि जनार्दन।
तत्र पत्नीवियोगं त्वं प्राप्स्यसे बहुवार्षिकम्।।

इति शप्तो महातेजा भृगुणा पूर्वजन्मनि।
इहाऽऽगतो हि पुत्रत्वं तव पार्थिवसत्तम।।

राम इत्यभिविख्यातस्त्रिषु लोकेषु मानद (व)।
तत्फलं प्राप्स्यते वाऽपि भृगुशापभवं महत्।। इति।

तत एव हि श्रुतिसूक्तमालायां श्रीसुदर्शनाचार्यचरणैः -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इच्छावतारमुरशासनगर्भवासस्स्याच्चेदुदाहरणमेष विमर्शनीयः।
गर्भे वसामि परिवेष्ट्य जरायुणाऽहं मासान्बहूनिति महेश्वर कस्य कामः।।

इच्छाऽपि नूनमनुयान्ति पुरा कृतानि कर्माणि शंकर शुभाशुभलक्षणानि।
इच्छावतारवचनानि तु भारतादौ नारायणस्य गुणवादमुदाहरन्ति।।

इति प्रतिपादितम्। एवञ्च श्रुतिस्मृतिपुराणैर्न्यायोपबृंहितैः परमशिवस्य त्रिमूर्तिकारणतया सर्वकारणत्वमिति ब्रह्मविष्णुरुद्राणां द्विमूर्तिकारणतया कल्पान्तरविषयाऽवान्तरकारणत्वमिति च सिद्धम्। अत एव नारायणे - **विश्वाधिको रुद्रो महर्षिरिति**। श्वेताश्वतराणाम्मन्त्रोपनिषदि **यदा तमस्तन्न दिवा न रात्रिर्न सन्न चाऽसच्छिव एव केवलः**। इति च परमशिवस्यैव सर्वकारणत्वं तन्मूलं विश्वाधिकत्वञ्चाऽऽम्नायते।

नन्वस्या स्तृतीयेऽध्याये **वेदाहमेतं पुरुषम्महान्तमि**ति पुरुषसूक्तपठितमन्त्राम्नानेन तत्प्रतिपाद्यस्य नारायणस्य प्रत्यभिज्ञानात्तत्परताऽवसीयते - इति चेदुच्यते - प्रत्यभिज्ञानं हि स्थलद्वयपरामर्शापेक्षतया विलम्बितोपस्थितिकम्। तस्मादभिधानश्रुतीनामेव प्राबल्यम्। ततश्च **क्षरं प्रधानममृताक्षरं हरः। शिव एव केवलः।, मायिनन्तु महेश्वरमि**ति हरशिवमहेश्वरादिभिः प्रबलाभिरभिधानश्रुतिभिः प्रापितमस्याश्शिव-विषयत्वमपोदितुं देवतान्तरविषयत्वमापादितुञ्च न शक्नोति प्रत्यभिज्ञानम्। अथ यदि तस्यैव प्राबल्यमिष्यते चेत्, तर्हि **याते रुद्र शिवातनूः, यामिषुं गिरिशन्त हस्त** इति श्रीरुद्रगतमन्त्राणामप्यत्र श्रूयमाणतया श्रीरुद्रप्रत्यभिज्ञया मन्त्रोपनिषदः मन्त्रोपनिषद्गत **वेदाहमेतमि**त्यादि मन्त्रप्रत्यभिज्ञया पुंसूक्तस्याऽपि शिवपरत्वसिद्ध्या परेषां वृद्धिमभीप्सतां मूलमेव नष्टमिति न्यायभाजनतया हास्यास्पदत्वमवार्यम्।

किञ्च - विमृश्यमाने पुंसूक्तस्याऽपि नारायणपरत्वमलभ्यमिति स्पष्टी भविष्यति परस्तात्। यदत्र परैः बह्वृचशतपथब्राह्मणसुबालमहोपनिषत्सामवचनादिभिर्हिरण्यगर्भजन्यत्वे श्वेताश्वतरवाक्येन हिरण्यगर्भजनकत्वे च रुद्रस्याऽवगम्यमाने तयोरविरोधेन निर्वाहाऽसम्भवे प्राबल्यदौर्बल्यचिन्तायुक्तेत्यादिना रुद्रस्य चतुर्मुखजन्यत्वं युक्तमित्यन्तमनल्पविकल्पं यत्प्रजल्पितं तदखिलं पुरस्तादेव त्रिमूर्तीनां कल्पभेदेन परस्परस्मादुत्पत्तिव्यवस्थापनेन रुद्रांशस्यैवाविर्भावनिरूपणेन च वातूलतूलीकृतम्। ततश्च - ननु परमकारणत्वं शिवशब्दवाच्यस्यैव श्रूयते - **यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केवल** इति। न तस्य भगवदसाधारण्यस्य बहूपनिषद्वाक्यैर्न्यायानुगृहीतैर्निश्चितत्वात्। किञ्च नारायणमहापुरुषादिशब्दानाम-साधारणत्वाद्बहूपनिषत्स्थत्वात् साधारणानामेकोपनिषत्स्थानां शिवादिशब्दानां तदनुरोधेन वर्णनीयत्वाद्विशेषतः पुरुषसूक्तैकार्थ्यावगमाच्च शिवरुद्रादिशब्दानामपि परमपुरुषपरत्वसिद्धेरिति **शिवश्शिवानामशिवो-ऽशिवानाम्।, शिवास्ते संतु पन्थानः** शिवमस्त्विति च शिवशब्दः प्रयुक्तः। पुंलिङ्गवचनान्तस्त्वसाधारण इति चेत्तर्हि प्रातिपदिकस्याऽसाधारण्यमनुमतं भवतीति च यदुक्तन्तदपि, **कपिरपि च कापिशायनमदमत्त** इति न्यायेनाऽवैदिकस्य शिवप्रद्वेषदोषविलसितमेव।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तथाहि - शिवशब्दस्य शिवे असाधारण्यं नास्तीति वदन्तमेवं प्रष्टव्यम् - किन्तस्य **पन्थानस्सन्तु ते शिवा** इत्यादिप्रयोगविषयसाधारणशुभतारूढिव्यतिरेकेण शिवे असाधारणरूपेण रूढिरेव नास्तीत्युच्यते? उत तत्सत्वेप्यक्षादिशब्दवदनेकशक्तिकत्वात्स्वतो न निर्णायकत्वमिति? नाद्यः **कल्याणं मंगलं शिवमित्याद्यनुशासनव्यतिरेकेण शिवश्शूली महेश्वरः।, ईशानश्शशिशेखरः पशुपतिश्शूली शिवश्शङ्करः।, व्योमकेशो महादेवः प्रमथाधिपतिश्शिवः।, शिवं मोक्षे च भद्रे च सलिले च शिवो हरे। शिवो भोले पद्मरागे हरे कीले शिवं जले। शिवं भद्रं शिवं शम्भुश्शिवा गौरी शिवाहयेत्याद्यनन्यथासिद्धानेकानुशासनबलात्। विष्णुर्नारायणः कृष्ण** इत्याद्यनुशासनबलात्कृष्णशब्दस्य पर्णविशेषे रूढिव्यतिरेकेण विष्णाविव **शस्तञ्चाथ त्रिषु द्रव्ये पापपुण्यसुखादि च** इति स्मृतं सर्वद्रव्यसाधारणमर्थवल्लिङ्गतां विना नित्यपुंलिङ्गतया असाधारणरूपेण उदाहृतानामनेकेषामनुशासनानां वैयर्थ्यापत्तेः।

नापि द्वितीयः। केवलयोगेन कुमुदादिषु प्रयुज्यमानानां पङ्कजादिशब्दानां योगरूढ्युभयानुग्रहलाभेन पद्मादिपरत्वस्येव शिवशब्दस्य शुभत्वनीलकंठत्वादिविशिष्टरूपविषयशक्तिद्वयानुग्रहलाभेन परमेश्वरपरत्वस्यौत्सर्गिकतया प्रकरणोपपदाद्यनुपपीडितात्तस्मात्सर्वत्र परमेश्वरस्य प्रतीतेः स्वत एव च तस्य निर्णायकत्वाच्च। अत्र पुंलिङ्गैकवचनान्तस्त्वसाधारण इति चेत्तर्हि प्रातिपदिकसाधारण्यमनुज्ञातम्भवतीति यदुक्तन्तदज्ञानविलसितमेव। भिन्नभिन्नशक्तिमतां शिवादिशब्दानां सारूप्येऽपि प्रातिपदिकानां विभिन्नत्वेन सारूप्यमात्रेण साधारण्याऽसिद्धेः।

अथ नारायणमहापुरुषादिशब्दानामसाधारणत्वादिति यदसाधारण्यमभिमतन्तदप्यभिमानमात्रमेव। तथा च विष्णुपुराण एव **ब्रह्मा नारायणाख्योऽसौ कल्पादौ भगवान्यथा" इति। नारायणाख्यो भगवान्ब्रह्मा लोकपितामहः** इत्याद्यनेकप्रदेशेषु। कौर्मे **अवाप्य संज्ञां गोविन्दात्पद्मयोनिः पितामहः।** इति प्रस्तुत्य **नारायणाख्यो भगवान्यथा पूर्वं प्रजापतिः** इति। आश्वलायनस्मृतौ **तस्मादण्डादभूत्स्रष्टा शिवात्मा चतुराननः। सर्वलोकस्य निर्माता ब्रह्मा विश्वसृजां पतिः। स चाप्सु शयनादेव शिवात्मा स्वेच्छया चिरम्। नारायणाख्यामभजच्छक्तिरूपः प्रजापतिः।।** इति। कूर्मपुराणे **ब्रह्मस्वरूपिणं देवं जगतः प्रभवाप्ययमिति** ब्रह्माणं प्रस्तुत्य **आपो नारा इति प्रोक्ता आपो वै नरसूनवः। ता यदस्यायनं पूर्वं तेन नारायणस्स्मृत** इति नारायणपदस्य ब्रह्मनिर्वचनात्। तत्रैव पुराणे **नारा अप्ययनं यस्मात्तेन नारायणस्स्मृत** इति नारायणपदस्य शिवपरत्वनिर्वचनात्तस्य विष्ण्वसाधारण्यभ्रांतेर्बहुपुराणनिर्धूतत्वात्।

अथ महापुरुषपदस्याऽपि क्वचिदपि नारायणनामत्वेनाऽनुशासनाभावात्। प्रयोगमात्रस्य गौतमस्मृतिपठितकृच्छ्रमंत्रेषु महापुरुषायेति शिव इव योगेनाप्युपपत्तेरितरस्याभिधानत्वात्। तथात्वेऽपि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पृथक्पदयोरिह श्रवणेन तस्याश्रवणात्। अवयवार्थव्यवस्थितिसिद्धौ योगरूढिपदप्रतिपाद्यावयवार्थपर-वाक्यस्याऽन्यत्राऽपि प्रयोगस्य दुर्वारत्वात्। अन्यथा पङ्कजादिशब्दानां योगरूढिवादिना केवलयोगवादिन-प्रत्यन्यत्राऽपि प्रयोगप्रसंगस्यापादकोक्तौ मूकीभावस्य शरणीकरणीयते। न व्यस्तयोः प्रकृते व्यत्यस्तयोरपि। पृथक्पदयो रूढेरुपपादयितुमशक्यत्वात्। भवादिशिवनामाष्टकमध्ये पठितस्य - **अथाऽष्टभिर्नामभिरित्यादि** बोधायनसूत्रे तन्नामत्वेन व्यवहृतस्य - **पूज्यते यत्सुरैर्नित्यं महांश्चैव प्रमाणतः। धातुर्महेति पूजायां महादेवस्ततस्स्मृतः।।** इति साम्बपुराणे तन्नामत्वेन निरुक्तस्य महच्छब्दस्य विशेष्यतया **पुरुषम्महान्तमित्यत्र** शिवपरत्वस्यैव प्रतीयते। एवञ्च शिवाऽसाधारणनामत्वेनाऽनेकानुशासनपुरुषमहापुरुषादिशब्दानां शिवासाधारण्यानभ्युपगमः, क्वचिदप्यनुक्तानां नारायणनामत्वेनाऽस्मृतानां पुरुषमहापुरुषादिशब्दानां नारायणाऽसाधारणत्वाऽभ्युपगम इत्यपि परेषामप्रामाणिकमतावलम्बमूलमतिवैपरीत्यमेवेति विशदीकृतम्।

अथ एकोपनिषत्स्थानां शिवादिशब्दानामिति यदुक्तं तदत्यन्ताऽनृतमेव। **ईशावास्यमिदँ सर्वमि**तीशावास्ये, **ईशानो भूतभव्यस्ये**ति कठोपनिषदि, **शिवमद्वैतं चतुर्थं मन्यन्त** इति माण्डुक्यादिषु चैवं सर्वास्वप्युपनिषत्सु श्रूयमाणत्वात्। नारायणमहापुरुषादिशब्दानां बहूपनिषत्स्थत्वादिति यदुक्तं तदपि तेषां शब्दानां विष्ण्वसाधारण्याभावस्य निरूपितत्वेन भ्रान्तिमूलमेव। इयं मन्त्रोपनिषत् नारायणपरीकर्तुमशक्येति परेषामपि विदितमेव। अत एवाऽन्यत्र हेत्वाभासैर्नारायणपरेति प्रतिज्ञाय **अजात इत्येवं कश्चिद्भीरुः प्रपद्यते।, रुद्र यत्ते दक्षिणं मुखं तेन मां पाहि नित्यमि**तिमन्त्रमुपलक्ष्य दक्षिणमुखं शिवासाधारणं नारायणस्य दुर्घटमिति निश्चित्य, छिद्रान्तराल वृश्चिकसंदष्टचोरन्यायेन मौनावलम्बनेन पलायनस्यैव शरणीकृतत्वात्। अथाऽपि यत् योगेन विष्णुनामसहस्रपाठमात्रेण च हरशिवशम्भुमहेश्वरादि **शिवसाधारण-श्रुतीनां** नारायणपरत्वप्रत्यभिज्ञाऽऽसीत्, तदप्यगतिकमेवेति विशदम्। योगरूढिरूपशक्तिद्वयानुग्रहलाभे सति योगशक्तिमात्रग्रहणस्याऽन्याय्यत्वात्। पदार्थनिर्णये स्तुत्यर्थत्वगन्धरहितानां लोकवेदसाधारणनाम-परिगणनैदम्पर्यप्रवृत्तानामभिधानकोशस्मृतीनामेव प्रमाणतया **स्तुवन्नामसहस्रेणे**ति स्तुत्यर्थं प्रवृत्तस्य सहस्रनामस्तवस्य शक्तिग्राहकत्वाभावात्। नामसहस्रमध्येऽनेकदेवान्तरनामपरिगणनदर्शनेन तेषां तद्वाचित्वे प्रमाणाभावात्। अन्यथा भारतलैङ्गादित्यपुराणादिपठितशिवनामसहस्रानन्तर्भूतविष्णुनामाऽसम्भवात्। **नामानि तव गोविन्द यानि लोके महान्ति च। तान्येव मम नामानि नाऽत्र कार्या विचारणे**ति हरिवंशे कैलासयात्रायां शिववचनेन सर्वेषां विष्णुनाम्नामन्येषाञ्चोत्कृष्टनाम्नां हिमकरनाम्नां, घनसारनामत्ववत्, शिवनामत्वसिद्धेश्च, क्वचिदपि नाम्ना विष्णुपरत्वनिर्णय एव लुप्येत। गणपतिहनुमदादिनामसहस्रस्तवादिष्वपि सकलदेवनामपरिगणनदर्शनेन सर्वासामपि श्रुतीनां तत्तत्परत्वापत्तेश्च। **सर्वाणि ह वा एतस्य नामधेयानी**त्याश्वलायनस्मारणाच्च। अभिधानश्रुत्या शिवविषयत्वसिद्ध्या - परेषां मौनमेव शरणीकरणीयं स्यादिति दिक्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ **यमन्तस्समुद्रे कवयो वयन्ति विद्युतः पुरुषादः** धीति समुद्रान्तर्वर्तिविद्युद्वर्णपुरुषप्रतिपादकत्वात् **अम्भस्य पार** इत्यनुवाको नारायणपर इति यदुक्तं तदप्यसत्।

लिङ्गमूर्तौ महाज्वालामालासंवृतमव्ययम्।
लिङ्गस्य मध्ये रुचिरं चन्द्रशेखरविग्रहम्।।

व्योममार्गे तथा लिङ्गं ब्रह्माणं हंसरूपिणम्।
विष्णुं वराहरूपेण लिङ्गस्याधस्त्वधोमुखम्।।

ब्रह्माणं दक्षिणे तस्य कृताञ्जलिपुटं स्थितम्।
वामे विष्णुं महाबाहुं कृताञ्जलिपुटं तथा।।

मध्ये लिङ्गं महाघोरं महाब्धेरम्भसि स्थितम्।
ध्यात्वा प्रदोषसमये सर्वसिध्दिमवाप्नुयात्।।

इति पुराणवचनान्महालिङ्गस्यैव जगत्प्रसूतिहेतुकत्वेन सर्वोत्कृष्टत्वप्रतिपादनात्।

हिरण्यगर्भाद्यष्टकस्य च, **य ईशे अस्य द्विपदश्चतुष्पद** इति **एतावन्तो वै पशवो द्विपदश्चतुष्पद** इति श्रुत्यन्तरप्रतिपादितद्विपाच्चतुष्पाद्रूपपशुपतित्वरूपशिवासाधारणलिङ्गविन्यासेन शिवपरत्वावसायात्।

ननूत्तरनारायणे नारायणासाधारणस्य लक्ष्मीपदस्य श्रुतत्वात्तदेकवाक्यतयाऽस्यानुवाकस्याऽपि नारायणपरत्वं। सिद्ध्यतीतिचेन्न - **तत्र ह्रीश्च ते लक्ष्मीश्च पत्न्याविति**, ह्लेखावाच्योमापतित्वलिङ्गकस्य प्रथमश्रुतत्वेन लक्ष्मीपतित्वलिङ्गस्य तदनुसारेण नेयत्वात्।

लक्ष्मीशब्दस्याऽपि वायुसंहितायां **तत्र माहेश्वरी लक्ष्म्या मूर्तिः मूर्तिमतः प्रभोः** इत्यारभ्य

तस्याङ्कमण्डलाऽऽरूढा शक्तिर्माहेश्वरी परा।
महालक्ष्मीरिति ख्याता श्यामा सर्वमनोहरा।।

इति श्रुतायां माहेश्वरशक्तिरूपायां परशक्त्यंशबीजायां वृत्त्युपपत्तेः **श्रीश्च लक्ष्मीश्च पत्न्याविति** वाजसनेयिपाठेऽपि श्रीशब्दस्य समानप्रकरणगतह्लेखा श्रुत्यनुरोधेन **श्रियं लक्ष्मीमौपलामम्बिकां गामित्यायुष्यसूक्ते** अम्बिकायामेव प्रयोगदर्शनात्तदन्यथा नेयत्वस्य दुरुपपन्नत्वात्।

न च ह्रीशब्दस्यैव लक्ष्म्यां वृत्तिरभ्युपेयत इति वाच्यं ह्लेखायां कमलायां प्रयोगाऽदर्शनेन वैपरीत्यशङ्काया अनवकाशात् **अम्भस्य पार** इत्यन्ते **पुरुषस्य विद्म सहस्राक्षस्य महादेवस्य धीमहि।, एव हि देवः प्रदिशोनुसर्वाः, विश्वतश्चक्षुरुत विश्वतोमुख।** इत्यादीनां मन्त्रोपनिषदथर्वशिरस्समाम्नातानां मन्त्राणां प्रत्यभिज्ञानात् **प्रजापतिश्चरति गर्भे अन्तः** इत्यत्र प्रजापतिशब्दस्य -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यस्मात्पाति प्रजास्सर्वाः प्रजापतिरिति स्मृतः।
देवेषु च महान्देवो महादेव इति स्मृतः॥

इति लैङ्गे शिवनामसु निर्वचनदर्शनेन शिव एव प्रवृत्तेरुपपन्नत्वात्। अथाऽत्र विष्णुस्मृतौ भगवत्समाराधने **हिरण्यगर्भ** इत्यष्टाभिर्हविर्निवेदने विनियोगादस्याऽष्टर्चस्य नारायणपरत्वमिति यदुक्तं तदप्ययुक्तम्।

हिरण्यगर्भस्समवर्तताग्र इत्याधारमाधारयतीति वायव्यपशौ एन्द्रे द्वितीयाधारे विनियोगवन्नारायणाराधने विनियोगमात्रेण श्रुतिलिङ्गादिसिद्धशिवपरत्वाक्षतेः। हिरण्यगर्भशब्दस्याऽपि **हिरण्यरेता हुतभुग्रेतोभूदस्य गर्भगः। तस्माद्धिरण्यगर्भोऽसौ पुराणेस्मिन्निरुच्यत** इति निर्वचनेन शिवपरत्वात्। एतेन **हिरण्यगर्भ-श्शत्रुघ्नः** इति भगवन्नामसहस्रपाठेन हिरण्यगर्भशब्दवाच्यो नारायण इति स्थितमिति यदुक्तं तदपि निरस्तम्। नामसहस्रस्तवस्य पदार्थविषयनिर्णायकत्वाभावस्य पुरस्तान्निरूपितत्वात्। अत्र श्रुतेन शत्रुघ्न इति नाम्ना नामिनश्शत्रुमित्रादियुक्ततया देवसामान्यतामूरीकुर्वता सर्वेश्वरत्वं दूरीकृतमिति परेषामनर्थान्तरमापन्नमिति च यत्किञ्चिदेतत्।

अथाऽत्र यदपि **सूर्या चन्द्रमसौ धाता यथा पूर्वमकल्पयदि**त्यत्र धातृशब्दं नारायणपरं प्रतिज्ञाय, **विश्वाधिको रुद्र** इति श्रवणात्, **यः परस्स महेश्वर** इत्युपसंहारे श्रुतत्वाच्च धातृशब्दस्याऽपि रुद्रपरत्वं न्याय्यमित्याशङ्क्य, उपक्रमस्थतया धातृशब्दस्य रूढिपरित्यागे को हेतुः रुद्रमहेश्वररूपश्रुतिद्वयमिति चेत्तथापि न बाधकम्। तुल्यबलत्वात् धातृपदश्रुतिरेकाप्युपक्रमस्थतया अनुगृहीतां रुद्रमहेश्वरश्रुत्योरनेकत्वेप्युपक्रमविरोधाद्दुर्बलत्वमित्यादि यत्प्रजल्पितं तदपि स्वपक्षे श्रुतिसमन्वयासिद्धिकलितवैमनस्य मूलमेव। धातृपदस्य नारायणे रूढेरेवाऽभावात् धातृपदस्य विधातृपरत्वपक्षेऽपि उपसंहारगतप्रमाणानामनेकत्वे उपक्रमबाधकत्वस्य आकाशोऽर्थान्तरत्वादित्यधिकरणे निर्णीतत्वात्। तथाहि - **आकाशो ह वै नामे**त्यादिवाक्यस्य उपक्रमस्थाभ्यामाकाशश्रुतिप्रसिद्धिलिङ्गाभ्यां पाश्चात्यानामपि नामरूपनिर्वोढृत्व-तदर्थान्तरत्व-अमृतत्वलिङ्गब्रह्मात्मश्रुतीनां भूयस्तया प्राबल्यात्तदनुरोधेनोपक्रमप्राप्तमपि भूताकाशपरत्वमपोह्य ब्रह्मपरत्वं व्यवस्थापितम्। तस्मादौपसंहारिकाऽनेकरुद्रमहेश्वरश्रुत्यनुरोधेन धातृपदं योगेन शिवपरतयैव नेयमिति सिद्धम्।

नन्वत्र **सहस्रशीर्षं देवमि**त्यनुवाके नारायणपरम्ब्रह्मेत्यादिना नारायणस्य परब्रह्मत्वं श्रुतमितिचेत्तस्य **दीपो ज्योतिः परम्ब्रह्मे**तिवदुपासकस्तुतिवादत्वेन न तेन नारायणस्य परब्रह्मत्वं सिद्ध्यति। तथाहि - तत्र

दहरं विपापं परवेश्मभूतं यत्पुण्डरीकं पुरमध्यसंस्थम्।
तत्राऽपि दहरं गगनं विशोकस्तस्मिन्यदन्तस्तदुपासितव्यम्॥

इति दहरोपासनां विधाय,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः।
तस्य प्रकृतिलीनस्य यः परस्स महेश्वरः।।

इत्युपास्यं महेश्वरशब्दवाच्यमेव प्रतिपादयति। न चाऽस्या निषदश्शिवोपासनाविधायकत्वेऽस्या नारायणसंज्ञा न संगच्छत इति शङ्क्यम्। नारायणाख्यर्षिदृष्टत्वेन वामदेव्यं सामेतिवत् तत्संज्ञकत्वेनाऽविरोधात्।

ननु नारायण एवोपास्यो भवति हृदयन्त्वन्येषामेवोपासकानां भविष्यतीतिचेदुच्यते। नारायणप्रकरणे **अनन्तमव्ययं कविं समुद्रेन्तं विश्वशम्भुवमि**ति नारायणस्य प्रशंसामनु **पद्मकोशप्रतीकाशमि**त्यादिना निगदितं हृदयं नारायणस्यैव भवितुमर्हति।

पूर्वानुवाकेन **दहरमि**त्यादिना श्रुतमुपासनाविषयन्तु **सन्न्यासयोगाद्यतयश्शुद्धसत्त्वा** इति यत्यात्मप्रकरणे दृष्टं हृदयं यतिसम्बन्धि। यथा दर्शपूर्णमासप्रकरणे **समिधो यजती**ति वाक्यविहिता प्रयाजा दर्शपूर्णमासाङ्गाः, यथा च **हृदयस्याऽग्रेऽवद्यती**त्यत्र निर्दिष्टं हृदयं प्राक्प्रस्तुतस्य पशोरेव। न तु यजमानस्य, तथा **पद्मकोशप्रतीकाशमि**त्यादिना वर्ण्यमानं हृदयपुण्डरीकमशब्दसन्निधापितस्योपासकस्य न भवति किन्तु प्राक्शब्दसन्निधापितस्य नारायणस्यैवेति युक्तम्।

ननु नारायणस्योपासकत्वे **नारायणपरम्ब्रह्मे**त्यादिवाक्येन तस्य परब्रह्मत्वाद्युपास्य धर्माभिधानं न सङ्गच्छत इति चेन्न। अस्य वाक्यस्योपासकस्तुतिवादत्वेनाऽर्थवादत्वात्। नारायणस्य ध्यातृध्येयविवेक-रहितसमाध्यवस्थायां परब्रह्मणा शिवेनैक्यानुसन्धानाद् गरुडभावनया गरुडमात्मानं मन्यमानस्य मन्त्रिण इव, परब्रह्मेत्यादिधर्माणां सुसङ्गतत्वात्। अत एव **नारायणम्महाज्ञेयमि**ति विशेषणमपि तस्य महाज्ञानित्वमेव व्यञ्जयन्नुक्तार्थं परिपुष्णातीत्यलम्।

ननु यद्येवं **स ब्रह्मा स शिवस्सहरिस्सेन्द्रस्सोक्षर** इत्यादिवाक्येन ब्रह्मशिवादीनामुपास्यविभूतित्वाम्नानेनाऽत्रोपास्यश्शिवादन्य इत्येव प्रतीयते। तस्य शिवत्वे स शिव इति विभूतिषु परिगणनायोगादितिचेदुच्यते। तत्र हरिब्रह्मादिप्रायपाठानुरोधेन शिवपदस्य कालरुद्रवाचित्वाऽवगमात्। अत्र **स हरिरि**ति हरेरुपास्यविभूतित्वाम्नानेन तस्योपास्यत्वाऽसम्भवेनोपासकत्वावसायादपि नारायणोपनिषदि दहरविद्योपास्यश्शिव एवेति सिद्ध्यति।

किञ्च - अत्र शिवस्यैवोपास्यत्वादुपास्यरूपसमर्पकम् **ऋतँ सत्यं परम्ब्रह्म पुरुषं कृष्णपिंगलमि**त्यादिमन्त्रः श्रूयते। नारायणस्योपास्यत्वे तस्यैव हि रूपं समर्पणीयं न तत्किमपि श्रूयते - ततश्चाऽत्रोपास्यश्शिव एवेति च वज्रलेपः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

किञ्च - इयं हि उपनिषदुपक्रमे दहरविद्यां तदनु अन्तरादित्यविद्यां ततो गायत्रीविद्याञ्च प्रकाशयन्ती विद्याऽत्र यस्यैकत्रैवोपसंहारं स्पष्टीकरोति। अत्रैवाऽन्तरादित्यविद्यायां श्रूयमाणा **नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरूपाय हिरण्यपतयेऽम्बिकापतय उमापतये पशुपतये नम** इत्यादिमन्त्राः उमापतिमेव तत्र ध्येयमावेदयन्तस्ते कथमिव दहरविद्यायां श्रीपतिमुपास्यमनुमन्येरन्। अत एव प्रकृतोपनिषदुदीरितविद्यात्रितयेप्युपास्यरूपसमर्पणाय प्रवृत्तो **ऋतँ सत्यम्परं ब्रह्मे**ति मन्त्रः देवतान्तरमुपास्यपदादुत्सारयन् **शिव एको ध्येयश्शिवंकरस्सर्वमन्यत्परित्यज्ये**त्यथर्वशिखासूक्तिं प्रोद्बलयति।

किञ्च यद्यत्र श्रीपतेरुपास्यत्वमिष्येत तर्हि तदीयमेव रूपमुपास्यरूपसमर्पणायोपदिश्येत नहि तदुपदिश्यते। किन्तु कृष्णपिङ्गलत्वविरूपाक्षत्वादियुतं शैवमेव रूपमुपदिश्यते। तस्मात्सर्वत्र सर्वथा शिव एवोपास्य इति वज्रलेपः।

अपि चाऽत्र उपनिषदि **सद्योजातं प्रपद्यामी**त्यादि पञ्चब्रह्ममन्त्रसहितम् **ऊर्ध्वाय नमः, ऊर्ध्वलिङ्गाय नम** इत्यादिना परैः दुर्वचं दुर्दर्शं दुश्श्रवञ्च लिङ्गसूक्तमपि श्रूयते। अतोऽपीयं शैवी, न कथमपि परैः स्वायत्तीकर्तुं शक्येति ध्रुवम्।

अथ पुंसूक्तं नारायणपरमेवेति यः परकीयोऽभिमानस्तदुत्सादनमावश्यकम्। ननु मुद्गलोपनिषदि पुंसूक्तं विष्णुपरतया व्याख्यातम्। श्रुतिनिश्चितस्यैवाऽर्थस्य यथार्थतया पुनस्तदर्थविचारोऽनर्थक इति चेन्न। क्वचित्पुंसूक्तस्य विष्णुपूजादिषु विनियुक्ततया विनियुक्तार्थप्रकाशनेन मुद्गलोपनिषद्विवरणस्य चरितार्थत्वेन श्रुतिलिङ्गाद्यवगमितयथार्थबाधकत्वाऽभावात्। अन्यथा **अपशवो वा अन्ये गो अश्वेभ्यः पशवो वै गो अश्वा** इति श्रुत्यैव गवामश्वानाञ्च पशुपदार्थत्वेन विवृततया तादृशार्थग्रहणे **अग्नीषोमीयं पशुमालभेते**त्यत्र भूयानुपप्लव आपद्येत। पुंसूक्तस्य विनियोगानुसारेणाऽर्थान्तराणां श्रुत्यादिषूपलम्भेऽपि **नान्यः पन्था अयनाय विद्यते** इति तदीयोक्त्या तस्यैकत्रैव तात्पर्यं विद्यत इत्यवगम्यते। ततश्च तस्य श्रुतिलिङ्गानुसारेण यथार्थप्रकाशनमावश्यकमेव। अत्र **उतामृतत्वस्येशानः** इतीशानश्रुतिसूक्तं शिवपरतया निर्धारयति।

ननु अमृतत्वस्येतीशितव्योपादानात्तदैश्वर्यरूपयौगिकार्थविधित्सया प्रयुक्तमीशानपदम्। न रूढ्या शिवं प्रतिपादयतितुं शक्तमिति चेन्न। ईशितव्यानुपादान इव तदुपादानेऽप्यवयवशक्त्या यौगिकार्थं प्रतिपादयत एव तस्य समुदायशक्त्या शिवस्याऽपि प्रतिपादकत्वस्यौत्सर्गिकस्य दुर्वारत्वादिह केवलयौगिकत्वस्याऽसिद्धेः। अवयवार्थप्रतिसम्बन्धिनोऽनुपादान एव समुदायशक्त्युन्मेष इति कस्यचिद्व्युत्पत्तिसिद्धनियमस्याऽभावात्। अत एव **शब्दादेव प्रमित** इत्यधिकरणे **अङ्गुष्ठमात्रः पुरुष** इति मन्त्रप्रतिपाद्यपुरुषस्य **ईशानो भूतभव्यस्ये**तीशितव्यस्योपादानेऽपीशानश्रुत्या परब्रह्मपरत्वं भगवद्बादरायणेन निर्णीतम्। अन्यथा

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तत्राऽपीशानशब्दादैश्वर्यरूपपरब्रह्मलिङ्गस्यैव प्रतीत्यापत्त्या तदभिधानश्रुतिरूपशब्दान्निर्णयो न सिद्ध्येत्। न च तत्र लिङ्गादेव निर्णयोऽस्त्विति शङ्क्यम्। प्रथमश्रुतस्याऽल्पपरिणामरूपलिङ्गस्य विरोधिना चरमश्रुतेन लिङ्गमात्रेण निर्णयस्याऽयुक्तत्वात्। न चाऽल्पपरिमाणत्वं जीवलिङ्गमेव न भवतीति शङ्क्यम्। तस्य जीवलिङ्गत्वाऽभावे पूर्वपक्षबीजस्यैवाभावेनाऽधिकरणस्यानारम्भणीयत्वापत्तेः। परैरपि तस्मिन्नधिकरणे ईशानशब्दस्य स्वाभिमते तत्त्वे शक्तिसत्वाभिमानेनैव नेश्वरसम्बन्धिलिङ्गान्निर्णयः। किन्त्वीश्वरवाचिशब्दादेवेत्येवकाराऽभिप्राय इत्युक्तत्वाच्च। तस्मादङ्गुष्ठमन्त्रस्येव पुरुषसूक्तस्याऽपीशानश्रुतिसमर्पिते परब्रह्मणि शिवे पर्यवसानमेव युक्तम्।

ननूपक्रमे **सहस्रशीर्षा पुरुष** इति नारायणाऽसाधारणः पुरुषशब्दश्श्रूयते। पुरुषशब्दो हि **पुरुसंज्ञे शरीरे हि शयनात्पुरुषो हरिः** इत्यादिना हरेरभिधानतया पुराणेषु निरुक्तः। तस्मादुपक्रमगतपुरुषश्रुत्या नारायणपरमेवेदं सूक्तमिति चेन्न। **पुरुषो ह वै नारायणोऽकामयत**ेत्यादौ पुरुषशब्दस्य नारायणे प्रयोगस्य विद्यमानत्वेऽपि, **पुरुषावात्ममानवावि**त्यभिधानकोशस्मृतेर्लौकिकवैदिकप्रयोगबाहुल्याच्च, आत्मसामान्ये तस्य शक्तेस्सिद्धत्वेन तत एव तदुपपत्तिसिद्ध्या न पृथिग्विष्णौ तस्य शक्तिं कल्पयितुं युज्यते - बर्हिराज्याधिकरणविरोधात्। तत्र हि म्लेच्छैः तृणघृतादिजातिमात्रे आर्यैस्संस्कृततृणादावेव प्रयुज्यमानानां बर्हिराज्यादिशब्दानां यववराहाधिकरणन्यायेन शास्त्रस्थप्रसिद्धेर्बलवत्त्वात्संस्कारनिमित्तकत्वमाशङ्क्य शास्त्रस्थप्रयोगस्य जात्यव्यभिचारात् जातिमात्रव्यवहारस्य संस्कारयुक्तेऽव्यभिचारादव्यभिचारिजातिशक्तिमादाय सर्वेषामपि प्रयोगाणामुपपन्नत्वेन विरोधाऽभावाज्जातिवाचितैवेति सिद्धान्तितम्। एवञ्च यदा म्लेच्छगतयाऽपि सामान्यप्रसिद्ध्या सामान्यशक्तिसिद्धौ तद्द्वारैवार्थव्यवहारसिद्धिविशेषलाभ इति न विशेषशक्तिकल्पनं तदा का कथा प्रकृतविषये। इह सामान्यप्रसिद्धेरप्यार्यगतत्वेन दौर्बल्यशङ्काया एवाऽनवकाशात्। नन्वेवमस्तु प्रयोगमात्रस्याऽन्यथासिद्धिः। तथाऽपि **पुरुसंज्ञे शरीरेऽस्मिन् शयनात्पुरुषो हरिः।** इति पौराणिकानां तस्य तन्नामत्वेन निर्वचनमनन्यथासिद्धं विशिष्याऽपि शक्तिं कल्पयतीति चेन्न सामान्यशक्तस्याऽपि पुरुषशब्दस्य श्रुत्यादिषु क्वचित्प्रकरणादिसामर्थ्यान्नारायणे पर्यवसानमस्तीत्येतावत् जपनेन चरितार्थतया अर्थवादप्रधानपौराणिकनिर्वचनस्य चित्राधिकरणे स्तोत्रविशेषनामधेयत्वेन सिद्धस्य प्रष्ठशब्दस्य **क्वचित्प्रष्ठैरुपतिष्ठत** इत्यादौ तत्साधने रथन्तरादावपि लक्षणया प्रवृत्तिरस्तीति तन्निर्वहणेन चरितार्थस्य रथन्तरादौ प्रवृत्तिनिमित्तप्रतिपादनपरस्य **आपो वा ऋत्विय मार्छन् तासां वायुः प्रष्ठे व्यवर्तत** इत्यादेः श्रौतार्थवादस्येवाऽन्यथासिद्धत्वेनाऽनन्यथासिद्धाभिधानकोशस्मृत्यादिक्लृप्तशक्त्या उपपादनीयप्रयोगविषये शक्त्यन्तरकल्पकत्वायोगात्। एवं श्रौतार्थवादस्यैव विशेषशक्तिकल्पकत्वाऽसिद्धौ किमुत पौराणिकार्थवादनिर्वचनस्य। एतेन तथा पुरुषशब्दोऽयं वासुदेवेऽवतिष्ठते। भगवानितिशब्दोऽयं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तथा पुरुष इत्यपि निरुपाधी च वर्तते। वासुदेवे सनातने इत्यादीनि परोदाहृतानि पुरुषशब्दस्य विष्णावसाधारण्यौत्सर्गिकत्वप्रतिपादनच्छायापन्नानि पौराणिकवचनानि व्याख्यातानि। नन्वेवमपि आरुणकेतुके **पूर्वमेवाऽहमिहासमि**ति कूर्माकृतिलिङ्गोपस्थापितस्य नारायणस्य वचनं प्रदर्श्य **तत्पुरुषस्य पुरुषत्वमि**ति तदर्थं तत्र पुरुषशब्दस्य प्रवृत्तिनिमित्तमभिधाय **सहस्रशीर्षा पुरुषस्सहस्राक्षस्सहस्रपाद्भूत्वोदतिष्ठदि**तिपाठात्पुरुषशब्दस्य नारायणपरत्वं निर्णीयत इति चेन्न। आरुणकेतुके **कूर्मः पुरुषो भूत्वोदतिष्ठदि**त्यपुरुषस्य पुरुषभावापत्तिप्रतिपादनेन सहस्रशीर्षेत्यादिमन्त्रस्थपुरुषपदस्याऽनन्तरवाक्यप्रतिपन्नप्रवृत्तिनिमित्तकत्वव्यतिरेकस्याऽवसायात्। अन्यथा तेन प्रवृत्तिनिमित्तेन प्रागपि तस्य पुरुषशब्दाभिलप्यतया पुरुषो भूत्वेत्युक्तिविरोधापत्तेः।

किञ्च पुरुषशब्दस्य -

स वै शरीरे प्रथमः स वै पुरुष उच्यते।
आदिकर्ता स भूतानां ब्रह्माग्रे समवर्तत।।

इति चतुर्मुखेप्यनेकपुराणेषु प्रयोगदर्शनेन एवमनेकया शक्त्या साधारणत्वान्न पुरुषश्रुत्या देवताविशेषनिर्णयस्सिद्ध्यति। यदीह ततो निर्णयस्स्यात्तर्हि - **य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते।, य एषोऽक्षिपुरुषो दृश्यते। दिव्यो ह्यमूर्तः पुरुषः परात्परं पुरिशयं पुरुषमीक्षिते।।, अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति।** इत्यादिश्रुतीनां परमते पुरुषश्रुत्यैव ब्रह्मपरत्वसिद्धौ **अन्तस्तद्धर्मोपदेशात्, आन्तर उपपत्तेः, अदृश्यत्वादिगुणको धर्मोक्तेः, ईक्षतिकर्मव्यपदेशात्सः, शब्दादेव प्रमित** इति तद्विचारसूत्रारम्भो व्यर्थस्स्यात्। कथञ्चित्तदारम्भसमर्थनेऽपि धर्मोपदेशादित्यादिना लिङ्गैः ब्रह्मपरत्वनिर्णयोऽसङ्गत एव स्यात्। प्रबलश्रुतिसम्भवे तामुपेक्ष्य लिङ्गोपन्यासस्याऽनुचितत्वात्। तस्माद्विशेषशक्तिसम्भावनया नारायणपरत्वकल्पनमसमञ्जसमेव। एतेन अन्तरादित्यविद्यायाम्पुरुषशब्देन हिरण्मयत्वविशेषणेनेति। मनोमयत्वभारूपत्वप्रत्यभिज्ञापितैः विद्युद्वर्णहिरण्मयपुरुषपदैरिति। अक्ष्यन्तः परमपुरुषः पुरुषशब्दवाच्यत्वादित्यादिना पुरुषशब्देन परमात्मनिर्णयस्सर्वोऽपि निरस्त एव।

ननु पुरुषशब्दस्य बर्हिराज्याधिकरणन्यायेन देवताविशेषे शक्तेरलाभेऽपि पुरुषशब्दे शरीरेऽस्मिन् शयनात्पुरुषो हरिरित्यादि पौराणिकव्यवहारान्नारायणी शक्तिरङ्गीक्रियत इति चेन्न। पोराणिकाद्व्यवहाराच्छ्रौतव्यवहारस्य गरीयस्त्वेन **पुरुषो वै रुद्र** इत्यादिश्रोतव्यवहारात्परशिव एव तस्य विशेषशक्तिसिद्धेः।

ननु आरुणकेतुके हिरण्यगर्भं प्रति **पूर्वमेवाऽहमिहासमि**ति नारायणोक्त्या तत्पुरुषस्य पुरुषत्वमिति निर्वचनेन च श्रौतव्यवहारेणाऽपि पुरुषपदस्य नारायणपरत्वं सिद्ध्यतीतिचेन्न। तस्माद्धिरण्यगर्भावधिक

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पूर्ववासित्वोपाधिना नारायणवाचकत्वेऽपि पूर्णत्वोपाधिना तस्य पदस्य शिवपरत्वसिद्धिः। तथाहि - यत्र कर्मभ्रेषो वा यज्ञभ्रेषो वा तत्र पुरुषं चिन्तयन् पुरुषसूक्तं ब्रूयात्। पूर्णत्वात्पुरुष इति विज्ञायत इति। वाधूवचनेन **पुरुषो वै रुद्र** इति श्रुतेरुपबृंहणरूपेण **पुरुषो नाम सम्पूर्णशिवस्सत्यादिलक्षणः। साम्बमूर्तिधरो नाऽन्यो रुद्रोऽजो विष्णुरेव हि।** इति पुराणवचनेन, **वृक्ष इव स्तब्धो दिवि तिष्ठत्येतस्तेनेदं पूर्णं पुरुषेण सर्वमि**तिश्रुत्या। **ईशो वृक्ष इव स्तब्धो य एको दिवि तिष्ठति। तेनेदमखिलम्पूर्णं पुरुषेण महात्मना।।** इति पुराणवचनोपबृंहितेन पूर्णत्वोपाधिना शिवपरत्वाऽवसायात्। **पुरुष एवेदं सर्वमि**तिवचनस्य सर्वो ह्येष रुद्र इति विवरणेन च पूर्णत्वोपाधिकपुरुषशब्दस्य शिवैकान्तिकत्वाऽवगमाच्च। अत एव **पुरुषस्य वेद्म सहस्राक्षस्य महादेवस्य धीमहि। पुरुषं कृष्णपिङ्गलम्। तमीशानं पुरुषं देवमीड्यमि**त्यादिना पुरुषशब्दविषयस्य श्रौतव्यवहारस्य शिव एव भूयसश्श्रूयमाणत्वादेवं नारायणेऽभावाच्च एतदेवाऽभिप्रेत्य **वेदान्तेषु यमाहुरेकपुरुषमि**ति वेदान्तवाक्यगतपुरुषशब्दवाच्यत्वं शिवैकान्तिकमित्यभियुक्तव्यवहाराच्च कारणवाक्येषु **परात्परं पुरुषं पुरिशयं पुरुषमीक्षत** इत्याद्युपास्यविषयवाक्येषु च श्रूयमाणं पुरुषपदं शिवासाधारणमिति सिद्धम्। ततश्च पुरुषश्रुतिरपि सूक्तस्य शिवपरत्वमेवाऽवसाययतीति विदितम्।

अथ यन्नारायणपूजायां विनियोगेनाऽस्य नारायणपरत्वमभिमन्यते, तदपि मृगतृष्णायमाणमेव। **यजेत्पुरुषसूक्तेन धनदं विश्वरूपिणमि**त्यादिना कुबेरपूजायां शिवाराधनेऽपि विनियुक्तत्वादेवञ्च पुरुषसूक्तं शिवपरमेवेति वज्रलेपः। एतेन यत्पुरुषसूक्तस्य हरिपरत्वाभिमानेन तत्प्रत्यभिज्ञया मन्त्रोपनिषदादीनां नारायणपरत्ववादस्सगर्भस्रावं निरस्तः।

अथ - यत्कारणप्रकरणश्रुतानां सद्ब्रह्मात्मादिसामान्यशब्दानां छागपशुन्यायेन नारायणपरत्वं प्रकल्प्यते परैः निस्साधारण्यनारायणपदविषये निश्चयं यान्त्यबाधे सद्ब्रह्माद्यास्समानप्रकरणपठिताशशङ्कितान्यार्थशब्दा इति तदपि नारायणपदस्य पुरस्ताच्चतुराननादिसाधारण्यप्रतिपादनेन निरस्तमेव।

अथवा उपनिषत्सु यत्र क्वचिन्नारायणनाम्नि श्रुतेऽपि कुत्राऽपि प्रसिद्धश्रुतौ तदीयरूपविशेषस्याऽप्रदर्शितत्वात्। **उमासहायम्परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम्।, ऋतं सत्यम्परं ब्रह्म पुरुषं कृष्णपिङ्गलम्। ऊर्ध्वरेतं विरूपाक्षमि**ति पारमेश्वराऽसाधारणरूपविशेषस्याऽभ्यासेन प्रदर्शितत्वाच्च औपनिषदस्य पुरुषस्योमासहायत्वादिस्वरूपलक्षणलक्षिततत्वावगमेनासाधारणस्याऽपि कारणप्रकरणगतस्य नारायणपदस्य प्राणाकाशादिपदजातस्येव **आकाशस्तल्लिङ्गा**दिति न्यायेन परमेश्वरपरत्वौचित्याच्च परेषां पाञ्चरात्रमन्तरेण श्रुतिषु नावकाश इति विदितम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तत्र तदात्मा शिव एव वाच्यः। यत्र यत्र पुरुषार्थविकाराज्ञत्वादिको धर्मस्तत्र शिवस्य परब्रह्मणश्शरीरं चिदचिद्वस्त्वेव बोध्यं द्रष्टव्यमिति निपुणं निरूप्यमिति सर्वं समञ्जसमेव।

।। इति सर्वव्याख्यानाधिकरणम् ।।

इति श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये

प्रथमाध्यायस्य चतुर्थः पादः

***

किञ्च परमेश्वरनामस्मरणचरणपरिचरणादिकं परित्यजतामपि भर्गपदाङ्कितसावित्रीजपस्य **रुद्रो वा एष यदग्निरिति** रुद्रमूर्तितया श्रुताग्न्युपासनस्याऽवार्यत्वात् - जाग्रद्दशायां शिवलिङ्गदर्शनादिकं यत्नतो विसृजतामपि सुषुप्तौ तदनुसन्धानस्याऽपरिहार्यत्वाच्चाऽनिष्टमवार्यमेव।

तथाहि - श्रुतयो हि सुषुप्तो जीवस्य हार्दब्रह्मसम्पत्तिं विदधति। हार्दस्य ब्रह्मणः अङ्गुष्ठमात्रश्रुत्या अङ्गुष्ठमात्रस्य शिवलिङ्गरूपत्वावसायाल्लिङ्गरूपत्वमाम्नयते। अत एव च - हंसोपनिषत् **लिङ्गे सुषुप्तिरिति** चेतनस्य हृदयकुहरवासिशिवलिङ्गनिष्ठायामुपलब्धायामेव सुषुप्तिं कण्ठरवेण विदधाति।

एतेन शिवद्वेषिभिर्हन्त सुषुप्तिरपि परित्यज्यैवेति कष्टमापतितम्। अन्यच्च **प्राणानां ग्रन्थिरसि रुद्र** इति श्रुतिः रुद्रद्वेषिभिः प्राणा अपि न परिग्राह्या इति निवेदयतीति हन्त तेषामनिष्टपरम्परा।

।। इति सर्वव्याख्यानाधिकरणम् ।।

***

इति श्री नागलिङ्गशिवाराध्यकृतिमुख्यायां लघुशिवार्कमणिदीपिकासख्यायां

श्रीशिवचिन्तामणिप्रभाख्यायां श्री नीलकण्ठभगवत्पादीयब्रह्म-

सूत्रभाष्यव्याख्यायां प्रथमाध्यायस्य

चतुर्थः पादः।।

***

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Sudhakar Collection, TN

Digitization by eGangotri-South Center

9 788195 845880

Prajasakti Press _ 94900 99509

CC-0. In Public Domain. Cuddalore Collection. TN.